प. पू. कलिकालसर्वज्ञ

आ देवश्री हेमचंद्राचार्य म. विरचित

सिद्धहेम लघुवृत्ति

अवचूरि परिष्कार

-:: अवचूरि - सम्पादक ::-

पूज्य मुनिराज श्री जितेन्द्रविजयजी म.

-:: प्रकाशक ::-

भवजीवन ग्रंथमाला (गा) ट्रस्ट - मुंबई

-:: उपप्रकाशन ::-

श्री रंजन विजय जैन पुस्तकालय (भालवाडा)

॥ श्री शंखेश्वर पार्श्वनाथाय नमः ॥

प. पू. कलिकालसर्वज्ञ
आ.देवश्री हेमचंद्राचार्य म. विरचित

सिद्धहेम लघुवृत्ति

अवचूरि परिष्कार
भाग - १

(अध्याय - २१/२ पाद - १०)

-:: अवचूरि - सम्पादक ::-
पूज्य मुनिराज श्री जितेन्द्रविजयजी म.

-:: ग्रंथ प्रेरक ::-
प्रवर्तक पूज्य मुनिराज श्री हरीशभद्रविजयजी म.

-:: अवचूरि ग्रंथ पुनः संशोधक ::-
युवाचार्य रत्नाकरसूरीश्वरजी के शिष्य पूज्य मुनिराज
श्री रत्नज्योत विजयजी म.

-:: प्रकाशक ::-
नवजीवन ग्रंथमाला (गा) ट्रस्ट - मुंबई

-:: उपप्रकाशन ::-
श्री रंजन विजय जैन पुस्तकालय (मालवाडा)

પ્રકાશક : નવજીવન ગ્રંથમાળા (ગા) ટ્રસ્ટ
ઉપ પ્રકાશક : શ્રી રંજન વિજય જૈન પુસ્તકાલય (માલવાડા)
મુખ્ય સમ્પાદક : પૂ. મુનિરાજ શ્રી જિનેન્દ્રવિજયજી મ.

-:: પ્રાપ્તિ સ્થાન ::-

૧) **શ્રી નવજીવન ગ્રંથમાળા (ગારીઆધાર) ટ્રસ્ટ**
ડી-૧૦૨, કુકરેજા કોમ્પલેક્ષ, એલ. બી. શાસ્ત્રી માર્ગ,
ભાંડુપ (વેસ્ટ), મુંબઈ-૪૦૦ ૦૭૮.

૨) **શ્રી જૈન તત્ત્વજ્ઞાન વિદ્યાપીઠ**
તત્ત્વજ્ઞાન ભવન, ૨૬૫, રવિવાર પેઠ,
ગોડીજી દેરાસર સામે, પૂના-૪૧૧૦૦૨.

૩) **શ્રી રંજન વિજયજી જૈન પુસ્તકાલય**
મુ.પો.-માલવાડા, જિ.-જેલોર (રાજ.) ૩૪૩૦૩૯.

૪) **શ્રી પારસ ગંગા જ્ઞાન મંદિર**
રાજેન્દ્રભાઈ-૯૪૨૬૫૩૯૦૭૬
બી-૧૦૨, કેદાર ટાવર, રાજસ્થાન હોસ્પીટલ સામે,
શાહીબાગ, અમદાવાદ-૪૦૦ ૦૦૪.

૫) **બાબુલાલ સાકલચંદ લાઘાણી**
૧૨૭, કીકાસ્ટ્રીટ, ગુલાલવાડી, બાફના મેન્સન, બીજે માળે,
મુંબઈ-૪૦૦ ૦૦૪. ફોન : ૯૮૬૯૭૫૫૯૮૮


પ્રત - ૧૦૦૦ સં. ૨૦૬૩ મૂલ્ય : ૧૦૦/-

પ્રિન્ટર્સ : **રમેશ પ્રિન્ટર્સ** - મુંબઈ-૪૦૦ ૦૦૪.
મોબાઈલ : ૯૮૨૦૧૪૯૨૮૮

"સમર્પણ"

પ.પૂ. વ્યાખ્યાન વાસ્પતિ આચાર્યદેવ
શ્રીમદ્ વિજય લબ્ધિસૂરીશ્વરજી મ.ના પ્રશિષ્ય
પ્રવિણ-મહિમા શિશુ

જ્ઞાનવૃદ્ધ, સંયમવૃદ્ધ, અનુભવવૃદ્ધ
સાહિત્યભૂષણ પરમ પૂજ્ય
મુનિરાજ શ્રી જિતેન્દ્રવિજયજી મ.



હે પરમોપકારી પૂજ્ય ગુરુદેવ !
જન્મશતાબ્દિના પવિત્ર અવસરે
આપનું જ સમ્પાદન કરેલ સાહિત્ય
વ્યાકરણનો અમૂલ્ય ખજાનો
આપના ચરણ કમળમાં
અર્પણ કરી ધન્ય બનું છું.

- હરીશભદ્રવિજય

શ્રી લબ્ધિ-પ્રવિણ-મહિમા શિશુ

જ્ઞાનવૃદ્ધ, સંયમવૃદ્ધ સાહિત્યભૂષણ

પૂ. મીનિરાજ શ્રી જિતેન્દ્રવિજયજી મહારાજ સાહેબની

-:: સંક્ષિપ્ત મીતાક્ષરી ::-

માત-પિતા	:	શ્રી પાર્વતિબેન જીવનચંદ નવલચંદ ઝવેરી
ગામ-જ્ઞાતિ	:	સુરત, વીશા ઓશવાળ
સંસારી નામ	:	જેચંદભાઈ
ધર્મપત્ની	:	શ્રીમતી જશવંતિબેન (સાધ્વીજી શ્રી જયપ્રભાશ્રીજી મ.)
ભાઈઓ	:	પ્રવિણભાઈ, ચંદ્રકાન્તભાઈ
બેનો	:	કોકીલાબેન, મંજુલાબેન
કાકા મહારાજ	:	પૂ.મનિશ્રી જિનભદ્રવિજયજી મ.
પિતરાઈ ભાઈ	:	મોતિચંદ હીરાચંદ ઝવેરી
મામાના છોકરા	:	પૂ. મુનિશ્રી શોભનવિજયજી મ.
જન્મ	:	સં. ૧૯૬૪ મહા વદ ૧૩, સુરત
દીક્ષા	:	સં. ૧૯૯૦ પાટણ
કાળધર્મ	:	સં. ૨૦૩૬ જેઠ સુદ ૭ ભાંડુપ-મુંબઈ
સમ્પાદીત	:	સ્વ. લીખીત ગ્રંથો, સંસ્કૃત, જ્યોતિષ ઉપરાંત ગુજરાતી-હિન્દી-મરાઠી-અંગ્રેજી આદિ સાત ભાષામાં નાના-મોટા ૭૦ પુસ્તકો
વિહાર ભૂમિ	:	પશ્ચિમ થી પૂર્વ કલકત્તા સુધી અને ઉત્તર હસ્તીનાપુર થી દક્ષિણમાં કન્યાકુમારી સુધી
શિષ્ય	:	પૂ. મુનિશ્રી બળભદ્રવિજયજી મ. પૂ. મુનિશ્રી હરીશભદ્રવિજયજી મ.

પ્રકાશકીય

જૈન સમાજના કરકમલમાં **શ્રી સિદ્ધહેમ લઘુવૃત્તિ અવચૂરિ પરિષ્કાર** સહિતનો **અઢી અધ્યાયનો આ ગ્રંથ** ધરતાં આજે અમોને ઘણો જ આનંદ થાય છે. આ સંસ્થા તરફથી સંસ્કૃત પ્રકાશનનો આ અલભ્ય મહાન ગ્રંથ પ્રગટ કરવા માટે પૂજ્ય મુનિરાજ શ્રી **જિતેન્દ્રવિજયજી મહારાજને** વિનંતિ કરતાં, તેઓશ્રીએ તેનો સ્વીકાર કરી આ ગ્રંથના પ્રકાશનનો અપૂર્વ લાભ આપી અમને કૃતાર્થ કર્યા છે. તે બદલ પૂજ્ય મહારાજશ્રીની આ સંસ્થા સદાને માટે ઋણી છે અને રહેશે. આ ગ્રંથના પ્રકાશન નિમિત્તે સંસ્થા તરફથી સમાજને થોડી વિગતો જણાવવી આવશ્યક છે, તે અહીં જણાવીએ તો તે અસ્થાને નહીં જ ગણાય.

જો કે, આ ગ્રંથમાળા પાસે કોઈ પણ જાતનું સ્થાયી ફંડ નથી. તેનાજે પુસ્તક પ્રકાશનો બહાર પડે, તેના વેચાણ દ્વારા પ્રેસ અને સંસ્થાના ખરચ જતાં વધારો થાય, તેમાંથી બીજા પ્રકાશનો પ્રગટ કરવામાં આવે છે. આવો વિસ્તૃત ગ્રંથ છપાવવામાં આર્થિક નાણાંની ખૂબ જરૂરત રહે એ સ્વાભાવિક છે. તદુપરાંત આવો મહામૂલો ગ્રંથ છપાવવા માટે પ્રેસ પણ સારી જોઇએ. એક ઉદાર સદ્ગૃહસ્થ તરફથી તે પ્રકાશન છપાવવા માટે રૂા. ૧૦૦૧) ની ઉદાર મદદ મળવાથી આ કાર્ય શરૂ કર્યું. તેમજ શ્રી **મહોદય પ્રિન્ટીંગ** પ્રેસના માલિક શ્રીમાન્ શેઠ **ગુલાબચંદ લલ્લુભાઇએ** "પોતાનો જ આ ગ્રંથ છપાઇ રહ્યો છે." તેમ માની સારું કાળજીભર્યું કામ કરાવી આપ્યું છે તે બદલ તેમનો પણ આ સ્થળે આભાર માનીએ છીએ. આ લઘુવૃત્તિના પ્રકાશન માટે એક પ્રશ્ન એ ઉભો થયો, કે લઘુવૃત્તિના સાત અધ્યાય સંસ્કૃતના અને પ્રાકૃતનો અષ્ટમ અધ્યાય કેટલા વર્ષે છપાઇ રહે અને જનતાના કરકમલમાં તે ક્યારે ધરી શકીએ ? એટલે ઘણો વિચાર

કરીને ૭ અધ્યાયના રૂા. ૧૭–૮–૦ ઠરાવીને પ્રથમ પાદના પ્રકાશન સમયે સંસ્થાએ જાહેર કર્યું હતું, કે જ્યારે જ્યારે છૂટાં પાદો પ્રગટ થતાં જશે, ત્યારે ત્યારે પ્રથમથી રૂા. ૧૭॥ ભરી ગ્રાહક થનારને તુરત જ તે મોકલાવવામાં આવશે. આ સંસ્થા એવી શક્તિસંપન્ન ન હતી, કે જે પોતે જ આવા મોટા ગ્રંથોનું પ્રકાશન કરી શકે. પરંતુ પૂજ્ય મુનિરાજ શ્રી **જિતેન્દ્રવિજયજી મહારાજ**ની અમીદૃષ્ટિથી અને પરમકૃપાથી જ આ પ્રકાશન અમે પ્રગટ કરી શકયા છીએ. જો કે આ મહાન્ ગ્રંથનું પ્રકાશન કોઈ જૂની, જામેલી અને નામી સંસ્થા તરફથી થવું જોઇએ એવી સૂચનાઓ પૂ૦ મહારાજશ્રી પાસે અનેક વ્યક્તિઓ તરફથી આવી હતી. **ગારીઆધાર**ની **શ્રી લબ્ધિસૂરીશ્વર જૈન ગ્રંથમાળા** માટે અમે મહારાજશ્રીને જણાવ્યું હતું કે–શું સારી સંસ્થા હોય તો જ પુસ્તકની કિંમત અંકાતી હશે ? વાસ્તવિક એવું છે, કે સારાં સારાં પ્રકાશનોથી જ સંસ્થાની કિંમત અંકાય છે. તેથી આ ઊગતી સંસ્થા તરફથી જ તે પ્રગટ કરવાની અમારી વિનંતિનો સ્વીકાર થયો.

આજ સુધી આ લઘુવૃત્તિના અમે દશ પાદો પ્રગટ કર્યા છે. બાકીના સાડાચાર અધ્યાયો અને અષ્ટમ અધ્યાયના સંપૂર્ણ મેટરની પ્રેસ કોપીઓ તો તૈયાર છે. જેમ જેમ મોંઘવારી દિનપ્રતિદિન વધતી ગઈ, તેમ તેમ આ પ્રકાશન માટે અનેક આર્થિક અગવડતાઓ આવવાથી થોડો વખત છપાઇકામ બંધ પણ રહ્યું, છતાં મહા-પ્રભાવિક શ્રી શંખેશ્વર પાર્શ્વનાથ પ્રભુજીના સુપ્રતાપે આ કાર્ય આગળ ધપ્યું છે અને ધપશે જ.

આ અવચૂરિ ઘણાં પૂજ્ય સાધુ–સાધ્વીજી મહારાજોના પઠન-પાઠનમાં અત્યંત ઉપયોગમાં આવે છે. તે અભ્યાસી વર્ગને આ ગ્રંથ ધીમે ધીમે પ્રકાશન થતો હોવાથી અસંતોષ ઉપજાવે છે, કારણ કે નવું પાદ ન છપાય ત્યાં સુધી તેમને બેસી રહેવું પડે છે. ક્યારે પ્રગટ થશે ? તેવા અનેક સાધુ–સાધ્વી મહારાજોના વારંવાર પત્રો આવ્યા કરે છે. આ બધા સત્ય હોવા છતાં અમે

તેને માટે તદ્દન નિરુપાય અને લાચાર છીએ. તે કારણથી ઉતાવળા થતા તેઓશ્રીઓને અમારે વારંવાર વિનવવું પડે છે, કે " થોડા થોભો, ધીરજ રાખો "–બીજી મુશ્કેલીઓ સાથે આજની અસહ્ય મોંઘવારી પણ તેને માટે એક મહાન્ કારણ છે. અમારા શક્ય ઉપાયોથી તે માટે બનતી ઝડપ કરીશું. સંસ્થાને કચવાતા મને ન છૂટકે જાહેર કરવું પડયું છે, કે **રૂા. ૧૭॥ થી ગ્રાહક તરીકે નામ નોંધવાનું હવેથી બંધ કર્યું છે અને હવેથી અઢી અધ્યાયના રૂા. ૧૫) રાખવામાં આવ્યા છે.** જો કે જેમણે અગાઉથી ગ્રાહક તરીકે રૂા. ૧૭॥) ભર્યા છે, તેમને તો સાતે અધ્યાયના છૂટા પાદો છપાશે ત્યારે મોકલવામાં આવશે જ, તેની અમારા ગ્રાહકોએ નોંધ લેવી.

આ ગ્રંથના જુદા જુદા પાદો ક્રમસર છપાય કે તુરત તે પાદ જ્ઞાનલિપ્સુ વર્ગને તુરત મળે તે હેતુથી છૂટા છૂટા પાદની પણ થોડી નકલો બહાર પાડવામાં આવે છે. તદુપરાંત (ચાર પાદની ભેગી) એક એક અધ્યાયની પણ ચોપડીઓ બહાર પાડીને સંસ્થાએ બનતી સર્વે સગવડો અભ્યાસીઓ માટે કરી આપી છે. આ ગ્રંથ અતીવ ઉપયોગી બન્યો છે અને બનશે, તથા ભવિષ્યની પ્રજા માટે પણ એક મહામૂલા વારસારૂપ બનશે જ તેવી ખાત્રી અનેક વિદ્વાનો તરફથી મળી છે. અનેક પ્રશંસાપૂર્ણ અભિપ્રાયો પણ ઘણા અનુભવીઓના મળ્યા છે. અભ્યાસી વર્ગ તો નવા પાદ માટે એટલો બધો આતુરતાપૂર્વક રાહ જોતો બન્યો છે, કે જેની સીમા નથી. **આટલો ઉપકાર આ સંસ્કરણથી થાય છે, એ જાણીને અમારા હર્ષનો પાર રહેતો નથી.** આ ગ્રંથનો આવો સુંદર લાભ ઉઠાવાય છે એ સાંભળી, જાણી અને જોઇને અમારું હૈયું નાચે છે. શાસનદેવ પ્રત્યે પ્રાર્થીએ છીએ કે–અમને આર્થિક અનુકૂળતા જલ્દીથી મળી રહે અને આ મહાન્ ગ્રંથનું પ્રકાશનકાર્ય શીઘ્ર પૂર્ણ થાય એ જ મનોકામના.

પ્રકાશક—

પુસ્તક પ્રકાશનમાં
શ્રુતભક્તિ કરનાર



-:: લાભાર્થી ::-



યુવાચાર્ય
પ.પૂજય રત્નાકરસૂરીશ્વરજી મ.સા.ની
પ્રેરણાથી
શ્રી શાંતિનગર શ્વે.મૂ. જૈન સંઘ
આશ્રમ રોડ (અમદા)
જ્ઞાનનિધિ

એવં

શ્રી આર. એસ. પુરમ્ જૈન સંઘ-કોઈમ્બતુરના
શ્રાવક-શ્રાવિકા
પૂ.આ.ભ. શ્રી અરિહંત-સિદ્ધસૂરીશ્વરજી મ.ના
આજ્ઞાવર્તિની
પૂ. સાધ્વીજી શ્રી લાવણ્યશ્રીજી મ.ના
પ્રશિષ્યા સાધ્વીજી શ્રી તત્ત્વયશાશ્રીજી મ.
તથા પૂ. સા. શ્રી પરાગયશાશ્રીજી મ.ના ઉપદેશથી.

ઈતિહાસ પ્રકાશનનો.....

ઈતિહાસે નોંધ લીધી કે-આજનો પવિત્ર દિવસ એક શ્રુતોપાસક મુનિશ્રીની જન્મ શતાબ્દિનો દિવસ છે.

મુનિશ્રીએ જીવનમાં પ્રથમ વીસી પૂર્ણ કર્યા પછી સંસારના ચાર ફેરા તો ફર્યા. પણ તેમાંથી સંસારવૃદ્ધિના બદલે આત્મદર્શનની પ્રેરણા મળી. પાંચ-છ વર્ષ પછી એ પ્રેરણાના કારણે નાણ સમક્ષ ચાર ફેરા ફર્યા તો તેમાં આત્મશુદ્ધિનો, સંયમી જીવનનો દ્રઢ પંથ મળ્યો. મહિમાવંત (પૂ.મુ. શ્રી મહિમાવિજયજી) ગુરુનું શરણું લીધુ તો સદ્‌ગુણનો વિકાસ કરવા પ્રવિણ થવા (પૂ.મુ. શ્રી પ્રવિણવિજયજીના) આશિષ મળ્યા. પવિત્રતાના પંથે પ્રયાણ કર્યું તો આત્મલબ્ધિની (પૂ.આ. શ્રી લબ્ધિસૂરીશ્વરજી મ.) પ્રાપ્તિ થઈ.

વિદ્યાર્થી અવસ્થાની જેમ અધ્યયન કાલિન કાળ જ્યાં દશ વર્ષનો લગભગ પૂર્ણ થવા આવ્યો ત્યાંજ 'જુનું તે સોનું' એ ન્યાયે જૂના જ્ઞાન ભંડારોની જૂના હસ્તલીખીત ગ્રંથોની પડીલહેણ કરવાની ભાવના જાગી. પરિણામે ૩૩ કરોડ શ્લોકના રચયિતા વિવિધ વિષયો ઉપર લખનારા પ.પૂ.આ. શ્રીમદ્ હેમચંદ્રચાર્ય મ. રચિત 'સિદ્ધહેમ લઘુવૃત્તિ' ઉપર મનન-ચિંતન કરતાં વ્યાકરણના ગ્રંથને ભાવિની પેઢીને સરળતાથી સમજાય તે માટે દ્રષ્ટિ જાગી. આત્મપ્રેરણા દ્વારા એ જ્ઞાનપરબને 'અવચૂરિ'ના સહારે વધુ લોકોપયોગી કરવા ટૂકા શબ્દ સંકલનનું મૂલ્યાકંન કરવા પ્રાજ્ઞ પુરુષો-પંડિતોનો સાથ-સહકાર લીધો.

આ ગ્રંથ વ્યાકરણનો હોવાથી 'અ' આદિ સ્વરના ૧૬ અક્ષરોને તથા 'ક' આદિ વર્ણના ૩૬ વર્ણાક્ષરો (વ્યંજન)નો પરસ્પર સંબંધ કરતા ૫૭૬ અક્ષરોનું નિર્માણ થયું. એ અક્ષરો જ્યારે શબ્દ બને ત્યારે તેનું ઘોષ-અઘોષ, સંધી-લોપ, ૩ લિંગ, ૩ વચન, ૩ કાળ, ૨૧ વિભક્તિ આદિ સહિત વિશાળ સ્વરૂપ બને છે. આ કારણે જીવન જ્ઞાનોપાસનામાં પ્રસન્ન બનતું જાય છે. અક્ષરોથી બનેલા શબ્દ જ્યારે દ્વિ અર્થી બને છે તો કેવળજ્ઞાનીએ તેનામાં રહેલા અનંત અર્થને

પ્રરૂપે છે. તે સમજાયું. ટૂકમાં 'શ્રુત' એ સાગર છે, દીપક છે, અમૃતમય ભોજન છે, દુઃખીને સુખ આપનાર વૈદ્ય-ડૉક્ટર છે. યાવત્ ઉધમી પુરુષને કેવળજ્ઞાન ને મોક્ષ પણ આપે છે.

કહેવાનું તાત્પર્ય એજ કે સંયમી જીવનના ૧૦/૧૨ વર્ષ પછી જે સમ્પાદન વૃત્તિ જાગી તેથી સં. ૨૦૦૧માં પોતાના દાદા-પિતાના નામને સંકલિત કરી નવજીવન ગ્રંથમાળાના ઉપક્રમે ક્રમશઃ દશ પાદ પ્રકાશિત કરી વિદ્યાપિપાસુ ચરણોમાં અર્પણ કરી ધન્યતાનો અનુભવ શરૂ કર્યો.

એક બાજુ સંસ્કૃત-જ્યોતિષ સાહિત્ય સેવાનો વિચાર વેગવંત બન્યો તો બીજી તરફ પાઠશાળાઓના શિક્ષણ ક્ષેત્રે વિકાસ માટે પાઠ્યપુસ્તક, અર્થ સહિતનું જ્ઞાન અને પરીક્ષા-ઈનામ માટે શ્રી જૈન તત્ત્વજ્ઞાન વિદ્યાપીઠ-પૂના નામે સં. ૨૦૦૪માં સંસ્થાની સ્થાપના કરી. પાઠશાળાઓને પ્રાણવાન બનાવવા પ્રાથમિકજ્ઞાનના ફેલાવા માટે શ્રી ગણેશ કર્યાં. સં. ૨૦૩૧માં બેંગલોર સંઘે 'સાહિત્યભૂષણ' પદવીથી વિભૂષિત કર્યા. જીવનમાં સાત ભાષાના ૭૦/૭૨ પુસ્તકોનું લેખન, સંપાદન, પ્રકાશન પૂજ્યશ્રીના હાથે થયું.

કહેવાનું તાત્પર્ય એજ કે-શિક્ષણ ક્ષેત્રે પગલા માંડવાથી સંસ્કૃત ગ્રંથના પ્રકાશનનો એક તરફ અલ્પવિરામ સંયોગો અનુસાર થયો જ્યારે વિવિધ ભાષી પાઠ્યપુસ્તકોને પ્રકાશિત કરવાનુ કામ વિકસવા લાગ્યું. છેક આ ક્રમ સં. ૨૦૩૬ સુધી પ્રગતિ કરતો રહ્યો.

અંતે સં. ૨૦૩૬ના જેઠ સુદ ૭ના આ જ્ઞાનદીપ પ્રગટાવનાર સંયમવૃદ્ધ-જ્ઞાનવૃદ્ધ આત્મા સદાને માટે વિલીન થઈ ગયો.

કુદરતનું કાંઈક નવું જ કરવા-કહેવા માગતી હશે એ દ્રષ્ટિએ લગભગ ૩૫ વર્ષ સુધી એ મહાગ્રંથના હસ્તલીખીત પાના અદ્રશ્ય રહ્યા. અચાનક એ અનમોલ વારસો પૂ. ગુરુદેવશ્રીના લઘુબંધુ પ્રવિણચંદ્ર જીવનચંદ્ર ઝવેરીના દ્વારા પૂ. મુનિરાજશ્રીના વિનયી શિષ્ય પ્રવર્તક પૂજ્ય મુનિરાજ શ્રી હરીશભદ્રવિજયજી મ.સા.ને પ્રાપ્ત થયો.

આવો દીર્ઘકાળ પરીશ્રમ દ્વારા તૈયાર કરાયેલા ગ્રંથને જન્મ શતાબ્દિ અવસરે પૂ. મુનિરાજશ્રીની સ્મૃતિરૂપે પ્રકાશિત કરવાનું સ્વપ્ન સેવ્યું.

ગ્રંથના વાંચન-મનન-શુદ્ધિકરણ-પ્રકાશન કરવા માટે (૧) પ.પૂ.આ. શ્રીમદ્ વિજય સૂર્યોદયસૂરીશ્વરજી મ. (૨) પૂ. સાધ્વીશ્રી મયુરકળાશ્રીજી મ.ને વિનંતિ કરી હતી. ફરી પૂજયશ્રીની 'જન્મશતાબ્દિ' નિમિત્તે ભાવનાએ વેગ આપી ગ્રંથ સંશોધન સમ્પાદનના રસિયા પૂ. મુનિરાજ શ્રી વિશ્રુત વિજયજી મ. આ કાર્ય માટે મહેનત પંડિતવર્યને સાથે બેસી કરી તે ભૂલી ન શકાય તેવી છે. ત્યાર પછી આ ગ્રંથ માટે પ.પૂ.આ. શ્રીમદ્ **વિજય મુનિચંદ્ર-સૂરીશ્વરજી**ને વિનંતિ કરતાં ઝડપી પ્રકાશન માટેની કાંઈક આશા બંધાઈ. અને તેના ફળ રૂપે સાહિત્યક્ષેત્રમાં ગમે તેવા ક્લિષ્ટ ગ્રંથોને વાંચવા-મનન-ચિંતન કરવા ટેવાયેલા પીઢ સેવાભાવી પૂ. મુનિરાજ **શ્રી રત્નજ્યોતવિજયજી મ.** આ કાર્ય એકક્ષણનો પણ વિલંબ કર્યા વગર કરી આપવા સંમતિ આપી એ ક્ષણ અમારા માટે ધન્ય છે.

છેલ્લા ૮ મહિનાથી અનેક પ્રવૃત્તિમાંથી નિવૃત્તિ શોધી પૂ. મુનિશ્રીએ આ ગ્રંથને જે રીતે પોતાનું કાર્ય સમજી વાંચી-પ્રુફ તપાસી-પ્રકાશિત કરવાની વિધિ સુધી પહોંચાડ્યું એ માટે સંસ્થા-સમિતિ તેઓની ઋણી છે. બીજો ભાગ પણ સવેળાએ ઝડપથી પ્રકાશિત કરવાના અમારા મનોરથ છે.

આ ગ્રંથના પ્રકાશનમાં જે નામી-અનામી સંઘ વ્યક્તિઓએ સાથ સહકાર આપ્યો છે, તે સર્વેના અમે આભારી છીએ. ભવિષ્યમાં આજ રીતે એ શ્રુતોપાસક શ્રુતજ્ઞાનની ભક્તિ કરશે તેવી આશા છે.

આ ગ્રંથ અભ્યાસી સુજ્ઞ જિજ્ઞાસુઓની જિજ્ઞાસા પૂર્ણ કરવા જરૂર ઉપયોગી ઠરશે તેવી અમર આશા સાથે પૂજ્ય વંદનીય ગુરુવર્યશ્રીને શુભ ભાવે અર્પણ કરીએ છીએ.

નવજીવન ગ્રંથમાળા (ગા.) ટ્રસ્ટ
જન્મશતાબ્દિ આયોજક સમિતિ

સંપાદકીય....

અનાદિકાળથી પ્રવચનનો પ્રવાહ એકધારો ચાલી રહ્યો છે એનું પાન કરી આત્મા પરમાત્મા બને છે. આજ સુધી અનંત આત્માએ આ સિદ્ધિ હાંસલ કરી છે. આપણા જેવા અબુધ જીવોને ઉગારવામાં અતિ ઉપયોગી આ પ્રવાહ આવા કપરા કાળમાં પણ આપણને મળ્યો છે. એનો સ્વાદ લેવો એ અંતરનાં ખજાનાને ખોલવા માટેનો મોંઘેરો સુઅવસર છે. પરંતુ આ પ્રવચન નદી ભાષાનાં આધારે ખલખલ વહેતી રહે છે. માટે ભાષાને ટકાવી રાખવી અત્યંત આવશ્યક છે. ગુજરાતી-હિંદી-અંગ્રેજી વગેરે લોક ભોગ્ય ભાષામાં કાળ-ક્ષેત્રનો પ્રભાવ પડ્યા વગર રહેતો નથી. તેથી પ્રથમથી પૂર્વની રચના પંડિત ભોગ્ય ભાષામાં કરવામાં આવી.

આ ભાષામાં ક્યાંય ગરબડ ઉભી ન થાય એટલે ૧૦૦૦ વર્ષ પહેલા કે પછી પણ એકધારો પ્રવાહ અકબંધ રહે તે માટે પંડિતોએ આ ભાષાને નિયમોમાં ગોઠવી નાંખી છે. બસ આ સંસ્કૃત ભાષાના નિયમોને જ આચાર્ય **હેમચંદ્રસૂરિ**એ શબ્દાનુશાસનમ્ નામ આપ્યુ છે. જેને ગુજરાતીમાં વ્યાકરણ કહીએ છીએ.

ખંતપૂર્વક અભ્યાસ કરનારા મુનિશ્રી **જિતેન્દ્રવિજયજી**એ ૬૦ વર્ષ પહેલાં અભ્યાસની સાથો સાથ "અભ્યાસુને ઉપયોગી બને" એ વાત લક્ષમાં રાખી અનેક અવચૂરિઓ એકઠી કરી અને તેનું સંકલન કરેલ. પૂજ્યશ્રીની જન્મશતાબ્દિ ઉપર તેઓશ્રીનાં જ્ઞાનયજ્ઞને યાદમાં લઈ પુનઃ આ ૧૦ પાદનો પ્રથમ ભાગ નવજીવન ગ્રંથમાલા (ગારીઆધાર) દ્વારા પ્રકાશિત કરવામાં આવી રહ્યો છે.

આચાર્યદેવશ્રી **મુનિચંદ્રસૂરીશ્વરજી મ.સા.**ની પ્રેરણાથી મને આ કાર્ય કરવામાં ઉત્સાહ જાગ્યો. જો કે પ્રથમ ભાગ પૂર્વે પ્રકાશિત હતો છતાં તેની અપ્રાપ્યતા દેખીને સંસ્થાએ પુનઃ મુદ્રણનો નિર્ણય લીધો. મારી દષ્ટિએ અનેક અશુદ્ધિઓ તથા અક્ષરની જુની પ્રિન્ટનાં કારણે અસ્પષ્ટતા હતી. તેથી આ સંપૂર્ણ પુસ્તકનું ફરી સંશોધન કરી

પોઝેટીવ નીકાળી પ્રિન્ટ કરવાનું થયું. તેમાં ઉંડાણ ભરેલી ગહન વાતોને સમજવા બૃહન્ન્યાસ, પાણિનીય વ્યાકરણ આદિ અનેક ગ્રંથોની સહાય લેવી પડી. અને યથાતથ્ય ગ્રંથ અભ્યાસુ માટે રજુ થાય તે માટે મહેનત કરી છે. છતાં છદ્મસ્થતાનાં કારણે હજી અનેક ત્રુટિઓ રહેવી સંભવ છે. તેને વાચક વર્ગ સુધારીને વાંચે. અને પૂજ્ય હેમચંદ્રાચાર્યનાં સત્ય આશય સુધી પહોંચવા કોશીશ કરે.

હું માનુ છું કે લઘુવૃત્તિ ઉપર આઠે અધ્યાયની આટલી વિસ્તૃત અવચૂરિ પહેલીવાર પ્રકાશિત થઈ રહી છે. એ ઘણાં આનંદનો વિષયછે. વ્યાકરણ અભ્યાસુ આનો અભ્યાસ કરી સત્યઆશય દ્વારા શુદ્ધજ્ઞાન પછી સમ્યગ્જ્ઞાન મેળવી શાશ્વત જ્ઞાનને મેળવે. મને પણ વીસ વર્ષ પછી **સિદ્ધહેમ શબ્દાનુશાસનને** પુનઃ સ્મૃતિપથમાં લાવવાનો લાહવો આ સંપાદન-સંશોધનનાં નિમિત્તે મળ્યો. તે બદલ પ્રવર્તક મુનિશ્રી **હરીશભદ્રવિજયજી મ.સા.**નો ખુબજ આભાર માનું છું. અભ્યાસુને ખાસ ભલામણ છે કે આ અવચૂરિ અનેક સ્થાને ત્રુટિત છે. અને સંપૂર્ણ લઘુવૃત્તિની કરવામાં નથી આવી માટે લઘુવૃત્તિને ધ્યાનમાં લઈ ગહન વિષયને સમજવા આનો વિશેષ ઉપયોગ કરવાનો છે.. આ અવચૂરિમાં આવી અનેક વાતો છે. જેનો બૃહન્ન્યાસકારે કે લઘુન્યાસકારે પણ સ્પર્શ નથી કર્યો. ચાલો પૂજ્ય મુનિરાજશ્રીનાં જ્ઞાનયજ્ઞનાં યત્નને સફળ બનાવીએ.

(૧) ૧ થી ૧૦ પાદ (૨) ૧૧ થી ૨૦ પાદ (૩) ૨૧ થી ૨૮ પાદ અને પછી પ્રાકૃતનાં વ્યાકરણનો ચોથો ભાગ એમ ચાર ભાગમાં આ કાર્ય પૂર્ણતાને પામશે.

હાલનાં તબક્કે પહેલો ભાગ પુનઃ પ્રકાશિત કરવામાં આવી રહ્યો છે. અને બીજા, ત્રીજા, ચોથા ભાગનું કાર્ય પ્રેસમાં છે. શકય એટલો જલ્દી પ્રકાશન કરવાનો યત્ન કરીશું.

મુનિ રત્નજ્યોતવિજય

વિનમ્ર આવેદન.

પરમ કલ્યાણકારી શ્રી જૈનશાસન જયવંતુ છે. એ શાસનની આરાધના કરનારા ભવ્યાત્માઓ જે જે થઈ ગયા તે પરમ શાસનના પ્રખર પ્રભાવકો તરીકે સુવિખ્યાત આચાર્ય ભગવંતોમાં કલિકાલસર્વજ્ઞ ભગવાન આચાર્ય-મહારાજ શ્રીમાન્ હેમચંદ્રસૂરીશ્વરજી મહારાજનું નામ પ્રાચીન ઇતિહાસમાં મોખરે આવે છે, તે સૌને સુવિદિત છે. શ્રી મહાવીર ભગવંતના શાસનમાં રહેલા અત્યારના આરાધક આત્માઓ માટે તરવાનો આધાર શ્રી જિનમંદિર અને શ્રી જિનાગમ છે. શ્રી જિનમંદિરની ઓળખાણ કરાવનાર શ્રી જિનાગમ છે. શ્રી જિનાગમનો વારસો તે કારણથી આપણા જેવા પામરો માટે સાચું માર્ગદર્શન આપનાર છે. આ આગમોનું રહસ્યમય તત્ત્વજ્ઞાન મેળવવા વ્યાકરણ જાણવાની અનિવાર્ય આવશ્યકતા રહે છે. આ જિનાગમો પ્રાકૃત અને સંસ્કૃત ભાષામાં છે. જો કે ગુરુગમ મેળવ્યા વિના આ આગમોના રહસ્યોનું તાત્પર્ય જ્ઞાન મેળવી શકાતું નથી, છતાં ભાષા ઉપરનો કાબૂ મેળવવા જેણે વ્યાકરણદ્વારા શબ્દરચનાનું વ્યુત્પત્તિજ્ઞાન મેળવ્યું હોય, તેને જ ગુરુગમ પણ કામ આવી શકે છે. વ્યાકરણજ્ઞાન મેળવ્યા બાદ કાવ્ય, કોશ, અલંકાર, ન્યાય, જ્યોતિષ, આગમો વિગેરેનો પણ બોધ ગુરુગમના જિજ્ઞાસુને હોવો જરુરી બને છે. એટલે આપણે કહી શકીએ કે અનેક શાસ્ત્રોનું અવગાહન જેણે કર્યું હોય, તેવા આત્માઓ જ કેવળજ્ઞાનીઓની ગૂઢ સમરયાઓને ઉકેલી શકે. આવા અનેક કારણોથી આપણે માનવું પડશે, કે પૂ. આ. મ. શ્રીહેમચંદ્રસૂરીશ્વરજી મહારાજના શ્રી સિદ્ધહેમચંદ્રશબ્દાનુશાસન નામના વ્યાકરણની રચના આગમોના મહાલયમાં પ્રવેશ કરવા માટે પ્રથમ પગથિયા સમાન છે.

આ મહાવ્યાકરણના મૂળ સૂત્રો પર એક મોટી ટીકા અત્યારે જે ઉપલબ્ધ છે, તે "અઢાર હજારી"ના નામથી પ્રખ્યાત છે. તે આકર ગ્રંથ સૌને ભણવો સુલભ ન બને, તેથી તેની નાની ટીકા પણ ભવિષ્યની પ્રજાના ઉપકારાર્થે કર્તાએ પોતેજ રચેલી છે, તે "છ હજારી અથવા લઘુવૃત્તિ" ના શુભ નામથી પ્રસિદ્ધ છે. અઢાર હજારી વિસ્તૃત ટીકા અમદાવાદથી પ્રતાકારે ઘણાં વર્ષો અગાઉ પ્રગટ થએલ છે. તે છાપેલી પ્રતોના કાગળો અત્યારે

બહુ જીર્ણ અવસ્થામાં થઈ ગયા હોવાથી તેના પુનરુદ્ધારની અથવા પુનર્મુદ્રણની આવશ્યકતા આજે સૌને જણાય છે, પરંતુ એ મહાન કાર્ય મારા જેવા અદના અલ્પશક્તિવાળા પામરનું ન હોવાથી ધુરાધર શક્તિશાળી આચાર્ય ભગવંતોને માત્ર નમ્રપણે સૂચન જ અત્રે કરું છું. જો કે આ લઘુવૃત્તિ જેવા ગ્રંથનું કાર્ય પણ મારી શક્તિ બહારનું તો છે જ, તે સૌ જાણે છે.

મારે કબૂલ કરવું જોઇશે, કે આવા ગહન વિષયવાળા જોખમદારીભર્યા મહાન ગ્રંથનું સંશોધન કાર્ય શક્તિ વિનાના એક મામુલી સાધુને માટે સુયોગ્ય નથી, પરંતુ શ્રી સંઘ સમક્ષ નીચેની સત્ય હકીકત જ્યારે જણાશે ત્યારે મારા આ પ્રયાસમાં રહેલી અનેકાનેક ક્ષતિઓને ક્ષમ્ય ગણી ઉપેક્ષા કરશે એમ મારું ચોક્કસ માનવું છે. આ લઘુવૃત્તિનું પ્રકાશન કાર્ય અગાઉ ભાવનગર ને અમદાવાદથી થએલ છે. ભાવનગરના પ્રકાશનનું કદ મોટું હતું. તેમાં ટાઇપો પણ મોટા ને દૂરથી વંચાય તેવા હતા. ત્યાર બાદ અમદાવાદથી ૧૯૬૧ માં થોડા ટિપ્પનપૂર્વક તે જ પુસ્તક થોડા નાના ટાઇપમાં પ્રગટ થયું. તેનીજ બીજી આવૃત્તિ રૂા ૧૬)ની કિંમતથી હમણાં ફરી પ્રગટ થઇ છે.

આ અવચૂરિથી જે બોધ થઇ શકશે, તેનાં કરતાં કેવળ સૂત્ર અને ટીકાથી બેઆની પણ બોધ અભ્યાસીને થનાર નથી એમ મારો નમ્ર મત છે. તેના પરથી ભણેલ હોય તેની પરીક્ષા લેવાય તો ખબર પડે કે આટલા વર્ષોની મહેનત પછી પણ આવો અપૂરો જ બોધ કેમ થયો ? બેઉ પ્રકાશનોના આલંબનથી ઘણાંઓએ તેનો અભ્યાસ કર્યો. અમદાવાદના પુસ્તક પરથી તો આ સેવકે પણ અભ્યાસ કર્યો છે. પરંતુ તે અભ્યાસ કરતી વેળા મને એ જણાયું, કે આ સૂત્રો અને આ ટીકાથી જોઇએ તેવા સરળ સ્વરૂપમાં મને સંગીન બોધ ન થયો. એમ ને એમ અભ્યાસ પૂરો તો કર્યો, છતાં ધાતુઓ, સમાસો, પરિભાષાઓ, પૂર્વાપરસમ્બંધો અને ન્યાયો જોઇએ તેવા સ્પષ્ટ રીતિએ સમજાયા નહીં, એ હંમેશાંની એક ખટકતી બીના હતી. મને એમ વિચાર આવતો કે બીજા બધા આ વ્યાકરણ કેવી રીતે ભણતા કે સમજી શકતા હશે ? એટલે કોઈ સારી ઢબના પ્રકાશનની જરૂર તો હતી જ. તપાસ કરતાં જણાયું, કે આ લઘુવૃત્તિ સમજવી કઠીન પડે છે, એમ સાંભળીને તેના બદલે કૌમુદી, લઘુકૌમુદી, સિદ્ધાંતચંદ્રિકા, સારસ્વત આદિ જૈનેતર વ્યાકરણો ભણવા ઘણા જિજ્ઞાસુઓ વધારે પ્રેરાય છે.

આવા સંયોગો હોવાથી અનેક વખત વિચાર ઘોળાયા કરતો હતો, કે આપણા આ મહાવ્યાકરણને ખિલવવા માટે કેમ ખાસ પ્રયાસો થયા નથી ? એ શોધમાં ચિત્ત વ્યાકુલ હતું, એટલામાં અમદાવાદમાં વિ. સં. ૨૦૦૦ ની સાલમાં આ લઘુવૃત્તિ ઉપર ટિપ્પનવાળી અવચૂરિની તૂટક પ્રતો માત્ર દોઢેક અધ્યાય જેટલી જોવામાં આવી. લીમડી, અમદાવાદ, જેસલમેર, વડોદરા, તથા પાટણના જ્ઞાનાલયોમાંથી પણ તપાસ કરતાં તેથી અધિક સાંપડવાની આશા રહી નહીં. એટલેથી નિરાશ થાઉં તેમ હું ન હતો. એમ કરતાં કરતાં અનેક હસ્તલિખિત જ્ઞાનભંડારોની પ્રતો નિહાળતાં નિહાળતાં સમાજના સદ્‌ભાગ્યે આ વ્યાકરણની અવચૂરિની સંપૂર્ણ પણ છૂટી છૂટી પ્રતો મળી ગઇ. સાતમા અધ્યાયના થોડા જ અક્ષરવચના સૂત્રોની તેમાં હવે ખામી રહી છે.

આ રીતે મુંબઈ, ખંભાત અને સુરતના જ્ઞાનભંડારોમાંથી તે મેળવીને તે બધાયની પ્રેસ કોપીઓ કરાવી. તેવા ને તેવા જ સ્વરૂપમાં તે અવચૂરિ છપાવીને પ્રગટ કરવાની પ્રથમ તો મનોભાવના થઇ. પછી તેમાં લહિયાઓના લેખનદોષથી રહેલી અશુદ્ધિઓને સુધારવાનું કામ શરૂ કર્યું અને છપાવવા યોગ્ય મેટર તૈયાર કરવા માંડયું. પછીથી એમ જણાયું કે આવી અને આટલી અવચૂરિથી જરૂરી માંગણીઓ પૂરી પડે તેમ નથી, એટલે કે અભ્યાસી વર્ગને તેથી સંતોષ થાય તેમ નથી. તે કારણથી તેની શૈલિમાં સંપૂર્ણ સુધારો કરી સૂત્રોના સમાસો, પરિભાષાઓ અને ન્યાયોની પૂરતી સમજણ, તથા સૂત્રોમાં કે વૃત્તિના દૃષ્ટાંતોમાં આવતા ધાતુઓનો નિર્દેશ તેમાં સ્થળે સ્થળે ઉમેરારૂપે વધારી, કૌમુદીના પ્રકાશનોની જેમ અદ્યતન શૈલિથી થોડું મેટર તૈયાર કર્યું. તે મેટર તેના અનેક જ્ઞાતાઓને બતાવતાં તેઓને ખૂબ જ પસંદ આવ્યું, તેથી તે છપાવવાનો દૃઢ નિર્ણય કર્યો. એમ મૂળ અવચૂરિ કરતાં સુધારો પણ વિશેષ કરાયો હોવાથી તેનું નામ "અવચૂરિપરિષ્કાર" આપવામાં આવ્યું છે.

મકાનનો પાયો જેટલો મજબૂત હોય, તેટલું મકાન પણ સદ્ધર કહેવાય, તેમ **આ વ્યાકરણ જેઓ સંગીન ભણશે, તેઓ આગમોની ચાવીઓ ગુરુગમથી જરૂર સરળતાથી ઉઘાડી શકશે.** એમ ગૌરવપૂર્વક ખાત્રી જે આપીએ, તો તે અતિશયોક્તિ કહેવાય નહીં. એનો અંશે કાળો મને મળશે એ આશાથી આ પ્રકાશનથી ઘણો જ સંતોષ થાય છે. આ તકે તેના અભ્યાસીઓને એક સલાહ એ આપવાની રહે છે, કે વ્યાકરણ ભણતી વખતે ભણનારને આ વિષય શુષ્ક જેવો લાગે છે, તેવી તેઓ ફરિયાદ

કરે છે, પણ તેઓએ ખાસ ધ્યાન રાખવું જોઇએ કે નિશાળમાં ભણેલા ગણિત કે ડ્રોઈંગના વિષયો જ્યારે ધંધાના ઉપયોગમાં લેવાય છે ત્યારે તેનું ફળ મળે છે. તેમ અહીં પણ સમજવું, કે આ મહાન વ્યાકરણ ભણીને જ્યારે ભગવાનના સ્વમુખે ભાખેલાં ને પ્રરૂપેલાં આગમોને વાંચશો, તથા **તેનું મનન કરી તેનાં રહસ્યોનો જ્યારે આસ્વાદ લેશો,** ત્યારે ખરી મજા આવશે. વ્યાકરણના **શ્રમનું ફળ ત્યારે મળેલું જણાશે.** આથી સમજાશે, કે આ પઠનના ઉદ્દેશમાં કેવળ ભાષાજ્ઞાન મેળવી વિદ્વાન બનવાની જ હદ હોતી નથી, પરંતુ **વિશ્વવાત્સલ્યની પરમોચ્ચ ભાવનાને મૂર્ત-સ્વરૂપ આપનાર, સામાજિક કલ્યાણની ચેતના ઉદ્બોધનાર, જીવોને શાસનરસિક બનાવવા તથા જિનકથિત તત્ત્વોને પ્રચારવા સર્વશુદ્ધ જ્ઞાનયોગના એ પ્રાણરૂપ છે. તેથી અભ્યાસીના મન, સંસ્કાર અને આચાર આદર્શરૂપ બને છે.** કહેવું પડશે કે ઉદ્યમી ભણનારાને સંસ્કૃત ભાષા અને અર્ધમાગધી ભાષાના પ્રદેશમાં, તેના ગહન વાતાવરણમાં, અને તેના ઊંડાણ તાત્પર્યાર્થમાં પહોંચાડવાને આ વ્યાકરણ શક્તિમાન છે.

આ રીતે પ્રાચીન કાલમાં **સાહિત્યસેવાને જે મહત્વ આપવામાં** આવતું હતું, તેવી રીતે અત્યારે પણ આ સાહિત્યાવલોકન કરી, તેમાં જ જિંદગીને સોંપી દઇ જો **જ્ઞાનયોગની ઉત્કૃષ્ટ સેવોપાસના સાધવામાં આવે,** તો પણ જૈન સમાજનો ઘણો ઉત્કર્ષ આજે થઇ શકે તેમ છે. **વિદ્યો-પાસના એ તો સાધુ-સાધ્વીજી મહારાજોનો જીવનમંત્ર હોય છે.** તે સર્વેને આ તકે એક નમ્ર વિનંતિ કરવાની કે મારા આ નમ્ર પ્રયાસમાં જે કાંઇ સ્ખલના કે ક્ષતિ રહેતી હોય તે મને જરૂર જણાવે, ને તેમાં રહેલી ભૂલો સુધારી આપે. જો કે આ પ્રથમ ભાગમાં અઢી અધ્યાયનું સંસ્કરણ જેવું થયું છે, તેવું સાડાચાર અધ્યાયનું સંસ્કૃતનું કાર્ય હજી બાકી છે. આટલા પ્રકાશનમાં સાત વર્ષો વીતી ગયા તો બીજા ૪॥ અધ્યાય તો કયારે પૂર્ણ થશે તે તો જ્ઞાનીઓ જ જાણી શકે. કુદરત વેગ આપશે તેમ થશે. પ્રાકૃત ભાષાવાળા અષ્ટમ અધ્યાયનું પણ આજ ઢબથી સંપાદન કરી પ્રકાશન તૈયાર કરવા ભાવના તો છે, પરંતુ તે સફળ થાય ત્યારે ખરી.

થોડી ઉપયોગી બાબતો બીજી એ છે, કે અવચૂરિની મને મળેલી પ્રતોમાં ઘણે ઠેકાણે બનાવનારનો નામનિર્દેશ પણ મળેલ નથી. જે એક બે પ્રતોમાં જોવામાં આવેલ છે, તે નામો બરાબર સંગત પણ લાગતા નથી. તેનું

કારણ એ બન્યું છે, કે આ પ્રતો અમને એક એક પાદની મળી છે. કોઇ કયાંથી મળી ને કોઇ કયાંથી. એટલે એક પ્રતમાં વિ. સં. ૧૩૬૫ અને બીજી પ્રતમાં ૧૪૪૫ એવી રીતે મળે છે. તે અવચૂરિની પ્રતોમાં એકને એક સૂત્ર–સાધના વારંવાર આવતી હતી, તે કાઢીને તેજ અવચૂરિનો આધાર લઇને વ્યાકરણગત ન્યાયોનો અને પરિભાષાઓનો ન્યાયસંગ્રહ આદિ ગ્રંથોના આધારે સમાવેશ કરી આ અવચૂરિને સમૃદ્ધ બનાવવામાં આવી છે. આ અવચૂરિની સંકલના માટે બૃહદ્વૃત્તિ, ન્યાયસંગ્રહ, હૈમધાતુપાઠ, લઘુન્યાસ તથા દ્વયાશ્રય કાવ્ય વિગેરે ગ્રંથોનો આધાર, તથા **વાક્યપદીય**, પાણિનીયાદિ જૈનેતર વ્યાકરણ ગ્રંથોનો પણ આધાર મેળવીને ઘણોજ શ્રમ લઇને આ ગ્રંથ તૈયાર કર્યો છે. જો કે પાઠાન્તરોના સૂચન તથા બીજા અનેક આવશ્યક પરિશિષ્ટો, સાત અધ્યાય પૂર્ણ થયા બાદ આપવાનો નિર્ણય કર્યો છે, એટલે આ પ્રકાશનમાં તે બધું આપેલ નથી. શુદ્ધિપત્રક પણ ખાસ ભૂલો ન હોવાથી આ ગ્રંથમાં તે આપવાની ઉપેક્ષા સેવવામાં આવી છે. છતાં જેઓને નજરે પડે તો તે મને જરૂર જણાવે કે જેથી સંપૂર્ણ ગ્રંથ તૈયાર થાય ત્યારે તેના શુદ્ધિપત્રકમાં તે સૂચિત શુદ્ધિઓ મૂકી શકાય.

આ ગ્રંથના કર્તા મહાપુરુષની થોડી વિગતો અત્રે જણાવવી જરૂરી છે. એ મહાપુરુષનો પુણ્યજન્મ **વિ. સં. ૧૧૪૫ ની કાર્તિકી પૂનમે** ધંધુકામાં થયો હતો. માતાપિતાએ પાંચ વર્ષની બાલ્યવયે તેમને **સં. ૧૧૫૦ ના માહ સુદ ૧૪ ના દિને દીક્ષા અપાવી.** ધીમે ધીમે અભ્યાસ કરી થોડા વર્ષોમાં તેઓ સર્વશાસ્ત્રપારંગત થઇ ગયા. તેથી **સં. ૧૧૬૬ ની વૈશાખ સુદ ત્રીજે** ગુરુમહારાજની પ્રસાદીરુપે તેઓને શાસન પ્રભાવનામાં સહાયક **આચાર્યપદ** મળ્યું. ત્યારથી તેમનું નામ **આચાર્ય શ્રી હેમચન્દ્રસૂરીશ્વરજી** તરીકે પ્રખ્યાત થયું. આ મહાવ્યાકરણ બનાવ્યા બાદ મહારાજા સિદ્ધરાજની રાજસભામાં એક મહાન ઉત્સવ ઉજવવામાં આવ્યો. તેમાં રાજાને પણ સારો રસ હતો, એટલે આ ગ્રંથનું નામ શ્રી **સિદ્ધ(સિદ્ધરાજ) હેમચંદ્રશબ્દાનુશાસન** રખાયું. ત્યારબાદ **મહારાજા કુમારપાલના** રાજ્યારોહણ બાદ ઘણી ઘણી ધર્મ પ્રભાવનાઓ એ સૂરિમહારાજે કરી. એમ કહી શકાય કે તે વખતે જેવું એકછત્રું જૈન રાજાનું રાજ્ય ધર્મ પાલનમાં ઉદ્યમશીલ અને જૈન શાસનમય બન્યું, તેવું અત્યાર સુધી હજી બીજું કોઈ થયું નથી. એટલું પણ એક અપેક્ષાએ કહી શકાય, કે રાજ-સત્તાના બળથી પણ જેટલી પ્રભુપ્રણીત **જીવદયા** મહારાજા **કુમારપાલે**

પળાવી, તેવી અહિંસા ભગવાન શ્રી મહાવીરદેવના સમયમાં ક્ષાયિક સમકિતી મહારાજા શ્રેણિક પણ પળાવી શકયા ન હતા.

આ મહાન **ધર્મપ્રચારમાં** મુખ્ય ભાગ આ ગ્રંથના કર્તા આચાર્ય ભગવાનશ્રી હેમચંદ્રસૂરીશ્વરજી મહારાજનો હતો, તેથી તેઓને "કલિકાલ-સર્વજ્ઞનું" મહાન બિરુદ અર્પણ કરવામાં આવ્યું હતું. તેઓની સાહિત્ય-સેવા ખરેખર અજબ હતી. વાગ્દેવી સરસ્વતીજી તેઓને પ્રસન્ન થયા હતા, પછી બાકી શું રહે? તેઓની સાહિત્યોપાસનાએ આજે આપણને કેટલો વારસો આપ્યો છે? તેઓ સર્વ વિષયોમાં નિષ્ણાત હતા. તેમની કૃતિઓ ભલભલા વિદ્વાનોને પણ દિંગમૂઢ બનાવે છે. તેમનો જ્ઞાન વારસો વાંચીને પચાવવા પણ આપણે અત્યારે તૈયાર નથી.

તેઓએ **સાડાત્રણકોડ નવ્યશ્લોકોની રચના કરી,** એ સાંભળીએ ત્યારે અચંબો જ થાય છે. તેઓની આજીવન શાસનસેવા ને સાહિત્યો-પાસનાએ આજે આપણને કેટલો વારસો આપ્યો છે? આજીવન શાસન-સેવા અને સાહિત્યોપાસનામાં ડૂબેલા તેઓશ્રીનું ચરિત્ર વિસ્મય ઉપજાવે તેમાં નવાઇ નથી. **૭૮ વર્ષના દીક્ષાકાલમાં** કે ચારિત્રપર્યાયમાં તેઓ **ભણ્યા કયારે? તે યુગના સમાજ** ઉપર ઉપકાર **કર્યો કયારે? જૂના ગ્રંથોનું પર્યાલોચન** કેટલું **અને કયારે કર્યું? આગમોનું મંથન કયારે કર્યું?** તથા નવા ૩॥ **કોડ** શ્લોકો રચ્યા કયારે? સાડાત્રણ કોડનો સંખ્યા વિચારતાં લાગે છે, કે એક દિવસના કે એક કલાકના કેટલા શ્લોકો બનાવ્યા હશે? લહિયાઓએ તે ઉતાર્યા કયારે હશે? **થોડી જિંદગીમાં ઘણું સાધવાના તેમના જીવનમંત્રને સાચેસાચ તેઓશ્રીએ અમલમાં મૂકી બતાવ્યો અને જીવન ધન્ય બનાવ્યું.**

શાસ્ત્ર સિદ્ધાંતોમાં જણાવ્યા પ્રમાણે મહાન જોખમદારી ભરેલી **આચાર્ય-પદવીની ફરજોને સંપૂર્ણપણે બજાવીને શ્રી જિનેશ્વર ભગવંત-ના શાસનની અલૌકિક પ્રભાવના દ્વારા તેઓશ્રીએ શાસનની અપૂર્વ શોભા વધારી હતી. અપ્રમત્ત દશાના સાચા ઉપાસક એ** સૂરિભગવંતના **આદર્શ ચરિત્રને** સામે રાખીએ તો આપણને પણ **નવચેતન** મળે છે. એ મહાપુરુષે સાહિત્યના અનેક વિષયોને સ્પર્શતા અનેક ગ્રંથોની રચના કરી છે. તેવા સૂરિપુંગવને કોડો ધન્યવાદ!

આ **લઘુવૃત્તિ** ભણનારને માટે ગ્રંથકાર મહર્ષિએ સંસ્કૃત અને પ્રાકૃતના

પ્રત્યેક સૂત્રના પ્રયોગોને સમજાવતા બે **દ્વયાશ્રય** કાવ્યો રચ્યા છે. તેમાંથી બે-બે અર્થો નીકળે છે. એક અર્થમાં સિદ્ધરાજ અને કુમારપાલનાં ચરિત્રો અને બીજા અર્થમાં સિદ્ધહેમલઘુવૃત્તિના પ્રત્યેક સૂત્રની પ્રયોગપૂર્વક સિદ્ધિ સુગમતાથી મળી રહે છે. એટલે આ લઘુવૃત્તિ ભણનાર અને ભણાવનાર, આ અવચૂરિને ભણતી ભણાવતી વખતે, જો **આ દ્વયાશ્રય કાવ્યને** સામે રાખી તે તે સૂત્રના પ્રયોગોને પણ જો સાથે જ શિખે કે શિખવાડે, તો મારું એમ માનવું છે, કે બહુ જ સંગીન બોધ થશે. તે જ કારણથી દ્વયાશ્રય કાવ્યને વ્યાકરણ સાથે જ ભણવા ભણાવવાની મારી નમ્ર સલાહ છે. જો ભણનાર બુદ્ધિશાળી હોય, અને આ અવચૂરિ જ્યારે ભણે તે વખતે સાથે દ્વયાશ્રય કાવ્ય પણ શિખે, ને એક સ્થાનમાં જો રહેવાનું હોય તો ભણનારને ત્રણ વર્ષમાં ઊંડાણ અવગાહન કરવાની શક્તિવાળો બોધ થાય જ. આ ભણ્યા પછી ગ્રંથકારનું જ રચેલું શ્રી ત્રિષષ્ટીશલાકાપુરુષ ચરિત્ર વાંચવામાં આવે, તો તે જ વ્યાકરણના ઘણા પ્રયોગોનો જ તેમાં ઉપયોગ કરવામાં આવ્યો છે, તેથી બોધ પરિપક્વ બને છે. તેઓશ્રીની એ મહાકૃતિમાં અલંકારોનો તો પાર જ નથી. એમની કલ્પનાઓ વિદ્વાનોને વિચાર ગગનમાં ઉડાડી અનહદ આનંદ આપે છે. **આવા મહાવિદ્વાન્ વિધામૂર્તિની કિંમત વિદ્વાનો જ આંકી શકે છે. અનેક આચાર્યોથી સાધ્ય થનારું મહાન્ કાર્ય તેઓશ્રીએ એકલાએ કેવું કરી બતાવ્યું છે, તે જોઇએ ત્યારે તેઓશ્રીની સીમાલંઘી પ્રતિભા, પવિત્ર ચારિત્રસમૃદ્ધિ, પ્રભાવનાશક્તિ અને ભલભલાને થંભાવી દે તેવી વિશાળ સેવાભાવના વિગેરેનો ખ્યાલ આવી શકે છે.**

આ વ્યાકરણના તેઓશ્રીએ સંસ્કૃતના સાત અધ્યાયો બનાવ્યા છે. દરેક અધ્યાયના ચાર-ચાર પાદો બનાવી ૨૮ પાદોમાં જુદા જુદા સંજ્ઞા, સંધિ, સમાસ વગેરે વિભાગો અને પ્રકરણો સંકલિત કર્યા છે. છેલ્લા આઠમા અધ્યાયના ચાર પાદોમાં સમગ્ર પ્રાકૃત વ્યાકરણ આપ્યું છે. તેમાં અનેક અપભ્રંશ ભાષાઓના અને દેશ્યભાષાઓના પ્રયોગોનો પણ સમાવેશ થઈ જાય છે. કુલ આઠે અધ્યાયના ૪૬૮૫ સૂત્રો છે, અને ઉણાદિના ૧૦૦૬ સૂત્રો ઉમેરતાં સમગ્ર મળીને ૫૬૯૧ થાય છે. એટલે સંસ્કૃત ૭ અધ્યાયના ૩૫૬૬ અને પ્રાકૃત અષ્ટમાધ્યાયના ૧૧૧૯ સૂત્રોથી આ મહાવ્યાકરણ બનેલું છે. ઇતિહાસના સંશોધનકારો માને છે, કે આ મહાન ગ્રંથની રચના કરતાં ૧૧૯૩ થી ૧૧૯૭ સુધી તેઓશ્રીને લગભગ પાંચ વર્ષ લાગ્યા હતા.

કોઇનું એમ માનવું છે, કે ૧૧૯૩ માં શરૂ કરી ૧૧૯૫માં એ કાર્ય ત્રણ વર્ષે સમાપ્ત કર્યું. આ વ્યાકરણની સવા લાખ શ્લોક પ્રમાણની મોટી સ્વોપજ્ઞ ટીકા તો અત્યારે ઉપલબ્ધ પણ થતી નથી.

અન્ય વ્યાકરણોની રચનાઓ સાથે તુલના કરતાં પણ જણાય છે, કે આ સૂરિપુંગવની કૃતિ બહુ જ ચડીઆતી છે. એક સૂત્ર રચવું એટલે નાનું-સૂનું કામ નથી. એક સૂત્રની રચના કર્યા બાદ જો તેમાં સુધારો કરવાથી અડધી માત્રા ઓછી થતી હોય, તો આવા સૂત્રકારોને એક મહોત્સવ સમાન આનંદ થાય છે. એટલે જે ભાવ લાવવો હોય તેના ઓછામાં ઓછા ને **ટૂંકામાં ટૂંકા શબ્દપ્રયોગને સૂત્ર કહેવાય** છે. પૂ. આચાર્ય ભગવંતની આ વ્યાકરણની સૂત્રરચના, **ટૂંકા શબ્દોમાં વિશાળ ભાવોનો સંગ્રહ કરવાવાળી હોવાથી બહુ જ પ્રશંસા પામેલ** છે. તેમની બીજી રચનાઓમાં પણ કોઇ નકામો શબ્દ જ આવતો નથી, એ તેઓની કૃતિઓની વિશેષતા છે.

પૂ. આચાર્યભગવાનના વિ. સં. ૧૨૨૯ માં સ્વર્ગગમન બાદ તેઓશ્રીનો વારસો **અત્યારસુધી** ઘણો જળવાઈ રહ્યો છે. આજે લગભગ તેમની પછી આઠસો વર્ષ થયા છતાં, **એ સૂરિપુંગવનો યશવાદ, કીર્તિ-નાદ, અને તેઓશ્રીની ગૌરવગાથા અત્યારે પણ જીવંત છે.** એ યશોદેહ ખરેખર **અમર થએલ છે.**

ધન્ય છે ! વંદન છે ! એવા જ્યોતિર્ધર પ્રભાવક મહાપુરુષોને !

પ્રાંતે આ પ્રકાશનના સંસ્કરણ કાર્યમાં જે કોઇ મતિમાંદ્યના કારણે અથવા મુદ્રણદોષથી સ્ખલના થઇ ગઇ હોય, કે કોઇ ક્ષતિ રહી ગઇ હોય, અથવા શ્રી જિનેશ્વર ભગવંતની આજ્ઞા વિરુદ્ધ તેમાં કોઇ જાણતા અજાણતાં આવી ગયું હોય, અથવા તો કર્તા મહર્ષિના આશયથી વિરુદ્ધ આ અવચૂરિ-ની રચનામાં કોઇપણ જાણતાં અજાણતાં છપાવાયું હોય, તો તે બદલ ચતુર્વિધ શ્રી સંઘ સમક્ષ વિનમ્રરૂપે ક્ષમા યાચના માંગી વિરમું છું.

તા. ૧-૫-૧૯૫૨.
શ્રી જૈન શ્વેતાંબર મંદિર
ઈતવારી—
નાગપુર (મધ્યપ્રદેશ)

શ્રી સંઘનો ચરણરજ સેવક.
મુનિ જિતેન્દ્રવિજય.

श्रीसिद्धहेमलघुवृत्तिसूत्रानुक्रमः ।

सूत्रम् ।	सूत्राङ्कः ।	सूत्रम् ।	सूत्राङ्कः ।
अइउवर्ण	१।२।४१।	अतोऽह्नस्य	२।३।७३।
अं अः अनु	१।१।९।	अदसोऽकञा	३।२।३३।
अं अः ४	१।१।१६।	अदसो दः	२।१।४३।
अकखाद्यषा	२।३।८०।	अदीर्घात्	१।३।३२।
अकमेरुक	२।२।९३।	अदुरुपसर्गा	२।३।७७।
अकालेऽभ्य	३।२।१४६।	अदृश्याधिके	३।२।१४५।
अकेन क्रीडा	३।१।८१।	अदेतः स्यमो	१।४।४४।
अक्लीबेऽध्व	३।१।१३९।	अदो मुमी	१।२।३५।
अगिलाद्धि	३।२।११५।	अद्यञ्ञनात्	३।२।१८।
अग्रहानुपदेशे	३।१।५।	अद्व्यञ्ञने	२।१।३५।
अघोषे प्र-टः	१।३।५०।	अधणूतस्वा	१।१।३२।
अङप्रतिस्त	२।३।४१।	अधश्चतुर्थात्	२।१।७९।
अङ्गान्निरसने	३।४।३८।	अधातुविभक्ति	१।१।२७।
अचः	१।४।६९।	अधातूदृदितः	२।४।२।
अच्च् प्रा	२।१।१०४।	अधिकेन	२।२।१११।
अजादेः	३।४।१६।	अधेः शीङस्थास	२।२।२०।
अज्ञाने ज्ञः	२।२।८०।	अनकू	२।१।३६।
अञ्चः	२।४।३।	अनजिरादि	३।२।७८।
अञ्जनादीनां	३।२।७७।	अनञः क्त्वो यप्	३।२।१५४।
अञ्वर्गस्या	१।३।३३।	अनञो मूलात्	२।४।५८।
अञ्वर्गात्	१।२।४०।	अनडुहः सौ	१।४।७२।
अणञेयेक	२।४।२०।	अनतो लुप्	१।४।५९।
अतः कृकमि	२।३।५।	अनतो लुप्	३।२।६।
अतः स्यमोऽम्	१।४।५७।	अनन्तः पञ्च	१।१।३८।
अत आः स्यादौ	१।४।१।	अनवर्णा नामी	१।१।६।
अतिरतिक्रमे च	३।१।४५।	अनाङ्माङो	१।३।२८।
अतोऽति रोरुः	१।३।२०।	अनाच्छादजा	२।४।४७।

सूत्रम् ।	सूत्राङ्कः ।	सूत्रम् ।	सूत्राङ्कः ।
अनाम् स्वरे	१।४।६४।	अलुपि वा	२।३।१९।
अनार्षे वृद्धे	२।४।७८।	अल्पे	३।२।१३६।
अनियोगे	१।२।१६।	अवः स्वपः	२।३।५७।
अनोर्देशे उप्	३।२।११०।	अवर्णमोभगो	१।३।२२।
अनो वा	२।४।११।	अवर्णस्या	१।४।१५।
अनोऽस्य	२।१।१०८।	अवर्णस्येव	१।२।६।
अन्यत्यदा	३।२।१५२।	अवर्णादश्नो	२।१।११५।
अन्यो घोषवान्	१।१।१४।	अवाच्चाश्रयो	२।३।४२।
अन् स्वरे	३।२।१२९।	अविशेषणे	२।२।१२२।
अपः	१।४।८८।	अव्ययम्	३।१।२१।
अपञ्चमान्त	१।१।११।	अव्ययं प्रवृ-	३।१।४८।
अपायेऽवधिर	२।२।२९।	अव्ययस्य	३।२।७।
अपील्वादेर्वहे	३।२।८९।	अशिशोः	२।४।८।
अपोऽद्धे	२।१।४।	अश्ववडवपू	३।१।१३१।
अपो ययोनि	३।२।२८।	अषष्ठीतृती	३।२।११९।
अप्रत्यादाव	२।२।१०१।	अष्ट औज्	१।४।५३।
अप्रयोगीत्	१।१।३७।	असंभस्त्राजिनै	२।४।५७।
अप्राणिपश्वादेः	३।१।१३६।	असत्काण्ड	२।४।५६।
अभिनिष्ठानः	२।३।२४।	असत्त्वाराद्	२।२।१२०।
अभ्यम् भ्यसः	२।१।१८।	असत्त्वे ङसेः	३।२।१०।
अभ्वादेरत्व	१।४।९०।	असदिवापू	२।१।२५।
अमव्ययीभा	३।२।२।	असहनञ्वि	२।४।३८।
अमा त्वा मा	२।१।२४।	असुको वाकि	२।१।४४।
अमूर्धमस्त	३।२।२२।	असोऽसिवू	२।३।४८।
अमौ मः	२।१।१६।	अस्पष्टाव	१।३।२५।
अयमियं पुं	२।१।३८।	अस्य ङयां	२।४।८६।
अरोः सुपि रः	१।३।५७।	अस्याऽयत्त	२।४।१११।
अर्ङौ च	१।४।३९।	अस्वस्थगुणैः	३।१।८७।
अर्धपूर्वपदः	१।१।४२।	अह्नः	२।१।७४।
अर्हम्	१।१।१।	आ अमूशसोऽता	१।४।७५।

सूत्रम् ।	सूत्राङ्कः ।	सूत्रम् ।	सूत्राङ्कः ।
आख्यातर्यु	२।२।७३।	इन्हन्	१।४।८७।
आङ्लप्ये	३।१।४६।	इर्वृद्धिमत्य	३।२।४३।
आङवघौ	२।२।७०।	इवर्णादे	१।२।२१।
आत्	२।४।१८।	ईः षोमवरुणे	३।२।४२।
आत्मनः पूरणे	३।२।१४।	ईर्ङौ वा	२।१।१०९।
आद्यद्वितीय	१।१।१३।	ईदूदेद्	१।२।३४।
आ द्वन्द्वे	२।२।३९।	ईयकारके	३।२।१२१।
आद्वेरः	२।१।४१।	ईषद्गुण	३।१।६४।
आपत्यस्य	२।४।९१।	इ ३ वा	१।२।३३।
आपो ङितां	१।४।१७।	उः पदान्ते	२।१।११८।
आम आकम्	२।१।२०।	उतोऽप्राणिन	२।४।७३।
आमन्त्र्ये	२।२।३२।	उत्कृष्टे	२।२।३९।
आमो नाम् वा	१।४।३१।	उत्पातेन	२।२।५९।
आरादर्थैः	२।२।७८।	उदः स्थःस्त	१।३।४४।
आ रायो व्यञ्जने	२।१।५।	उदकस्योदः	३।२।१०४।
आर्यक्षत्रिया	२।४।६६।	उदच उदीच्	२।१।१०३।
आशीराशा	३।२।१२०।	उदवानब्धौ	२।१।९७।
आसन्नादूरा	३।१।३०।	उपमानं	३।१।१०१।
आहिताग्न्या	३।१।१५३।	उपमानस	२।४।७५।
इच्चापुंसो	२।४।१०७।	उपमेयं व्या	३।१।१०२।
इच्यस्वरे	३।२।७२।	उपसर्गस्या	१।२।१९।
इञ इतः	२।१।७१।	उपसर्गस्यायौ	२।३।१००।
इणः	२।१।५१।	उपसर्गात्	२।३।३९।
इतोऽक्त्यर्थात्	२।४।३२।	उपसर्गादिव	२।२।१७।
इदंकिमीत्कीः	३।२।१५३।	उपाजेऽन्वाजे	३।१।१२।
इदमः	२।१।३४।	उपान्वध्या	२।२।२१।
इदमदसो	१।४।३।	उपेनाधिकिनि	२।२।१०५।
इदुतोऽस्त्रे	१।४।२१।	उषसोषसः	३।२।४६।
इनूङीस्वरे	१।४।७९।	उष्ट्रमुखादयः	३।१।२३।
इन्द्रे	१।२।३०।	ऊङः	३।२।६७।

सूत्रम् ।	सूत्राङ्कः ।	सूत्रम् ।	सूत्राङ्कः ।
ऊँ चोञ्	१।२।३९।	ऌदन्ताः	१।१।७।
ऊटा	१।२।१३।	ए ऐ ओ औ	१।१।८।
ऊढायाम्	२।४।५१।	एः	१।४।७७।
ऊध्नः	२।४।७।	एकद्वित्रि	१।१।५।
ऊनार्थपूर्वाद्यैः	३।१।६७।	एकादश षोडश	३।२।९१।
ऊर्याद्यनु	३।१।२।	एकार्थं चानेकं च	३।१।२२।
ऋलति	१।२।२।	एतदश्च	१।३।४६।
ऋचश्शसि	३।२।९७।	एत्यकः	२।३।२६।
ऋचि पादः	२।४।१७।	एदापः	१।४।४२।
ऋणाद्धेतोः	१।२।७६।	एदैतोऽयाय्	१।२।२३।
ऋणेप्रदशा	१।२।७।	एदोतः पदा	१।२।२७।
ऋतां विद्यायो	३।२।३७।	एदोद्धयां	१।४।३५।
ऋते तृती	१।२।८।	एद्बहुस्भोसि	१।४।४।
ऋते तृतीया च	२।२।११४।	एयेऽघ्नायी	३।२।५२।
ऋतो ङुर्	१।४।३७।	एष्यदृणेनः	२।२।९४।
ऋतो रः	२।१।२।	ऐकार्थ्यं	३।२।८।
ऋतो रस्त	१।२।२६।	ऐदौत्सन्ध्य	१।२।१२।
ऋतो वातौ च	१।२।४।	ओजोऽः स	३।२।१२।
ऋत्यारुप	१।२।९।	ओत औः	१।४।७४।
ऋत्विज्दिश्	२।१।६९।	ओदन्तः	१।२।३७।
ऋदुदितः	१।४।७०।	ओदौतोऽवाव्	१।२।२४।
ऋदुदित्तर	३।२।६३।	ओमाङि	१।२।१८।
ऋदुशनस्पु	१।४।८४।	औता	१।४।२०।
ऋद्ध नदी	३।२।५।	औदन्ताः स्वराः	१।१।४।
ऋफिडादीनां	२।३।१०४।	औरीः	१।४।५६।
ऋर ऌलं	२।३।९१।	कडारादयः	३।१।१५८।
ऋषौ विश्व	३।२।७९।	कर्णेमनस्तृतौ	३।१।६।
ऋस्तयोः	१।२।५।	कतरकतमौ	३।१।१०९।
लृत ऋलृ	१।२।३।	कत्रिः	३।२।१३३।
ऌत्याल् वा	१।२।११।	कपेर्गोत्रे	२।३।२९।

सूत्रम् ।	सूत्राङ्कः ।	सूत्रम् ।	सूत्राङ्कः ।
कबरमणि	२।४।४२।	कृगो नवा	३।१।१०।
करणं च	२।२।१९।	कृताद्यैः	२।२।४७।
कर्तरि	२।२।८६।	कृति ।३।१।७७।	
कर्तुर्व्याप्यं	२।२।३।	कृत्यतुल्या	३।१।११४।
कर्मजा तृचा च	३।१।८३।	कृत्येऽयस्य	३।२।१३८।
कर्मणि	२।२।४०।	कृत्यस्य वा	२।२।८८।
कर्मणि कृतः	२।२।८३।	कृद्येनावश्यके	३।१।९५।
कर्माभिप्रेयः	२।२।२५।	केवलमाम	२।४।२९।
कवर्गैक	२।३।७६।	केवलस	१।४।२६।
कसमासे	१।१।४१।	केशे वा	३।२।१०२।
काकवौ बोष्णे	३।२।१३७।	कोः कत्तत्पुरुषे	३।२।१३०।
काकाद्यैः क्षेपे	३।१।९०।	कोटरमिश्र	३।२।७६।
कागपथोः	३।२।१३४।	कौरव्यमा	२।४।७०।
काण्डात् प्रभा	२।४।२४।	क्तं नञादिभिन्नैः	३।१।१०५।
कादिर्व्यं	१।१।१०।	क्तयोरसदाधारे	२।२।९२।
कारकं कृता	३।१।६८।	क्ताः	३।१।१५१।
कारिकास्थि	३।१।३।	क्ताच्च नाम्नि	२।४।२८।
कालः	३।१।६०।	क्तादल्पे	२।४।४५।
कालात् तन	३।२।२४।	क्तादेशोऽषि	।२।१।६१।
कालाध्वनो	२।२।३२।	क्तेन	३।१।९२।
कालाध्वभा	२।२।२३।	क्तेनासत्त्वे	३।१।७४।
काले भात् नवा	२।२।४८।	क्त्वातुमम्	१।१।३५।
कालो द्विगौ	३।१।५७।	क्रः पलितासितात्	२।४।३७।
किं क्षेपे	३।१।११०।	क्यङ्मानि	३।२।५०।
किमः कस्त	२।१।४०।	क्रियामध्ये	२।२।११०।
कुमारः श्रम	३।१।११५।	क्रियाविशेष	२।२।४१।
कुरुच्छुरः	२।१।६६।	क्रियाश्रयस्या	२।२।३०।
कुलाख्यानाम्	२।४।७९।	क्रियाहेतुः	२।२।१।
कुशलायु	।२।३।९७	क्रीतात् करः	२।३।४४।
कृगः प्रतियत्ने	२।२।१२।	क्रुद् द्रुहे	२।२।२७।

सूत्रम् ।	सूत्राङ्कः ।	सूत्रम् ।	सूत्राङ्कः ।
कुशस्तुनः	१।४।९१।	गोऽम्बाम्ब	२।३।३०।
कौड्यादीनाम्	२।४।७९।	गोर्नाम्न्य	१।२।२८।
क्लीबमन्ये	३।१।१२८।	गोश्चान्ते	२।४।९६।
क्लीबे	२।४।९७।	गौणात् समं	२।२।३३।
क्लीबे वा	२।१।९३।	गौरादिभ्यो	२।४।१९।
क्षुषमतौ च	२।१।१०५।	ग्रन्थान्ते	३।२।१४७।
क्विब्वृत्तेर	२।१।५८।	ग्रामाग्रान्नियः	२।३।७१।
क्षुभ्नादीनाम्	२।३।९६।	ग्राम्याशिशु	३।१।१२७।
खितिखीती	१।४।३६।	ग्रो यङि	२।३।१०१।
खित्यनव्यया	३।२।१११।	घञ्युपसर्ग	३।२।८६।
ख्यागि	१।३।५४।	घस्वसः	२।३।३६।
गडदवादे	२।१।७७।	घुटि	१।४।६८।
गड्वादिभ्यः	।३।१।१५६।	घोषवति	१।३।२१।
गतिः	१।१।३६।	ङसेश्चाद्	२।१।१९।
गतिकारक	३।२।८५।	ङस्युक्तं कृता	३।१।४९।
गतिकन्य	३।१।४२।	ङिङौं	१।४।२५।
गतिबोधा	२।२।५।	ङित्यदिति	१।४।२३।
गते गम्ये	२।२।१०७।	ङेः स्मिन्	१।४।८।
गतेर्नवा	२।२।६३।	ङे ङसा	२।१।२३।
गतौसेधः	२।३।६१।	ङे ङस्यो	१।४।६।
गत्यर्थवदो	३।१।८।	ङृणोः कटाव	१।३।१७।
गम्ययपः	२।२।७४।	ङ्यः	३।२।६४।
गम्यस्याप्ये	२।२।६२।	ङ्यादीङूतः के	२।४।१०४।
गवाश्वादिः	३।१।१४४।	ङ्यादेर्गौण	२।४।९५।
गवियुक्ते	३।२।७४।	ङ्यापो बहुलं	२।४।९९।
गवियुधेः	२।३।२५।	चजः कगम्	२।१।८६।
गिरिनद्यादीनाम्	२।३।६८।	चटते सद्धि	१।३।७।
गुणाद	२।२।७७।	चतस्रार्द्धम्	३।१।६६।
गुरावेकश्च	२।२।१२४।	चतुर्थी	२।२।५३।
गोण्या मेये	२।४।१०३।	चतुर्थी प्रकृत्या	३।१।७०।

सूत्रम् ।	सूत्राङ्कः ।	सूत्रम् ।	सूत्राङ्कः ।
चतुष्पाद्	३।१।११२।	टादौ स्वरे	१।४।९२।
चतुस्त्रेहाय	२।३।७४।	टौस्यनः	२।१।३७।
चत्वारिंशदादौ	३।२।९३।	टौस्येत्	१।४।१९।
चरणस्य	३।१।१३८।	डतिष्णः	१।४।५४।
चर्मण्वत्य	२।१।९६।	डत्यतु	१।१।३९।
चादयोऽसत्त्वे	१।१।३१।	डित्यन्त्य	२।१।११४।
चादिः स्वरो	१।२।३६।	ड्नः सः त्सोऽ	१।३।१८।
चार्थे द्वन्द्व	३।१।११७।	ढस्तडूढे	१।३।४२।
चाहहवैवयोगे	२।१।२९।	णषमसत्परे	२।१।६०।
चितेः कचि	३।२।८३।	णस्वराघोषा	२।४।४।
च्वौ क्वचित्	३।२।६०।	णिस्तोरेवा	२।३।३७।
जपादीनां	२।३।१०५।	णेर्वा	२।३।८८।
जरत्यादिभिः	३।१।५५।	तः सौ सः	२।१।४२।
जरसो वा	१।४।६०।	ततः शिटः	१।३।३६।
जराया ज	२।१।३।	ततोऽस्याः	१।३।३४।
जस इः	१।४।९।	ततो हश्च	१।३।३।
जस्येदोत्	१।४।२२।	तत्पुरुषे	३।२।२०।
जस्विशे	२।१।२६।	तत्रादायमि	३।१।२६।
जातिकाल	३।१।१५२।	तत्राहोरात्रां	३।१।९३।
जातिश्च	३।२।५१।	तदः सेः स्वरे	१।३।४५।
जातीयैकार्थे	३।२।७०।	तदन्तं	१।१।२०।
जातेरयान्त	२।४।५४।	तदर्थार्थेन	३।१।७२।
जात्याख्यायां	३।२।१२१।	तद्धितः	३।२।५५।
जासनाट	२।२।१४।	तद्धितय	२।४।९२।
जीविकोपनि	३।१।१७।	तद्धिताक	३।२।५४।
ज्ञानेच्छाऽर्चार्था	३।१।८६।	तद्भद्रायु	२।२।६६।
ज्योतिरायु	२।३।१७।	तद्युक्ते हेतौ	२।२।१००।
टः पुंसि ना	१।४।२४।	तरुतृणधान्य	३।१।१३३।
टाङसोरिनस्यौ	१।४।५।	तव मम	२।१।१५।
टाङ्योसि यः	२।१।७।	तवर्गस्य	१।३।६०।

सूत्रम् ।	सूत्राङ्कः ।	सूत्रम् ।	सूत्राङ्कः ।
तादर्थ्ये	२।२।५४।	त्रेस्त्रयः	१।४।३४।
ताभ्यां वा	२।४।१५।	त्वतेगुणः	३।२।५९।
तारका वर्णका	२।४।११२।	त्वमहम्	२।१।१२।
तिरसस्ति	३।२।१२४।	त्वमौ प्रत्ययौ	२।१।११
तिरसो वा	२।३।२।	त्वे	२।४।१००।
तिरोन्तर्द्धौ	३।१।९।	थोन्थ्	१।४।७८।
तिष्ठद्गवि	३।१।३६।	दध्यस्थि	१।४।६३।
तिष्यपुष्य	२।४।९०।	दन्तपाद	२।१।१०१।
तीयं ङित्कार्ये	१।४।१४।	दस्ति	३।२।८८।
तुभ्यं मह्यं	२।१।१४।	दामः सम्प्रदाने	२।२।५२।
तुमश्चमनः	३।२।१४०।	दाम्नः	२।४।१०।
तुमोर्थे भाव	३।२।६१।	दिक्शब्दा	३।२।१४२।
तुल्यस्थाना	१।१।१७।	दिगधिकं	३।१।९८।
तुल्यार्थै	२।२।११६।	दिव औः सौ	२।१।११७।
तृणे जातौ	३।२।१३२।	दिवस् दिवः	३।२।४५।
तृतीयस्य	१।३।१।	दिवो द्यावा	३।२।४४।
तृतीया	३।१।६५।	दिशो रूढ्या	३।१।२५।
तृतीयान्ता	१।४।१३।	दीर्घड्याब्	१।४।४५।
तृतीयायाम्	३।१।८४।	दीर्घो नाम्य	१।४।४७।
तृतीयार्थो	२।२।११२।	दुर्निन्दाकृच्छ्रे	३।१।४३।
तृतीयोक्तं	३।१।५०।	दृगृदृशदृक्षे	३।२।१५१।
तृन्नुदन्ता	२।२।९०।	दृन्पुनर्वर्षा	२।१।५९।
तृप्तार्थपूर	३।१।८५।	दृश्यभिवदो	२।२।९।
तृस्वस्रृर	१।४।३८।	दृश्यर्थै	२।१।३०।
ते लुग्वा	३।२।१०८।	देवानांप्रियः	३।२।३४।
तौ मुमौ	१।३।१४।	देशे	२।३।७०।
त्यदादि	३।१।१२०।	देशेऽन्तरो	२।३।९१।
त्यदामेन	२।१।३३।	दैर्घ्येऽनुः	३।१।३४।
त्यादौ क्षेपे	३।२।१२६।	दैवयज्ञिशौ	१।४।८२।
त्रिचतुरस्	२।१।१।	दो मः स्यादौ	२।१।३९।

सूत्रम् ।	सूत्राङ्कः ।	सूत्रम् ।	सूत्राङ्कः ।
द्युपावृट्	३।२।२७।	नखमुखाद	२।४।४०।
द्वन्द्वे वा	१।४।११।	नखादयः	३।२।१२८।
द्विः कानः	१।३।११।	नख्यापूग्	२।३।९०।
द्विगोः समा	२।४।२२।	नगोऽप्राणिनि	३।२।१२७।
द्वितीया खट्वा	३।१।५९।	नञ्	३।१।५१।
द्वितीया षष्ठ्या	२।२।११७।	नञत	३।२।१२५।
द्वित्रिचतुष्पू	३।१।५६।	न दधिपय	३।१।१४५।
द्वित्रिस्वरौ	२।३।६७।	नदंदेशपुरा	३।१।१४२।
द्वित्र्यष्टानां	३।२।९२।	नदीभिर्नाम्नि	३।१।२७।
द्वित्वेऽधो	२।२।३४।	न नाङ्दित्	१।४।२७।
द्वित्वेऽप्यन्ते	२।३।८१।	न नाम्येक	३।२।९।
द्वित्वे वां नौ	२।१।२२।	नपुंसकस्य	१।४।५५।
द्विषो वातृशः	२।२।८४।	नपुम्वन्निषेधे	३।२।७१।
द्विहेतोर	२।२।८७।	नमस्पुरसो	२।३।१।
द्व्यन्तरन	३।२।१०८।	न यि तद्धिते	२।१।६५।
द्व्येषसूत	२।४।१०९।	न राजन्य	२।४।९४।
धर्मार्थादिषु	३।१।१५९।	न रात्स्वरे	१।३।३७।
धवाद्योगा	२।४।५९।	नरिकामामिका	२।४।११२।
धागस्तथोश्च	२।१।७८।	नरे	३।२।८०।
धातोः पूजार्थ	३।१।१।	नवभ्यः	१।४।१६।
धातोरिवर्णो	२।१।५०।	नवमन्त	२।१।१११।
धुटस्तृतीयः	२।१।७६।	नवाऽखित्कृदन्ते	३।२।११७।
धुटां प्राक्	१।४।६६।	नवापः	२।४।१०६।
धुटो धुटि	१।३।४८।	नवा शोणादेः	२।४।३१।
धेनोर्भव्याम्	३।२।११८।	नवा सुजर्थै	३।२।९६।
न	२।२।१८।	नवा स्वरे	२।३।१०२।
नं क्ये	१।१।२२।	न विंशत्यादि	३।१।६९।
नः शि ञ्	१।३।१९।	नवैकस्वरा	३।२।६६।
न कचि	२।४।१०५।	नशः शः	२।३।७८।
न कर्तरि	३।१।८२।	न शात्	१।३।६२।

सूत्रम् ।	सूत्राङ्कः ।	सूत्रम् ।	सूत्राङ्कः ।
नञोवा	२।१।७०।	नारी सखी	२।४।७६।
न संधिः	१।३।५२।	नाऽऽशिष्य	३।२।१४८।
न सप्तमी	३।१।१५५।	नासिकोदरो	२।४।३९।
न सर्वादिः	१।४।१२।	निंसनिक्ष	२।३।८४।
नसस्य	२।३।६५।	निकटपाठस्य	३।१।१४०।
न स्तं मत्वर्थे	१।१।२३।	नित्यदिद्	१।४।४३।
नस्नासिकाया	३।२।९९।	नित्यमन्वा	२।१।३१।
न स्सः	२।३।५९।	नित्यवैरस्य	३।१।१४१।
नहाहोर्धत्तौ	२।१।८५।	नित्यं प्रतिनाऽल्पे	३।१।३७।
नाथः	२।२।१०।	नित्यं हस्ते	३।१।६५।
नान्यत्	२।१।२७।	नि दीर्घः	१।४।८५।
नाप्रियादौ	३।२।५३।	निनद्याः स्नातेः	२।३।२०।
नामन्त्ये	२।१।९२।	निन्द्यं कुत्सनै	३।१।१००।
नाम नाम्नै	३।१।१८।	निपुणेन	२।२।१०३।
नाम सिदय्	१।१।२१।	निप्रेभ्यो घ्नः	२।२।१५।
नामिनःकाशे	३।२।८७।	निय आम्	१।४।५१।
नामिनस्त्योः षः	२।३।८।	निरभ्यनो	२।३।५०।
नामिनो लुग्वा	१।४।६१।	निर्दुःसुवेः	२।३।५६।
नाम्नः प्रथमै	२।२।३१।	निर्दुर्बहि	२।३।९।
नाम्नि	२।१।९५।	निर्दुस्सोः	२।३।३१।
नाम्नि	२।४।१२।	निर्नेःस्फुर	२।३।५३।
नाम्नि	३।१।९४।	निर्विण्णः	२।३।८९।
नाम्नि	३।२।१६।	नि वा	१।४।८९।
नाम्नि	३।२।७५।	निष्प्राऽग्रे	२।३।६६।
नाम्नि	३।२।१४४।	निसस्तपे	२।३।३५।
नाम्नि वा	१।२।१०।	नीलात्प्राण्यौ	२।४।२७।
नाम्नो नो	२।१।९१।	नुर्जातेः	२।४।७२।
नाम्न्युत्तर	३।२।१०७।	नुर्वा	१।४।४८।
नाम्यन्त	२।३।१५।	नृतेर्यङि	२।३।९५।
नाम्यादे	२।३।८६।	नृनःपेषु वा	१।३।१०।

सूत्रम् ।	सूत्राङ्कः ।	सूत्रम् ।	सूत्राङ्कः ।
नेन्सिद्ध	३।२।२९।	परिक्रयणे	२।२।६७।
नेमार्द्धप्रथम	१।४।१०।	परिनिवेः	२।३।४६।
नेर्मादापत	२।३।७९।	परिमाणा	२।४।२३।
नैकार्थ्ये	२।३।१२।	परेः	२।३।५२।
नोपसंर्गात्	२।२।२८।	परेर्घाङ्कयोगे	२।३।१०३।
नोपान्त्य	२।४।१३।	पर्यपाङ्	३।१।३२
नोऽप्रशानो	१।३।८।	पर्यपाभ्यां	२।२।७१।
नोभयोर्हेतोः	२।२।८९।	पशुष्यञ्चना	३।१।१३२।
नोर्म्यादिभ्यः	२।१।९९।	पश्यद्वाग्	३।२।३२।
न्स्रहतोः	१।४।८६।	पाककर्ण	२।४।५५।
पक्षाच्चोप	२।४।४३।	पाठे घात्वादे	२।३।९७।
पञ्चकोपवर्गः	१।१।१२।	पाणिगृहीती	२।४।५२।
पञ्चतोऽन्या	१।४।५८।	पात्रे समि	३।१।९१।
पञ्चमी भयाद्यैः	३।१।७३।	पाद्यशुद्र	३।१।१४३।
पञ्चम्यपादा	२।२।६९।	पादाद्योः	२।१।२८।
पतिवत्न्य	२।४।५३।	पानस्य भा	२।३।६९।
पत्तिरथौ	३।१।७९।	पारेमध्ये	३।१।३०।
पत्युर्नः	२।४।४८।	पिता मात्रा वा	३।१।१२२।
पथिन् मथिन्	१।४।७३।	पुम्वत् कर्म	३।२।५७।
पदः पादस्य	३।२।९५।	पुंसः	२।३।३।
पदस्य	२।१।८९।	पुंसोः पु	१।४।७३।
पदाद्युग्	२।१।२१।	पुंस्त्रियोः	१।१।२९।
पदान्ताट्ट	१।३।६३।	पुच्छात्	२।४।४१।
पदान्ते	२।१।६४।	पुञ्जनुषो	३।२।१३।
पदेऽन्तरे	२।३।९३।	पुत्रस्यादि	१।३।३८।
पद्धतेः	२।४।३३।	पुत्रे	३।२।४०।
परः शतादिः	३।१।७५।	पुत्रे वा	३।२।३१।
परतः स्त्री	३।२।४९।	पुमोऽशि	१।३।९।
परस्परान्यो	३।२।१।	पुरुषः स्त्रिया	३।१।१२६।
परात्मभ्यां	३।२।१७।	पुरुषे वा	३।२।१३५।

सूत्रम् ।	सूत्राङ्कः ।	सूत्रम् ।	सूत्राङ्कः ।
पुरुषाद्वा	२।४।२५।	प्रियः	३।१।१५७।
पुरोऽस्तम	३।१।७।	प्लुताद्वा	१।३।२९।
पुष्यार्थाद्धे	३।१।१२९।	प्लुतोऽनितौ	१।२।३२।
पूतक्रतुवृ	२।४।६०।	फलस्य जातौ	३।१।१३५।
पूर्वकालैक	२।१।९०।	फल्गुनीप्रो	२।२।१२३।
पूर्वपदस्था	२।३।६४।	बन्धे घञि नवा	३।२।२३।
पूर्वापरप्र	३।१।१०३।	बन्धौ बहु	२।४।८४।
पूर्वापराध	३।१।५२।	बहुगणं	१।१।४०।
पृथग् नाना	२।२।११३।	बहुष्वेरीः	२।१।४९।
पृषोदरादयः	३।२।१५५।	बाह्वन्तक	२।४।७४।
पोटायुवति	३।१।१११।	बिल्वकीया	२।४।९३।
प्रतेः स्नात	२।३।२१।	ब्राह्मणाच्छंसी	३।२।११।
प्रत्यनोर्गृ	२।२।५७।	भक्षेर्हिंसायाम्	२।२।६।
प्रत्यये	२।३।६।	भद्रोष्णात्करणे	३।२।११६।
प्रत्यये च	१।३।२।	भर्तु तुल्यस्वरम्	३।१।१६२।
प्रत्याङः श्रु	२।२।५६।	भागिनि च	२।२।३७।
प्रथमाद	१।३।४।	भाजगोण	२।४।३०।
प्रथमोक्तं प्राक्	३।१।१४८।	भादितो वा	२।३।२७।
प्रभृत्यन्यार्थ	२।२।७५।	भिस ऐस्	१।४।२।
प्रष्ठोऽग्रगे	२।३।३२।	भीरुष्ठानादयः	२।३।३३।
प्रसितोत्सु	२।२।४९।	भूषादरक्षेपे	३।१।४।
प्रस्यैषै	१।२।१४।	भोगवद्गौरि	३।२।६५।
प्रहरणात्	३।१।१५४।	भोजसूतयोः	२।४।८१।
प्राक्कारस्य व्य	३।२।१९।	भ्रातुष्पुत्र	२।३।१४।
प्रागिनात्	२।१।४८।	भ्रातृपुत्राः	३।१।१२१
प्राणितूर्या	३।१।१३७।	भ्राष्ट्राग्ने	३।२।११४।
प्रात्यवपरि	३।१।४७।	भ्रुवोऽच्च कुंस	२।४।१०१।
प्रादुरुपसर्गा	२।३।५८।	भ्रूश्नोः	२।१।५३।
प्राध्वं बन्धे	३।१।१६।	भ्वादेर्दार्दैर्घः	२।१।८३।
प्राप्तापन्नौ	३।१।६३।	भ्वादेर्नामि	२।१।६३।

सूत्रम् ।	सूत्राङ्कः ।	सूत्रम् ।	सूत्राङ्कः ।
मत्स्यस्य यः	२।४।८७।	यञो ङायन्	२।४।६७।
मध्ये पदे नि	३।१।११।	यतः प्रतिनिधि	२।२।७।
मनः	२।४।१४।	यथाऽथा	३।१।४१।
मनयवल	१।३।१५।	यद्भावो भाव	२।२।१०६।
मनसश्चा	३।२।१५।	यद्धेदैस्त	२।२।४६।
मनुर्नभोङ्गि	१।१।२४।	यद्धीक्ष्ये	२।२।५८।
मनोरौ च वा	२।४।६१।	यरलवा	१।१।१५।
मन्तस्य यु	२।१।१०।	यवयवनारण्य	२।४।६५।
मन्थौदन	३।२।१०६।	यस्वरे पाद	२।१।१०३।
मन्यस्या	२।२।६४।	याजकादिभिः	३।१।७८।
मयूरव्यंस	३।१।११६।	यावद्रियत्त्वे	३।१।३१।
महतः करः	३।२।६८।	युजञ्चक्रुञ्चो	२।१।७१।
मांसस्यान	३।२।१४१।	युञ्जोऽसमासे	१।४।७१।
मातमातृ	२।४।८५।	युवा खलति	३।१।११३।
मातरपितरं वा	३।२।४७।	युष्मदस्मदोः	२।१।६।
मातुर्मातः	१।४।४०।	यूनस्तिः	२।४।७७।
मातुलाचार्यो	२।४।६३।	यूयं वयं	२।१।१३।
मातृपितुः	२।३।१८।	येऽवर्णे	३।२।१००।
मादुवर्णोऽनु	२।१।४७।	योग्यतावी	३।१।४०।
मालेषीके	२।४।१०१।	योऽनेकस्व	२।१।५६।
मावर्णान्तो	२।१।९४।	य्यक्ये	१।२।२५।
मासनिशा	२।१।१००।	रः कखपफ	१।३।५।
मासवर्णश्रा	३।१।१६१।	रः पदान्ते	१।३।५३।
मुहद्रुहष्णु	२।१।८४	रथवदे	३।२।१३१।
मृगक्षीरा	३।२।६२।	रषृवर्णान्नो	२।३।६३।
मो नो म्वोश्च	२।१।६७।	राजदन्तादिषु	३।१।१४९।
मोर्वा	२।१।९।	राजन्वान्	२।१।९८।
मोऽवर्णस्य	२।१।४५।	रात्सः	२।१।९०।
म्नां धुड्वर्गे	१।३।३९।	रिति	३।२।५८।
यजसृजमृ	२।१।८७।	रिरिष्टात्	२।२।८२।

सूत्रम् ।	सूत्राङ्कः ।	सूत्रम् ।	सूत्राङ्कः ।
रुचिकृप्य	२।२।५५।	वाः शेषे	१।४।८२।
रुजार्थस्या	२।२।१३।	वाऽकर्मणा	२।२।४।
रेवतरोहि	२।४।२६।	वा क्लीबे	२।२।९२।
रोः काम्ये	२।३।७।	वाचस्पति	३।२।३६।
रो रे लुग्	१।३।४१।	वा तृतीयायाः	३।२।३।
रोर्यः	१।३।२६।	वात्यसंधिः	१।२।३१।
रो लुप्यरि	२।१।७५।	वाद्यौ	२।१।४६।
र्नाम्यन्तात्	२।१।८०।	वा नाम्नि	१।२।२०।
र्लो वा	१।४।६७।	वान्तिके	३।२।१४७।
र्हादर्हस्वर	१।३।३१।	वान्यतः	१।४।६२।
लक्षणवीप्स्ये	२।२।३६।	वा पादः	२।४।६।
लक्षणेनाभि	३।१।३३।	वा बहुव्रीहेः	२।४।५।
लघ्वक्षरा	३।१।१६०।	वाभिनिविशः	२।२।२२।
लि लौ	१।३।६५।	वाम्शसि	२।१।५५।
लुक्	१।३।१३।	वावाप्यो	३।२।१५६।
लुगस्यादे	२।१।११३।	वाष्टन आः	१।४।५२।
लुगातोऽनापः	२।१।१०७।	वाहर्पत्या	१।३।४८।
लोकंपृणम	३।२।११३।	वाह्याद्वा	२।३।७२।
लोकात्	१।१।३।	विकुशमिपरेः	२।३।२८।
लोहितादि	२।४।६८।	विना ते तृ	२।२।११५।
वंश्येन	३।१।२९।	विनिमेय	२।२।१६।
वत्तस्याम्	१।१।३४।	विभक्तिथम	१।१।३३।
वमि वा	२।३।८३।	विभक्तिस	३।१।३९।
वयस्यनन्त्ये	२।४।२१।	विरामे वा	१।३।५१।
वरुणेन्द्र	२।४।६२।	विरोधिनाम्	३।१।१३०।
वर्चस्कादि	३।२।४८।	विशेषणं	३।१।९६।
वर्षक्षर	३।२।२६।	विशेषणसर्वा	३।१।१५०।
वलच्यपि	३।२८।२।	वृत्र्यन्तो	१।१।२५।
वसुराटोः	३।२।८१।	वृद्धो यूना	३।१।१२४।
वहेः प्रवेयः	२।२।७।	वृन्दारक	३।१।१०८।

सूत्रम् ।	सूत्राङ्कः ।	सूत्रम् ।	सूत्राङ्कः ।
वेः	२।३।५४।	शित्यघोषात्	१।३।५५।
वेः स्कन्दो	२।३।५१।	शित्याद्यस्य	१।३।५९।
वेः स्रः	२।३।२३।	शिड्हेऽनुस्वारः	१।३।४०।
वेदसहश्रु	३।२।४१।	शिरसः शीर्षन्	३।२।१०१।
वेदूतोऽनव्यय	२।४।९८।	शिरोऽधसः	२।३।४।
वेयुवोऽस्त्रियाः	१।४।३०।	शिर्घुट्	१।१।२८।
वेसुसोऽपे	२।३।११।	शीर्षः स्वरे	३।२।१०३।
वैकत्र द्वयोः	२।२।८५।	शुनः	३।२।९०।
वैकव्यञ्जने पूर्वे	३।२।१०५।	शेषपुच्छला	३।२।३५।
वोत्तरपद	२।३।७५।	शेषे	२।२।८१।
वोशनसो	१।४।८०।	शेषे लुक्	२।१।८।
वौ वर्तिका	२।४।११०।	श्यशवः	२।१।११६।
वौष्ठौतौ	१।२।१७।	श्येतैतहरित	२।४।३६।
व्यञ्जनात्त	२।४।८८।	श्रितादिभिः	३।१।६२।
व्यञ्जनात्प	१।३।४७।	श्रेण्यादिकृ	३।१।१०४।
व्यञ्जनादेर्ना	२।३।८७।	श्लाघह्नुस्था	२।२।६०।
व्यत्यये	१।३।५६।	श्वन्युवन्म	२।१।१०६।
व्यवात्स्वनो	२।३।४३।	श्वशुरः श्वश्रू	३।१।१२३।
व्याप्तौ	३।१।६१।	श्वस्तनी ता	३।२।१४।
व्याप्ये क्तेनः	२।२।९९।	षः सोऽष्टौ	२।३।९८।
व्याप्ये द्विद्रो	२।२।५०।	षढोः कः सि	२।१।६२।
व्योः	१।३।२३।	षष्ठी वानादरे	२।२।१०९।
शक्तार्थवषट्	२।२।६८।	षष्ठ्यय	३।१।७६।
शक्तेः शस्त्रे	२।४।३४।	षष्ठ्याः क्षेपे	३।२।३०।
शब्दनिष्क	३।२।९८।	षात्पदे	२।३।९२।
शयवासिवा	३।२।२५।	षादिहन्	२।१।११०।
शषसे श	१।३।६।	षावटाद्वा	२।४।६९।
शसोता सश्च	१।४।४९।	षि तवर्गस्य	१।३।६४।
शसो नः	२।१।१७।	ष्या पुत्रपत्योः	२।४।८३।
शिटः प्रथम	१।३।३५।	संख्याक्ष	३।१।३८।

सूत्रम् ।	सूत्राङ्कः ।	सूत्रम् ।	सूत्राङ्कः ।
संख्यादेर्हा	२।४।९।	समोगमृ	२।३।८४।
संख्यानां	१।४।३३।	समोऽहोऽस्मृ	२।२।५१।
संख्याने	३।१।१४६।	सम्राट्	१।३।१६।
संख्या समासे	३।१।१६३।	सयसितस्य	२।३।४७।
संख्या समाहारे	३।१।२८।	सर्वपश्चादा	३।१।८०।
संख्या समा	३।१।९९।	सर्वादयो	३।२।६१।
संख्यासाय	१।४।५०।	सर्वादिविष्वग्	३।२।१२२।
संयोगस्या	२।१।८८।	सर्वादेः सर्वाः	२।२।११९।
संयोगात्	२।१।५२।	सर्वादेः स्मै	१।४।७।
सख्युरितो	१।४।८३।	सर्वादेर्डस्	१।४।१८।
सजुषः	२।१।७३।	सर्वोभया	२।२।३५।
सञ्जेर्वा	२।३।३८।	सविशेषण	१।१।२६।
सत्यामदा	३।२।११२।	सस्य शषौ	१।३।६१।
सदोऽप्रतेः	२।३।४४।	सहसमः	३।२।१२३।
सन्महत्प	३।१।१०७।	सहस्तेन	३।१।२४।
सपत्न्यादौ	२।४।५०।	सहस्य सो	३।२।१४३।
सपूर्वात्प्रथ	२।१।३२।	सहार्थे	२।२।४५।
सप्तमी चा	२।२।१०९।	सहिवहे	१।३।४३।
सप्तमी शौ	३।१।८८।	साक्षादादि	३।१।१४।
सप्तम्यधि	२।२।९५।	सादेः	२।४।४९।
सप्तम्या वा	३।२।४।	साधकतमं	२।२।२४।
सब्रह्मचारी	३।२।१५०।	साधुना	२।२।१०२।
समस्तत	३।२।१३९।	सायाह्नादयः	३।१।५३।
समानस्य	३।२।१४९।	सिचो यङि	२।३।६०।
समानादमोऽतः	१।४।४६।	सिद्धिः स्या	१।१।२।
समानानां	१।२।१।	सिद्धौ तृतीया	२।२।४३।
समानामर्थै	३।१।११८।	सिंहाद्यैः पूजाः	३।१।८९।
समासेऽग्नेः	२।३।१६।	सुःपूजायाम्	३।१।४४।
समासेऽसम	२।३।१३।	सुगः स्यसनि	२।३।६२।
समीपे	३।१।३५।	सुचो वा	२।३।१०।
समेऽशेऽर्धं	३।१।५४।	सुज्वार्थे सं	३।१।१९।

सूत्रम् ।	सूत्राङ्कः ।	सूत्रम् ।	सूत्राङ्कः ।
सूर्यागस्त्य	२।४।८९।	स्वरादुतो	२।४।३५।
सूर्यादेवता	२।४।६४।	स्वरेभ्यः	१।३।३०।
सेड्नानिटा	३।१।१०६।	स्वरे वा	१।३।२४।
सेनाङ्गक्षुद्र	३।१।१३४।	स्वरे वा ऽ	१।२।२९।
सोरुः	२।१।७२।	स्वसृपत्योः	३।२।३८।
सौनवेतौ	१।२।३८।	स्वाङ्गात्	३।२।५६।
स्कभ्नः	२।३।५५।	स्वाङ्गादेर	२।४।४६।
स्तुस्वञ्जश्चा	२।३।४९।	स्वामीश्वरा	२।२।९८।
स्तोकाल्प	२।२।७९।	स्वाम्येऽधिः	३।१।१३।
स्त्यादिर्वि	१।१।१९।	स्वेशेऽधिना	२।२।१०४।
स्त्रियाः	२।१।५४।	स्वैरस्वैर्य	१।२।१५।
स्त्रियां ङितां	१।४।२८।	स्सटि समः	१।३।१२।
स्त्रियां नृतो	२।४।१।	हनः	२।३।८२।
स्त्रियाम्	१।४।९३।	हनो घि	२।३।९४।
स्त्रियाम्	३ २।६९।	हनो ह्नो घ्नः	२।१।११२।
स्त्रीदूतः	१।४।२९।	हविष्यघ्नः	३।२।७३।
स्त्री पुंवच्च	३।१।१२५।	हान्तस्थाञ्	२।१।८१।
स्थासेनिसि	२।३।४०।	हितसुखा	२।२।६५।
स्नानस्य	२।३।२२।	हितादिभिः	३।१।७१।
स्पृहेर्य्या	२।२।२६।	हिमहतिका	३।२।९६।
स्मृत्यर्थ	२।२।११।	हृक्रोर्नवा	२।२।८।
स्यादावसं	३।१।११९।	हृदयस्य	३।२।९४।
स्यादौ वः	२।१।५७।	हेतुकर्तृक	२।२।४४।
स्यौजस	१।२।१८।	हेतुसहार्थे	२।२।३८।
स्रंस् ध्वंस्	२।१।६८।	हेत्वर्थैस्तृ	२।२।११८।
स्वञ्जश्च	२।३।४५।	हो धुट् पदान्ते-	२।१।८२।
स्वञ्जाऽजभ	२।४।१०८।	ह्रस्वस्य गुणः	१।४।४१।
स्वतन्त्रः	२।२।२।	ह्रस्वात् ङ्णो	१।३।२७।
स्वयं सामी	३।१।५८।	ह्रस्वात्	२।३।३४।
स्वराच्छौ	१।४।६५।	ह्रस्वापश्च	२।४।३२।
स्वरात्	२।३।८५।	ह्रस्वोऽपदे वा	१।२।२२।
स्वरादयो	१।१।३०।		

* अर्हम् *

श्रीसिद्धहेमलघुवृत्तिः ॥

अवचूरिपरिष्कारसमेता

प्रणम्य परमात्मानं श्रेयःशब्दानुशासनम् ।
आचार्यहेमचन्द्रेण स्मृत्वा किञ्चित् प्रकाश्यते ॥१॥

ऐं नमः ।

प्रणम्य लब्धिदं पार्श्वं ध्यात्वा शब्दानुशासनम् ।
अवचूरिपरिष्कारो लघुवृत्तेर्विधीयते ॥ १ ॥

अथ भगवान्सुगृहीतनामधेयः श्रीहेमचन्द्रसूरीश्वरः जडमति-ग्रस्तजनतानुकम्पापरिपूर्णमानसः सुविशुद्धभाषाबोधाय श्रीशब्दा-नुशासनं प्रणेतुकामः 'ग्रन्थादौ ग्रन्थमध्ये ग्रन्थान्ते च मङ्गलं कुर्यादि'ति शिष्टसमयमवलम्ब्य प्रारिप्सितग्रन्थसमाप्तिप्रतिबन्धकदुरि-तोपशमनार्थमभिधेयादिप्रदर्शनार्थञ्चेष्टदेवतानमस्कारात्मकं मङ्गलमादौ निबध्नाति—**प्रणम्येति**, 'णमं प्रह्वत्वे,' 'पाठे धात्वादेर्णो न' इति णस्य नत्वम्, पूजार्थः प्रकारः, प्रणमनं पूर्वं प्रणम्य 'प्राक्काल' इति क्त्वाप्रत्ययः । 'अनवः क्त्वो यबि'ति यबादेशः । 'अदुरुपसर्गान्तर' इति णत्वम् । अत सातत्यगमने, अतति सततं गच्छति ज्ञानादिप-र्यायेष्वित्यात्मा । परमश्चासावात्मा च परमात्मा तम्, कर्मणि द्वितीयै-कवचनम् । परमत्वञ्च रागादिजेतृत्वात्, अतिशयदीप्तिमत्त्वात्, योगि-गम्यत्वात् क्षायिकज्ञानादिमत्त्वाद्वा, इदमनयोर्मध्येऽतिशयेन प्रशस्यं

अर्हम् ॥१॥ अर्हमित्येतदक्षरं परमेश्वरस्य परमेष्ठिनो वाचकम्,

श्रेयः । 'गुणाङ्गाद्वेष्ठेयस्' इतीयस् प्रत्यये 'प्रशस्यस्य श्र' इति श्रादेशः । 'अवर्णस्येवर्णे'ति एत् । 'अनतो लुप्' । 'शपीं आक्रोशे' शपतीति शब्दः, 'शाशयिमनिकनिभ्यो द' इति दः, 'तृतीयस्य तृतीये'ति पस्य बः । शासूक् अनुशिष्टौ, अनुशास्यन्ते आविष्क्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति करणाधारेऽनट्, शब्दानामनुशासनम् । अत्र कथं षष्ठीसमासः ? 'तृतीयामिति' निषेधात्, उच्यते, षष्ठीतृतीययोः विभिन्नापेक्षत्वे निषेधस्याप्रवृत्तेः, प्रकाश्यते इत्यपेक्षया तृतीया, अनुशासनमित्यपेक्षया च षष्ठीति भिन्नापेक्षत्वमत्रेति न षष्ठीसमासनिषेधः । चर् भक्षणे, आचर्यते सेव्यते विद्यार्थं विनयग्रहणार्थं वा शिष्यैरित्याचार्यः 'ऋवर्णव्यञ्जनाद् ष्यण्' वृद्धिः । हिंड् गतिवृद्ध्योः, हिनोति स्वतेजसेति हेमः । चन्दति आह्लादयति लोकानिति चन्द्रः । हेमवद्धौरित्वाद्धेमः चन्द्रवदाह्लादकत्वाच्चन्द्रः, हेमश्चासौ चन्द्रश्च हेमचन्द्रः, आचार्यश्चासौ हेमचन्द्रश्च आचार्यहेमचन्द्रः, तेन । स्मृं चिन्तायाम्, स्मरणं पूर्वं स्मृत्वा, 'प्राक्काले' क्त्वा, किमप्यल्पं चिनोति बध्नाति अभिधेयतयेति किञ्चित्, क्विप्, 'ह्रस्वस्य तः पित्कृती'ति तोन्तः । 'अप्रयोगीत्' इति क्विब् लोपः । 'क्रियाविशेषणादम्' 'अनतो लुप्' अम् लोपः । अथवा किञ्चिदित्यव्ययं स्वरादिषु द्रष्टव्यम् । ततो 'अव्ययस्ये'ति अम्लोपः । प्रपूर्वः काशृङ् दीप्तौ । प्रकाश्यते व्याकरणं तत्स्वयं प्रकाश्यमानमाचार्य्येण प्रयुज्यते, 'प्रयोक्तृव्यापारे णिग्,' वर्तमाने ते प्रत्ययः, 'क्यः शिती'ति क्यः, 'णेरनिटि' णिग्लोपः ॥ **अर्ह** पूजायाम् । अर्हति त्रिभुवनकृतां पूजामित्यर्हम् । 'अजि'त्यौणादिके अप्रत्यये पृषोदरादित्वात् सानुनासिको निपातः । अम् 'अव्ययस्ये'ति लुप् । **परमेष्ठी**ति, सिद्धिलक्षणे परमे पदे तिष्ठतीति परमेष्ठी तस्य भगवतोऽर्हतः प्रतिपादकं अर्हमित्येतद-

मङ्गलार्थं शास्त्रस्याऽऽदौ प्रणिदध्महे ॥ **सिद्धिः स्याद्वादात् ॥२॥** स्याद्वादादनेकान्तवादात् प्रकृतानां शब्दानां सिद्धिर्निष्पत्तिर्ज्ञप्तिश्च वेदितव्या ॥ **लोकात् ॥३॥** अनुक्तानां संज्ञानां न्यायानां च लोकाद्व्याकरणादेः सिद्धिर्ज्ञप्तिश्च वेदितव्या, वर्णसमाम्नायस्य च । तत्र–॥ **औदन्ताः स्वराः ॥४॥** औकारावसाना वर्णाः स्वरसंज्ञाः स्युः ।

क्षरं प्रणिदध्महे ध्यायामः, अभिधानाभिधेययोरभेदोपचारात् । अत्र बहुवचनन्तु ध्येयगुणस्याऽऽधिक्याद्ध्यातुश्च तदभेदाद्विज्ञेयम् ॥ **सिद्धिः, स्याद्वादात् ॥** षिधू गत्याम् । 'षः सोऽष्ठ्यैष्ठिवे'ति सिध्, सेधनं सिद्धिः, स्त्रियां क्तिः । 'अधश्चतुर्थात्तथोर्धः' इति तस्य धः । 'तृतीयस्तृतीयचतुर्थे' इति पूर्वधस्य दः । स्यादित्यसक् धातोर्यात्प्रत्ययान्तस्य प्रतिरूपकं विधिविचारणास्तित्वविवादानेकान्तसंशयाद्यर्थवृत्त्यव्ययम्, अत्र त्वनेकान्तवृत्तिः, अत एवोक्तं वृत्तौ स्याद्वादादनेकान्तवादादिति । वदनं वादः, 'भावाकर्त्रोर्घञ्,' स्यादिति वादः स्याद्वादः तस्मात्, 'गम्ययपः कर्म्माधारे' पञ्चमी, स्याद्वादमाश्रित्येत्यर्थः । तथा च शब्दानां कथञ्चिदनित्यत्वान्निष्पत्तिः, कथञ्चिन्नित्यत्वाच्च ज्ञप्तिरिति तेषां सिद्धिर्द्विधा प्रोक्ता ॥ **लोकात्**, लोकृङ् दर्शने, लोकते सम्यक् पदार्थानिति लोकः, अचप्रत्ययः तस्मात् । **अनुक्तानामित्यादि,** अस्मिन् शब्दानुशासनेऽनुदितानां क्रियागुणद्रव्यजातिकाललिङ्गस्वाङ्गसङ्ख्यापरिमाणापत्यवीप्सालुगवर्णादीनां संज्ञानां परनित्यान्तरङ्गानवकाशानामुत्तरोत्तरं बलीय इत्यादिन्यायानाञ्च व्याकरणान्तरात्सिद्धिर्ज्ञेया, वर्णानां क्रमविन्यासश्च । क्रमविन्यासस्तु अ आ, इ ई, उ ऊ, इत्यादिरूपः । **तत्रेति,** वर्णसमाम्नाय इत्यर्थः, अस्याग्रिमसूत्रेण सह सम्बन्धः ॥ **औदन्ताः स्वराः,** औत् अन्तः चरमावयवः येषान्ते औदन्ताः । 'अत आः स्यादौ,' इति आ, 'समानानां तेन दीर्घः' । 'सोरुः' सस्य रः 'रः पदान्ते विसर्गः' रस्य विसर्गः

अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ, ए ऐ ओ औ ॥ **एकद्वित्रिमात्रा ह्रस्वदीर्घप्लुताः** ॥५॥ मात्रा कालविशेषः, एकद्वित्र्यु-

---

'घुटस्तृतीयः' तस्य दः, लोकादकारेण योगः। स्वयं राजन्ते शोभन्ते इति स्वराः। 'क्वचिदि'ति डप्रत्ययः 'डित्यन्त्यस्वरादेः' अन्त्यस्वरलोपः, पृषोदरादित्वात् स्वयंशब्दस्य स्वः। बहुवचनं वर्णेष्वपठितानां प्लुतानां सङ्ग्रहणार्थम्, तेन तेषामपि स्वरसंज्ञा स्यात्। औदन्ता इत्यत्र तद्गुणसंविज्ञानो बहुव्रीहिः यथा लम्बकर्णः। अतद्गुणसंविज्ञानबहुव्रीहौ तु औकारस्य स्वरत्वाप्राप्त्या, 'अष्टन आ'दित्यादिसूत्रेषु 'स्वरे वा' इत्यनेन यलोपो न स्यात्। औदित्यत्र तकारः स्पष्टप्रतिपत्तये, अन्यथा आवन्ताः इत्युच्येत, तथा च सति औकारप्रतीतिः क्लिष्टा भवेत्। षोढा सूत्राणि, 'औदन्ताः स्वराः' इत्येवमादीनि संज्ञासूत्राणि, 'शापे व्याप्यात्' इत्यादीनि परिभाषासूत्राणि, 'क्तक्तवतू' 'ईङ्क्तिः कर्तरि' इत्यादीनि विधिसूत्राणि, 'इदमदसोऽक्येवे'ति नियमसूत्राणि, 'नस्तं मत्वर्थे' इत्यादीनि प्रतिषेधसूत्राणि, 'घुटि' 'आ रायो व्यञ्जने' इत्यादीन्यधिकारसूत्राणि। औदन्तसमुदायं दर्शयति, अ आ इत्यादि, तथा च दीर्घाणां पृथग्गणनया औदन्ताश्चतुर्दश, प्लुतानान्तु विशेषसूत्रविहितत्वेन पृथग्गणनाभावात्॥ **एकद्वित्रिमात्राः ह्रस्वदीर्घप्लुताः**, इंण्क् गतौ, एत्यसहायतामिति 'भीण्शली'ति के गुणे च एका। उभतः द्वित्वप्रतीतिं पूरयतस्तथा उभन्ति त्रित्वप्रतीतिं पूरयन्तीति व्युत्पत्त्या उणादित्वादिप्रत्यये क्रमतः उभस्य द्वित्र्यादेशे द्वे तिस्रः, एका च द्वे च तिस्रश्च एकद्वितिस्रः, 'सर्वादयोऽस्यादा'विति पुंवद्भावात्। नन्वेका चेति द्वन्द्वो न सर्वादिरिति, 'सर्वादयोऽस्यादा'विति कथं पुंवद्भावः, उच्यते, तत्र बहुवचनं व्याप्त्यर्थम्, तेन भूतपूर्वस्यापि सर्वादेः पुंवद्भावो भवति। मीयतेऽनयेति मात्रा, एकद्वितिस्रो मात्रा विद्यन्ते ये-

च्चारणमात्रा औदन्ता वर्णा यथासङ्ख्यं ह्रस्वदीर्घप्लुतसंज्ञाः स्युः । अ इ उ ऋ ऌ, आ ई ऊ ॠ ॡ ए ऐ ओ औ, आ ३ ई ३ ऊ ३ इत्यादि ॥ **अनवर्णा नामी** ॥६॥ अवर्णवर्ज्जा औदन्ता वर्णा नामिसंज्ञाः स्युः । इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ ॥ **ऌदन्ताः समानाः** ॥७॥ ऌकारावसाना वर्णाः समानाः स्युः । अ

षान्ते, ' गोश्चान्ते ' इति ह्रस्वः, ' अतः आ ' 'समानानां' 'सो रुः' ' अवर्णेभोभगो ' इति लोपः । ह्रस् शब्दे, ह्रसति अपचितो भवति इति ह्रस्वः । ' लटिखटी 'ति वप्रत्ययः । दृश् विदारणे, दृणाति विदारयति मुखमिति दीर्घः निपातनात् । प्लुङ् गतौ, प्लवते मात्राधिक्यमिति प्लुतः । ह्रस्वश्च दीर्घश्च प्लुतश्च ह्रस्वदीर्घप्लुताः । **मात्रा कालविशेष इति**, स्वरस्यात्यन्तापकृष्टो निमेषोन्मेषक्रियापरिच्छिन्नोच्चारणकालो मात्रा । **एकेति**, ' एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते । त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनञ्चार्धमात्रकम् ' । अत्र ए ऐ ओ औ वर्णानां न ह्रस्वत्वम् । **पाणिनीये** विवृतस्य ऌवर्णस्य दीर्घत्वं नास्ति । औदन्ता इति पदमर्द्धमात्रिकयोर्व्यञ्जनयोर्मेलनेन एकमात्रत्वसम्भवेऽपि **ह्रस्वसंज्ञाव्यावृत्तये** ॥ **अनवर्णा नामी**, न विद्यतेऽवर्णो येषु तेऽनवर्णाः । णमं प्रह्वत्वे, भावाकर्त्रोर्घञ् । नामोऽस्यास्तीति नामी । ' अतोऽनेकस्वरादि 'ति इन्, ' अवर्णस्ये ' त्यलोपः । 'इन हन् पूषा' इति दीर्घः, 'दीर्घङ्याप्' सिलोपः, 'नाम्नो' नलोपः । नामिन इत्यकृत्वा नामीति करणं यत्र कार्य्यात् कार्यी स्वरो न्यूनो भवति तत्रैव नामिसंज्ञा स्यान्नान्यत्रेति ज्ञापनार्थं, तेन ग्लायति म्लायतीत्यादौ न गुणः । विशेषणविशेष्यभावस्तु वचनभेदेऽपि सामान्यविशेषभावेन, यथा वेदाः प्रमाणमिति । **अनवर्णा** इति बहुवचनं प्लुतसङ्ग्रहार्थम् ॥ **ऌदन्ताः समानाः**, ऌत् अन्ते अन्तो वा येषां ते । समानं तुल्यं मानं परिमाणं येषान्ते समानाः । 'समानस्य धर्मादिषु'

आ इ ई उ ऊ ऋ ॠ ऌ ॡ ॥ **ए ऐ ओ औ सन्ध्यक्षरम्** ॥८॥ ए ऐ ओ औ इत्येते सन्ध्यक्षराणि स्युः ॥ **अं अः अनुस्वारविसर्गौ** ॥९॥ अकारावुच्चारणार्थौ । 'अं' इति नासिक्यो वर्णः, 'अः' इति च कण्ठ्यः, एतौ यथासङ्ख्यमनुस्वारविसर्गौ स्याताम् ॥ **कादिर्व्यञ्जनम्** ॥१०॥ कादिर्वर्णो हपर्यन्तो व्यञ्जनं स्यात् । क ख ग घ ङ, च छ ज झ ञ, ट ठ ड ढ ण, त थ द ध न, प फ ब भ म, य र ल व, श ष स ह ॥ **अपञ्चमान्तस्थो धुट्**

इति समानस्य संभावः, अत्रावर्णादीनां समानता नाऽऽकारतः विलक्षणत्वात्, किन्तु उदात्तानुदात्तस्वरितसानुनासिकनिरनुनासिकलक्षणपरिमाणभेदात् ॥ **ए ऐ ओ औ संध्यक्षरम्**, एश्च ऐश्च ओश्च औश्च ए ऐ ओ औ, सूत्रत्वाद्विभक्तिलोपः । सन्धानं सन्धिः, सन्धावक्षरं सन्ध्यक्षरम् । अत्र स्पष्टप्रतिपत्त्यर्थं सन्ध्यभावः, अथवा 'चादि स्वरोऽनाङ्' इति सूत्रेणासन्धिः । **सन्ध्यक्षराणीति**, अवर्णस्येवर्णेन सह सन्धावेकारः एकारैकाराभ्यामैकारः अवर्णस्योवर्णेनौकार ओकारौकाराभ्यामौकार इति सन्ध्यक्षराणि विज्ञेयानि ॥ **अं अः अनुस्वारविसर्गौ**, अंश्च अश्च अंअः सूत्रत्वाल्लोपः । अनु औस्वं शब्दोपतापयोः अनुस्वर्यत इत्यनुस्वारः, भावाकर्त्रोर्घञ् । सृजिंच् विसर्गे, विसृज्यत इति विसर्गः, घञ् । अनुस्वारश्च विसर्गश्चाऽनुस्वारविसर्गौ । **अकाराविति**, अकारोत्तरं विद्यमानयोरेकबिन्दुबिन्दुद्वययोरेवानुस्वारविसर्गसंज्ञकत्वाद्बिन्दुमात्राभिव्यङ्ग्यो नासिक्यो वर्णविशेषोऽनुस्वारः, बिन्दुद्वयमात्राभिव्यङ्ग्यः कण्ठ्यो वर्णविशेषो विसर्गः ॥ **कादिः व्यञ्जनम्**, क आदिर्यस्य सः कादिः । वि अञ्जौप् व्यक्तिम्रक्षणगतिषु, व्यज्यते प्रकटीक्रियतेऽर्थोऽनेनेति करणाधारेऽनट् प्रत्ययः । व्यञ्जनं स्वराणामर्थप्रकाशने उपकारकं भवति । एवमनुस्वारविसर्गयोरपि व्यञ्जनसंज्ञा विज्ञेया ॥ **अपञ्चमान्तस्थो धुट्**,

॥११॥ वर्गपञ्चमान्तस्थावर्ज्जः कादिर्वर्णो धुट् स्यात् । क ख ग घ, च छ ज झ, ट ठ ड ढ, त थ द ध, प फ ब भ, श ष स ह ॥ **पञ्चको वर्गः** ॥१२॥ कादिषु वर्णेषु यो यः पञ्चसङ्ख्यापरिमाणो वर्णः स स वर्गः स्यात् । क ख ग घ ङ, च छ ज झ ञ, ट ठ ड ढ ण, त थ द ध न, प फ ब भ म ॥ **आद्यद्वितीयशषसा अघोषाः** ॥१३॥ वर्गाणामाद्यद्वितीया वर्णाः शषसाश्चाऽघोषाः स्युः । क ख, च छ, ट ठ, त थ, प फ, श ष स ॥ **अन्यो घो-**

पञ्चानां पूरणः पञ्चमः, अन्ते तिष्ठन्तीति अन्तस्थाः, पञ्चमाश्चान्तस्थाश्च पञ्चमान्तस्थाः, न विद्यन्ते पञ्चमान्तस्थाः यत्रासावपञ्चमान्तस्थः । धुक्षि धिक्षि सन्दीपने, धुक्षते इति धुट् किप् । कादिरित्यनुवर्त्तते, **वर्गपञ्चमान्तस्थावर्ज** इति, वर्गपञ्चमाः ङञणनमाः, अन्तस्थाश्च यरलवाः, एतान्वर्ज्जयित्वेत्यर्थः ॥ **पञ्चकः वर्गः**, पञ्च सङ्ख्या मानमस्येति पञ्चकः । 'सङ्ख्याडतेश्चाशत्तिष्टेः क' इति कः । वृग्ट् वरणे, वृणोति आत्मीयमेकत्वेन व्यवस्थापयतीति वर्गः, 'गम्यमी'ति गप्रत्ययः । सजातीयवर्णसमुदायो वर्गः, स च कवर्गादिभेदेन ज्ञेयः ॥ **आद्यद्वितीयशषसाः अघोषाः**, आदीयतेऽर्थोऽस्मादित्यादिः । आदौ भवः आद्यः, 'दिगादिदेहांशायु' इति यप्रत्ययः । द्वयोः पूरणो द्वितीयः, ' द्वेस्तीये 'ति तीयप्रत्ययः । आद्यश्च द्वितीयश्च शश्च षश्च सश्च आद्यद्वितीयशषसाः । **अघोषाः**, घुषृ शब्दे, घोषणं घोषः, न विद्यते घोषो ध्वनिर्येषान्ते अघोषाः । इह चानुदरा कन्या इतिवदघोषाणामल्पत्वादिहेतुना घोषाभावाऽऽरोपो ज्ञातव्यः । **अघोषा इति**, अल्पत्वादिनाऽऽरोपितघोषाभाववन्त इत्यर्थः । अत्र बहुव्रीहिणा मत्वर्थस्य लाभान्न मतुः कृतः, 'न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकर ' इति न्यायाच्च, कर्म्मधारयापेक्षयात्र बहुव्रीहौ लाघवं विज्ञेयम् ॥ **अन्यः घोषवान्**, घोषोऽस्यास्तीति घोष-

षवान् ॥१४॥ अघोषेभ्योऽन्यः कादिर्वर्णो घोषवान् स्यात् । ग घ ङ, ज झ ञ, ड ढ ण, द ध न, ब भ म, य र ल व, ह ॥ **यरलवा अन्तस्थाः ॥१५॥** एते अन्तस्थाः स्युः ॥ **अं अः ५ क ५ पशषसाः शिट् ॥१६॥** अकपा उच्चारणार्थाः, अनुस्वारविसर्गौ वज्रगजकुम्भाऽऽकृती च वर्णौ, शषसाश्च शिटः स्युः ॥ **तुल्यस्थानाऽऽस्यप्रयत्नः स्वः ॥१७॥** स्थानं कण्ठादि । "अष्टौ स्थानानि

वान् । 'तदस्यास्ति' इति मतुः । **अघोषेभ्योऽन्य** इति, गघङादीनामघोषाऽपेक्षयाऽन्यत्वमतिशयितघोषवत्त्वाद्बोध्यम् ॥ **यरलवाः अन्तस्थाः**, यश्च रश्च लश्च वश्च यरलवाः । स्पर्शोष्मणोरन्तर्मध्ये तिष्ठन्तीति अन्तस्थाः । वर्णविशेषणमप्यन्तस्थाशब्दो बाहुलकत्वात् स्त्रीलिङ्गः, बहुवचनं सानुनासिकादिभेदपरिग्रहार्थम् । यलवाः सानुनासिकनिरनुनासिकभेदवन्तो भवन्ति ॥ **अं अः ५ क ५ पशषसाः शिट्**, अंश्च अश्च ५ कश्च ५ पश्च शश्च षश्च सश्च अं अः ५ क ५ पशषसाः । बहुवचनं वर्णेष्वपठितयोः ५ क ५ पयोः वर्णत्वार्थम् । शिपृंप् विशेषणे, शिनष्टीति शिट्, क्विप् । विषयनामत्वात् शिट्धुटोः पुंस्त्वम् । **वज्रगजकुम्भाकृतीति**, वज्रश्च गजकुम्भश्च वज्रगजकुम्भौ तयोरिवाऽऽकृतिः ययोस्तौ वज्रगजकुम्भाकृती । कपूर्ववर्त्तिनः वज्राऽऽकृतित्वं पपूर्ववर्तिनश्च गजकुम्भाकृतित्वं विज्ञेयम् । एतौ द्वौ न स्वतन्त्रौ, नाऽपि पूर्ववर्णसम्बद्धौ, किन्तु प्ररूपकखपफवर्णसम्बद्धावेव भवतः, अनयोः रेफादेशत्वात्, रेफस्य च वर्णत्वादनयोरपि वर्णत्वसिद्धिः ॥ **तुल्यस्थानाऽऽस्यप्रयत्नः स्वः**, तुलण् उन्माने तोलनं तुला, 'भिदाद्यङि' तुला, तुलया सम्मितः तुल्यः । 'हृद्यपद्ये'ति तुल्येति निपातः । ष्ठां गतिनिवृत्तौ, स्थीयतेऽत्रेति स्थानं, करणाधारेऽनट् । असूच् क्षेपणे, अस्यतेऽनेनेति 'ऋवर्णेव्यञ्जनाद्' घ्यण् । यतैङ् प्रयत्ने, प्रयतनं प्रयत्नः, स्वः । स्थानास्य प्रयत्नाभ्यां यो वर्णो

वर्णानामुरः कण्ठः शिरस्तथा । जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च

यं वर्णं प्रति तुल्यस्तं प्रति स स्वसंज्ञो भवतीत्यर्थः । तत्रावर्णकवर्गहकारविसर्जनीयाः कण्ठ्याः । इवर्णचवर्गयशास्तालव्याः । उवर्णपवर्गोपध्मानीया ओष्ठ्याः । ऋवर्णटवर्गरषा मूर्द्धन्याः । ऌवर्णतवर्गलसा दन्त्याः । एऐ तालव्यौ कण्ठतालव्यावित्यन्ये । ओऔ ओष्ठ्यौ कण्ठ्योष्ठ्यावित्यन्ये, वो दन्त्योष्ठः, अं इति नासिक्यो वर्णः । अः इति कण्ठ्यः, जिह्वामूलीयो जिह्वयः, ङञणनमाः स्वस्थाननासिक्यस्थानाः । स्पृष्टं करणं स्पर्शानाम्, स्पर्शा वर्ग्याः । ईषत्स्पृष्टं करणमन्तस्थानाम्, ईषद्विवृतकरणमूष्मणाम्, उष्माणः शषसहाः, विवृतं करणं स्वराणाम् । स्वरेषु एओ विवृततरौ, ऐऔ अतिविवृततरौ । आस्यग्रहणं बाह्यप्रयत्ननिवृत्त्यर्थं, ते हि ' आसन्न ' इत्यत्रैवोपयुज्यंते, न स्वसंज्ञायाम् । के पुनस्ते बाह्यप्रयत्नाः ? विवारसंवारौ श्वासनादौ घोषवदघोषवन्तावल्पप्राणमहाप्राणावुदात्तानुदात्तस्वरिताः । कथं पुनरेते आस्यबाह्याः स्पृष्टतादयस्त्वान्तराः ? उच्यते, वायुना कोष्ठेऽभिहन्यमानेऽमीषां प्रादुर्भावात्, स्पृष्टतादीनान्तु कण्ठादिस्थानाभिघाते सम्भवात् । तथा च शिष्टाः पठन्ति, नाभिप्रदेशात् प्रयत्नप्रेरितः प्राणो नाम वायुरूर्ध्वं सङ्क्रामन्नुरःप्रभृतीनामन्यस्मिन्स्थाने प्रयत्नेन विधार्य्यते, स विधार्यमाणः स्थानमभिहन्ति, तस्मात्स्थानाभिघातात् ध्वनिरुत्पद्यते, सा वर्णश्रुतिः, सः वर्णस्यात्मलाभः । तत्र वर्णध्वनावुत्पद्यमाने यदा स्थानकरणप्रयत्नाः परस्परं स्पृशन्ति तदा स्पृष्टता, ईषत्स्पर्शने ईषत्स्पृष्टता, एवं सामीप्येन संवृतता दूरेण विवृतता च । स्थानं कण्ठादीति, पुद्गलस्कन्धस्य पूर्वरूपपरित्यागेन वर्णरूपताऽऽपत्तिर्यत्र तत्स्थानम्, तच्च स्थानं कण्ठादि, तत्स्थानप्रदर्शकं पाणिनिशिक्षाकारिकामुपन्यस्यति, अष्टा-

तालु च "॥ १ ॥ आस्ये प्रयत्न आस्यप्रयत्नः स्पृष्टतादिः तुल्यौ वर्णा-

---

विति । अकारभेदानाऽष्टे, तत्रेति, यलवानामिति, रेफोष्मणान्तु तुल्यस्थानाऽऽस्यप्रयत्नाऽभावात् न परस्परं स्वत्वम् । स्वस्वापेक्षया तु स्वत्वं स्यादेव । वर्गाणां प्रथमद्वितीयाः शषसविसर्गजिह्वामूलीयोपध्मानीयाश्च विवाराः श्वासाः अघोषाश्च । वर्गाणां तृतीयचतुर्थपञ्चमाः अन्तस्थाः हकारानुस्वारौ च संवाराः नादाः घोषाश्च । वर्गाणां प्रथमतृतीयपञ्चमाः अन्तस्थाश्चाल्पप्राणाः, शिष्टाः सर्वे महाप्राणाः ॥

वर्णानां भेदाः	भेदपरिज्ञानकोष्टकम् ।		
	अइउऋऌ	अइउऋऌएऐओऔ	अइउऋऌएऐओऔ
१	ह्रस्वोदात्तानुनासिकः	दीर्घोदात्तानुनासिकः	प्लुतोदात्तानुनासिकः
२	ह्रस्वोदात्ताऽननुनासिकः	दीर्घोदात्तानननुनासिकः	प्लुतोदात्ताऽननुनासिकः
३	ह्रस्वाऽनुदात्तानुनासिकः	दीर्घानुदात्तानुनासिकः	प्लुतानुदात्तानुनासिकः
४	ह्रस्वानुदात्ताऽननुनासिकः	दीर्घानुदात्तानननुनासिकः	प्लुतानुदात्तानननुनासिकः
५	ह्रस्वस्वरिताऽनुनासिकः	दीर्घस्वरितानुनासिकः	प्लुतस्वरितानुनासिकः
६	ह्रस्वस्वरितानननुनासिकः	दीर्घस्वरितानननुनासिकः	प्लुतस्वरिताऽननुनासिकः

वाह्याभ्यन्तरप्रयत्नस्थानयन्त्रकम् ।

वाह्यप्रयत्नाः	विवारश्वासाघोषाल्पप्राणाः	विवारश्वासाघोषमहाप्राणाः	संवारनादघोषाल्पप्राणाः			संवारनादघोषमहाप्राणाः		स्थानानि
			नासिक्यः					
वर्णाः	क ख च छ ट ठ त थ प फ	श ष स	ग ङ ज ञ ड ण द न ब म	अ	इएऐ ऋ ऌ उओऔ	य र ल व	घ झ ढ ध भ	ह	:	कण्ठ्याः तालव्याः मूर्द्धन्याः दन्त्याः ओष्ठ्याः (व)
आन्तरप्रयत्नाः	स्पृष्टाः	ईषद्विवृताः	स्पृष्टाः	ह्रस्वः संवृतः (केचित्)	विवृताः	ईषत्स्पृष्टाः	स्पृष्टाः	ईषद्विवृताः	×क	जिह्वामूलीयः

न्तरेण सदृशौ स्थानाऽऽस्यप्रयत्नौ यस्य स वर्णस्तं प्रति स्वः स्यात् । तत्र त्रयोऽकारा उदात्तानुदात्तस्वरिताः प्रत्येकं सानुनासिक–निरनुनासिकभेदात् षट् । एवं दीर्घप्लुतावित्यष्टादश भेदा अवर्णस्य, ते सर्वे कण्ठस्थाना विवृतकरणाः परस्परं स्वाः । एवमिवर्णास्तावन्तस्तालव्या विवृतकरणाः स्वाः । उवर्णा ओष्ठ्या विवृतकरणाः स्वाः । ऋवर्णा मूर्द्धन्या विवृतकरणाः परस्परं स्वाः । ऌवर्णा दन्त्या विवृतकरणाः परस्परं स्वाः । सन्ध्यक्षराणां ह्रस्वा न सन्ति इति तानि प्रत्येकं द्वादशभेदानि । तत्र एकारास्तालव्या विवृततराः स्वाः । ऐकारास्तालव्या अतिविवृततराः स्वाः । ओकारा ओष्ठ्या विवृततराः स्वाः । औकारा ओष्ठ्या अतिविवृततराः स्वाः । वर्ग्याः पञ्च पञ्च परस्परं स्वाः । यलवानामनुनासिकोऽननुनासिकश्च द्वौ भेदौ परस्परं स्वौ ॥ **स्यौजसमौशस्टाभ्यांभिस्ङेभ्यांभ्यस्ङसिभ्यांभ्यस्ङसोसाम्ङ्योस्सुपां त्रयी त्रयी प्रथमाऽऽदिः** ॥१८॥ स्यादीनां प्रत्ययानां त्रयी त्रयी यथासङ्ख्यं प्रथमाद्वितीयातृतीयाचतुर्थीपञ्चमीषष्ठीसप्तमी च स्यात् ॥ **स्त्यादिर्विभक्तिः** ॥१९॥ 'स्' इति 'ति' इति चोत्सृष्टानुबन्धस्य सेस्तिवश्च ग्रहणम् । स्यादयस्तिवादयश्च

सिश्च औश्च जश्च स्यमौजसः । अम् च औश्च शश्च अमौशसः । इत्येवं द्वन्द्वः । ततः स्यौजसश्च अमौशसश्चेत्येवं द्वन्द्वस्तेषाम् । त्रयोऽवयवा यस्याः सा त्रयी, 'द्वित्रिभ्यामयड्वा,' वीप्सायां द्वित्वम् । प्रथमा आदिर्यस्याः सा प्रथमादिः ॥ **स्यादीनामिति,** सिजस्शस् टाङेङसिङस्ङिसुप्प्रत्ययेषु इजशटङपा अनुबन्धाः ज्ञेयाः ॥ स् च ति च स्ती, स्ती आदिर्यस्यासौ स्त्यादिः विभज्योप् आमर्दने, विभज्यन्ते विभागशः प्रकाश्यन्ते कर्तृकर्मादयोऽर्था अनयेति विभक्तिः ॥ **उत्सृष्टानुबन्धस्येति,** अनुबध्यते कार्यार्थमुपदिश्यते इत्यनुबन्धः । उत्सृष्टः व्यक्तोऽनुबन्धो येन सः तस्य । सूत्रे आदिशब्दस्य व्यवस्था-

सुप्स्यामहिपर्यन्ता विभक्तयः स्युः ॥ **तदन्तं पदम्** ॥२०॥ स्याद्यन्तं त्याद्यन्तं च पदं स्यात्, धर्मो वः स्वं ददाति, नः शास्त्रम् ॥ **नाम सिदय्व्यञ्जने** ॥२१॥ सिति प्रत्यये यवर्ज्जव्यञ्जनादौ च परे पूर्वं नाम पदं स्यात्, भवदीयः, पयोभ्याम् । अयिति किम् ?

वाचित्वेन पूर्वाचार्यसम्मतानुबन्धव्यवस्थावतां स्यादीनां तिवादीनाञ्च विभक्तिसंज्ञां प्रकाशयति–**स्यादय इति** ॥ **सा** विभक्तिरन्ते यस्य तत्तदन्तम्, पदिच् गतौ, पद्यते गम्यते कारकसंसृष्टोऽर्थोऽनेनेति पदम् ॥ ननु 'प्रत्ययः प्रकृत्यादेः' इति परिभाषासूत्रेण तदन्तविधेर्लाभात् 'सा पद'मित्येव सूत्रं कर्त्तव्यं, न तु 'तदन्तं पद'मिति शङ्कायामाह–**धर्मो वः स्वं ददाति, नः शास्त्रमिति,** अयं भावः–यदि उक्तपरिभाषया तदन्तस्य लाभस्तर्हि 'स्त्यादिर्विभक्तिः' इत्यत्रापि तदन्तलाभेन स्त्याद्यन्तस्य विभक्तिसंज्ञा प्राप्नोति, तथा च सति धर्मः ददाति इत्यादीनां स्त्याद्यन्तानां विभक्तिसंज्ञतया पदसंज्ञाऽभावाद्युष्मदस्मदोः वस्नसादेशौ न स्याताम्, अतः अन्तग्रहणं कृतम्, तथा च संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्तीति सूचितम् । एवञ्च 'संज्ञोत्तरपदाधिकारे प्रत्ययग्रहणे प्रत्ययमात्रस्यैव ग्रहणं न तदन्तस्य' इति न्यायस्यान्तपदेन सूचनं भवति । फलञ्च स्त्यादिर्विभक्तिरित्यादावन्तग्रहणाभावः ॥ **नमति** धातवे इति नाम, 'सात्मन्नात्मन्निति' साधुः, स इत् अनुबन्धो यस्यासौ सित्, न य् अय्, अय् च तद्व्यञ्जनञ्च अय्व्यञ्जनं, सिच्च अय्व्यञ्जनं च सिदय्व्यञ्जनं तस्मिन्, पदमित्यनुवर्त्तते । भवतोऽयं भवदीयः, 'भवतोरिकणीयसौ' इतीयस्, अनेन पदत्वात् 'धुटस्तृतीयः' इति तस्य दः । अत्र भवत इति विग्रहान्तर्गतषष्ठीविभक्तिमादाय भवच्छब्दस्य पदत्वे सिद्धे सिद्ग्रहणं व्यर्थं सन्नियमयति, सानुबन्धप्रत्यये परे एव पदसंज्ञा, न तु प्रत्ययान्तर इति, अतः भगवत इदं भागवतमित्या-

वाच्यति ॥ **नं क्ये** ॥२२॥ 'क्ये' इति क्यन्क्यङ्क्यङ्षां ग्रहणम्, नान्तं नाम क्ये परे पदं स्यात् । राजीयति, राजायते, चर्मायति ॥ **न स्तं मत्वर्थे** ॥२३॥ सान्तं तान्तं च नाम मत्वर्थे परे पदं न स्यात्, यशस्वी, तडित्वान् ॥ **मनुर्नभोऽङ्गिरो वति**

दावण् प्रत्यये परे न पदसंज्ञा । पयस्भ्याम्, 'सोरुः,' घोषवति, उ, अवर्णस्येति ओ । ननु नाम सिद्ध्यञ्जने इत्येव सूत्र्यतां, किमित्ययग्रहणमिति शङ्कायामाह **वाच्यतीति,** वाचमिच्छति वाच्यति, 'अमाव्ययात्क्यन्' तिव् शव् । अत्र यकारे परे वाचः पदत्वप्राप्त्या चकारस्य कः स्यात्, तद्व्यावृत्त्यर्थं यवर्जनम् । यद्यपि राजीयतीत्यादौ नाम सिद्ध्यञ्जने इति पदत्वप्राप्त्या 'नं क्ये' इति सूत्रं व्यर्थं सत् क्यप्रत्यये परे नकारान्तमेव नाम पदसंज्ञं भवतीति नियमयति तथा च वाच्यतीत्यादौ न पदसंज्ञा प्राप्नोतीति यवर्जनं व्यर्थं, तथापि सत्सु साधु सत्यमित्यादौ पदसंज्ञाव्यावृत्तये यवर्जनं कृतम् ॥ **नं क्ये** ॥ **क्यन्क्यङ्क्यङ्षां ग्रहणमिति,** नात्र क्यक्यपोर्ग्रहणं नामाधिकारत्वात् । राजानमिच्छति राजीयति 'अमाव्ययात्क्यन्' पदत्वात् क्यनि ईकारः । राजेवाऽऽचरति राजायते, क्यङ् 'दीर्घश्चियङि'ति दीर्घः । अचर्म चर्म भवति चर्मायति, अत्र चर्मन् शब्दश्चर्मवदर्थकः, चर्मणः प्रागतत्त्वासम्भवेन च्व्यर्थाघटनात्, पदत्वान्नकारलोपः । 'डाच् लोहितादिभ्यः षित्' इति क्यङ्प्, अयिति प्रतिषेधात् पूर्वेणाऽप्राप्ते वचनम् ॥ **न स् च तश्च स्तं,** मतोरर्थः मत्वर्थः, मत्वर्थोऽस्त्यस्येति मत्वर्थस्तस्मिन् ॥ यशोऽस्यास्तीति यशस्वी, 'अस्तपोमायामेध्यस्रजो विन्' इति विन्, 'इन् हन् पूषे'ति दीर्घत्वम्, तडिद्विद्यते यस्यासौ, 'तदस्या' इति मतुप् । 'मावर्णान्त' इति मस्य वः, अत्र पदत्वनिषेधाद्रेफदकारौ न भवतः । तथा मतोरपि मत्वर्थाऽव्यभिचारान्मत्वर्थशब्देन ग्रहणम् । नाम सिदय्व्यञ्जन

॥२४॥ एतानि वति परे पदं न स्युः । मनुष्वत्, नभस्वत्, अङ्गिरस्वत् ॥ **वृत्त्यन्तोऽसषे** ॥२५॥ परार्थाभिधायी समासादिर्वृत्तिः,

---

इति प्राप्तौ प्रतिषेधोऽयम् ॥ **मनुश्च** नभश्च अङ्गिराश्च मनुर्नभोऽङ्गिरः वति सप्तमी ॥ मनुरिव मनुष्वत्, नभ इव नभस्वत्, अङ्गिरा इवाङ्गिरस्वत्, 'स्यादेरिवे' इति वत्, 'नाम्यन्तस्थे'ति वत्वम् । अत्र पदत्वाभावान्न 'सोरुः', पदमध्यत्वात्तु मनुष्वदित्यत्र षत्वं स्यात् ॥ वृतूङ् वर्तने, वर्तनं वृत्तिः, स्त्रियां क्तिः, वर्त्तनन्तु अवयवार्थोऽपेक्षया परस्य समुदायार्थस्य प्रतिपादनम । यद्वा वर्तन्ते स्वार्थापरित्यागेन पदान्यत्रेति आधारे क्तौ वृत्तिः पदसमुदायादिरूपा । सा त्रिधा समासवृत्तिः, तद्धितान्तवृत्तिः, नामधातुवृत्तिश्चेति । यथा—राजपुरुषः, औपगवः, पुत्रकाम्यतीत्यादि । वृत्तेरन्तो वृत्त्यन्तः, सस्य षः सषः, न सषः असषः तस्मिन् ॥ **परार्थाभिधायीति**, अवयवार्थापेक्षयाऽन्यस्य समुदायार्थस्याभिधायकम्, यद्घटकैः पदैरितरार्थान्वितस्वार्थस्यैवोपस्थानं सा वृत्तिरिति यावत् । **परमदिवाविति**, अत्र परमदिव् औ, इति दशायां औ विभक्तेर्वृत्त्यघटकत्वेन परमदिव् इत्यस्य वृत्त्यन्तत्वं बोध्यम् । परमा द्यौर्ययोस्तौ परमदिवौ, 'परतः स्त्री पुंवत्' इति पुंवद्भावः । दण्डाः सन्त्येषामिति दण्डिनः । बहवो दण्डिनो ययोस्तौ, यद्वा ईषदूनौ दण्डिनौ बहुदण्डिनौ, 'नाम्नः प्राग्बहुर्वेति' पूर्वं बहुप्रत्ययः । षिंचीत् क्षरणे, सिञ्चतीति सेक्, दध्नः सेक् दधिसेक् । अत्र षत्वे कर्त्तव्येऽनेन सूत्रेण पदसंज्ञायां सकारस्य पदादित्वेन 'नाम्यन्तस्थे'त्यनेन षत्वाभावः प्रसिध्यति, अन्तर्वर्त्तिन्या विभक्तेः स्थानिवद्भावेन पदत्वं प्राप्तमनेन निषिध्यते । वृत्तिग्रहणं किम् ? चैत्रस्य कर्म्म । अन्तग्रहणं किम्, राजवाक् । वाक्त्वक्स्रुच इति त्रयाणां वृत्तौ न द्वयोः प्रथग्वृत्तिरिति मध्यमस्य निषेधो न भवति । अथ वाक्त्वचमित्यत्र समासान्ते अप्रत्यये सति वृत्त्यन्तत्वाभा-

तस्या अन्तः-अवसानं पदं न स्यात्, असषे-सस्य तु षत्वे पदमेव । परमदिवौ, बहुदण्डिनौ । असंष इति किम् ? दधिसेक् ॥ **सविशेषणमाख्यातं वाक्यम् ॥२६॥** प्रयुज्यमानैरप्रयुज्यमानैर्वा विशेषणैः सहितं प्रयुज्यमानमप्रयुज्यमानं वा आख्यातं वाक्यं स्यात् । धर्म्मो

वात्पदत्वं प्राप्नोति, तथा च कत्वं स्यात्, उच्यते, समासानन्तरं समासान्तप्रत्ययस्य विधानेन त्वचो वृत्त्यन्तत्वान्न कत्वम्, समासान्तप्रत्ययश्च वृत्तिबहिर्भूत इति । वृत्त्यन्तशब्दात् सेः ओकारनिर्देशः, 'अन्तरङ्गं बहिरङ्गात्' 'न स्वरान्तर्ये' इति न्यायौ सूचयति ॥ विशिष्यतेऽर्थोऽनेनेति विशेषणं करणे अनट्, सह विशेषणैर्वर्त्तते यत्तत्सविशेषणम्, ख्याङ्क् प्रकथने, आख्यायत इत्याख्यातम्, वचंक् भाषणे, उच्यत इति वाक्यम् ॥ **प्रयुज्यमानैरित्यादि,** क्रियाविशेषस्य तत्साधनस्य वाऽव्यधानेनातद्रूपव्यवच्छेदकं साक्षाद्विशेषणमुच्यते, विशेषणान्तरद्वारेण च व्यवच्छेदकं परम्पराविशेषणमुच्यते, उभयविधैरपि विशेषणैः प्रयुज्यमानैरप्रयुज्यमानैर्वा सहितं तथाविधं विशेष्यमाख्यातं वाक्यं स्यादित्यर्थः । आख्यातपदेन क्रियावाचकपदस्य ग्रहणं, न तु त्याद्यन्तमात्रस्य, तेन चैत्रेण शयितव्यमित्याद्यपि वाक्यं भवति । धर्मो वो रक्षतु, 'पदाद्युग्' इति वस् । रक्ष पालने, पञ्चमी तुव् । इदं प्रयुज्यमानविशेषणं, लुनीहि३ 'क्षियाशीः' इति प्लुतः, एतदप्रयुज्यमानविशेषणम् । प्रयुज्यमानाख्यातकं यथा—पृथुकांश्च खाद, शीलं ते स्वमित्यप्रयुज्यमानाख्यातकम् । नन्वर्थावबोधाय शब्दप्रयोगः क्रियते, तत्र यद्यप्रयुज्यमानमपि पदं विशेषणविशेष्यभावं प्राप्नुयात्तर्ह्यतिप्रसङ्गः स्यादन्यस्याऽपि तत्प्राप्तेः, अप्रयुज्यमानत्वाविशेषात्, **सर्वं** सर्वस्य विशेषणं विशेष्यं च स्यान्नियामकाभावात्, क्वचित्तयोः प्रयोगस्य व्यर्थता च स्यादिति चेन्न, लोकात्प्रकरणाद्वा विशेष्यविशेषणयोर्नियतयोः प्राप्त्या

वो रक्षतु, लुनीहि३ पृथुकाँश्च खाद, शीलं ते स्वम् ॥ **अधातुविभक्तिवाक्यमर्थवन्नाम** ॥२७॥ धातुविभक्त्यन्तवाक्यवर्ज्जमर्थवच्छब्दरूपं नाम स्यात् । वृक्षः, स्वः, धवश्च । अधातुविभक्तिवाक्य-

---

तयोरप्रयोगात्, अप्राप्ते हि अर्थवदिति न्यायात् ॥ **दधाति**, क्रियार्थत्वमिति धातुः, धातुश्च विभक्तिश्च वाक्यञ्च धातुविभक्तिवाक्यं ततो नञ्समासः । ऋंक् गतौ, अर्यते शिष्टेनेत्यर्थः । अभिधेयद्योत्यलक्षणोऽर्थोऽस्यास्तीत्यर्थवन्नाम ॥ **विभक्त्यन्तेति**, 'प्रत्ययः प्रकृत्यादेरिति परिभाषासूत्रेण विभक्त्यन्तस्य लाभः । **अर्थवच्छब्दरूपमिति**, अर्थवदिति विशेषणत्वेन स्वानुगुणं विशेष्यमध्याहृतं शब्दरूपमिति । अर्थश्च द्वेधा, अभिधेयरूपः द्योत्यरूपश्च । अभिधेयश्च स्वार्थद्रव्यलिङ्गसङ्ख्याशक्तिभेदात् पञ्चधा, द्योत्यश्च समुच्चयादिः, एतौ द्वौ शब्दे वाच्यतया स्त इत्यर्थवच्छब्दरूपं विज्ञेयम् । ओव्रश्चौत् छेदने, वृश्चति काष्ठार्थिभिरिति वृक्षः । हनंक् हिंसागत्योः, ह्यस्तनी दिव्, ' अड्धातोः ' अडागमः ' व्यञ्जनादेः सश्चे 'ति दिव् लोपः । अत्र नामत्वाऽभावा ' न्नाम्नो नो ' इति न लोपो न । यद्यप्यहन् इत्यस्य विभक्त्यन्तत्वान्न नामत्वमिति धातुवर्जनं व्यर्थ; तथापि हन्तीत्यत्र विभक्तिपूर्वस्य हनो नामत्वे ' नाम सिदय्व्यञ्जने ' इति पदत्वे च न लोपः स्यात्तद्व्यावृत्तये धातुवर्जनम् । **वृक्षानिति**, अत्र नामत्वे नलोपः स्यात्, न च ' शसोऽता सश्च नः पुंसि ' इति नकारविधानसामर्थ्यान्नाऽत्र नलोप इति विभक्त्यन्तवर्जनं व्यर्थमिति वाच्यम्, कांस्कानित्यादौ नकारविधानस्य चरितार्थत्वेन नलोपस्याऽत्र दुर्वारत्वात् । विभक्त्यन्तवर्जनाच्चाऽऽबादि प्रत्ययान्तानां नामसंज्ञा स्यादेव । राधं साधंट् संसिद्धौ, साध्नोति रत्नत्रयमिति साधुः, धर्मं । ब्रूंगुक् व्यक्तायां वाचि, साधुर्धर्मं ब्रूते, इत्यादिवाक्यस्य यद्यपि विभक्त्यन्तत्वान्न नामसंज्ञेति शङ्का

मिति किम् ? अहन्, वृक्षान्, साधुर्धर्म्मं ब्रूते ॥ **शिर्घुट् ॥२८॥** जस्शसादेशः शिर्घुट् स्यात् । पद्मानि तिष्ठन्ति पश्य वा ॥ **पुंस्त्रियोः स्यमौजस् ॥२९॥** *स्यादयः पुंस्त्रीलिङ्गयोर्घुटः स्युः । राजा, राजानौ, राजानः, राजानम्, राजानौ, सीमा, सीमानौ, सीमानः, सीमानम्* ॥ **स्वरादयोऽव्ययम् ॥ ३० ॥** स्वरादयोऽव्ययानि स्युः ।

सम्भवति, तथापि ब्रूत इत्यस्यैव विभक्त्यन्तत्वात् साधुर्धर्मं ब्रूते इति समुदायस्य च विभक्त्यन्तत्वाभावात् नामसंज्ञाप्राप्तौ स्यादिविभक्तिः स्यादतो वाक्यवर्ज्जनम्, एतद्वर्जनादेव समासादिसमुदायस्य नामत्वं भवति, यथा चित्रगुः ॥ **शिर्घुट्**, पद्म जस्, 'नपुंसकस्य शिः' 'स्वराच्छौ' नोऽन्तः 'निदीर्घः' । ष्ठां गतिनिवृत्तौ, षः सः निमित्तापाये इति न्यायात् ठः थः, अन्ति । 'श्नौतिकृवु' इति तिष्ठादेशः । 'लुगस्या' अलोपः । दृशृं प्रेक्षणे, पञ्चमी हि, *पश्यादेशः 'अतः प्रत्यया' दिति* हिलोपः । **जस्शसादेश** इति, अत्र जस्साहचर्यात् स्यादेरेव शसो ग्रहणं न तु तद्धितशसः, तेन एकशो ददातीत्यादौ न शसो घुट्संज्ञा ॥ **पुमांश्च स्त्री च पुंस्त्रियौ** तयोः । अलौकिकोऽयं निर्देशोऽन्यथा स्त्रीपुंसयोरिति स्यात् । औश्च औश्च आवौ, सिश्च अम्च आवौ च जश्च स्यमौजस्, स्यमौजसमिति व्युत्क्रमाऽभिधानमौकारद्वयस्य ग्रहणाय । राजन्सि, 'निदीर्घः' 'दीर्घङ्या' 'नाम्नो नो' । स्यति सन्देहमिति सीमा, इदं स्त्रीलिङ्गस्योदाहरणम् ॥ **स्वरादिर्येषान्ते स्वरादयः** । विपूर्वः इंण्क् गतौ न व्येति, न क्षयं यातीत्यव्ययम्, 'लिहादिभ्योऽच्' ॥ सदृशं त्रिषु लिङ्गेषु सर्व्वासु च विभक्तिषु । वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥ **स्वरिति**, स्वर्गे परलोके च । **अन्तरिति**, मध्ये । **प्रातरिति**, प्रत्यूषे ॥ **चादिर्येषान्ते** । 'जस्येदोत्' 'एदैतोऽय्' 'सो रुः'

स्वर्, अन्तर्, प्रातरित्यादि ॥ **चाऽऽदयोऽसत्त्वे** ॥३१॥ अद्रव्ये वर्तमानाश्चादयोऽव्ययानि स्युः । वृक्षश्चेत्यादि ॥ **अधणन्तस्वाद्याशसः** ॥३२॥ धण्वर्जास्तस्वादयः शस्पर्यन्ता ये प्रत्ययास्तदन्तं नाम्ाव्ययं स्यात् । देवा अर्जुनतोऽभवन्, ततः, तत्र, बहुशः । अधणिति किम् ? पथिद्वैधानि ॥ **विभक्तिथमन्ततसाद्याभाः** ॥३३॥

'अतोऽति' 'अवर्णस्य' 'एदोतः' । सतो भावः सत्त्वम् । भावे त्वतल्, न सत्त्वमसत्त्वं तस्मिन् । लिङ्गसङ्ख्याद्याश्रयो द्रव्यं सत्त्वम् । वृक्षस् च 'चटते सद्वितीये' ॥ **न धण्** अधण् । तसुरादिर्यस्य तत् । अधण् च तत् तस्वादि च अधणन्तस्वादि, आ, शसः पंचमी ॥ अर्जुनस्य पक्षेऽर्जुनतः द्व्याश्रये तसुः, अव्ययम् । भू सत्तायाम्, ह्यस्तनी अन्, 'अड्धातो' रडागमः, कर्तरि शव्, नामिनो गुणः, 'ओदौतोऽव्' इति अभवन् । तनूयी विस्तारे, तनोति परोक्षप्रतीतिमिति तद्, तस्मादिति ततः, 'किमद्व्यादिसर्वादि' तस्प्रत्ययः । तस्मिन् तत्र 'सप्तम्या'ल्रप् । बहुभिः क्रीतो बहुशः, 'बह्वल्पार्था' इति शस् । द्वौ प्रकारौ एषां तानि द्वैधानि, 'तद्वति' धण् । पथां द्वैधानि पथिद्वैधानि ॥ **थम्** अन्ते येषान्ते थमन्ताः । तसादिर्येषां ते तसादयः । थमन्ताश्च ते तसादयश्च । विभक्तयश्च थमन्ततसादयश्च । विभक्तिथमन्ततसादीनामिवाऽऽभा छाया येषान्ते । अहमस्यास्तीति अहंयुः, 'ऊर्णाहंशुभम्मे' इति युस् । अस्ति विद्यमानं क्षीरं यस्याः सा अस्तिक्षीरा गौः । अत्राऽस्तिशब्दस्याऽव्ययत्वात् 'एकार्थं चाऽनेकं चे'ति समासः । कस्मात् कुतः । 'किमद्व्यादीति' तस्, केन प्रकारेण कथम् । अहं कृतं । येन तेन चिरेण अचिरेणान्तरेण । ते मे चिराय अह्नाय । चिरात् अकस्मात् । चिरस्याऽन्योन्यस्य मम । एकपदे अग्रे हेतौ रात्रौ वेलायां मात्रायामिति प्रथमादिविभक्त्यन्तप्रतिरूपकाः । अस्ति नास्ति अस्ति विद्यते भवति । एहि ब्रूहि मन्ये अस्तु भवतु पूर्यते

विभक्त्यन्ताभाः, थमवसानतसादिप्रत्ययान्ताभाश्चाऽव्ययानि स्युः । अहंयुः, अस्तिक्षीरा गौः, कथम्, कुतः ॥ **वत्तस्याम्** ॥ ३४ ॥ वत्-तसि-आम्प्रत्ययान्तमव्ययं स्यात् । मुनिवद् वृत्तम्, उरस्तः, उच्चैस्तराम् ॥ **क्त्वातुमम्** ॥३५॥ क्त्वा-तुम्-अम्प्रत्ययान्तमव्ययं स्यात् । कृत्वा, कर्तुम्, यावज्जीवमदात् ॥ **गतिः** ॥ ३६ ॥ गतिसंज्ञमव्ययं स्यात् । अदःकृत्य । " अतः कृकमि " इत्यादिना

स्यात् । आस आह वर्तते, न वर्तते, याति, न याति, पश्य पश्यत आतंक इति तिवादिविभक्त्यन्तप्रतिरूपकाः ॥ वच्च तसिश्च आम् च वत्तस्याऽऽम् । 'अनतो' बुधिं मनिं च ज्ञाने, मन्यते संसाराऽऽसारतामिति मुनिः । मुनेरर्हं मुनिवद्, 'तस्यार्हे' क्रियायां वत् अव्ययम् । उरसा एकदिक् उरस्तः, 'यश्चोरसः' तस् । इदमनयोर्मध्येऽतिशयेनोच्चैरित्युच्चैस्तराम् । 'द्वयोर्विभज्ये' तरप्, 'किन्त्याद्ये' इति आम् । अत्र च वत्तसि साहचर्यात् तद्धितस्याऽऽमो ग्रहणं नेतरस्य । उपलक्षणं चैतत्तेन 'धातोरनेकस्वरात्' इत्यादिना विहितस्याऽऽमो ग्रहणं, तथा च पाचयांचक्रुषा इत्यादावनुस्वारसिद्धिः । 'साहचर्यात् सदृशस्यैवे'ति न्यायस्याऽनित्यत्वात् ॥ क्त्वा च तुम् च अम् च क्त्वातुमम् । 'अनतो' ॥ अमिति णम्ख्यमोरुत्सृष्टानुबन्धयोर्ग्रहणं न द्वितीयैकवचनस्य, क्त्वातुम्साहचर्यात्, तथा च 'साहचर्यात् सदृशस्यैव' इति न्यायः सिद्ध्यति । डुकृंञ् करणे, करणं पूर्वं कृत्वा, 'प्राक्काले क्त्वा,' करणायेति कर्तुं क्रियायां क्रियार्थायां तुमण् । जीवप्राणधारणे, यावत्कालं जीव्यते यावज्जीवं, 'यावतो विन्दे'तिणम्, अदात् ॥ **गम्लृं** गतौ, गमनं गतिः, स्त्रियां क्तिः, 'यमिरमिनमि 'म् लोपः ॥ अदः करणं पूर्वं अदःकृत्य, क्त्वा । 'अनञः क्त्वो यप्' । अत्राव्ययत्वे 'अतः कृकमिकंसे'ति इति सकाराभावः । 'अग्रहानुपदेशेंतरदः' इति गतिसंज्ञा ज्ञातव्या ॥ **युजृंपी** योगे, प्रयोजनं

रः सो न स्यात् ॥ **अप्रयोगीत् ॥३७॥** इह शास्त्रे उपदिश्यमानो वर्णस्तत्समुदायो वा प्रयोगेऽदृश्यमान इत् स्यात् । एधते, यजते, चित्रीयते ॥ **अनन्तः पञ्चम्याः प्रत्ययः ॥ ३८ ॥** पञ्चम्यर्थाद् विहितोऽन्तशब्दाऽनिर्दिष्टः प्रत्ययः स्यात् । "नाम्नः प्रथमैकद्विबहौ" । वृक्षः । अनन्त इति किम्? आगमः प्रत्ययो मा भूत् ॥ **डत्यतु संख्यावत् ॥ ३९ ॥** डत्यन्तम-

---

प्रयोगः, 'भावाकर्त्रोर्घञ्' । प्रयोगोऽस्यास्तीति प्रयोगी, 'अतोऽनेकस्वर' इन् । न प्रयोगी अप्रयोगी । इंण्क् गतौ, एति गच्छतीति इत्, क्विप्, अप्रयोगीत् ॥ अप्रयोगीति संज्ञिनिर्देशः, इदिति संज्ञानिर्देशः । इत्संज्ञाविधानात् प्रयोगाभावः । **वर्णस्तत्समुदायो वेति**, कस्मैचित् कार्यार्थमुच्चार्यमाण एकवर्णो वा द्वित्र्यादिवर्णसमुदायो वा प्रयोगकालेऽदृश्यमान इत्संज्ञो भवतीत्यर्थः । एधीत्यत्रैकवर्ण इकारः, यजीं इत्यत्र ईकारानुस्वारौ, चित्रङ्, अत्राकारङकारौ । एधि वृद्धौ, वर्तमाने ते, कर्त्तरि शव्, इदित्वादात्मनेपदम् । यजीं देवपूजायाम्, ईदित्वात् फलवत्याऽऽत्मनेपदम् । चित्रङ् आश्चर्ये, चित्रमाश्चर्यं करोति, 'नमो वरि०' क्यनि ई, ङित्त्वादात्मनेपदम् ॥ **न विद्यतेऽन्तः**—अन्तशब्दो वाचको यस्य सः अनंतः । **पञ्चम्याः**, 'स्त्रीदूतः,' दास् । प्रति इंण्क् गतौ, प्रतीयतेऽर्थो येनासौ प्रत्ययः ॥ सूत्रे पञ्चमीति प्रत्ययोऽभिधीयते, स च प्रत्ययः न प्रकृतिमन्तरेणेति, प्रकृतेराक्षेपादाह **पञ्चम्यर्थादिति**, पञ्चम्यन्ताद्विहित इत्यर्थः । **आगमः प्रत्ययो मा भूदिति**, आगमस्य प्रत्ययत्वे हि अनन्ददित्यादौ नागमे कृते नन्द इत्यस्य धातुत्वाभावेनाऽडागमो न स्यात् । न च तन्मध्यपतितः तद्ग्रहणेन गृह्यते इति परिभाषया नागमविशिष्टस्यापि धातुत्वमक्षतमिति वाच्यम्, तथा सति इदमेवान्तग्रहणमुक्तपरिभाषाया अनित्यत्वं ज्ञापयति । अत एव यका सका इत्यादौ

त्वन्तं च संख्याकार्यभाक् स्यात् । कतिकः, यावत्कः ॥ **बहुगणं भेदे** ॥४०॥ बहुगणशब्दौ भेदवृत्ती सङ्ख्यावत् स्याताम् । बहुकः, गणकः । भेद इति किम् ? वैपुल्ये सङ्घे च मा भूत् ॥ **कसमासेऽध्यर्द्धः** ॥४१॥ अध्यर्द्धशब्दः के प्रत्यये समासे च विधेये सङ्ख्या-

---

'इचापुंसोऽनित्क्याप्परे' इति सूत्रेण इकाराप्राप्त्या 'अस्यायत्तक्षिपकादीना'मिति सूत्रेण यत्तदोरकारस्य इत्वप्रतिषेधः सार्थको भवति, अन्यथा ककारस्य प्रकृत्यवयवत्वे तु इत्वप्राप्तिरेव न स्यात् ॥ **डतिश्च अतुश्च डत्यतु, सङ्ख्यैव सङ्ख्यावत् 'स्यादेरिवे'** इति वत्प्रत्ययः । अव्ययम् ॥ अत्र डतिप्रत्ययः तद्धितविहित एव गृह्यते, अतुसाहचर्यात्, न तु धातोर्विहितस्य डतेः । डत्यत्वोः केवलयोः सङ्ख्यावत्संज्ञाविधाने फलाभावात्, संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्तीति परिभाषामुपेक्ष्य तदन्तविधेरङ्गीकारेणाह–**डत्यन्तमत्वन्तञ्चेति** । किं सङ्ख्या मानमेषां कति 'यत्तत्किमः सङ्ख्याया डतिर्वा' इति डतिप्रत्ययः । कतिभिः क्रीतः कतिकः । 'सङ्ख्याडतेश्चेति कः । यत्परिमाणमेषां यावन्तः, 'यत्तदेतदो डावादिः' इति अतुप्रत्ययः । यावद्भिः क्रीतः यावत्कः ॥ **बहुश्च** गणश्च बहुगणं **भेदे** ॥ भेदो नाम नानात्वमेकत्वप्रतियोगि । बहुभिः क्रीतो बहुकः । गणैः क्रीतो गणकः, 'सङ्ख्याडतेश्च कः' । बहुगणशब्दौ नियतविषयपरिच्छेदकारणे न भवत इति सङ्ख्याप्रसिद्धेरभावात् वचनम् । एवञ्चार्थान्तरवाचित्वे सति बहुत्ववाचिनो यदि सङ्ख्याकार्यं तर्हि बहुगणयोरेवेति नियमेन भूय्यादीनां वैपुल्याद्यर्थान्तरवाचिनां न सङ्ख्याकार्यम् ॥ **कश्च** समासश्च **कसमासम्** तस्मिन् । अधिकमर्धं यस्यासौ **अध्यर्धः** ॥ **अध्यर्द्धेन क्रीतं अध्यर्द्धकम्** । 'सङ्ख्याडतेः' कः । अध्यर्द्धेन शूर्पेण क्रीतं अध्यर्द्धशूर्पम् । 'मूल्यैः क्रीते' इकण्प्रत्ययः । 'अनाम्न्यद्विरि'ति तस्य लोपः । अत्र सङ्ख्यासमाहारे द्विगुः ॥

वत् स्यात् । अध्यर्द्धकम्, अध्यर्द्धशूर्पम् ॥ **अर्द्धपूर्वपदः पूरणः** ॥४२॥ अर्द्धपूर्वपदः पूरणप्रत्ययान्तः के प्रत्यये समासे च कार्ये संख्यावत् स्यात् । अर्द्धपञ्चमकम्, अर्द्धपञ्चमशूर्पम् ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ प्रथमाध्यायस्य प्रथमः पादः समाप्तः ॥

अर्धशब्दः पूर्वपदं यस्य सः । पूरयतीति पूरणः 'नन्द्यादिभ्यो'ऽन् 'रषृवर्णान्नोण' इति णत्वम् ॥ अध्यर्द्धपूर्वपद इति, समासावयवभूते पूर्वभागे पूर्वपदं, उत्तरभागे चोत्तरपदमिति प्रसिद्धिः । अर्द्धपञ्चमैः क्रीतं अर्द्धपंचमकम् । अर्द्धपञ्चमैः शूर्पैः क्रीतं अर्द्धपञ्चमशूर्पम् 'मूल्यैः क्रीते' इकण्, 'अनाम्नि' इति लोपः ॥

इति प्रथमाध्याये प्रथमपादस्यावचूरिपरिष्कारः समाप्तः ॥

द्वितीयः पादः ।

समानानां तेन दीर्घः ॥१॥ समानानां तेन समानेन परेण सह दीर्घः स्यात् । दण्डाग्रम्, दधीदम्, नदीन्द्रः ॥ **ऋलृति ह्रस्वो वा** ॥२॥ ऋति लृति च परे समानानां ह्रस्वो वा स्यात् ।

समानं तुल्यं मानं परिमाणं येषान्ते समानास्तेषाम्, तेन, **दीर्घः** ॥ तच्छब्देन समानस्य परामर्शः । दधि शीतमित्यत्र न दीर्घः, शकारस्याऽऽस्यप्रयत्नभेदेन समानत्वाभावात्। **परेण** सहेति, अत्र पुत्रेण सह स्थूल इतिवन्न द्वयोः पृथक् पृथग्दीर्घता, किन्तु अजाक्षीरेण सहौषधं पिबेदितिवद्द्वयोरेक एव दीर्घः । अत्र बहुवचनं व्याख्यार्थम्, तेनोत्तरसूत्रेण ऋलृतोरपि ऋलृति ह्रस्वो भवति । ऋ ऋषभः, होतृ लृकारः । अन्यथा ' ऋृस्तयोरि ' ति परत्वात् ऋृइत्येव स्यात् । समानानामिति निर्देशात् ' अपेक्षातोऽधिकार ' इति न्यायो निश्चीयते । न्यायानामिव कस्यचित्पदादेरधिकारस्य प्रवृत्तौ निवृत्तौ वा न किञ्चिज्ज्ञापकं विद्यते, किन्त्वपेक्षैव तत्र नियामिकेति न्यायतात्पर्यम् । समानानामिति हि ' ह्रस्वापश्चे ' त्यनेन भवति, सूत्रमिदन्तु तदा प्रवर्त्तेत यदा ' आमो नाम्वे ' ति पूर्वसूत्रादाम इति नामिति च पदे तत्रानुवर्त्तेयाताम् । तदनुवृत्तिश्चैतन्न्यायादेव प्रसिद्ध्यति, नत्वन्यथा ज्ञापकान्तराभावादिति ॥ **ऋश्च** लृच्च ऋलृत् तस्मिन्, **ह्रस्वः**, **वा** ॥ समानानामित्यनुवर्त्तते । ' ह्रस्वोऽपदे वे ' त्येव सिद्धाववर्णार्थं पदार्थञ्च वचनम् । बलति प्राणिति मातुः स्तन्येनेति बालः, बालश्चासौ ऋश्यश्च बाल ऋश्यः, ह्रस्वकरणसामर्थ्यादेव कार्यान्तरं न भवति । अत एव ह्रस्वस्यापि ह्रस्वः क्रियते । पक्षे 'अवर्णस्ये'त्यर्, लुः ऋषभः लृऋषभः । होतुः लृकारो

बाल ऋश्यः, ऌ ऋषभः, होतृ ऌकारः । पक्षे बालऋर्यः ॥ **ऌत ऋऌ ऋऌभ्यां वा** ॥३॥ ऌत ऋता ऌता च सह यथासंख्यं ऋऌ इत्येतौ वा स्याताम् । ऋता ऋकारः, पक्षे ऌ ऋकारः ऋकारः । ऌता ऌकारः, पक्षे ऌ ऌकारः ऌकारः ॥ **ऋतो वा तौ च** ॥४॥ ऋत ऋऌभ्यां यथासंख्यं ऋऌ इत्येतौ वा स्याताम्, तौ च ऋकारऌकारौ ऋऌभ्यां सह वा स्याताम् । ऋता-पितृषभः, पक्षे पितृ ऋषभः, पितृषभः । ऌता–होत्ऌकारः, पक्षे होतृ ऌकारः, होतृकारः । तौ च पितृषभः होत्ऌकारः, पक्षे पूर्ववत् ॥ **ऋस्तयोः** ॥५॥ तयोः पूर्वस्थानिनोर्ऌकारऋकारयोर्यथासंख्यं ऋऌभ्यां सह ऋ

होतृ ऌकारः । अत्र वाग्रहणं ' सर्वं वाक्यं सावधारणमि 'ति न्यायं सूचयति, अन्यथा ऋऌति ह्रस्वः इत्युक्तावपि ह्रस्वस्य तदभावस्य च सिद्धेर्वाग्रहणं व्यर्थं स्यात् ॥ **ऌतः** षष्ठी, ऋश्च ऌश्च ऋऌ, ऋच ऌच ऋऌनी ताभ्याम्, वा ॥ ऌ ऋकारः, अत्र ऌइत्येतस्य ऋता सह ऋकारः, पक्षे ह्रस्वत्वेन ऌकारः । उत्तरेण च 'ऋस्तयो'रित्यनेन ऋकारः । ऌता, ऌ ऌकारः ऌकारः, पक्षे प्राग्वत् । ऋ इति स्वरसमुदायो स्वरव्यञ्जनसमुदायो वर्णान्तरं वा ॥ **ऋतः** षष्ठी, वा, तौ प्रथमा च ॥ ऋऌभ्यामित्यनुवर्तते । तच्छब्देन ऋकारऌकारयोः परामर्शः पितुः ऋषभः पितृषभः पितृषभः, पक्षे पितृ ऋषभः । ' समानानामि 'ति दीर्घः, पितृषभः । होतुः ऋकारः, होत्ऌकारः, होत्ऌकारः । पक्षे ह्रस्वत्वं दीर्घश्च । पूर्ववदिति, ह्रस्वत्वं दीर्घत्वञ्च ॥ **ऋः** प्रथमा, तयोः षष्ठी ॥ ऋऌभ्यामिति सम्बध्यते । अनेन ऋकारऋकारयोः, ऋकारऌकारयोश्च ऋकारो भवति, यथा ऋ ऋषभः ऋषभः, होतुः ऌकारः होतृकारः ॥ **अकारेणोपलक्षितो** वर्णस्तस्य, इवर्णः आदिर्यस्य स इवर्णादिः तेन, एच्च ओच्च अर् च अल् च एदोदरल् ॥

सर्वोऽपि द्वन्द्वो विभाषया एकवद्भवति । समाहारविशेषेऽनिर्धारिता

इति दीर्घः स्यात् । ऋषभः, होतृकारः ॥ **अवर्णस्येवर्णादिनैदोदरल् ॥६॥** अवर्णस्य इउऋऌवर्णैः सह यथासंख्यं एत् ओत् अर् अल् इत्येते स्युः । देवेन्द्रः, तवेहा, मालेयम्, सेक्षते, तवोदकम्, तवोढा, तवर्षिः, तवर्कारः, महर्षिः, सर्क्कारः, तवल्कारः, सल्कारेण ॥ **ऋणे प्रदशार्णवसनकम्बलवत्सरवत्सतरस्यार् ॥७॥** प्रादीनामवर्णस्य ऋणे परे ऋता सह आर् स्यात् । प्रार्णम्, दशार्णम्, ऋणार्णम् वस-

---

षष्ठी स्थाने योगा भवति । तथा चेवर्णादिना सहितस्यावर्णस्य स्थाने एकारादयो भवन्तीति सूत्रार्थः । यथासङ्ख्यमिति तु 'यथासङ्ख्यमनुदेशः समानामि'ति समसम्बन्धी विधिः यथासङ्ख्यं भवतीत्यर्थकान्न्यायात् । देवानामिन्द्रः देवेन्द्रः, अत्र 'वर्णग्रहणे जातिग्रहणमि'ति न्यायेनावर्णेवर्णादिपदेन अत्वेत्वादिजात्यवच्छिन्नानां यथायोगमष्टादशभेदानां ग्रहणमित्याशयेनोदाहृतं तवेहा मालेयमित्यादि । युष्मच्छब्दस्य 'तव मम ङसे' ति तव, ईहि चेष्टायाम्, ईहनमीहा । मांङ् माने मीयते इति माला, माला इयम् । सा, ईक्षि दर्शने, वर्तमाने ते । तव उदकम् । तव, वहीं प्रापणे उह्यते स्म 'क्तक्तवतू' ऊढा । तव ऋषिः । तव ऋकारः । महांश्चासौ ऋषिश्च । सा ऋकारः । तव ऌकारः । सा ऌकारेणेति सल्कारेण ॥ **ऋणे, प्रश्च दशश्च ऋणञ्च वसनञ्च कम्बलञ्च वत्सरश्च वत्सतरश्च तस्य, आर् ॥** अवर्णस्येत्यनुवर्तते । प्रकृष्टं ऋणं प्रार्णम् । दशानां ऋणं दशार्णम् । ऋणस्याऽवयवतया तत्सम्बन्धि ऋणं ऋणार्णम् । वसनस्य कम्बलस्य वत्सरस्य वत्सतरस्य वा ऋणम् । समानानामिति बहुवचनस्य व्याख्यर्थत्वेनोक्तत्वादिहोत्तरत्र पूर्वत्र च ह्रस्वोऽपि भवति । तेन प्र ऋणम्, दश ऋणम, इत्याद्युदाहरणान्यपि सिद्ध्यन्ति, पक्षे अर् प्राप्तावनेनाऽऽर् । अर एवायं बाधकः, 'येन नाप्राप्ते यो विधिरारभ्यते स तस्यैव बाधकः' इति न्या-

नार्णम्, कम्बलार्णम्, वत्सरार्णम्, वत्सत्रार्णम् ॥ **ऋते तृतीयासमासे** ॥८॥ अवर्णस्य ऋते परे तृतीयासमासे ऋता सह आर् स्यात्। शीतार्त्तः। तृतीयासमास इति किम्? परमर्त्तः। समास इति किम्? दुःखेनर्त्तः ॥ **ऋत्यारुपसर्गस्य** ॥९॥ उपसर्गस्थस्यावर्णस्य ऋकारादौ धातौ परे ऋता सह आर् स्यात्। प्रार्च्छति, पराच्छति ॥

यात्। सोऽयमपवादः क्वचित्स्थानिविशेषात्, क्वचिन्निमित्तविशेषात्, क्वचिदुभयविशेषात्, क्वचिदर्थान्तरविशेषाच्च। अत्र स्थानिनिमित्तोभयविशेषादपवादः। पाणिनीयाः वत्सरशब्दस्य ऋणशब्देन आरं नेच्छन्ति। केचिद्वत्सशब्दमपि पठन्ति ॥ **ऋते**, समसनं समासः, तृतीयया समासः, तस्मिन्। अवर्णस्य, आरित्यनुवर्तते। शीतेन ऋतः शीतार्त्तः, शीत ऋत इति ह्रस्वोऽपि। परमश्चासौ ऋतश्च परमर्तः, अत्र तृतीयासमासाभावादवर्णस्येत्यनेन अरेव भवति। दुःखेनर्त इत्यत्र तु समास एव न, अतो नार् किन्तु अरेव। अर एवायमपवादः ॥ **ऋति** सप्तमी, आर्, उपसृजति धात्वर्थविशेषम्, उपसर्जनमिति वा उपसर्गस्तस्य। अवर्णस्येत्यनुवर्तते, एवमग्रेऽपि। क्रियायोगे एव उपसर्गत्वाद्उपसर्गग्रहणबलेन धातोराक्षेपादाह–ऋकारादौ धाताविति। प्र ऋच्छति, ऋच्छ् गतौ, 'येन धातुना युक्ताः प्रादयस्तं प्रत्येवोपसर्गसंज्ञा' तेनेह न। प्रगत ऋच्छकोऽस्मादिति प्रर्च्छको देशः। अत्र हि प्रस्य गमिना सम्बन्धो न ऋच्छिना, अतः गमिं प्रत्येव प्रस्योपसर्गता। न्यायस्यास्य ज्ञापकमुपसर्गस्येत्युक्तिरेव, अन्यथा प्रार्च्छतीत्यादिवत् प्रर्च्छक देश इत्यादावपि प्राप्तस्याऽऽरः अभीष्टत्वे ऋत्यार् प्रादेरित्येवोच्येत। उपसर्गस्येति गुरुतरनिर्देशाच्च प्रर्च्छक इत्यादौ आर्निषेध इष्ट इति ज्ञायते, स च निषेधो नोक्तन्यायमन्तरेणेति। आरिति वर्तमाने पुनरार्ग्रहणमारेव यथा स्यादित्येव-

नाम्नि वा ॥१०॥ उपसर्गस्थस्यावर्णस्य ऋकारादौ नामावयवे धातौ परे ऋता सह आर् वा स्यात् । प्रार्षभीयति, प्रर्षभीयति ॥ **लृत्यालृवा** ॥११॥ उपसर्गावर्णस्य लृकारादौ नामावयवे धातौ परे लृता सह आल्वा स्यात् । उपाल्कारीयति, उपल्कारीयति ॥ **ऐदौत् सन्ध्यक्षरैः** ॥१२॥ अवर्णस्य सन्ध्यक्षरैः परैः सह ऐ औ इत्येतौ स्याताम् । तवैषा, खट्वैषा, तवैन्द्री, सैन्द्री, तवौदनः, तवौपगवः ॥

मर्थम्, तेनेहोत्तरत्र च सूत्रयोर्ह्रस्वो बाध्यते । सर्वापवादोऽयम् ॥ **नाम्नि, वा** ॥ पूर्वसूत्रं सम्बध्यते । ऋकारादिधातोः नाम्ना सह सामानाधिकरण्येन विशेषणासम्भवादवयवद्वारेण विशिनष्टि—ऋकारादौ नामावयवे धातौ परे इति । ऋषभमिच्छति ऋषभीयति, प्र ऋषभीयति, अनेनाऽऽर्, पक्षे 'अवर्णस्ये' त्यर् । ह्रस्वमपि केचिदिच्छन्ति, तन्मते प्र ऋषभीयति ॥ **लृति** सप्तमी, आल्, वा । उपसर्गस्य, नाम्नि, इति पदद्वयमनुवर्तते । लृकारमिच्छति लृकारीयति, उप लृकारीयति उपाल्कारीयति । पक्षेऽल्, केचिन्मते ह्रस्वश्च । अलोऽपवादोऽयम् ॥ **ऐच्च** औच्च ऐदौत्, सन्धावक्षराणि सन्धिरूपाण्यक्षराणि वा सन्ध्यक्षराणि तैः । तव एषा, 'ऋत्यारुपसर्गस्ये'ति सूत्रेणोपसर्गस्येति नानुवर्तते, 'अपेक्षातोऽधिकार' इति न्यायात्, अन्यथाऽनुपसर्गस्याकारस्यैत्वं न स्यात् । अत्राकारैकारयोः स्थानिनोरैदौलक्षणकार्यद्वयमध्ये किं कार्यमित्याशङ्कायां 'आसन्न' इति परिभाषासूत्रं निर्णायकतया प्रवर्तते । तत्र स्थानादिभिरासन्नः ऐत्, अनासन्नः औत्, तयोः प्रसङ्गे आसन्न एव भवतीति ऐत्वम् । नात्र यथासङ्ख्यपरिभाषया निर्वाहः स्थानीभूतसन्ध्यक्षराणां चतुःसङ्ख्याकत्वाद्विधेयस्य च द्वित्वेन समत्वाभावात् । खट्वा एषा, इन्द्रो देवताऽस्याः सा ऐन्द्री, तव ऐन्द्री, सा ऐन्द्री, तव ओदनः । उप समीपे गावो यस्य सः

ऊटा ॥१३॥ अवर्णस्य परेण ऊटा सह औः स्यात् । धौतः, धौतवान् ॥ **प्रस्यैषैष्योढोढयूहे स्वरेण ॥१४॥** प्रावर्णस्य एषादिषु

उपगुः, उपगोरपत्यं औपगवः, तव औपगवः । सन्ध्यक्षरैरिति ऐत्वनिर्देशादुपसर्गस्येति निवृत्तम्, गुणापवादोऽयम् ॥ ऊटा तृतीया ॥ ' ऐदौत्सन्ध्यक्षरैरि 'ति ऐदौतोऽनुवृत्तावपि ' आसन्न 'इति सूत्रेण स्थानीभूताऽऽकृतिकोकारसदृशः औकार एवात्र भवतीत्याशयेन औः स्यादित्युक्तम् ॥ धावूग् गतिशुद्धयोः, धाव्यते स्म धौतः, धावति स्म धौतवान्, क्तक्तवतू, ' अनुनासिके च च्छ्वः शूट् ' इति वः ऊट्, अनेन औः । ' अवर्णस्ये ' त्यस्यापवादोऽयम् ॥ प्रस्य षष्ठी । एषश्च एष्यश्च ऊढश्च ऊढिश्च ऊहश्च एषैष्योढोढयूहस्तस्मिन् स्वरेण ॥ ऐदोत् इति वर्तते, प्र ईषत् इच्छायाम्, एषणमेषः, प्र एषः प्रैषः, प्रेषणं प्रैषः, घञ् प्रत्ययः । एष्यत इति एष्यः । ' ऋवर्णव्यञ्जनाद् ध्यण् ,' प्र एष्यः प्रैष्यः, प्र वहति स्म प्रौढः क्तः । प्रवहणं प्रौढिः, स्त्रियां क्तिः । ऊहि वितर्के, प्रोहणं प्रौहः, घञ् । अत्र एष एष्य ऊढादयः ' अर्थवद्ग्रहणे नानर्थकस्य ग्रहणमि 'ति न्यायेन सार्थका ग्राह्याः, तेन प्रेषते प्रेष्यते प्रोढवानित्यादयो न गृह्यन्ते। ऊढिरपि ऊढसाहचर्यात् स्याद्यन्त एव ग्राह्यः, तेन प्रोढयतीत्यत्र न औत् । 'येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवती'ति न्यायेन ' उपसर्गस्यानिणेधेदोती ' त्यस्यैव बाधकः, न तु ' ओमाङी 'त्यस्य, तेन आ ईष्यः एष्यः, प्र एष्यः प्रेष्यः इत्यत्र नैत्, एवञ्च आ ईष्यः एष्यः ततः प्रोपसर्गेण योगे आङ् ईतोः स्थाने जातस्य एत उभयस्थाननिष्पन्नत्वेन ' उभयस्थाननिष्पन्नोऽन्यतरव्यपदेशभागि 'ति न्यायेन यदा आङादेशत्वम्, तदा ' ओमाङी 'त्यलुकि प्रेष्य इति स्यात्, यदा च धात्वादेशत्वं तदा ' उपसर्गस्यानिणेधेदोती ' त्यनेन प्रस्य प्राप्तमलुकं बाधित्वा विशेष-

परेषु परेण स्वरेण सह ऐ औ स्याताम् ॥ प्रैषः, प्रैष्यः, प्रौढः, प्रौढिः, प्रौढः ॥ **स्वैरस्वैर्यक्षौहिण्याम् ॥१५॥** स्वैरादिष्ववर्णस्य परेण स्वरेण सह ऐ औ स्याताम् । स्वैरः, स्वैरी, अक्षौहिणी सेना ॥ **अनियोगे लुगेवे ॥१६॥** अनियोगोऽनवधारणं तद्विषये एवे परेऽ

विहितत्वादनेन सूत्रेण ऐत्वे कृते प्रैष्य इति भवति । न च एषैष्ययोः घञ्ध्यणन्तयोः धातुत्वाभावात्कथं ' उपसर्गस्ये 'ति सूत्रं प्राप्नोतीति वाच्यम्, क्विबन्तस्येवान्यप्रत्ययान्तस्यापि धातुत्वात् ॥ स्वैरश्च स्वैरी च अक्षौहिणी च स्वैरस्वैर्यक्षौहिणी तस्याम् । स्व ईरिक् गतिकम्पनयोः, घञ् । स्वस्य ईरः स्वैरः, स्वेनेरितुं शीलमस्येति स्वैरी । ' अजातेः शीले ' णिन्, स्वैरशब्दान्मत्वर्थीयेनैव इना सिद्धे स्वैरिन् ग्रहणं ताच्छीलिकेऽपीरिन्शब्दे ऐत्वार्थम् । स्वैरीति नामग्रहणात् ' नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमि 'ति न्यायेन नामग्रहणेत्रनिर्देशे स्त्रीत्वादिलिङ्गविशिष्टमपि नाम ग्राह्यमित्यर्थकेन स्वैरिणीत्यपि भवति । ऊह वितर्के ऊहनमूहः, ऊहोऽस्यास्तीति ऊहिनी ' अतोऽनेक ' इति इन्, स्त्रियां ङीः । अक्षाणामूहिनी अक्षौहिणी, परिमाणविशेषविशिष्टा सेनेत्यर्थः, ' पूर्वपदस्थादि 'ति नस्य णः । अक्षशब्दस्य ऊहशब्देन समासं कृत्वा इन् प्रत्यये अक्षोहिणीत्येव सिद्ध्यति, न त्वौत्, अन्तरङ्गेण गुणेन बाधात्, अपवादभूतस्याप्यस्य सूत्रस्य अक्षौहिणीत्यत्र चरितार्थत्वात्, यद्यपवादोऽन्यत्र चरितार्थस्तर्हि परान्तरङ्गाभ्यां बाध्यत इति न्यायात् ॥ नि, युजृंपी योगे, नियोजनं नियोगः, घञ्, नियोगोऽवधारणम् । नियोगो व्यापारः इति केचित्, तन्न, यदैव पूर्वे ज्वलने शरीरम्, मनैव जन्मान्तरपातकानामित्यादिप्रयोगविरोधात् । न नियोगोऽनियोगस्तस्मिन्, अनवक्लृप्तिरनिश्चय इति यावत् । लुग्, एवे सप्तमी ॥ इदम्, अस्मिन्निह । ष्ठां गति-

वर्णस्य लुक् स्यात्। इहेव तिष्ठ, अद्येव गच्छ। नियोगे तु, इहैव तिष्ठ मा गाः ॥ **वौष्ठौतौ समासे** ॥१७॥ ओष्ठौत्वोः परयोः समासेऽ वर्णस्य लुग्वा स्यात्। बिम्बोष्ठी, बिम्बौष्ठी, स्थूलोतुः, स्थूलौतुः। समास इति किम्? हे पुत्रौष्ठं पश्य ॥ **ओमाङि** ॥१८॥ अवर्णस्य ओमि आङादेशे च परे लुक् स्यात्। अद्योम्, सोम्, आ ऊढा ओढा, अद्योढा, सोढा ॥ **उपसर्गस्यानिणेधेदोति** ॥१९॥ उपसर्गावर्णस्य इणेधि वर्ज्जे एदादावोदादौ च धातौ परे लुक् स्यात्।

निवृत्तौ, पञ्चमी हि, इहेव तिष्ठ, अन्यत्र वा गच्छ यथेच्छं। कुरु, इत्यनवधारणमत्र प्रतीयते, इहैव तिष्ठेत्युक्तौ त्वन्यत्र मा गाः, इत्यत्रावस्थानस्यैव निर्धारणं प्रतीयत इति। अस्मिन्नहनि अद्य एव। गम्, पञ्चमी हि, मा पूर्वं इंणुक् गतौ, अद्यतनी सिच्॥ **वा, ओष्ठश्च** ओतुश्च ओष्ठौतुः तस्मिन्, समासे। लुगिति वर्तते, एवमग्रेऽपि। एकवचनादेकस्मिन्नेव समासे, न समासान्तरे, अत एव वृषलसुतौष्ठव्रणः इत्यादौ नाकारलोपः। बिम्बाकारौ ओष्ठौ यस्याः सा 'नासिकोदरौष्ठे 'ति ङीः। स्थूलश्चासौ ओतुश्च, हे पुत्र, आमन्त्र्ये। अवति रक्षति क्षुद्रोपद्रवेभ्य इति ओष्ठः॥ **ओम्** च आङ् च तस्मिन्। अद्य आ ऊढा, अत्र प्रथमं दीर्घे ततः 'अवर्णस्ये 'ति गुणे अद्योढेतीष्टसिद्धौ आङ्ग्रहणमाङादेशार्थमित्याशयेनाह— **आङादेशे** चेति। अद्य ओम्, सा ओम्, इति ह्रस्वदीर्घावादायोदाहरणद्वयम्। आ ऊढा ओढा इति प्रथमं प्रसाध्य ततः अद्य ओढा, सा ओढा, इत्याङादेशस्योदाहरणद्वयम्॥ **उपसर्गस्य**, इण् च एध् च इणेध्, न इणेध् अनिणेध्, **एच्च** ओच्च एदोत्, अनिणेध् चासौ एदोच्च, तस्मिन्। प्र, परा, इलण् प्रेरणे, 'चुरादिभ्यो णिच्,' प्र एलयति, परा एलयति, अत्र वृद्धिं बाधित्वाऽनेनावर्णलोपः। प्र, परा, उपू दाहे, तिव्, शव्। उप इंणुक्, तिव्।

प्रेलयति, परेलयति, प्रोषति, परोषति, अनिणेधिति किम् ? उपैति, प्रैधते ॥ **वा नाम्नि** ॥२०॥ नामावयवे एदादावोदादौ च धातौ परे उपसर्गावर्णस्य लुग् वा स्यात् । उपेकीयति, उपैकीयति । प्रोषधीयति, प्रौषधीयति ॥ **इवर्णादेरस्वे स्वरे यवरलम्** ॥२१॥ इ उ

एधि वृद्धौ, प्र एधते, अत्र ' ' ऐदौदि 'त्यनेन वृद्धिः ॥ वा, नामन् तस्मिन् । उपसर्गस्य, एदोतीति पदद्वयमनुवर्तते । उप एकमिच्छति क्यनि एकीयति । अत्रोपेत्यत्रावर्णलुपि उपित्यस्य पदत्वात् ' धुटस्तृतीय ' इत्यनेन पस्य बकारः प्राप्तः, सः ' असिद्धं बहिरङ्गमन्तरङ्गे ' इति न्यायेन न भवति, ' वा नाम्नि ' इत्यस्य बह्वपेक्षत्वेन बहिरङ्गत्वात् । प्र ओषधिमिच्छति क्यनि प्रोषधीयति। पक्षे, 'ऐदौत्सन्ध्यक्षरैः'॥ इवर्ण आदिर्यस्य स इवर्णादिः, तस्य, न स्वः अस्वस्तस्मिन्, स्वरे यश्च वश्च रश्च लश्च यवरलम् ॥ इवर्णादेरित्युक्तत्वादवर्णस्येति निवृत्तम् । अस्वे स्वरे इत्यसमस्ताभिधानमुत्तरसूत्रेषु केवलं स्वर इत्यस्यैवाऽनुवृत्त्यर्थम्। अस्व इति विशेषणन्तु 'ह्रस्वोऽपदे वे' त्यत्राऽऽवश्यकतयाऽत्र स्पष्टप्रतिपत्तयेऽभिहितं न तु दधि इदमित्यत्र यत्वप्रसङ्गवारणार्थं, ' समानानां तेन दीर्घ ' इत्यनेन बाधनात् । इवर्णादेरिति सामान्यनिर्देशः, एवं यवरलमित्यपि । अत एव यथासङ्ख्योपपत्तिः, व्यक्त्या निर्देशे तु इवर्णादेरित्यनेन द्वासप्ततेः, यवरलमित्यनेन च सप्तानामुपस्थित्या यथासङ्ख्यता न स्यात्, दधि अत्र, यत्वम् । देवी उपासनेत्यत्रेवर्णः वकारोत्तरवर्त्तीकारः, ततः परमस्वस्वरः उकारः, एवमिवर्ण उपासनेत्यत्र उकारः, ततः परमस्वस्वरः पकारोत्तरवर्त्याऽऽकारः, तत्र कस्य कार्यं विधेयमिति शङ्का जायते, परिहारश्च 'सप्तम्याः पूर्वस्य' सप्तमीनिर्देशेन विधीयमानं कार्यं तदव्यवहितपूर्वस्य भवतीति परिभाषया अस्वे स्वर इति सप्तमीनिर्देशेन विधीयमानं कार्यं तद-

ऋ ऌ वर्णानामस्वे स्वरे परे यथासंख्यं य व र ल इत्येते स्युः । द-ध्यत्र, नद्येषा, मध्वत्र, वध्वासनं, पित्रर्थः, क्रादिः, लित्, लाकृतिः ॥ **ह्रस्वोऽपदे वा** ॥२२॥ इवर्णादीनामस्वे स्वरे परे ह्रस्वो वा स्यात् । न चेत्तौ निमित्तनिमित्तिनावेकत्र पदे स्याताम् । नदि एषा, नद्येषा । मधु अत्र, मध्वत्र । अपद इति किम् ? नद्यौ, नद्यर्थः ॥ **एदैतोऽ**

व्यवहितपूर्वस्यैव इवर्णादेर्भवति । तथा चोक्तप्रयोगे वकारोत्तरवर्ती-वर्णस्यैव कार्यं विधेयम्, तदव्यवहितोत्तरमेव अस्वस्वरसद्भावात्, न तूकारस्य, तदव्यवहितोत्तरं पकारस्य सद्भावेनास्वस्वरस्य व्यवहि-तत्वात् । नदी एषा, मधु अत्र वधू आसनम्, पितृ अर्थः, कृ आदिर्य-स्य सः क्रादिः, लृ इत् अनुबन्धो यस्य सः लित्, लृवदाऽऽकृतिः यस्य सः । ' इवर्णादे 'रित्यत्र केचित् पञ्चमीं व्याख्यानयन्ति, तन्मते दधियत्र, मधुवत्र, भूवादय इति स्यात् ॥ **ह्रस्वः** न पदं अपदं तस्मिन्, वा । इवर्णादेरस्वे स्वरे इत्यनुवर्तन्ते । नदी एषा, अनेन ह्रस्वत्वम्, पक्षे यत्वम् । यद्यपि ईकारैकारयोस्तालव्यत्वात् इवर्णस्य अस्वस्वरपरत्वं नास्तीति ह्रस्वयत्वे न स्याताम्, तथापि ' एदैतोः कण्ठतालु, ओदौतोः कण्ठोष्ठमिति मतान्तरमाश्रित्य ते विज्ञेये ॥ मधु अत्र ह्रस्वस्यापि ह्रस्वः, ननु किमर्थं ह्रस्वस्य ह्रस्वकरणं फलाभा-वादिति चेन्न, 'पर्जन्यवल्लक्षणप्रवृत्तेः', यद्यपि ह्रस्वस्य ह्रस्वे कृते यत्वा-दिकार्यान्तराभवनलक्षणं फलमस्त्येव, तथापि तत्फलं न तादात्विकं किन्तु कालान्तरभावि, अत एव पर्जन्यवदित्युपमानं साकूतम् । पर्जन्यस्यापि हि जलपूर्णे वर्षतः तत्काले फलं नास्त्येव, कालान्तरे तु ओषधिनिष्पत्तिरसाऽऽधिक्यादिकं फलमस्त्येवेति ह्रस्वविधान-सामर्थ्यात् कार्यान्तरं न भवति । नद्याः अर्थः नद्यर्थः, अत्रान्तर्व-र्त्तिन्या विभक्तेरपेक्षया पदभेदेऽपि समासे सति ऐकपद्यमिति युग-पत् पदत्वमपदत्वञ्च, तत्र पदभेदाश्रयेण विधीयमानो ह्रस्वः गौणः,

याय् ॥२३॥ एदैतोः स्वरे परे यथासंख्यं अय् आय् इत्येतौ स्याताम् । नयनम्, वृक्षयेव, नायकः, रायैन्द्री ॥ **ओदौतोऽवाव् ॥२४॥** ओदौतोः स्वरे परे यथासंख्यं अव् आव् इत्येतौ स्याताम् । लवनम्, पटवोतुः, लावकः, गावौ ॥ **व्यक्ये ॥२५॥** ओदौतोः क्यवर्जे यादौ

एकपदाऽऽश्रयेण निषेधः प्रधानम्, तस्मात् ' गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्यय ' इति न्यायेन प्रधानाश्रितमेवात्र कार्यं भवतीति न ह्रस्वः । अपदे इत्येकवचनान्तेन एकत्वस्य विवक्षितत्वादेकत्र पदे न स्यातामित्युक्तम् । तच्च पदं नद्यौ इत्यपि, नद्यर्थं इत्येवं समासोऽपि ॥ **एच्च ऐच्च एदैत्** तस्य, अय् च आय् च अयाय् । स्वरे इत्यनुवर्तते, इवर्णादिसम्बद्धस्याऽस्व इत्यस्य तन्निवृत्तौ निवृत्तेः, तन्निवृत्तिश्च एदैत इत्युक्तेः । णींग् प्रापणे, नीयतेऽनेनेति नयनम्, करणाधारेऽनट्, ' नामिनो गुणः ने अयनम्, अनेन अय् । वृक्षे एव स्वे स्वरे परेऽप्यत्र अय् । नयतीति नायकः, णकतृचौ णकः, ' नामिनोऽकलि ' इति नै अकः । रांक् दाने रायते महेच्छैरिति रैः, इन्द्रो देवताऽस्या इति ऐन्द्री, रायः ऐन्द्री रायैन्द्री, रै ऐन्द्री ॥ **ओच्च औच्च ओदौत्** तस्य, अव् च आव् च अवाव् ॥ स्वरे इत्यनुवर्तते । लूयतेऽनेनेति लवनम्, अनट् प्रत्ययः, ' नामिनो गुणः ' लो अनम्, अनेनाव् । पटु ' ह्रस्वस्य गुणः, ' पटो ओतुः, लुनातीति लावकः, णकतृचौ, ' नामिनोऽकलि ' लौ अकः । गौ औ ॥ **यि** सप्तमी, न क्यः अक्यः तस्मिन् । ओदौतोऽवावित्यनुवर्तते । ' सप्तम्याः पूर्वस्य ' । ' एकानुबन्धग्रहणे न द्व्यनुबन्धकस्ये ' ति न्यायेनैकानुबन्धस्य क्यस्य वर्जनात् द्व्यनुबन्धके क्यनि क्यङि च अवावौ स्यातामेवेत्यत आह गव्यतीत्यादि । गामिच्छति गव्यति, अमाव्ययात् क्यन् । वर्तमाने तिव्, शव्, अनेन अव्, गौरिवाऽऽचरति गव्यते क्यङ्, वर्तमाने ते । नावमिच्छति

प्रत्यये परे यथासंख्यमव् आवौ स्याताम् । गव्यति, गव्यते, नाव्यति, नाव्यते, लव्यम्, लाव्यम्, अक्य इति किम् ? उपोयते । औयत ॥ **ऋतो रस्तद्धिते ॥२६॥** ऋकारस्य यादौ तद्धिते परे रः स्यात् । पित्र्यम् । तद्धित इति किम् ? कार्यम् ॥ **एदोतः पदान्तेऽस्य**

नाव्यति, नौरिवाऽऽचरति क्यङ्, नाव्यते । लूयते इति लव्यम्, ये गुणः, अवश्यं लूयते इति लाव्यम्, ' उवर्णादावश्यके ' ष्यण्, ' नामिनोऽकलि ' वृद्धिः । नञ्युक्तक्यप्रत्ययेन ' नञुक्तं तत्सदृशे ' इति न्यायेन क्यसदृशस्य यकारादिप्रत्यये परे एव आदेशविधानादिह न भवति, गवां यूतिः गोयूतिः । गव्यूतिरिति त्वव्युत्पन्नः संज्ञाशब्दः, गवां यूतिर्गव्यूतिरिति व्युत्पत्तिपक्षे तु पृषोदरादित्वादवाऽऽदेशः, गव्यूतिः क्रोशद्वयम् । नावा यानं नौयानम् । उप वेंग् तन्तुसन्ताने, वर्तमाने ते, ' क्यः शिति ' इति क्यप्रत्ययः । ' यजादिवचेः किति ' वः उः, ' दीर्घश्चिवयङ्यक्ष्वेषु चे ' ति ऊः । उप ऊयते, ' अवर्णस्ये ' त्योत्वम्, क्यवर्ज्जनान्नात्राव् । अत्र धातूपसर्गकार्यस्य गुणस्य बहिरङ्गत्वेन व्यक्य इत्यवाऽऽदेशे कर्त्तव्येऽसिद्धत्वेन नात्राव् प्राप्नोतीत्यरुचेरुदाहरणान्तरं दर्शयति औयत इति । वेंग् ' अड्धातो ' रिति अड्, ' आत्सन्ध्यक्षरस्ये ' त्यात्वे ह्यस्तनी त, ' क्यः शिती ' ति क्यः, ' यजादिवचेः ' ' स्वरादेस्तासु ' वृद्धिः ॥ **ऋतः** षष्ठी, रः प्रथमा, तस्मै लौकिकवैदिकशब्दसन्दर्भाय हितः तद्धितस्तस्मिन् तद्धिते ॥ ' यि ' इत्यनुवर्त्तते । पितरि साधुः पित्र्यम्, ' तत्र साधौ यः ' अनेन ऋकारस्य रः । डुकृंग् करणे क्रियत इति कार्यम्, ' ऋवर्णव्यञ्जनाद् ष्यण् ' ' नामिनोऽकलि ' इति वृद्धिः । यद्यप्यत्र परत्वात् ' नामिनोऽकलि ' इति वृद्धिरेव भवति, न तु रः, अतस्तद्धितग्रहणमत्र व्यर्थं, तथापि जागृयादित्यादौ ऋकारस्य रत्ववारणाय तद्ग्रहणं सार्थकम् ॥ **एच्च ओच्च एदोत्**

लुक् ॥२७॥ एदोद्भ्यां पदान्तस्थाभ्यां परस्याकारस्य लुक् स्यात् । तेऽत्र, पटोऽत्र । पदान्त इति किम् ? नयनम् ॥ **गोर्नाम्न्यवोऽक्षे** ॥२८॥ गोरोतः पदान्तस्थस्य अक्षे परे संज्ञायां अव इति स्यात् । गवाक्षः । नाम्नीति किम् ? गोऽक्षाणि ॥ **स्वरे वाऽनक्षे** ॥२९॥ गोरोतः पदान्तस्थस्य स्वरे परे अव इति वा स्यात्, स चेत् स्वरोऽ-

---

तस्मात्, पदस्यान्तः पदान्तस्तस्मिन्, अस्य, लुक् ॥ ' पञ्चम्या निर्दिष्टे परस्य ' पञ्चम्या निर्दिष्टे यत्कार्यमुच्यते तत्तदव्यवहितस्य परस्य स्थाने भवतीति परिभाषया **एदोद्भ्यां परस्येत्युक्तम्** । ननु पदान्त इति व्यधिकरणं विशेषणं किमस्येत्यस्य, उत एदोत इत्यस्य, उच्यते, एदोत इत्यस्यैव न त्वस्य, अन्यथा ' गोर्नाम्न्यवोऽक्षे ' इति सूत्रेणालोपबाधनार्थमवाऽऽदेशविधानं न स्यात्, अलोपाप्राप्तेः पदान्तेऽभावात् । अयवोरपवादः, तद्, ' आद्गेरः ' ' जस इः, ' ते अत्र, अनेनाकारलोपः । पटु, सम्बोधने ह्रस्वस्य गुणः पटो अत्र । णींग् प्रापणे, नीयतेऽनेनेति नयनम्, ने अनम्, अत्र पदान्ताभावादनेन नाकारलोपः किन्त्वयादेशः ॥ **गोः** षष्ठी, नाम्नि सप्तमी, अवः प्रथमा, अक्षे सप्तमी । एदोतः इत्यस्मादोतः पदान्ते इत्यनुवर्तते, न तु एदित्यस्य, असम्भवात् । नाम्नीत्यस्य संज्ञायां गम्यमानायामित्यर्थः । गोरक्षीव गवाक्षः । ' अक्ष्णोऽप्राण्यङ्गे ' इति अत्समासान्तः । ' अवर्णेऽवर्णस्ये 'त्यलोपः, गो अक्ष इति स्थितेऽनेनावादेशः, ' समानानां तेन दीर्घः ' गवामक्षाणि गोऽक्षाणि, पूर्वसूत्रेणास्य लुक् ॥ **स्वरे** सप्तमी, वा, न अक्षः अनक्षस्तस्मिन् ॥ गोः, ओतः पदान्ते अव इति वर्तन्ते, एवमग्रेऽपि, गवामग्रं गवाग्रं वैकल्पिकोऽवादेशः, सन्निपातपरिभाषाया अनित्यत्वाद्दीर्घश्च, पक्षे गोऽग्रम्, ' एदोतः ' इत्यस्य लुक्, अत्र ' वात्यसन्धि 'रित्यसन्धिरपि, तेन गो अग्रमित्यपि । गोः ईशः

क्षस्थो न स्यात् । गवाग्रम्, गोऽग्रम् । गवेशः, गवीशः । अनक्ष इति किम्? गोऽक्षम् । ओत इति किम्? चित्रग्वर्थः ॥ **इन्द्रे** ॥३०॥ गोरोतः पदान्तस्थस्य इन्द्रस्थे स्वरे परे अव इति स्यात् । गवेन्द्रः ॥ **वाऽत्यसन्धिः** ॥३१॥ गोरोतः पदान्तस्थस्याकारे परेऽसन्धिभावो वा स्यात् । गो अग्रम्, गवाग्रम्, गोऽग्रम् । अतीति किम् ? गवेङ्गितम् ॥ **प्लुतोऽनितौ** ॥३२॥ इतिवर्ज्जे स्वरे परे प्लुतः सन्धि-

---

गवेशः, अनेनावाऽऽदेशः, ' अवर्णस्ये 'त्यनेन एकारश्च, पक्षे गवीशः अव्, गोऽक्षमित्यत्राक्षशब्द एवास्ति, न च संज्ञा गम्यते, अतः ' एदोतः ' इति लुक् । चित्रा गावो यस्य सः चित्रगुः, ' गोश्चाऽन्ते ' इति ह्रस्वः, चित्रगोरर्थः चित्रग्वर्थः । नन्वत्र ओत इत्यभावेऽपि न दोषः, गोशब्दाभावेनास्याप्रवृत्तेरत ओत इति व्यर्थमिति चेन्न, ' एकदेशविकृतमनन्यवदि' ति न्यायेन ह्रस्वेन विकारे जातेऽपि गोशब्द एव नान्यः, अत ओत इति कार्य्यम् ॥ इदु परमैश्वर्ये इन्द्रे ॥ स्वरे इति वर्तते, गवामिन्द्रः गवेन्द्रः । पूर्वेण विकल्पे प्राप्ते नित्यार्थं वचनम् । अत्र ' सप्तम्या आदिरि 'ति परिभाषोपस्थित्या इन्द्रादौ शब्दे परे इत्यर्थः, तथा च इन्द्रयज्ञादिशब्दे परे एव गोरोतोऽवादेशः प्राप्नोति, न तु गवेन्द्र इत्यत्रापि, परन्तु ' आद्यन्तवदेकस्मिन्नि 'ति न्यायेन गवेन्द्र इत्यत्रापीन्द्रस्येन्द्रादित्वकल्पनादवादेशः सिद्ध्यतीति बोध्यम् ॥ वा, अति सप्तमी, न सन्धिरसन्धिः । गोः पदान्ते इत्यनुवर्त्तते । गवामग्रं गो अग्रम्, गवामिङ्गितं ' स्वरे वे 'त्यवे कृते गवेङ्गितम् ॥ प्लुतः, न इति अनिति तस्मिन् । असन्धिः, स्वरे, इत्यनुवर्त्तते । देवो दीयते स्म देवदत्तः क्तः, दत्ताऽऽदेशः, ' दूरादामन्त्र्यस्ये 'ति प्लुतः अत्र नु असि । शोभनः श्लोकः कीर्त्तिर्यस्य सः सुश्लोकः तस्य सम्बोधनं, हे सुश्लोक इति, अत्र गुणः । पाणिनीये यदा अनार्ष इतिशब्दस्तदैव सन्धिर्न भवति ॥ इ ३, सूत्रत्वात्

भाग् न स्यात् । देवदत्त ३ अत्र न्वसि । अनितावितिं किम् ? लुश्लो-केति ॥ **इ ३ वा** ॥३३॥ इस्थानः प्लुतः स्वरे परेऽसन्धिर्वा स्यात् । लुनीहि ३ इति, लुनीहीति ॥ **ईदूदेद्विवचनम्** ॥३४॥ ई ऊ ए इत्येवमन्तं द्विवचनान्तं स्वरे परेऽसन्धिः स्यात् । मुनी इह, साधू एतौ, माले इमे, पचेते इति । इदूदेदिति किम् ? वृक्षावत्र । द्विव-चनमिति किम् ? कुमार्यत्र ॥ **अदोमुमी** ॥३५॥ अदसः सम्ब-

---

सिलोपः, वा । स्वरे, असन्धिः, इत्यनुवर्तते, लूग्श् छेदने, पञ्चमी हि, क्रयादेः श्ना, ' एषामीर्य्यङ्ग्ने ' इति नी, ' प्वादेर्ह्रस्वः ' ' क्षि-याऽऽशीः ' इति प्लुतः, लुनीहि ३ इति । इतावप्राप्तेऽन्यत्र च प्राप्ते उभयत्र विकल्पार्थं वचनम् ॥ **ईच्च ऊच्च एच्च ईदूदेत्**, द्वौ अर्थौ व-क्तीति द्विवचनम् ॥ स्वरे, असन्धिरित्यनुवर्तते । ' विशेषणमन्तः, ' अभेदेनोक्तोऽवयवो विशेषणम्, तद्विशेष्यस्य समुदायस्यान्तः स्यात् । तथा च द्विवचनरूपं यदीदूदेत् तदन्तः सन्धिं न प्राप्नोतीतीदूदेद्विशे-ष्यं विधायार्थकरणे माले इत्यत्रासन्धेः प्राप्तावपि पचेते इत्यादौ न स्यात्, आते इति द्विवचनस्यैदन्तत्वेऽप्येकाररूपत्वाभावात् । इदूदे-दन्तं द्विवचनमित्युक्तौ तु पचेते इत्यत्रासन्धेः प्राप्तावपि माले इत्यादौ न स्यात्, तत्र ईकारादेः द्विवचनत्वेऽपीदन्तद्विवचनाभावादित्युभयत्र दोषादाह—**ई ऊ ए इत्येवमन्तं द्विवचनान्तमिति** समुदायोऽत्र विशे-ष्यम् । यः समुदायः ईदूदेदन्तः, अथ च द्विवचनान्तः सः सन्धिं न प्राप्नोतीत्यर्थः । तथा च माले पचेते इत्यादौ न दोषः, तादृशस-मुदायस्य द्विवचनान्तत्वादीदूदेदन्तत्वाच्च । मुनी इह, साधू एतौ, माले इमे, पचेते इति, अत्र सर्वत्र न सन्धिः । मणीवोष्ट्रस्य, दम्पतीवे-त्यादौ, औपम्ये वशब्दः न त्विवशब्दः । कुमार्यत्रेत्यत्र तु इवर्णादे-रित्यनेन यत्वम् ॥ **मुश्च मीश्च मुमी, अदसो मुमी अदोमुमी** ॥ अ-त्रादस् शब्दस्य ' स्वं रूपं शब्दस्याशब्दसंज्ञे 'ति **परिभाषया** शब्द-

न्धिनौ मुमी इत्येतौ स्वरे परेऽसन्धी स्याताम्। अमुमु ईचा। अमी अश्वाः ॥ **चादिः स्वरोऽनाङ् ॥३६॥** आङ्वर्ज्जश्चादिः स्वरः स्वरे परेऽसन्धिः स्यात्। अ अपेहि, इ इन्द्रं पश्य, उ॰ उत्तिष्ठ,

---

परत्वेन अदस् शब्दार्थपरत्वाभावान्नामुष्य मुमी इति विग्रहः, सूत्रत्वादौलोपः। अदसः अग्रे अञ्चू गतौ च, अमुमञ्चतीति क्विप्, 'अञ्चोऽनर्चायामिति न लोपः, 'सर्वादिविष्व' गिति अदस् परः डद्रिप्रत्ययः, डित्, अदस् अद्रि अच् इति स्थिते, 'डित्यन्त्यस्वरादेरि'ति अदसो ऽसूलोपे अदद्रि अच् इति स्थिते, 'वाऽद्रा' विति दकारस्य मकारः कर्त्तव्यस्तत्र मतचतुष्टयम्। १. केचिद्द्वितीयदकारस्य, २. अपरे पूर्वदकारस्य, ३. उभयोः केचित्, ४. नोभयोरित्यन्ये, तत्र द्वितीयदकारस्य मकारे 'मादुवर्णोऽनु' इत्यनेन मपरस्य वर्णस्य उवर्णे अदमु इअच् इति जाते, इकारस्य यत्वे अदमुयच् इति सञ्जाते, 'अचः' इति नागमः, 'पदस्ये'ति चलोपे, 'युजञ्चक्रुञ्चो नो ङः' इति नकारस्य ङकारे अदमुयङ् इति सिद्धम्। पूर्वदकारस्य मत्वे, तत्सम्बन्धिनः अकारस्य उत्वे, अमुद्रि अच् इति जाते, यत्वे अमुद्रयङ् इति सिद्धम्। उभयोर्दकारयोर्मत्वे अमुमुयङ् इति सिद्ध्यति, उभयोर्दकारयोर्मत्वाऽभावे अदद्रयङ् इति प्रथमैकवचने रूपचतुष्टयम्। तृतीयैकवचने उदाहरणानुरूपेण अमुमु इ अच् आ इति स्थिते, 'अच्च् प्राग्दीर्घश्चे'त्यनेनाचः चादेशे पूर्वस्वरस्य च दीर्घे अमुमुईचा इति भवति। अत्रे 'वर्णादे'रिति वत्वे प्राप्तेऽनेनासन्धिः। अदस्, जस इः, 'आद्वेरः' 'लुगस्या' अद इ इति जाते, 'मोऽवर्णस्य' इति दस्य मः, 'अवर्णस्ये'ति ए, 'बहुष्वेरीः' इत्येकारस्य ईकारः। अमी अश्वाः, यत्वे प्राप्तेऽनेनासन्धिः ॥ च आदिर्यस्य सः चादिः, स्वरः, न आङ् अनाङ् ॥ *स्वरे, असन्धिरिति चानुवर्तते। यद्यप्यत्र चादेः स्वर इत्यस्य विशे-*

आ एवं किल मन्यसे, आ एवं नु तत् । अनाङिति किम् ? आ इहि एहि ॥ **ओदन्तः** ॥३७॥ ओदन्तश्चादिः स्वरे परेऽसन्धिः स्यात् । अहो अत्र ॥ **सौ नवेतौ** ॥३८॥ सिनिमित्त ओदन्त इतौ परेऽसन्धिर्वा स्यात् । पटो इति, पटविति ॥ **ऊँ चोञ्** ॥३९॥ उञ् चादि-

---

षणत्वेन ' विशेषणमन्त ' इति परिभाषया तदन्तविधिः प्राप्नोति, तथाप्यनाङिति पर्युदासात् पर्युदासस्य च सदृशग्रहणरूपत्वात्, आङ्-भिन्नाङ्सदृशस्यैव स्वरस्य ग्राह्यतया न तदन्तविधिः, उत्तरसूत्रेऽन्तग्रहणेनात्र केवलस्यैव सम्मतत्वाद्वाऽऽह–आङुर्जश्चादिः स्वर इति । अ अपेहीति, अपपूर्वकात् इंणूक् गताविति धातोः पञ्चमी हिप्रत्यये गुणे च अपेहीति भवति, अनेन चाकारेण सन्ध्यभावः । अ इति निर्भत्सने, अ अपेहि दूरीभवेत्यर्थः । इ इति सम्बोधने विस्मये वा । उ इति सम्बोधने रोषोक्तौ वितर्के वा । **आ एवं किल मन्यसे,** पूर्वप्रक्रान्तवाक्यार्थस्याऽन्यथाद्योतकोऽयमाकारः । पूर्वमित्थं नाऽगंस्थाः, इदानीं त्वेवं मन्यसे इत्यर्थः, वृद्धौ प्राप्तायामसन्धिः । **आ एवं नु तत्,** स्मरणद्योतकोऽयमाकारः, उभयत्राऽऽकारः आङ्भिन्नः । आ इहि एहि, अत्र आ इति आङुपसर्गः, अत्र तु गुणः । ' ईषदर्थे क्रियायोगे मर्यादाऽभिविधौ च यः, एतमातं ङितं विद्यात् वाक्यस्मरणयोरङित् । ' इत्याकारस्याङ्त्वाऽनाङ्त्व-प्रदर्शिका **कारिका** ॥ **ओत्** अन्ते यस्य स ओदन्तः ॥ चादिः, स्वरे, असन्धिरित्यनुवर्तन्ते । अहो इत्यादयोऽखण्डाश्चादय इति पृथग्योगः, पूर्वसूत्रेऽनाङिति पर्युदासादेकस्वररूपचादेरेव ग्रहणस्येष्टतया वा पृथग्योगः । अहो अत्रेत्यत्रावादेशे प्राप्तेऽनेनाऽसन्धिः ॥ **सौ** सप्तमी, नवा, इतौ सप्तमी । ओदन्तः असन्धिः इत्यनुवर्तते । आमन्त्र्यविहितः सिरत्र ग्राह्यः, अन्येन स्वरस्य व्यवधानादोकायारश्च सम्भवाच्च प्राप्तेरभावात् प्रतिषेधोऽनर्थकः स्यात् । पटुशब्दात् सम्बो-

रितौ परे सन्धिर्वा स्यात् । असन्धौ च उञ् ऊँ इति दीर्घोऽनुनासिको वा स्यात् । उ इति, ऊँ इति, विति ॥ **अञ्वर्गात् स्वरे वोऽसन्** ॥४०॥ अवर्जवर्गेभ्यः परः उञ् स्वरे परे वो वा स्यात्, स चासन् । कुइञ्वास्ते, कुइञ्ङ आस्ते । असत्वाद् द्वित्वम् ॥ **अइउवर्णस्या-**

धने सौ परे 'ह्रस्वस्य गुणः' इति गुणे सिलोपे, तत इतिशब्दविवक्षायां सिनिमित्तकौकारस्य सत्त्वान्न सन्धिः, पक्षे अवादेशः । वेत्येव सिद्धौ नवाग्रहणमुत्तरत्रानुवृत्त्यर्थम्, एवञ्च सर्वत्र वेति पदस्य नानुवृत्तिः, न वेत्युच्यमाने त्वनुवृत्तिर्ज्ञेया ॥ ऊँ, सूत्रत्वाद्विभक्तिलोपः । च, उञ् । अत्र चादिः इतौ नवेत्यनुवर्तन्ते । पक्षे 'ओदौतोऽवाव्' ञित् करणं स्वरूपपरिग्रहार्थं, तेन विकृतस्य न भवति, विकृतौ सत्यां स्वरूपहानेः । एवञ्च द्वौ उकारौ, एको निरनुबन्धोऽपरः सानुबन्ध इति, तत्र यो निरनुबन्धस्तस्याहो इत्यत्रौकारादेशः इष्यते नापरस्य, अतोऽहो इत्यत्राञित एव कृतादेशत्वादिदं सूत्रं न प्रवर्तते; अत एव जान्वस्य रुजतीत्यत्रोत्तरसूत्रेण वत्वं सिद्धम्, उञा सह जानोरुकारस्य दीर्घीभूतत्वात्, अथवाऽत्र सूत्रे उकारप्रश्लेषात् उ उञ् ऊञ् इत्युकारेण उञो विशेषणात् उकाररूपस्य उञो ग्रहणात् अहो इत्यादौ न भवति, उत्तरत्र तु जात्याश्रयणात् दीर्घीभूतस्यापि जान्वस्य रुजतीत्यादौ वत्वं भवति । अथ ऊँ इत्येव चादिषु पठ्यताम्, किमादेशेन, नैवम्, तस्यानितावपि प्रयोगः प्रसज्येत तन्निषेधार्थमादेशवचनम् । यथा अह्+उ, अत्र 'अवर्णस्य' इत्यनेनोत्वे अहो, पश्चादोदन्त इत्यसन्धौ अहो इति, उ इति असन्धौ ऊँ इति असन्धिदीर्घानुनासिकाभ्यां भवति, विति, अत्र तु असन्ध्यभावे वत्वम् ॥ न ञ् अञ्, अञ् चासौ वर्गश्च, तस्मात्, स्वरे, वः, अस्तीति सन् न सन् असन्, ऊँञ् इत्यनुवर्तते । 'पञ्चम्या निर्दिष्टे परस्ये'ति परिभाषाप्यत्र प्रवर्तते । अत्र वकाररूपादेशस्यासन्नित्यनेन स्वरूपेणाभावो

न्तेऽनुनासिकोऽनीदादेः ॥४१॥ अ इ उ वर्णानामन्ते विरामेऽनुनासिको वा स्यात्, नचेदेते 'ईदूदेद्विवचनम्' इत्यादि सूत्र-

---

न विधीयते वत्वविधानवैयर्थ्यप्रसङ्गात्, नापि स्थानिन उव् रूपस्य निवृत्तिः क्रियते, तथा सति तस्यैव निवृत्तिविधानप्रसङ्गात्, तस्मादसन्नित्यस्य मुख्यार्थतापरित्यागेनाकृतवदिति गौणार्थोऽभ्युपेय इति । क्रुञ्च् कौटिल्याऽल्पीभावयोः क्रुञ्चतीति क्रुङ्, 'अप्रयोगीत्' किलोपः, 'दीर्घङ्या' सि लुक्, 'पदस्य' चलोपः । 'युजंच क्रुञ्चो नो ङः,' क्रुङ् उ आस्ते, अनेनोकारस्य वकारे कृतेप्यसत्त्वात् 'ह्रस्वाद् ङणनो' द्वित्वम् । ननु असद्भावमन्तरेणापि क्रुङ् उ आस्ते, इत्यवस्थायां प्रथमं द्वित्वे कृते, पश्चाद्वत्वे क्रुङ्ङ्वास्ते इति सिद्ध्यति, किमनेनाऽसद्भावेनेति चेन्न, 'ह्रस्वान् ङणनो द्वे' इति सूत्रं यद्यपि परं तथापि वत्वस्य कृताकृतप्रसङ्गित्वेन नित्यत्वात् 'परान्नित्यमिति' न्यायेन द्वित्वं बाधित्वा वत्वस्य भावात् पश्चात्स्वराभावेन द्वित्वं न स्यादतोऽसद्भावः कृतः ॥ असन्निति पदमुत्तरसूत्रं मुक्त्वा 'तृतीयस्य पञ्चमे' प्रत्यये चे'ति सूत्रयोः सम्बध्यते, 'अपेक्षातोऽधिकार' इति न्यायात् ॥ अश्च इश्च उश्च अयवः अइऊनां वर्णः तस्य, अन्ते, अनु पश्चान्नासिकास्थानमुच्चारणीयं यस्यासावनुनासिकः, ईत् आदिर्यस्य स ईदादिः, न ईदादिरनीदादिस्तस्य ॥ सोस्यति व्यलीकमिति साम, कामयते इति कुमारी, अग्नीति, 'ईदूदेद्विवचन' मिति सूत्रसम्बन्धि, अमीति, 'अदोमुमी'ति सूत्र सम्बन्धि, किमु इति च 'अव्यवर्गात् स्वरे' इति सूत्रसम्बन्धि ज्ञेयम् ॥ 'एदोतः' इति सूत्रात् पदान्ते इत्यस्यानुवृत्तिसद्भावेऽप्यत्र अन्तं ग्रहणं विरामप्रतिपत्त्यर्थम्, स च विरामे भवन् पदस्यान्ते भवति। केवलमुपसर्गस्य समासान्तर्वर्तिनश्च न भवति । विरामत्वाच्च सन्धिर्न, यथा—

सम्बन्धिनः स्युः । सामँ, साम । खट्वाँ, खट्वा । दधिँ, दधि । कुमारीँ, कुमारी । मधुँ, मधु । अनीदादेरिति किम् । अग्नी, अग्नी, किमु ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ प्रथमस्याध्यायस्य द्वितीयपादः समाप्तः ॥

दधि अत्र । सामँ, 'अनतो' 'नाम्नो नो' खट्वा, 'दीर्घङ्याप्' ननु यत्र देवदत्तेन देवादित्युच्चरितं यज्ञदत्तेन च घट इत्युच्चरितं तत्र विरामो न स्यात्, उच्चारणाभावलक्षणविरामाभावादिति चेन्न, वर्णविशिष्टोऽभावो विराम इत्यर्थात्, वैशिष्ट्यञ्च स्वकर्मकोच्चारणकर्तृपुरुषोच्चरितवर्णप्रतियोगिकत्वम्, अर्द्धमात्राधिककालाव्यवायेन स्वकर्म्मकोच्चारणकर्तृपुरुषोच्चरितवर्णावधिकपूर्वत्वाभाववत्त्वमेतदुभयसम्बन्धेनेति ॥

इति प्रथमाध्याये द्वितीयपादस्यावचूरिपरिष्कारः समाप्तः ॥

तृतीयः पादः ।

तृतीयस्य पञ्चमे ॥१॥ वेति, पदान्त इति, अनुनासिक इति चानुवर्त्तते । वर्गतृतीयस्य पदान्तस्थस्य, पञ्चमे परेऽनुनासिको वा स्यात् । वाङ्ङवते, वाग्ङवते, ककुम्मण्डलम्, ककुब्मण्डलम् ॥ **प्रत्यये च** ॥२॥ पदान्तस्थस्य तृतीयस्य प्रत्यये पञ्चमे परेऽनुनासिको नित्यं

त्रयाणां पूरणस्तृतीयः, तस्य, **पञ्चानां** पूरणः पञ्चमः तस्मिन्, वेति, पदान्त इति, अनुनासिक इति चानुवर्तते । तृतीयः पञ्चमश्च वर्गाणामेव ज्ञेयः तद्धर्मत्वादित्याशयेन **वर्गतृतीयस्येत्युक्तम्** । वाच् ङवते, " चजः कगं " कः, ' धुटस्तृतीयः ' इति गः । वाग् ङवते अनेन सूत्रेण गस्य पञ्चमो भवति, **वर्गपञ्चमश्च** ङञणनमेति पञ्च वर्णास्तत्केनात्र भाव्यमिति शङ्कायां ' आसन्नः ' आसन्नाऽनासन्न-प्रसङ्गे यथास्वं स्थानार्थप्रमाणादिभिरासन्न एव भवतीति परिभाषया स्थानीभूत आसन्नः पञ्चम एव ङकारोऽत्र ग्राह्यस्तेन वाङ्ङवते इति । ककुभां मण्डलम्, ' धुटस्तृतीयः ' ककुब् मण्डलम्, पूर्वोक्त-रीत्या बस्य मः, ' तौ मुमः ' इति तु नाऽत्र प्रवर्तते, ' अञ्वर्गा 'दि-त्यतोऽसदधिकारस्य प्रयोजनवशादिष्टत्वात् ' धुटस्तृतीय ' इत्यनेन विहितस्य तृतीयस्याऽसत्त्वेन तत्स्थानस्य मस्याऽप्यसत्त्वाद्वा ॥ प्रती-यतेऽर्थोऽनेन सः प्रत्ययस्तस्मिन्, च । पदान्ते अनुनासिक इत्यनु-वर्तते । च उत्तरत्र वाऽनुवृत्त्यर्थ इति । अयं चकारो हि पूर्वयोगस्यैवाऽ-स्य योगस्य शेषतां प्रतिपादयन्नात्मनि वेत्यस्य सम्बन्धाभावं वानु-वृत्तेश्चोत्तरत्राव्यवधानं सूचयतीति भावः । वाचां विकारोऽवयवो वा वाच् मयम्, ' चजः कग 'मिति गः, अनेन गस्य ङः वाङ्मयम्, 'एकस्वरान्मयट्', षष् आम्, ' सङ्ख्याना 'मित्यामो नाम्, ' धुट-

स्यात् । वाङ्मयम्, षण्णाम् । 'च' उत्तरत्र वा अनुवृत्त्यर्थः ॥ **ततो हश्चतुर्थः** ॥३॥ पदान्तस्थात् ततस्तृतीयात् परस्य हस्य पूर्वसवर्गश्चतुर्थो वा स्यात् । वाग्घीनः, वाग्हीनः । ककुब्भासः, ककुब्हासः ॥ **प्रथमादधुटि शश्छः** ॥४॥ पदान्तस्थात् प्रथमात् परस्य शस्याधुटि परे छो वा स्यात् । वाक्छूरः, वाक्शूरः । त्रिष्टुप्छुतम्, त्रि-

---

स्तृतीयः' षड् 'तवर्गस्ये'ति नस्य णः, षड् णाम्, अनेन डस्य णः ॥ ' अनाम्नगरीनवतेरि 'ति पर्युदासान्न टवर्गनिषेधः । असदधिकारोप्यत्र वर्तते, तेन तन्मात्रमित्यादौ नलोपो न । अत्र 'अर्थवशाद्विभक्तिविपरिणाम' इति न्यायो न प्रवर्तते, 'तृतीयस्य पञ्चमे' इत्यतोऽनुवर्तमानस्य तृतीयस्येति पदस्य पञ्चम्यन्ततया विपरिणामे सिद्धेऽपि तत इत्यभिधानात् ॥ **तस्मादिति** ततः, हः षष्ठी, चतुर्णां पूरणश्चतुर्थः ॥ पदान्ते इति वर्तते तच्छब्देन तृतीयस्य परामर्शः । अत्र हकारस्य विधीयमानश्चतुर्थः हकारसमानस्थानिक एव स्यात्, स च वर्णो घकार एव, न तु भकारादिः । तथा च ककुब्भास इत्यादि न सिध्येत्तथा हस्थानिकचतुर्थस्यैवेष्टत्वे ततो 'हो घः' इत्येव ब्रूयाल्लाघवात्तथा नोक्तमिति गुरुभूतचतुर्थपदोपादानाच्च पूर्वसवर्गचतुर्थ एवात्र विवक्षित इति विज्ञायते, अत उक्तं पूर्वसवर्ग इति । हीयते स्म हीनः, वाचा हीनः वाग्घीनः । हसनं हासः, घञ्, ककुभां हासः, ककुब्भासः ॥ प्रथमात्, न धुट् अधुट् तस्मिन्, शः षष्ठी, छः प्रथमा, पदान्ते इति वर्तते, एवमग्रे । ननु पूर्वसूत्रेण तत इत्यनुवृत्त्या वाचा शूरः वाच् शूरः, 'धुटस्तृतीयः' 'चजः कग'मिति वाग् शूर इति जाते पदान्ततृतीयात् गकारात् परस्य शस्य छकारे कृते 'अघोषे प्रथम' इति गस्य ककारे वाक् छूर इति सिद्धौ व्यर्थं प्रथमादित्यभिधानम्, मैवम्, तृतीयाच्छे कृते ततस्तृतीयस्य प्रथमत्वाभावप्रसङ्गात्, यथा षट् सीदन्तीत्यत्र 'ड्णः सः त्सोऽश्वे'ति त्से कृते

ष्टुप् श्रुतम् । अधुटीति किम् ? वाक्श्योतति ॥ **रः कखपफयोः ᳟ क ᳟ पौ ॥५॥** पदान्तस्थस्य रस्य कखे पफे च परे यथासङ्ख्यं ᳟ क ᳟ पौ वा स्याताम् । क᳟करोति, कःकरोति । क᳟खनति, कःखनति । क᳟पचति, कःपचति । क᳟फलति, कःफलति ॥ **शषसे शषसं वा ॥६॥** पदान्तस्थस्थ रस्य शषसेषु परेषु यथा-

---

षड्त्सीदन्तीति जाते पुनः डकारस्य प्रथमो न भवति विधानसामर्थ्यात्, तथा च वाक् शूर इति न सिध्येदतः प्रथमादित्युक्तम् । पाणिनीयास्तु षट्त्सीदन्तीति प्रथममिच्छन्ति । शूरयतीति शूरः, वाचा शूरः, त्रिष्टुभां श्रुतम् । वाक्श्योततीत्यत्र तु प्रथमात्परस्य शकारस्य सत्त्वेऽपि ततः परं अधुट् नास्त्यतो न छकारः ॥ **रः**, कश्च खश्च कखम्, पश्च फश्च पफम्, कखं च पफं च कखपफे, तयोः, ᳟ कश्च ᳟ पश्च ᳟ क ᳟ पौ, द्वयोर्द्वयोर्द्वन्द्वं विधाय पुनर्द्वन्द्वकरणाद्यथासङ्ख्यलाभः । अत एव वृत्तौ **कखे पफे** इत्युक्तम् । ᳟ क ᳟ पेत्यत्र ककारपकाराकारा उच्चारणार्थाः । अत्र ᳟ क इति जिह्वामूलीयः ᳟ प इति उपध्मानीयः । 'किमः कस्तसादौ चे'ति किमः कः, ' सोरुः ' कर् करोति, अत्र **रः कखपफयो**रित्य र इति निरनुबन्धग्रहणात् ' **निरनु**बन्धग्रहणे न सानुबन्धस्ये 'ति न्यायात्, सानुबन्धस्य रोः ᳟ क ᳟ पावादेशौ न स्यातामिति चेन्न, यतः ' अरोः सुपि रः ' इति सूत्रे ' रः पदान्त ' इति सूत्रेण निरनुबन्धस्यैव रस्यानुवृत्त्या सानुबन्धस्य रोः रत्वाप्राप्तावरोरिति रुवर्ज्जनाभिधानं व्यर्थं सत् ज्ञापयति ' **निरनु**बन्धग्रहणे सामान्यस्य ग्रहणमि' ति **न्यायम्** । ततश्च सामान्यस्य रकारस्य ग्रहणादत्र ᳟ क ᳟ पादेशौ भवतः । ' खनूग् विदारणे, तिव्, शव्, खनति । डुपचीश् पाके, तिव् पचति, **फल निष्पत्तौ**, विसर्गापवादोऽयम् ॥ शश्च षश्च सश्च शषसं तस्मिन् वा ॥ रः इति वर्तते नवेत्यधिकारे सति

सङ्ख्यं शषसा वा स्युः । कश्शेते, कःशेते । कष्षण्ढः, कःषण्ढः । कस्साधुः, कःसाधुः ॥ **चटते सद्वितीये** ॥७॥ पदान्तस्थस्य रस्य चटतेषु सद्वितीयेषु परेषु यथासङ्ख्यं शषसा नित्यं स्युः । कश्चरः, क-

---

पुनर्वा ग्रहणमुत्तरत्र विकल्पनिवृत्त्यर्थम् । ननु शषसे सो वेत्येव सूत्र्यताम्, कर् षण्डः, कर् शेते इत्यादौ रकारस्य सकारे ' सस्यशषौ ' इति सूत्रेण यथायोगं शकारषकारौ भवत इति कश्शेते इत्यादिसिद्धिर्भवति, एवमुत्तरसूत्रेऽपि कश्चरः इत्यादिरूपाणामेवमेव सिद्धिर्भवतीति नोत्तरार्थमपि तथा वक्तव्यम् । कश्शेते इत्यादौ ' धुटस्तृतीय ' इति कर्तव्ये रुत्वस्यासिद्धत्वेन अंतश्शेते इत्यादौ च ' असिद्धं बहिरङ्ग ' मिति न्यायेन शत्वस्याऽसिद्धत्वेन तृतीयत्वमपि न प्रवर्तते, अतः शषग्रहणं व्यर्थमिति चेन्न, ' असिद्धं बहिरङ्गमन्तरङ्ग ' इति न्यायस्याऽनित्यत्वज्ञापनाय तथोक्तेः, तथाऽनेन सूत्रेण कृतानां शषसां विजातीयकार्यान्तराभावसूचनार्थमपि तथोक्तेः, तेन अंतःशेते इत्यादौ ' धुटस्तृतीय ' इति न भवति । विलक्षणत्वोक्त्या च सर्प्पिष्षु इत्यादौ षत्वं भवत्येव । शीङ् स्वप्ने वर्तमाने ते शेते ॥ चश्च टश्च तश्च चटतं तस्मिन्, सह द्वितीयेन वर्तते यस्स सद्वितीयस्तस्मिन् । ' सहस्य सोऽन्यार्थे ' इति सहस्य सः ॥ रः, शषसमित्यनुवर्त्तते । अत्र लाघवात् चछटठतथेति सूत्रं कर्तुं शक्यं तथाऽपि ' यथासङ्ख्यमनुदेशस्समानां ' सङ्ख्यया एकद्व्यादिवचननिर्देशेन चेति प्रकारद्वयेन मिथस्तुल्यानां पूर्वेषामुत्तरेषाञ्च पदानां सङ्ख्यानतिक्रमेणैवानुकूलं कथनं कार्यमित्यर्थकन्यायज्ञापनाय तथोक्तम् । न च चटते सद्वितीये इत्युक्तौ द्वितीयसहितानामटता यत्र भवन्ति तत्रैव शषसाऽऽदेशाः प्राप्ताः, न तु केवलानां चछटठतथामिति वाच्यम्, ' उदश्चरः ' ' चरेष्टः ' ' व्रीह्यादिभ्यस्तः ' इत्यादिसूत्रप्रयोगात् केवलेष्वेवाऽऽदेशात् । अत्राप्युभय-

श्छन्नः । कष्टः, कष्ठः । कस्तः, कस्थः ॥ **नोऽप्रशानोऽनुस्वारानुनासिकौ च पूर्वस्याधुट्परे** ॥८॥ पदान्तस्थस्य प्रशान्वर्ज्जशब्दसम्बन्धिनो नस्य चटतेषु सद्वितीयेषु अधुट्परेषु शषसा यथासङ्ख्यं स्युः, अनुस्वारानुनासिकौ चागमादेशौ पूर्वस्य क्रमेण स्याताम्। भवांश्चरः, भवाँश्चरः । भवांश्छ्यति, भवाँश्छ्यति । भवांष्टङ्कः, भवाँष्टङ्कः । भवांष्ठकारः, भवाँष्ठकारः । भवांस्तनुः, भवाँस्तनुः । भवां-

---

विधस्य रेफस्य ग्रहणम् । चर भक्षणे चरतीति चरः, ' चरेष्टः ' इति टप्रत्ययः । छदणू संवरणे, छाद्यते स्म छन्नः, क्तप्रत्ययः, ' णौ दान्तशान्तपूर्णे ' ति छन्नेति निपातः । कष्टः टः ध्वनौ, कष्ठः ठः ध्वनौ, कस्तः तः तस्करे, कस्थः थः पर्वते ॥ **नः षष्ठी,** प्रशाम्यतीति प्रशान्, न प्रशान् अप्रशान् तस्य, अनुस्वारश्च अनुनासिकश्च, च, पूर्वस्य, न धुट् अधुट्, अधुट् परो यस्मात् तस्मिन् ॥ शषसं, चटते सद्वितीये, इत्यनुवर्त्तन्ते । भातीति भवान्, भातेर्डवतु । भवान् चर इति स्थिते नकारस्य शकारः, पूर्वस्यानुस्वारागमे भवांश्चर इति रूपम् । पूर्वस्यानुनासिकादेशे च भवाँश्चर इति रूपम्, एवमग्रेऽपि । भवान् छ्यति, भवान् टंकः, टंकयतीति टंकः, ठकारः शून्यः, तनुः कृशः, थुडत् संवरणे, प्रशान् चरः, ' तवर्गस्य श्चवर्गे 'ति नस्य ञः, त्सरुः खड्गमुष्टिः, त्सरौ कुशलः त्सरुकः, ' कोऽश्यादे 'रिति कः । अत्र तकारस्य धुट्परत्वात्पूर्वोक्तं कार्यं न भवति, अधुटीत्युक्तौ चटते परतो योऽधुट् तस्मिन्परे नकारस्यैते भवन्तीति विपरीतार्थवारणायाधुट्पर इत्युक्तम् । अत्र नकारो लाक्षणिको न गृह्यते 'लक्षणप्रतिपदोक्तयोरि'ति न्यायात्, तेन त्वन् तत्रेत्यादौ नस्य सो न भवति । अयं नकारो ' तौ मुम ' इत्यनेनानुनासिकशब्देन सामान्येन विहितः, अतो लाक्षणिकः, भवानित्यादौ तु नकारो नोन्त इत्यनेन नामग्राहं विहितत्वात् प्रतिपदोक्तः । अनु-

स्थुडति, भवाँस्थुडति । अप्रशानिति किम् ? प्रशाञ्चरः । अधुट्पर इति किम् ? भवान्त्सरुकः ॥ **पुमोऽशिट्यघोषेऽख्यागि रः ॥९॥** पुमिति पुंसः संयोगलुक्यनुकरणम्, अधुट्परे अघोषे शिट्ख्यागिवर्जे परे पुमित्येतस्य रः स्यात्, अनुस्वारानुनासिकौ च पूर्वस्य । पुंस्कामा, पुँस्कामा । अशिटीति किम् ? पुंशिरः । अघोष इति किम् ? पुंदासः । अख्यागीति किम् ? पुंख्यातः । अधुट्पर इत्येव पुंक्षारः ॥ **नॄनः पेषु वा ॥१०॥** 'नॄनि'ति शसन्तस्यानुकरणम्, नॄनः पे परे रो वा स्यात्,

---

स्वारः आगमः, अनुनासिकश्चादेशः । **पुमः** षष्ठी, न शिट् अशिट् तस्मिन्, न विद्यते घोषो ध्वनिर्यस्य स तस्मिन्, न ख्याग् अख्याग् तस्मिन्, रः प्रथमा ॥ अनुस्वारानुनासिकौ च पूर्वस्याधुट्पर इत्यनुवर्त्तते । पुमिति पुंसः कृतसंयोगान्तलोपस्यानुकरणम् । पुमांसं कामयतीत्येवंशीला पुंस्कामा, ' शीलिकामिभिक्षाचरी 'ति णप्रत्ययः, ' पदस्ये 'ति पुम्सः सलोपः, अनेन मः रः पूर्वस्य चाऽनुस्वारानुनासिकाविति, ततः 'रः कखपफयो'रिति प्राप्तौ ' पुंस ' इति रस्य सः । पुंसः शिरः, सलोपः, 'शिड्हेऽनुस्वारः' । पुंसो दासः, ' पदस्ये 'ति सलोपः । चक्षिक् व्यक्तायां वाचि, ख्यायते स्म ख्यातः, क्तः, पुंसा ख्यातः, ' चक्षो वाचि क्शांग् ' ख्यागादेशः । ख्याग्वर्जनात् ख्याङ् प्रकथन इत्यस्मात् पुंख्यातः पुँख्यात इति स्यादेव । पुंसः क्षारः, अत्र धुट्परत्वान्न रः ॥ **नॄनः** षष्ठी, **पेषु**, **वा** ॥ बहुवचनत्वं व्याख्यर्थम्, धुटि अधुटि वाऽस्य प्रवृत्तेस्तेनाऽधुट्पर इति निवृत्तम् । नॄनित्यस्यैवाऽऽदेशस्येष्टत्वात् शसन्तस्य नृशब्दानुकरणं कृतम् । अनुवृत्तिः पूर्ववत्, नॄन् पाहि, अत्रानेन रत्वे, विकल्पेन च रस्य ५ पाऽऽदेशे पूर्वस्यानुस्वारानुनासिकाभ्याम्, नृं ५ पाहि, नॄँ ५ पाहि इति भवति, ५ पाऽऽदेशाभावे विसर्गे च नृः पाहि, नॄँः पाहि इति भवति । रादेशाभावे च नॄन् पाहीति पञ्च रूपाणि ॥

अनुस्वारानुनासिकौ च पूर्वस्य । नृं॰पाहि, नृँ॰पाहि, नृन्पाहि, नृःपाहि ॥ **द्विः कानः कानि सः** ॥११॥ 'कानः' किमः शसन्तस्यानुकरणम्, द्विरुक्तस्य कानः कानि परे सः स्यात्, अनुस्वारानुनासिकौ च पूर्वस्य । कांस्कान्, काँस्कान् । द्विरिति किम् ? कान्कान् पश्यति ॥ **स्सटि समः** ॥१२॥ समः स्सटि परे सः स्यात्, अनु-

---

द्वौ वारावस्य द्विः, स चाऽव्ययम्, कानः षष्ठी, कानि सप्तमी, सः प्रथमा ॥ अनुस्वारानुनासिकौ पूर्वस्येत्यनुवर्तते । 'षष्ठ्यान्त्यस्ये'ति परिभाषया षष्ठीनिर्देशेन विहितं यत् कार्यं तदन्त्यस्य कानो नकारस्य भवति, न चानुस्वारस्य व्यञ्जनत्वात् 'पदस्ये'ति संयोगान्तलोपः स्यादिति वाच्यम्, मुख्यव्यञ्जनसंयोगस्यैव 'पदस्ये'त्यत्राऽऽश्रितत्वात्, अस्य तु सामर्थ्यप्रापितत्वेन गौणव्यञ्जनत्वात् । कांस्कान्, वीप्सायां द्विर्वचनम्, कान्कानित्यत्रैकः प्रश्नेऽन्यस्तु क्षेपे, रस्याधिकारेणैव सिद्धे सविधानं रुत्वबाधनार्थम्, तेन कांस्कानित्यत्र न सकारस्य रुत्वम् ॥ **सकारे**णोपलक्षितः सट् स्सट् तस्मिन्, समः षष्ठी ॥ अनुस्वारानुनासिकौ, पूर्वस्य, सः इति चानुवर्तन्ते । स मित्युपसर्ग एव ग्राह्यः, न तु षम् वैकुण्ठ्ये इत्यस्य किबन्तस्य समः । 'संस्कृते भक्ष्ये' इति सूत्रप्रयोगात् । संस्करोतीति विग्रहे 'णकतृचा'विति तृच्प्रत्यये सम् कर्त्तेति स्थिते, 'संपरे कृगः स्सट्' इत्यनेन कृगः पूर्वं सटि अटाविताौ सम् स् कर्ता, इति जातेऽनेन सूत्रेण मकारस्य सकारे पूर्वस्यानुस्वारानुनासिकौ च संस्स्कर्ता, सँस्स्कर्ता । अनुस्वारस्य व्यञ्जनत्वात् 'धुटो धुटि स्वे वे'ति पक्षे सकारलोपे द्विसकारम्, एकसकारञ्च संस्कर्ता, संस्स्कर्तेति रूपद्वयं द्रष्टव्यम् । संस्करणं संकृतिः, स्त्रियां क्तिः, गर्गादिपाठादत्र स्सट् न भवति । सञ्चस्कारेत्यत्र तु चकारेण व्यवधानान्न मकारस्य

स्वारानुनासिकौ च पूर्वस्य । संस्कर्त्ता, सँस्कर्त्ता । स्सटीति किम् ? संकृतिः ॥ **लुक्** ॥१३॥ समः स्सटि परे लुक् स्यात् । सस्कर्ता ॥ **तौ मुमो व्यञ्जने स्वौ** ॥१४॥ मोर्म्वागमस्य, पदान्तस्थस्य च मस्य, व्यञ्जने परे तस्यैव स्वौ, तावनुस्वारानुनासिकौ क्रमेण स्याताम् ।

सकारः । न चात्र सम् स्कृ इति स्थिते प्रत्ययोत्पत्तेः प्रागेवाऽऽदेश-प्रसङ्ग इति वाच्यम्, परत्वात्, नित्यत्वात्, धातुमात्राश्रयत्वेना-न्तरङ्गत्वाच्च प्रथममेव णबुत्पत्तेः, ततश्च द्वित्वेऽस्ति व्यवधानम् । न च *चेन व्यवधानाङ्गीकारे स्सटो निमित्तस्य समकृगोः अव्यवधा-*नस्याभावात् ' निमित्ताभावे नैमित्तिकस्याप्यभाव ' इति न्यायेन स्सटो निवृत्तिः स्यादिति वाच्यम्, ' स्वाङ्गमव्यवधायी 'ति **न्यायेन** द्वित्वरूपाङ्गस्याव्यवधायकत्वात् ॥ **लुक्** ॥ समः स्सटीत्यनुवर्त्तते । ' **षष्ठ्यान्त्यस्ये** 'ति **परिभाषाऽत्र** प्रवर्तते । पृथग्योगादनुस्वारानु-नासिकौ च पूर्वस्येति निवृत्तम् ॥ **तौ**, मुश्च म् च मुम् तस्य, व्यञ्जने, स्वौ ॥ अत्र तच्छब्देनाऽनुस्वारानुनासिकयोः केवलयोः परामर्शः । यद्यपि स्वौ इत्येवोक्तावपि विशेष्यरूपतयाऽधिकारतः बुद्धिस्थावनु-स्वारानुनासिकौ प्राप्नुयाताम्, तथापि तौ ग्रहणमवधारणार्थम्। अनु-स्वारानुनासिकावेव भवतः, न तु लुक् पूर्वस्यानुस्वारानुनासिकौ चेति। एतदाशयेनैव तौ अनुस्वारानुनासिकावित्युक्तम्। म् ग्रहणेनैव सिद्धे मुग्रहणमपदान्तार्थमत एव मस्यैव **पदान्तस्थस्ये**ति विशेषितम्। **स्वे**त्यनुनासिकस्य विशेषणम्, नाऽनुस्वारस्यासम्भवात्, अनुनासि-कस्तु स्वोऽस्वोऽपि भवत्यतः सम्भवित्वाद्व्यभिचारित्वाच्च तस्यैव विशेषणं स्वः, स्वावित्युभयोरपि द्विवचनेन निर्देशेऽपि ' **सम्भवे** व्यभिचारे च विशेषणमर्थवदि 'ति **न्यायेनाऽनुनासिकस्यैव** विशे-षणम्, इदमेव द्विवचनं तन्न्यायस्य ज्ञापकम्। मुमयोरनुस्वारानु-नासिकाभ्यां सह समसङ्ख्यत्वेऽपि ' यथासङ्ख्यमनुदेशः समा-

चंक्रम्यते, चङ्क्रम्यते । वंवम्यते, वव्वँम्यते । त्वंकरोषि, त्वङ्करोषि । कंवः, कव्वँः ॥ **मनयवलपरे हे** ॥१५॥ मनयवलपरे हे पदान्तस्थस्य मस्यानुस्वारानुनासिकौ स्वौ क्रमात् स्याताम् । किं ह्मलयति, किम्ह्मलयति । किंह्नुते, किन्ह्नुते, किंह्यः, किय्ँह्यः, किंह्लयति, किव्ँह्लयति, किंह्लादयते, किल्ँह्लादयते ॥ **सम्राट्** ॥१६॥ समो मस्य

नामिति ' न प्रवर्तते, वचननिर्देशेन तुल्यत्वाभावात् । ताविति हि द्विवचनम्, मुम इति चैकवचनमिति । क्रमू पादविक्षेपे, कुटिलं क्राम्यति चङ्क्रम्यते । 'गत्यर्थात् कुटिले यङ्' । 'सन्यङश्चे'ति क्रमो द्वित्वं ' व्यञ्जनस्याऽनादे'र्लुक्, आदिरलोपे ' कडश्चञ् ' पूर्वस्य कस्य चः । 'मुरतोऽनुनासिकस्ये'ति पूर्वस्य मोन्तः । मकारस्याऽनुस्वारः चंक्रम्यते । पक्षे स्वः अनुनासिको भवति चङ्क्रम्यते । टुवम् उद्गिरणे, भृशं पुनर्वा वमति वंवम्यते, पूर्ववत्, अनुस्वारे तु वंवम्यते, अनुनासिकपक्षे तु यवलानां सानुनासिकनिरनुनासिकभेदवत्त्वेन स्वः सानुनासिको वः भवति, तथा च वव्वँम्यते, त्वं करोषि, त्वङ्करोषि, इदं पदान्तस्थस्य मकारस्योदाहरणम् । कम् सुखमस्यास्तीति 'कंशंभ्यामि'ति वः प्रत्ययः ॥ **मश्च नश्च यश्च वश्च लश्च मनयवलाः, ते परे यस्मात्तस्मिन्, हे** सप्तमी । तौ स्वौ इत्यनुवर्तते । स्वश्च मनयवलानां बोध्यः । ह्वल ह्वल चलने, ह्वलयति ह्मलयति । ह्नुङ्क् अपनयने ह्नुते । ह्य इत्यव्ययम् । ह्लादैङ् सुखे च ह्लादयते ॥ **सम्**–राजृग् दीप्तौ, सामस्त्येन राजते शोभत इति सम्राट्, क्विप्, 'यजसृजभृजे'ति जः षः, धुटस्तृतीयः इति षस्य डः, 'विरामे वा' डस्य टः । अत्र 'तौ मुमो व्यञ्जने स्वा' वितिसूत्रेण प्राप्तस्यानुस्वारस्य निषेधोऽनेन क्रियते । रेफस्य तु सानुनासिकत्वस्याभावान्नानुनासिकसम्भवः । एकवचनस्यातन्त्रत्वात् द्विवचनादावपि भवति ॥ **ङ् च ण् च ङौ** तयोः, कश्च टश्च कटौ अन्तौ, शिटि, नवा ॥ अत्रान्तशब्दः आगमबोधकः, नोन्त इत्या-

राजौ क्विबन्तेऽनुस्वाराभावः स्यात् । सम्राट्, सम्राजौ ॥ **ङ्णोः कटावन्तौ शिटि नवा** ॥१७॥ पदान्तस्थयोर्ङणयोः शिटि परे यथासङ्ख्यं कटावन्तौ वा स्याताम् । प्राङ्छेते, प्राङ्शेते, प्राङ्शेते । सुगण्ट्छेते, सुगण्ट्शेते, सुगण्शेते ॥ **ङ्णः सः त्सोऽश्वः** ॥१८॥ पदान्तस्थाभ्यां ङनाभ्यां परस्य सस्य 'त्स' इति तादिः सो वा स्यात् ।

दिवत् । प्राञ्चतीति प्राङ्, क्विप्, शीङ्कृ स्वप्ने, प्राङ् शेते, अनेन सूत्रेण कोऽन्तः, प्राङ्क शेते, 'प्रथमादधुटि शश्छः' इति सूत्रेण शकारस्य छत्वम्, प्राङ्क् छेते, कोऽन्ताभावे तु प्राङ् शेते, इति त्रैरूप्यम् । कटयोर्विधानसामर्थ्यात् 'धुटस्तृतीय' इति न प्रवर्तते, एवं सुगण् शेते इत्यत्रापि । सु गण् सङ्ख्याने, सुष्ठु गणयतीति क्विपि सुगण् ॥ ङ् च न् च ङ्, तस्मात्, सः षष्ठी, त्सः प्रथमा, न श्र् अश्र् तस्य । श्रवर्जनात् ज्ञापयति 'सकारापदिष्टं कार्यं तदादेशस्य शकारस्याऽपी'ति न्यायम्, अन्यथा शकारस्य सत्वप्राप्तिरेव नास्तीति तद्वर्जनं व्यर्थं स्यात् । षष् 'डतिष्णः सङ्ख्याया लुबि'ति जस्लोपः । 'धुटस्तृतीयः' षस्य डः । षड्लृं विशरणगत्यवसादनेषु । षड् सीदन्तीत्यत्रानेन सूत्रेण डात्परस्य सस्य त्साऽऽदेशे षड्त्सीदन्तीति रूपम् । अत्र डकारनिर्देशात् 'अघोषे प्रथमोऽशिटः' इति डस्य टो न भवति पाणिनीये तु भवति । 'तवर्गस्ये'ति डात्परस्य तकारस्य न टकारः, 'पदान्तादृवर्गादि'ति सूत्रेण निषेधात् । त्सादेशाभावे तु 'अघोषे' इति डस्य टः, षट् सीदन्ति । भवान् त्साधुरित्यत्र 'नोऽप्रशाने'ति सूत्रेण नकारस्यानुस्वारानुनासिकपूर्वः सकारो न भवति, धुट् परस्य तकारस्यात्र सत्त्वेनाधुट्परत्वाभावात् । श्रुतृ क्षरणे श्रोतति, अत्र श्रग्रहणाभावे षड् श्रोततीत्यत्र यद्यपि डात्परः सो नास्ति, तथापि 'सस्य शषा' वित्यनेन सकारस्थानिकशकारस्य भावादतः 'सकारापदिष्टमि'ति न्यायेन त्सादेशस्य प्राप्तिः अयं धातुः सोपदेशः, अतः श्रवर्जनं कृतम् ॥

अश्नः श्नावयवश्चेत् शो न स्यात्, षड्त्सीदन्ति, षट्सीदन्ति । भवान्त्साधुः, भवान्साधुः । अश्न इति किम् ? षट्श्च्योतन्ति ॥ **नः शि ञ्चू** ॥१९॥ पदान्तस्थस्य नस्य शे परे ञ्चू वा स्यात्, अश्नः । भवाञ्च्छूरः, भवाञ्चूशूरः, भवाञ्शूरः । अश्न इत्येव ? भवाञ्श्च्यो-

---

नः षष्ठी, **शि** सप्तमी, **ञ्चू** ॥ अश्न इति पदं सप्तम्यन्ततया विपरिणम्याऽनुवर्त्तनीयम्, तच्च शीत्यस्य विशेषणम् । श्नघटकमित्रं शकार इत्यर्थः । ञ्चादेशबलात् चस्य कत्वं 'पदस्ये'ति च न भवति, 'धुटो धुटि स्वे वे'ति तु भवत्येव, तेन भवाञ्छूर इत्यपि भवति । भवान् शूरः, इत्यत्रानेन सूत्रेण नकारस्य ञ्चादेशे, 'प्रथमादधुटी'ति शकारस्य छादेशे भवाञ्छूरः, छोऽभावे भवाञ्च् शूरः, ञ्चादेशाभावे भवान् शूर इत्यत्र 'तवर्गस्ये'त्यनेन नस्य ञत्वे भवाञ् शूर इति विकल्पद्वये त्रैरूप्यं सर्वत्र बोध्यम् । भवान् श्च्योततीत्यत्र तु 'तवर्गस्ये'ति नस्य ञ् ॥ **अतः** पञ्चमी, अति सप्तमी, **रोः** षष्ठी, **उः** प्रथमा ॥ सूत्रेषु सामान्येन प्रथमं कार्यी, ततो निमित्तं, ततः कार्यमिति निर्देशक्रमो दृश्यतेऽत्र तु कार्यिणः रोः पूर्वमतीति निमित्तस्योपादानेन क्रमोल्लङ्घनं नवेत्यधिकारनिवृत्तिं सूचयति । किम् स्, किमः काऽऽदेशः, सकारस्य 'सो रुः,' करु अर्थः, रोर्यं इति सूत्रं बाधित्वानेन सूत्रेण रोरुत्वम्, रोर्यं इत्यस्य सामान्यस्वरनिमित्तकत्वादस्य च विशेषस्वरनिमित्तकत्वात् । सर्वत्राऽपि 'विशेषेण सामान्यं बाध्यते नतु सामान्येन विशेषः' इति न्यायात् । क उ अर्थः, 'अवर्णस्ये'ति ओकारः, को अर्थः, 'एदोतः' इत्यकारलोपः, कोऽर्थः । ननु क उ अर्थ, इति जाते न 'अवर्णस्ये'ति सूत्रं प्रवर्त्तते, 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्ये'ति न्यायप्रवृत्तेरिति चेन्न, 'अतोऽति' इति सूत्रनिर्देशादेवोक्तन्यायस्यात्राप्रवृत्तेः । तथा क उ अर्थ इत्यत्र पूर्वं गुणः, उ अर्थः, अत्र 'इवर्णादेरि'ति वत्वं च प्राप्नोति, कतरेण

तति ॥ **अतोऽति रोरुः** ॥२०॥ आत्परस्य पदान्तस्थस्य रोरति परे उर्नित्यं स्यात् । कोऽर्थः ॥ **घोषवति** ॥२१॥ आत्परस्य पदान्तस्थस्य रोर्घोषवति परे उः स्यात् । धर्म्मो जेता ॥ **अवर्णभोभगोऽघोर्लुगसन्धिः** ॥२२॥ अवर्णाद्भोभगोअघोभ्यश्च परस्य पदान्त-

---

कार्येणात्र भाव्यमिति शङ्कायां '**अन्तरङ्गं बहिरङ्गादिति**' **न्यायः** प्रवर्तते, पदद्वयापेक्षत्वाद्वत्वं बहिरङ्गमेकपदान्तर्वर्त्तित्वात् '**अवर्णस्ये**'त्योत्वं अन्तरङ्गमित्यन्तरङ्गस्य बलवत्त्वादोत्वमेव प्रथमं कार्यम् । '**अतोऽती**'ति निर्देशादेव सानुबन्धस्य रस्यैव ग्रहणम्, न तु रुवर्णस्य, तेन तरु अयनमित्यत्र न रोरुः, सानुबन्धग्रहणाच्च निरनुबन्धस्य रेफस्य नोत्वम्, तेन प्रातर् अत्र, अत्र न रस्य उः ॥ **घोषोऽस्यास्तीति** घोषवत् तस्मिन् ॥ अतो रो रुः इत्यनुवर्तन्ते, जयतीति जेता, धर्म स् जेता, '**सो रुः**' '**घोषवति**' इति रोः उः, '**अवर्णस्ये**'त्योत्वम्, धर्म रु जेतेत्यत्र '**अवर्णभोभगो**' इति रोः लुक् प्राप्तः, तथापि 'घोषवती' त्येवात्र प्रवर्तते, दीर्घाऽऽकारविषये 'अवर्णभोभगो' इत्यस्य चरितार्थत्वात् सावकाशत्वं तस्य । ह्रस्वाकारस्थलेऽपि तस्य प्रवृत्तौ '**घोषवती**'ति सूत्रं निरवकाशं स्यात्, तथा च '**निरवकाशं सावकाशाद्बलीयमि**'ति **न्यायेन** 'घोषवती' त्येव प्रवर्तते ॥ **अवर्णश्च भोश्च भगोश्च अघोश्च तस्मात्, लुक्, न सन्धिः असन्धिः** ॥ एते त्रयः लुप्तसकाराः भोस् भगोस् अघोस्, इत्येतेषामनुकरणशब्दा ज्ञेयाः, भोस् इत्यादयश्च आमन्त्र्यार्थद्योतका अव्ययाः । ननु लुकः सन्धिरूपत्वेऽसन्धिरिति प्रतिषेधो युक्तः स्यात्, यावता च लुक् सन्धिरूप एव न भवति, अभावरूपत्वात्, तत्कथमसन्धिरिति शङ्कायामुक्तम्, स च न सन्धिहेतुरिति । रोः घोषवतीत्यनुवर्तते । देवा यान्ति, '**सो रुः**' अनेन लुक् । भगोस् हस !, हसे हसने, पञ्चमी हि प्रत्यये हस !। *अघोस् वद् व्यक्तायां वाचि, पञ्चमी हि वद । अत्र सर्वत्र लुगन-*

स्थस्य रोर्घोषवति परे लुक् स्यात्, स च न सन्धिहेतुः। देवा यान्ति, भो! यासि, भगो! हस, अघो! वद ॥ **व्योः** ॥२३॥ अवर्णात्परयोः पदान्तस्थयोर्वययोर्घोषवति परे लुक् स्यात्, स चासन्धिः। वृक्षवृश्चमव्ययञ्चाऽऽचक्षाणो वृक्षव्, अव्यय्, वृक्षयाति, अव्ययाति ॥ **स्वरे वा** ॥२४॥ अवर्णभोभगोअघोभ्यः परयोः पदान्तस्थयोर्वययोः स्वरे परे लुग्वा स्यात्, स चासन्धिः। पट इह, पटविह। वृक्षा इह, वृक्षाविह। त आहुः, तयाहुः। तस्मा इदम्, तस्मायिदम्। भो अत्र,

---

न्तरं कस्यापि सन्धेरप्राप्तेरसन्धिग्रहणमुत्तरार्थं विज्ञेयम्, लुक्सन्नियोगशिष्टत्वज्ञापनाय चात्रोपादानम्, तेन यत्र लुक् तत्रैवासन्धिः, यत्र च लुग्निवृत्तिस्तत्रासन्धिरपि निवर्तते ॥ व् च य् च व्यौ तयोः ॥ घोषवति, अवर्णात् लुगिति चाऽनुवर्त्तन्ते। वृक्षं वृश्चतीति वृक्षवृद्, क्विप्, वृक्षवृश्चमाचष्टे वृक्षवयति 'णिज् बहुलं' णिज्, 'अन्त्यस्वरादेः,' अन्त्यस्वरलोपः, वृक्षवयतीति 'मन्वन्क्वनिप् विच्' इति विच्प्रत्ययः अन्यथा क्विपि ऊट् स्यात्, 'णेरनिटि' णिग्लोपः, 'अप्रयोगीत्' विच्लोपः, इति सिद्धं वृक्षव्। अव्ययमाचष्टे अव्ययति, अव्ययतीति अव्ययू ॥ स्वरे, वा ॥ अवर्णभोभगोऽघो, व्योः इति पदानि वर्तन्ते। पटु आमन्त्र्ये, 'ह्रस्वस्य गुणः,' इह अव्ययम्, अवादेशः, अनेन लोपः, गुणे प्राप्ते असन्धिः। ते आहुः, तस्मै इदम्। भोस् अत्र, इत्यत्र 'सोरुः' 'रोर्यः' 'स्वरे वा' इति यलोपः। एवमग्रेऽपि ॥ **न स्पष्टौ** अस्पष्टौ, अवर्णात्, तु, न उञ् अनुञ् तस्मिन्, वा ॥ अवर्णभोभगो, व्योः स्वरे इति पदान्यनुवर्तन्ते। अस्पृष्टाविति एको योगः, अवर्णात्त्वनुञि वेत्यपरो योगः। पूर्वयोगे वेति न सम्बध्यते, अत एव नित्यमस्पृष्टविधानम्। सर्वमिदमवर्णपदोत्तरं तुशब्दोपादानात्सूचितम्। पटो उञ्, अवादेशः। उत्तरयोगेनावर्णात्परयोः यवयोः उञ्वर्जस्वरे परे एव

भोयत्र । भगो अत्र, भगोयत्र । अघो अत्र, अघोयत्र ॥ **अस्पष्टावर्णात्त्वनुत्रि वा** ॥२५॥ अवर्णभोभगोअघोभ्यः परयोः पदान्तस्थयोर्वययोरस्पष्टावीषत्स्पृष्टतरौ वयौ स्वरे परे स्याताम्, अवर्णात्तु परयोर्व्योरुञ्वर्ज्जे स्वरेऽस्पष्टौ वा स्याताम् । पटवुँ, असावुँ, कयुँ, देवायुँ, भोयँत्र, भगोयँत्र, अघोयँत्र । पटविह, पटविँह, असाविन्दुः २, तयिह २, तस्मायिदम् २ ॥ **रोर्यः** ॥२६॥ अवर्णभोभगोअघोभ्यः परस्य पदान्तस्थस्य रोः स्वरे परे यः स्यात् । कयास्ते, देवायासते, भोयत्र, भगोयत्र, अघोयत्र ॥ **ह्रस्वान्ङ्णनो द्वे** ॥२७॥ ह्रस्वात् परेषां पदान्तस्थानां ङ्णनां स्वरे परे द्वेरूपे स्याताम्। कुङ्ङा-

---

विकल्पतः अस्पष्टयवयोर्विधानात् उत्र् परे नित्यं तौ भवतः । असौ उ, कस् उ, ' सो रुः ' ' रोर्यः ' अस्पष्टो यः, कयु, देवास् उ, भोस् अत्र, एवमग्रे । पटो इह, अवादेशः, विकल्पेन अस्पष्टो वः, पटविह । पक्षे ' स्वरे वे ' ति लोपो वा, पट इह, पक्षे पटविह, एवमग्रेऽपि ॥ **रोः षष्ठी**, यः प्रथमा ॥ अवर्णभोभगोअघो, स्वरे, इत्यनुवर्तन्ते । कस् आस्ते, ' सो रुः ' अनेन यः । स्यादिविधौ रोरसत्त्वात्, ' अत आः स्यादावि ' ति येपरे न दीर्घः, एवमग्रेऽपि बोध्यम् ॥ **ह्रस्वात्**, ङ् च ण् च न् च, तस्य, द्वे प्रथमा ॥ स्वरे इति वर्तते । कुंचव् कौटिल्यालपीभावयोः, कुञ्चतीति मन्वन् विच् प्रत्यये कुङ्, कुङ् आस्ते, अनेन द्वित्वम् । सुष्ठु गणयतीति क्विपि सुगण् इह, कृषींत् विलेखने, कृषतीति कृषन् आस्ते । अत्र चोभयपदापेक्षया बहिरङ्गस्य द्वित्वस्यासिद्धत्वादनन्त्यत्वाभावेन णत्वं न भवति ॥ **आङ् च माङ् च आङ्माङ्**, न आङ्माङ् अमाङ्माङ् तस्मात्, **दीर्घात्**, वा, **छः षष्ठी** ॥ द्वे इत्यनुवर्तते । कन्यायाः छत्रम्, ' अघोषे प्रथमः ' पूर्वछकारस्य चः । आ ईषत् छाया आच्छाया, ' स्वरेभ्यः ' इति नित्यं द्वे रूपे । मा छिदत्, ' स्वरे-

स्ते, सुगण्णिह, कृपन्नास्ते ॥ **अनाङ्माङो दीर्घाद्वा छः** ॥२८॥ आङ्माङ्वर्जदीर्घात्पदान्तस्थात् परस्य छस्य द्वे रूपे वा स्याताम्। कन्याच्छत्रम्, कन्याछत्रम्। अनाङ्माङिति किम्? आच्छाया, माच्छिदत् ॥ **प्लुताद्वा** ॥२९॥ पदान्तस्थादीर्घात्प्लुतात्परस्य छस्य द्वे रूपे वा स्याताम्। आगच्छ भो! इन्द्रभूते ३ च्छत्रमानय, पक्षे छत्रमानय ॥ **स्वरेभ्यः** ॥३०॥ स्वरात्परस्य छस्य द्वे रूपे स्याताम्। इच्छ-

---

भ्यः'। ङित्करणादव्ययस्य आङ्माङोर्ग्रहणम् ॥ प्लुतात्, वा ॥ दीर्घात्, छः, द्वे इति सम्बध्यन्ते। अनुवर्तमानस्य दीर्घस्य प्लुतेन विरोधत्सामानाधिकरण्यासम्भवात् दीर्घस्थानकः प्लुतो ग्राह्यः, भो इन्द्रभूते, 'दूरादामन्त्र्यस्ये'ति प्लुतः, छत्रम्, अनेन छस्य द्वे रूपे। भूतपूर्वं दीर्घमाश्रित्य पूर्वसूत्रेणैव सिद्धाविदं सूत्रं 'ह्रस्वदीर्घापदिष्टं कार्यं न प्लुतस्ये'ति न्यायं ज्ञापयति। एवमेव हे राज ३ निह, इत्यादौ परत्वान्नित्यत्वाच्च, 'दूरादामन्त्र्यस्ये'ति जकारोत्तरवर्त्यकारस्य प्लुतत्वे कृते 'भूतपूर्वकस्तद्वदुपचार' इति न्यायेन ह्रस्वोपचारान्नस्य 'ह्रस्वान् ङ्ण्न' इति न द्वित्वमुक्तन्यायात्। तथा हे गो ३त्रात, इत्यत्र 'अदीर्घाद्विरामे'ति सूत्रे दीर्घवर्जनेऽप्युक्तन्यायेन प्लुतावर्जनात् वा द्वित्वम्॥ स्वरेभ्यः, द्वे छः इत्यनुवर्तते। बहुवचनं व्याख्यर्थम्, तेन पदान्ते इति निवृत्तम्। इच्छति, पदान्तेऽपि भवति, तेन वृक्षच्छाया ॥ र् च ह्श्च तस्मात्, र् च ह्श्च स्वरश्च र्ह्स्वरं न र्ह्स्वरं अर्ह्स्वरं तस्य, अनु नवा, द्वे इत्यनुवर्तते। अर्च्यते स्तूयते इत्यर्कः, चस्य कः अनेन सूत्रेण विकल्पेन कस्य द्वित्वम्। ब्रह्म, मस्य द्वित्वम्। पद्मानां ह्रदः, पद्मश्चासौ ह्रदश्चेति वा। अर्हेति रेफपरो हकारः। अर्हतीति अच्, अर्हः, क्रियतेऽनेनेति, करः, 'पुंनाम्नि' घः, अत्र अकारपरो रेफः, ततो द्वित्वं न भवति। अभ्यते, अत्र व्यञ्जनपरो रेफः। प्रोर्ण्णुनावेति, प्रोप-

ति, गच्छति ॥ **हादर्हस्वरस्यानु नवा** ॥३१॥ स्वरात्पराभ्यां रहाभ्यां परस्य रहस्वरवर्जस्य वर्णस्य द्वे रूपे वा स्याताम्, अनु-कार्यान्तरात्पश्चात् । अर्क्कः, अर्कः । ब्रह्म्म, ब्रह्म । अर्हस्वरस्येति किम् ? पद्महृदः, अर्हः, करः । स्वरेभ्य इत्येव ? अभ्यते । अन्विति किम् ? प्रोर्ण्णुनाव ॥ **अदीर्घाद्विरामैकव्यञ्जने** ॥३२॥ अदीर्घा-

---

सर्गात् ऊर्णु आच्छादने इत्यस्य धातोः परोक्षायां रूपम् । अत्र अनु इत्यस्याभावे सत्यन्तरङ्गत्वादनेन द्वित्वे कृते पश्चाद्बहिरङ्गं परोक्षानिमित्तं द्विर्वचनं स्यात्, ततश्च प्रोर्णुन्नावेत्यनिष्टं रूपं स्यात्, अतः प्रथमं प्रोर्णुनावेति प्रसाध्य ततोऽनेन णस्य द्वित्वम् ॥ न दीर्घः अदीर्घः तस्मात्, एकं च तद् व्यञ्जनं च, विरामश्च एकव्यञ्जनं च तस्मिन् ॥ द्वे, अर्हस्वरस्य, अनु इत्यनुवर्तते । त्वक्किति, अनेन द्वित्वम्, पुनश्चानेन एकव्यञ्जने परे द्वित्वं न भवति, ' यावत्सम्भवः तावद्विधिरि'ति न्यायात्, किञ्चित्फलाभावात् । यस्य सूत्रस्य यत्र प्रवर्त्तने किञ्चित्फलं नास्ति, तत्सूत्रं तत्र न प्रवर्त्यते, इत्यर्थकेन ' यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यत ' इति न्यायेन व्यर्थविधि-निषेधेन प्रवृत्तेः सम्भवस्य व्याहतत्वादन्यथा क्रियानुपरमप्रसङ्गात् । अर्हस्वरमात्रस्य द्वित्वविधानसामर्थ्यात् पदस्येति ' संयोगस्यादौ ' इति वा न प्रवर्तते । दधि अत्र इति स्थिते ' इवर्णादेरि ' ति यत्वेऽनेन धस्य द्वित्वम् । न च धस्य कथं द्वित्वं ' स्थानीवावर्णविधावि 'ति सूत्रेण यस्य स्थानिवद्भावात् व्यञ्जनपरत्वाभावादिति वाच्यम् । अस्य द्वित्वस्य वर्णविधित्वेनावर्णविधाविति निषेधात् । न च स्वरस्य परे प्राग्विधावित्यनेन परनिमित्तकस्य स्वरादेशस्य यकारस्य स्थानिवद्भावः स्यादिति वाच्यम्, ' न सन्धि ' इत्यनेन तन्निषेधात् । तथा च द ध् ध् य् अत्र, इति भवति । न चात्र ' पदस्ये 'ति सूत्रेण यलोपः स्यादिति वाच्यम्, ' असिद्धं *बहिरङ्गमि'ति न्यायेन* अन्तरङ्गे यकारलोपे क्रियमाणे बहिरङ्गस्य

त्स्वरात्परस्य रहस्वरवर्जस्य वर्णस्य विरामे असंयुक्तव्यञ्जने च परेऽनु द्वेरूपे वा स्याताम् । त्वक्क्, त्वक्, दद्ध्यत्र, दध्यत्र, गो३त्रात, गो३त्रात । अर्हस्वरस्येत्येव ? वर्या, वह्यं, तितउ ॥ **अञ्वर्गस्यान्तस्थातः** ॥३३॥ अन्तस्थातः परस्य ञ्वर्जवर्गस्य अनु द्वे रूपे वा स्याताम् । उल्क्का, उल्का । अञ्जिति किम् ? हल्ञौ ॥ **ततोऽस्याः** ॥३४॥

यत्वस्यासिद्धत्वात् । ' तृतीयस्तृतीये 'ति प्रथमधकारस्य दकारः । गो३त्रातेति, ' दूरादामन्त्र्यस्ये ' ति प्लुतः, अनेन तस्य द्वित्वम् । व्रियते इति वर्या, अत्र स्वरात्परो रः । ' वर्योपसर्ये 'ति यप्रत्ययः । उह्यतेऽनेनेति वह्यम्, वह्यं करणमित्यनेन निपातनम्, अत्र स्वरात्परो हकारः । तनोतीति तितउ, अत्र स्वरात्परः उकारः । तितउश्चालनिकेत्यर्थः ॥ न ञ् अञ्, अञ् चासौ वर्गश्च अञ्वर्गः तस्य, अन्तस्थाया इति अन्तस्थातः, ' आद्यादित्वा 'त्तस् ॥ अनु, द्वे इत्यनुवर्तते । उल्क्का, अत्र लकारात्परस्य ककारस्य द्वित्वम् । हल् चासौ ञश्च हल्ञौ, अत्र ञस्य द्वित्वनिषेधः । व्यञ्जनस्य हल्संज्ञा ॥ **तस्मात्** ततः, अस्याः षष्ठी ॥ द्वे इति वर्तते । तच्छब्देनाञ्वर्गस्य परामर्शः, इदंशब्देन चान्तस्थाशब्दस्य । दध्यत्रेत्यत्रानेन सूत्रेण धकारात्परस्य यस्य द्वित्वम्, तथा च धकारयकारयोर्द्वित्वविकल्पादेकधयकारात्मकमेकं रूपम् १ । द्विधद्वियघटितमेकं रूपम् २ । द्विधैकयघटितमपरं रूपम् ३ । एकधद्वियघटितं चान्यत् ४ । इति सामान्यतश्चत्वारि रूपाणि । ननु धकारस्य द्वित्वे कर्त्तव्ये ' असिद्धं बहिरङ्गमन्तरङ्गे ' इति **न्यायेन** बहिरङ्गः याऽऽदेशोऽसिद्ध इति कथं द्विधघटितं रूपं स्यादिति चेन्न, ' न सन्धी 'ति सूत्रे सन्धिग्रहणेनैव द्वित्वविधावपि स्थानिवद्भावप्रतिषेधे सिद्धे पृथग् द्वित्वग्रहणं ' असिद्धं बहिरङ्गमि'ति न्यायस्यानित्यतां ज्ञापयति, तेनात्रासौ न प्रवर्तते ॥ **शिटः** पञ्चमी, प्रथमश्च द्वितीयश्च प्रथमद्वितीयम् तस्य ॥ द्वे इति

ततोऽव्वर्गात्परस्या अस्या अन्तस्थाया द्वे रूपे वा स्याताम् । दध्यत्र, दध्यत्र ॥ **शिटः प्रथमद्वितीयस्य** ॥३५॥ शिटः परयोः प्रथमद्वितीययोर्द्वे रूपे वा स्याताम् । त्वंक्करोषि । त्वं करोषिं । त्वं क्खनसि, त्वं खनसि ॥ **ततः शिटः** ॥३६॥ ततः प्रथमद्वितीयाभ्यां परस्य शिटो द्वे रूपे वा स्याताम् । तच्छ्शेते, तच्छेते ॥ **न रात्स्वरे** ॥३७॥ रात्परस्य शिटः स्वरे परे द्वे रूपे न स्याताम् । दर्शनम् ॥ **पुत्रस्याऽऽदिन्पुत्रादिन्याक्रोशे** ॥ ३८ ॥ आदिनि पुत्रादिनि च परे पुत्रस्थस्य तस्य आक्रोशविषये द्वे रूपे न स्याताम् । पुत्रादिनी त्वमसि पापे, पुत्रपुत्रादिनी भव । आक्रोश इति किम् ? पुत्रादिनी

वर्तते । त्वं करोषि, अत्रानुस्वाररूपशिटः परस्य कस्य द्वित्वम् ॥ **ताभ्यां** ततः, शिटः षष्ठी ॥ तत्पदेन प्रथमद्वितीययोः परामर्शः । तत् शेते, प्रथमात्तकारात् परस्य शकारस्य शिटो वा द्वित्वं 'तवर्गस्ये'ति तस्य चः ॥ **न, रात्** पञ्चमी, **स्वरे** ॥ शिटः द्वे इति पदद्वयमनुवर्तते । दृशृं प्रेक्षणे, दृश्यते इति दर्शनम्, 'करणाधारे अनट्' गुणः, अर्, 'र्हादर्हस्वरस्ये'ति द्वित्वे विकल्पे प्राप्ते निषेधः ॥ **पुत्रस्य,** आदिन् च पुत्रादिन् च आदिन्पुत्रादिन् तस्मिन्, आक्रोशनमाक्रोशः तस्मिन् ॥ न द्वे इति वर्तते । पुत्रमत्तीत्वेवंशीला पुत्रादिनी 'नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमि'ति न्यायेन स्त्रिया मुदा हृतं प्रायेण तत्रैवाऽऽक्रोशसम्भवात् । अध्यारोपेण हि निन्दा आक्रोशः, तत्वाऽऽख्याने त्वसौ प्रतिषेधो नास्ति, 'अदीर्घाद्विरामैके'ति विकल्पे प्राप्ते प्रतिषेधपरमिदं सूत्रम् ॥ मश्च नश्च म्नः तेषाम्, धुट् चासौ वर्गश्च, तस्मिन्, अन्त्यः, न पदान्तः अपदान्तस्तस्मिन् ॥ गच्छतीति गन्ता, 'णकतृचौ,' अनेनात्र मकारस्य 'आसन्ने'ति सूत्रसहकारेण पञ्चमो नकारः । शकुङ् शङ्कायां, 'उदितस्वरान्नोन्तः,' शङ्कते इति शङ्किता, अत्रापि नकारस्य ङकारः, कम्पते इति कम्पिता, अत्र नकारस्य ङुः । 'आङो यम-

शिशुमारी, पुत्रादिनीति वा । पुत्रपुत्त्रादिनी नागी, पुत्रपुत्रादिनीति वा ॥ **म्नां धुड्वर्गेऽन्त्योऽपदान्ते** ॥३९॥ अपदान्तस्थानां मनानां धुटि वर्गे परे निमित्तस्यैवान्त्योऽनु स्यात् । गन्ता, शङ्किता, कम्पिता । धुडिति किम् । आहन्म्हे । धुड्वर्ग इति किम् ? गम्यते । अपदान्त इति किम् ? भवान् करोति ॥ **शिड्हेऽनुस्वारः** ॥४०॥ अपदान्तस्थानां म्नां शिटि हे च परेऽनुस्वारोऽनु स्यात् । पुंसि, दंशः, बृंह्^णम् ॥ **रो रे लुग्दीर्घश्चादिदुतः** ॥४१॥ रस्य रे परेऽनु लुक् स्यात्, अइऊनाञ्च दीर्घः । पुना रात्रिः, अग्नी रथेन, पटू राजा ।

हने 'त्यात्मनेपदम् । आहन्म्हे, अत्र मकारस्य वर्गत्वेऽपि धुट्त्वाभावान्न नकारस्य मकारः पञ्चमः । गम्यते इत्यत्र तु यकारस्य धुट्त्वेऽपि धुड्वर्गत्वाभावान्न मस्य यस्यान्त्यो रः । **म्ना**मिति बहुवचनं वर्णान्तरवाधनार्थम्, तेन अपदान्तस्थयावद्व्यक्तिव्याप्त्या तत्प्रवृत्तेः, कुर्वन्ति कृषन्तीत्यत्र नकारस्य णत्वं बाधित्वानेन वर्गान्त्य एव भवति ॥ **शिट्** च हश्च शिड्हं तस्मिन्, अनुस्वारः । अपदान्ते, म्नामिति चानुवर्तते । पुम्स् इ, अत्रानेन सूत्रेण शिटि परे मकारस्यानुस्वारः दंश दशने, दंशनं दंशः, घञ्प्रत्ययः । बृहु शब्दे, 'उदितस्वरान्नोन्तः' 'स्वरात्' नस्य णः, बृह्यते अत्रानटि म्नामिति बहुवचनात् बृंहणमित्यत्र णत्वम्, दंश इत्यादौ 'तवर्गस्ये'ति ञत्वं च बाधित्वानेनानुस्वार एव भवति ॥ **रः षष्ठी,** रे सप्तमी, लुग्, दीर्घः, च, अच इच उच अदिदुत् तस्य ॥ अत्रेकारात्परस्य रेफस्य रेफे अपदान्ते सम्भवो नास्ति, अत इद्ग्रहणादपदान्त इति नानुवर्तते, भिन्नस्थानिनिमित्तवर्णनाद्वा, ननु रोरिति किं सानुबन्धस्य रोर्ग्रहणं, किंवा निरनुबन्धस्य । आद्ये पुना रमते इत्यादि न सिध्येत्, द्वितीये चाग्नी रथेनेत्यादि न सिध्येदिति चेन्न,र इति सामान्यनिर्देशेन, 'निरनुबन्धग्रहणे सामान्यग्रहणमि'ति **न्यायेनो**भयोर्ग्रहणात्, अत एव वृत्तौ **रस्ये**त्युक्तम् । 'सप्तम्याः

अनु इत्येव ? अहोरूपम् ॥ **ढस्तङ्ढे** ॥४२॥ तन्निमित्ते ढे परे ढस्यानु लुक् स्यात्, दीर्घश्चादिदुतः । माढिः, लीढम्, गूढम् । तङ्ढ इति किम् ? मधुलिङ्ढौकते ॥ **सहिवहेरोच्चावर्णस्य** ॥४३॥ सहिवह्योर्ढस्य तङ्ढे परेऽनु लुक् स्यात्, ओच्चावर्णस्य । सोढा, वोढा, उद-

---

पूर्वस्ये 'ति परिभाषयाव्यवहितपूर्वस्य अदिदुतो दीर्घो विधेयः । पुनर् अव्ययम्, रात्रिः, अनेनात्र रस्य लुक्, पूर्वस्य चाकारस्य दीर्घः, निरनुबन्धरेफस्योदाहरणमिदम् । अग्नी रथेनेत्यादि तु रोः । अहोरूपमित्यत्र रोरुत्वे कृते रेफाभावाल्लुगूदीर्घौ न भवतः, लुग्दीर्घश्चेत्येकनिमित्तत्वात्, अन्यथा ' सर्वेभ्यो लोपो बलीयः ' इति **न्यायेन** परत्वाद्वाऽनेन रस्य लुकि दीर्घे च अहा रूपमिति स्यात् । अत्र न्याये लोपशब्देन लुगेव ग्राह्यः ॥ **ढः षष्ठी**, तन्निमित्तो ढः तङ्ढः, तस्मिन्, ' तवर्गस्ये 'ति दस्य डः ॥ लुग्दीर्घश्चादिदुत इत्यभिसम्बध्यते । इदं सूत्रं पदान्ते ' धुटस्तृतीय ' इत्यस्य, अपदान्ते तु ' तृतीयस्तृतीयचतुर्थे ' इत्यस्य बाधकम् । अतोऽन्वित्यधिकार एतयोः सूत्रयोर्विषयं मुक्त्वा ज्ञातव्यः । मह पूजायाम्, महनं माढिः, स्त्रियां क्तिः, मह् ति, ' हो धुट् पदान्ते, ' इति हस्य ढः, ' अधश्चतुर्थादि 'ति तस्य धः, मद् धि, ' तवर्गस्ये 'ति धस्य ढः, अनेन सूत्रेण प्रथमढकारस्य लोपः, अकारस्य दीर्घश्च । एवमग्रेऽपि ज्ञेयम् । लिहींक् आस्वादने, लिह्यते स्म लीढम्, गुहौग् संवरणे, गुह्यते स्म गूढं, मधुलेढीति किपि मधुलिट्, अत्र उत्तरढकारस्य पूर्वढनिमित्तत्वाभावाल्लुग्न ॥ **सहिश्च** वहिश्च तस्य, **ओत्**, च, **अवर्णस्य** ॥ **लुक्**, **ढस्तङ्ढे** इत्यनुवर्तते । षहि मर्षणे, सहते इति सोढा, णकतृचौ, *' हो धुट् ' हः ढः, 'अधश्चतुर्था ' तस्य धः, प्राग्वत् ।* वहीं प्रापणे, उद् वह् ताम्, ' सिजद्यतन्यामि 'ति सिच् प्रत्ययः, ' व्यञ्जनानामि 'ति वृद्धिः, ' धुट् ह्रस्वे 'ति सिच्

वोढाम् ॥ **उदः स्थास्तम्भः सः** ॥४४॥ उदः परयोः स्थास्तम्भोः सस्य लुक् स्यात् । उत्थाता, उत्तम्भिता ॥ **तदः सेः स्वरे पादार्था** ।४५॥ तदः परस्य सेः स्वरे परे लुक् स्यात् । सा चेत्पादपूरणी

लोपः, ' हो धुट् पदान्ते ' ' अधश्चतुर्था ' धः ' तवर्गस्य ' अनेन लोपः, ओच्च ।। **उदः** पञ्चमी, **स्था च स्तम्भ च** तस्य, सः षष्ठी ।। लुगित्यनुवर्तते । ' पञ्चम्या निर्दिष्टे परस्ये 'ति परिभाषालभ्यमर्थमाह–**उदः परयो**रिति । ष्ठां गतिनिवृत्तौ, षः सः । ' निमित्ताभावे नैमित्तिकस्याप्यभावः ' इति **न्यायेन** स्था, उत्तिष्ठतीति, णकतृचौ, उद् स्थाता, सलुक्, स्तम्भू इति सौत्रो धातुः उत्तभ्नातीति तृच् उत्तम्भिता उद इति स्थास्तम्भविशेषणस्यैव ग्रहणम्, तेन ऊर्ध्वं स्थानमस्येति उत् स्थानः, अत्र न सलुक्, उदः स्थानस्य विशेषणत्वात् न तु तिष्ठतेः । ननु उदस्थादित्यत्र सकारलोपापत्तिः, न च अडागमेन व्यवधानमस्तीति वाच्यम्, तस्य स्थाधात्वङ्गत्वेन ' स्वाङ्गमव्यवधायी 'ति न्यायेनाव्यवधायकत्वादिति चेन्न, ' निर्दिश्यमानस्यैवाऽऽदेशाः भवन्ती 'ति न्यायेन सूत्रे सकारादिस्थास्तम्भोरेव निर्दिष्टत्वेनोदस्थादित्यत्र त्वकारादिस्थाशब्दस्य सत्त्वान्न सलोपापत्तिः । अत्र स्थाशब्दस्य घटितत्वेऽप्यागमसमभिव्याहारे आगमसहितस्यैवाऽर्थवत्त्वात् तद्घटितस्थायाः निरर्थकत्वात् अर्थवद्ग्रहणपरिभाषयानर्थके तत्राऽप्रवृत्तेश्च ॥ **तदः** पञ्चमी, **सेः** षष्ठी, **स्वरे**, **पादाय इयं पादार्था** ॥ तदित्यनेन तदादेशभूतस्य सस्य ग्रहणम्, अन्यथा व्यञ्जनात्परस्य सेः ' दीर्घङ्याबि 'त्यनेन लुग् सिद्ध एव । ' पञ्चम्या निर्दिष्टे परस्ये 'ति वर्तते । तद इत्यत्र ' प्रकृतिवदनुकरणमि 'ति न्यायो न प्रवर्तते; अन्यथा तदोऽनुकरणभूतस्याऽस्य प्रकृतिवत्त्वस्वीकारे तस्मादिति स्यात् । सैष दाशरथी रामः, इत्यादौ सस् एषः इति स्थिते,

स्यात् । सैष दाशरथी रामः, सैष राजा युधिष्ठिरः । पादार्थेति किम् ? स एष भरतो राजा ॥ **एतदश्च व्यञ्जनेऽनञ्नञ्समासे ॥४६॥** एतदस्तदश्च परस्य सेर्व्यञ्जने परे लुक् स्यात्, अकि नञ्समासे न । एष दत्ते, स लाति । अनञ्नञ्समास इति किम् ? एषकः कृती, सको

' सो रुः ' ' रोर्यः ' तस्य लुक्, असन्धिश्च न भवति, अन्यथा स एष दाशरथी राम इति स्यात्, एवञ्चाष्टवर्णात्मकत्वलक्षणपादस्य हानिः स्यात्, अतोऽनेन सूत्रेण सलोपः सन्धिश्च । स एष भरतो राजा इत्यत्र तु रुत्वयत्वलोपासन्धीनां प्रवृत्तावपि न पादहानिरिति न प्रकृतसूत्रं तत्र प्रवर्तते । एवं ' सोऽहं तथाऽपि तवे ' त्याद्यपि भाव्यम् ॥ **एतदः** पञ्चमी, **च**, **व्यञ्जने**, **नञः** समासः, अक् च नञ्समासश्च, न अनञ्नञ्समासः तस्मिन् ॥ चशब्देन तदोऽनुकर्षः, लुगित्यनुवर्तते । **अनञ्नञ्समासे** इत्यत्र नञ् प्रसज्यप्रतिषेधपरः, न तु पर्युदासपरः, अन्यथा समासे एव सिलोपः स्यात् । प्रसज्यप्रतिषेधाश्रयणादेव अकि, नञ्समासे च न भवतीत्युक्तम् । कुत्सितोऽल्पोऽज्ञातो वा एषः एषकः, एवं सकः । ' त्यादिसर्वादेः स्वरेष्वन्त्यात् पूर्वो अक् ' इत्यनेनाऽतः पूर्वोऽक् । ' तन्मध्यपतितस्तद्ग्रहणेन गृह्यते ' इति **न्यायेन** साकोऽपि प्राप्ते प्रतिषेधः, न एषः अनेषः । ननु **अनेषो** यातीत्यत्र नञ्तत्पुरुषस्य पूर्वपदार्थप्राधान्यादेतच्छब्दाद्यर्थस्य गौणत्वात् ' आद्वेर ' इत्यादेः प्रधाने एव प्रवृत्तेरत्र तदप्रवृत्त्या ' दीर्घङ्याबि 'ति सिलोप एव स्यादिति चेन्न, नञ्समासे उत्तरपदार्थप्राधान्यस्येदमेव हि ज्ञापकम्, गौणत्वेऽपि वा नञ्समासे उत्तरपदार्थप्राधान्यप्रयुक्तकार्यस्य, तस्मा ' दाद्वेरः ' ' तः सौ सः ' इत्यादीनि प्रवर्तन्ते । तथा च प्रतिषेधाभावेऽनेनैव सिलोपः स्यादतो नञ्समासवर्जनं कृतम् ॥ **व्यञ्जनात्**, पञ्चमश्चान्तस्था च तस्याः, सर्वो

याति, अनेषो याति, असो वाति ॥ **व्यञ्जनात् पञ्चमान्तस्थायाः सरूपे वा** ॥४७॥ व्यञ्जनात् परस्य पञ्चमस्यान्तस्थायाश्च सरूपे वर्णे परे लुग् वा स्यात् । कुङ्को ङ्ङौ, कुङ्ङौ, कुङ्ङ्ङौ । आदित्यो देवताऽस्य आदित्यः, आदित्य्यः । सरूप इति किम् ? वर्ण्यते ॥ **धुटो धुटि स्वे वा** ॥४८॥ व्यञ्जनात्परस्य धुटो धुटि स्वे परे लुग्वा स्यात् । शिण्ढि, शिण्ड्ढि । स्व इति किम् ? तर्ता, दर्प्ता ॥ **तृतीयस्तृतीयचतुर्थे** ॥४९॥ तृतीये चतुर्थे च परे धुटस्तृतीयः स्यात् ।

ऽपि द्वन्द्वो विभाषया एकवद्भवतीत्येकवद्भावो नपुंसकत्वञ्च प्राप्तमपि सौत्रत्वान्नपुंसकत्वाभावः । समानं तुल्यं रूपं यस्य सरूपः, तस्मिन्, वा ॥ लुगिति वर्तते । कुङ्चतीति कुङ्, ङ् च ङ् च ङौ, कुङ्को ङ्ङौ कुङ्ङौ, ' पदस्ये 'ति चलोपः, 'युजञ्च क्रुञ्चो नो ङः,' अनेन सूत्रेण तस्य लुग्वा । अदितेरयमादित्यः, आदित्यो देवताऽस्य, 'अनिदम्भ्यणापपादे चे 'ति यप्रत्ययः अलोपः, अनेनैकयलोपः, वर्णण् वर्णक्रियाविस्तारगुणवचनेषु, वर्ण्यते, अत्र पञ्चमस्य णस्य सरूपो यकारो नेति णलुग्न भवति ॥ **धुटः** षष्ठी, धुटि, स्वे, वा ॥ लुग्, व्यञ्जनादिति पदद्वयमनुवर्तते । शिषृंप् विशेषणे, शिप् धातोः पञ्यम्यां हौ परे ' रुधां स्वरादि 'ति श्नाप्रत्यये ' श्नास्त्योर्लुगि 'त्यकारलोपे 'हुधुटः' इति हेः धिकृते ' तृतीयस्तृतीये 'ति षकारस्य डकारे, ' तवर्गस्ये 'ति धेः ढत्वे, ' स्नां धुडि 'ति णत्वे शिण्ढि इति जातेऽनेन वा डस्य लुक् । तृपौच् प्रीतौ, दृपौच् हर्षमोहनयोः, तृप्यतीति तृप्यतीति, ' णकतृचौ ' तर्ता दर्ता, अत्र न पकारस्य लोपः स्वपरत्वाभावात् ॥ **तृतीयः**, तृतीयश्च चतुर्थश्च तस्मिन् ॥ धुट इत्यनुवर्तते ॥ दुमस्जौत् शुद्धौ, मस्ज, वर्तमाने तिव्, ' तुदादेः ' शः, ' शस्य शषौ ' इति सस्य शे कृते शकारस्यानेन सूत्रेणासन्नो जकारः । दुहींक् क्षरणे, श्वस्तन्यां ता, दोग्धा ' भ्वादेर्दार्दैर्घः ' हस्य घः,

मज्जति, दोग्धा ॥ **अघोषे प्रथमोऽशिटः** ॥५०॥ अघोषे परे शिड्वर्जस्य धुटः प्रथमः स्यात् । वाक्पूता । अशिट इति किम् ? पयस्सु ॥ **विरामे वा** ॥५१॥ विरामस्थस्याऽशिटो धुटः प्रथमो वा स्यात् । वाक्, वाग् ॥ **न सन्धिः** ॥५२॥ उक्तो वक्ष्यमाणश्च स-

---

'अधश्चतुर्था' तस्य धः, 'धुटस्तृतीय' इति पदान्तार्थम्, एतच्चापदान्तार्थं सूत्रम् ॥ **अघोषे**, प्रथमः, न शिट् अशिट् तस्य ॥ धुट इत्यनुवर्तते, 'चजः कगं' चः कः । 'धुटस्तृतीयः' कस्य गकारः । अनेन प्रथमः कः । पूयते स्मेति पूता, वाचा पूता वाक्पूता । पयस्सु, अत्र न सकारस्य प्रथमः शिऽरूपघुट्त्वात् । यद्यपि पयस्त्वित्यत्र 'शषसे शषसं वे'ति विधानादपि प्रथमता न प्राप्नोति, तथापि श्योततीत्यादौ शकारस्य चकारे परे प्रथमताऽऽपत्तिः स्यादिति शिड्वर्जनम् ॥ **विरामे**, वा ॥ धुटः प्रथमोऽशिट इत्येतेषामनुवृत्तिः । विरामे इति वैषयिकी सप्तमी, तथा च विरामविषयस्याऽशिटो धुट इत्यर्थः । विरामश्चोच्चारणाभावः । न च यत्र चैत्रेण वागित्युच्चारितं तदनन्तरमेव मैत्रेण घट इत्युच्चारितम्, तत्र विरामो न स्यादुच्चारणाभावस्याभावादिति वाच्यम्, वर्णविशिष्टाभावस्य विरामत्वात्, अभावे वर्णवैशिष्ट्यञ्च स्वकर्मकोच्चारणकर्तृपुरुषोच्चारितवर्णप्रतियोगिकत्वम्, अर्धमात्राधिककालाव्यवायेन स्वकर्मकोच्चारणकर्तृपुरुषोच्चारितवर्णावधिकपूर्वत्वाभाववत्त्वमेतदुभयसम्बन्धेन । तथा चोक्तस्थले उभयसम्बन्धेन वर्णविशिष्टाभावस्य सत्त्वान्न विरामत्वक्षतिः । वक्तीति वाच्, 'धुटस्तृतीयः' 'चजः कगं' विरामे वा ॥ **न**, सन्धानं सन्धिः, विरामे इत्यनुवर्तते । कार्यनिमित्तयोर्यदाऽतिशयितसन्निधिर्विवक्ष्यते तदैव सन्धिर्भवति । भावार्थश्च पदधातूपसर्गसमासानां नियमेनैकप्रयत्नोच्चार्यत्वान्नित्यसमुदितत्वाच्च विरामाभावान्नित्यं संहिता भवति, यथा देवेन, उपैति, परमेश्वरः इति । वाक्ये तु संहिता विवक्ष-

न्धिर्विरामे न स्यात् । दधि अत्र, तद् लुनाति ॥ **रः पदान्ते विसर्गस्तयोः** ॥५३॥ पदान्तस्थस्य रस्य तयोर्विरामाघोषयोर्विसर्गः स्यात् । वृक्षः, स्वः, कः कृती । पदान्त इति किम् ? ईर्त्ते ॥ **ख्यागि** ॥५४॥ पदान्तस्थस्य रस्य ख्यागि परे विसर्ग एव स्यात् । कः ख्यातः, नमः ख्यात्रे ॥ **शिट्यघोषात्** ॥५५॥ अघोषात्परे शिटि परतः

धीना, विरामविवक्षया न सन्धिः, अविरामविवक्षया च सन्धिरिति । अविरामस्तु स्वारसिकार्धमात्राकालव्यवधानेनोच्चारणम् । ततोऽधिकमात्राकालेनोच्चारणे न साधुत्वम् नापि बोध इष्यते तज्ज्ञैः । उक्तञ्च, संहितैकपदे नित्या नित्या धातूपसर्गयोः । नित्या समासे वाक्ये तु सा विवक्षामपेक्षते, इति ॥ रः षष्ठी, पदान्ते विसर्गः तयोः सप्तमी ॥ तत्पदेन विरामाघोषयोः परामर्शो विरामविषयेऽघोषे वा परत्व इत्यर्थः । र इत्यनेन ' निरनुबन्धग्रहणे सामान्यस्य ग्रहणमि 'ति न्यायेन रोः रेफस्य च ग्रहणम् । वृक्ष इति, विरामविषये रोरुदाहरणम्, स्व इति विरामविषये रेफस्योदाहरणम् । कः कृतीत्यघोषे परे रोरुदाहरणम् । ईरिक् गतिकम्पनयोः, वर्तमाने ते, अत्र रेफस्य पदान्तेऽभावान्न विसर्गः । अत्राऽप्यन्वित्यधिकाराद्वीरित्यादौ दीर्घे कृते विसर्गः, अन्यथा हि पूर्वं विसर्गे कृते इरुरोरभावाद्दीर्घो न स्यात् ॥ ख्यागि ॥ रः पदान्ते विसर्ग इत्यनुवर्तन्ते । चक्षिक् व्यक्तायां वाचि, ख्यायते स्म क्तप्रत्ययः, ' चक्षो वाची 'ति ख्यागाऽऽदेशः, चष्ट इति ख्याता ' णकतृचौ, ' तस्मै ख्यात्रे । पूर्वेणैव सिद्धे नियमार्थमिदम्, तेन जिह्वामूलीयो न भवति, ख्याक् प्रकथन इत्यस्य जिह्वामूलीयोऽपि, सूत्रे ख्याग् भणनात् ॥ शिटि, अघोषात् ॥ रः पदान्ते विसर्ग इत्यभिसम्बध्यते । अघोषादिति शिटो विशेषणम् न तु रेफस्य, अघोषात्परस्य पदान्ते विद्यमानस्य रेफस्यासम्भवात्, अत

पदान्तस्थस्य रस्य विसर्ग एव स्यात्। पुरुषः त्सरुकः, सर्पिः प्साति, वासः क्षौमम्, अद्भिः प्सातम् ॥ **व्यत्यये लुग्वा** ॥५६॥ शिटः परोऽघोष इति व्यत्ययस्तस्मिन्सति पदान्तस्थस्य रस्य लुग्वा स्यात्। चक्षु श्च्योतति, चक्षुश्च्योतति चक्षुः, श्च्योतति ॥ **अरोः सुपि रः** ॥५७॥ रोरन्यस्य रस्य सुपि परे र एव स्यात्। गीर्षु, धूर्षु, अरोरिति किम्? पयस्सु ॥ **वाहर्पत्यादयः** ॥५८॥ अहर्पत्यादयो यथायोगमकृतविसर्गाः कृतोत्वाभावाश्च वा स्युः। अर्हपतिः, अहः पतिः।

एवोक्तमघोषात् परे शिटीति। त्सरौ कुशलः 'को श्चादेरि'ति कप्रत्ययः, पुरुषः त्सरुकः, 'चटत' इति सत्वप्राप्तौ नियम्यते। सर्पिस् प्साति, अत्र 'वेसुसोऽपेक्षायामि'ति षत्वे प्राप्ते नियम्यते। वासः क्षौमम्, अद्भिः प्सातम्, अत्र 'कखे'ति ×क×पौ न भवतः॥ व्यत्यये लुग्, वा॥ रः पदान्ते इति वर्तते। व्यत्ययश्च वैपरीत्यम्, तच्च शिटः परोऽघोष इति। चक्षुस् श्च्योततीत्यादौ चक्षुस्, 'सो रुः' इति कृतस्य रोरनेन लोपः, पक्षे तु 'शषसे' इति सस्य शः। पक्षे विसर्गः॥ न रुः अरुः तस्य, सुपि, रः प्रथमा॥ र इत्यनुवर्तते, गिर् सु 'रः पदान्ते' इति विसर्गे प्राप्तेऽनेन रकार एव भवति, कार्यान्तरबाधनार्थो नियामकमिदं सूत्रम्, 'पदान्ते इति दीर्घः, 'नाम्यन्तस्थे'ति सस्य षः, एवमग्रेऽपि। पयस्सु इत्यादौ 'सो रुः', 'रः पदान्ते' 'शषसे शषसं वा' पयः सु। अत्र 'सो रुः' इति कृते 'नाम्यन्तस्थे'ति सूत्रेण रकारस्यान्तस्थत्वात्तत्परः शकारः कथं न भवति, उच्यते, 'रः पदान्ते' इत्यस्य नित्यत्वात् 'परान्नित्यमि'ति न्यायेन 'नाम्यन्तस्थे'ति बाधनात्। अत्र रुप्रतिषेधः 'निरनुबन्धग्रहणे सामान्येने'ति न्यायं सूचयति। रः पदान्त इत्यत्र सामान्येनोक्तात् रशब्दादुभयस्य प्राप्तौ सत्यां हि प्रतिषेधः सार्थकः स्यात्। रशब्देन द्वयोः प्राप्तिश्चास्य न्यायस्य सद्भावे एवेति॥

गीर्पतिः, गीः पतिः । प्रचेता राजन्, प्रचेतो राजन् ॥ **शिटयाद्यस्य द्वितीयो वा** ॥५९॥ प्रथमस्य शिटि परे द्वितीयो वा स्यात् । ख्षीरम्, क्षीरम् । अफ्सराः अप्सराः ॥ **तवर्गस्य श्चवर्गष्टवर्गाभ्यां योगे चटवर्गौ** ॥६०॥ तवर्गस्य शचवर्गाभ्यां षटवर्गाभ्यां च योगे यथासङ्ख्यं चवर्गटवर्गौ स्याताम् । तच्शेते, भवाञ्शेते, तच्चारु

वा, अहर्पतिरादिर्येषान्ते अहर्पत्यादयः । अहर्पत्यादयो वा भवन्तीति कथनात् निपातः फलति । अह्नां पतिः, ' रो लुप्यरि ' इति नस्य रः । गिरां पतिः गीर्पतिः, ' पदान्ते ' इति दीर्घः, उभयत्र विसर्गोऽभावो निपात्यते । प्रकृष्टं चेतो यस्य राज्ञोऽसौ, तस्याऽऽमन्त्रणं हे प्रचेता राजन् ! ' सो रुः ' अनेन उत्वाभावो वा निपात्यते । ' रो रे लुगि 'ति दीर्घलुगौ, पक्षे ' घोषवति ' उत्वम्, हे प्रचेतो राजन् ! । पृथग् सम्बोधनयोः सतः प्रचेता ! राजन् ! वा । निपातनादेव पदान्ताधिकारो निवृत्तः ॥ बहुवचनमाकृतिगणार्थम् । आकृतिः सादृश्यम्, तत्प्रधानो गणः आकृतिगणः, अथवाऽऽकृतिशब्देन जातिरुच्यते सा यथा निखिलव्यक्तिव्याप्ता तथा यः प्रचुरशब्दविषयं व्याप्नोति सः जातिसादृश्यादाकृतिगणः ॥ शिटि, आद्यस्य, द्वितीयः, वा ॥ क्षीरमित्यत्र वर्गादिभूतस्य ककारस्य शिट्परत्वाद्वा खकारः । एवमप्सरा इत्यादिष्वपि ॥ तवर्गस्य, श् च चवर्गश्च श्चवर्गम्, ष् च टवर्गश्च ष्टवर्गम्, श्चवर्गं च ष्टवर्गं च श्चवर्गष्टवर्गे, ताभ्याम्, योगे, चश्च टश्च चटौ, तयोः वर्गौ चटवर्गौ ॥ समुदायद्वयापेक्षया यथासङ्ख्यार्थं तृतीयाद्विवचनम् । अत्र योगग्रहणाभावेऽवर्णस्येवर्णादिनेत्येव सहार्थतृतीयायां श्चवर्गादेरपि स्थानित्वं स्यात्, दिग्योगलक्षणपञ्चम्यङ्गीकारे 'पञ्चम्या निर्दिष्टे परस्ये'ति न्यायेन परस्यैव तवर्गस्य स्यान्न तु पूर्वस्येति योगग्रहणम् । योगोऽत्र पूर्वतः परतो वा तत्र परत इत्यस्योदाहरणं तत् शेते, यद्यपि

तज्जकारेण, पेष्टा, पूष्णः, तट्टकारः, तण्णकारेण, ईट्टे ॥ **सस्य शषौ** ॥६१॥ सस्य श्चवर्गष्टवर्गाभ्यां योगे यथासङ्ख्यं शषौ स्याताम्। चवर्गेण–श्योतति, वृश्चति, षेण, दोष्षु। टवर्गेण–पापट्षि॥ **न शात्** ॥६२॥ शात्परस्य तवर्गस्य चवर्गो न स्यात्। अश्नाति, प्रश्नः॥ **पदान्ताट्टवर्गादनाम्नगरीनवतेः** ॥ ६३ ॥ पदान्तस्थाट्टवर्गात्परस्य

तवर्गस्येति कथनात्तदेकदेशस्य तकारस्य चकारो न भवति, विशिष्टतवर्गसमुदायाभावात्, तथापि समुदायैकदेशस्यापि समुदायात्मकत्वाद्ग्रामैकदेशे दग्धे ग्रामो दग्ध इति प्रतीतिवत् तकारस्यापि तवर्गत्वाद्यथासंख्यं चवर्गः स्यादेव। अनेन तकारस्य चकारः तत- 'श्रजः कगमि'ति न भवति, पदमात्राश्रयत्वेन 'चजः कगमि'त्यस्यान्तरङ्गत्वेन 'असिद्धं बहिरङ्गमि'ति न्यायेन चवर्गस्यासिद्धत्वात् एवं भवान् शेते, नस्य ञः। तत् चारु, तस्य चः। एवं तद् जकारेण, दकारस्य जकारः। पूर्वतो योगे दृष्टान्तमाह–पेष् ता, अत्र तस्य टः। एवमग्रेऽपि, यथासङ्ख्यमिति, अत्र स्थान्यादेशयोर्यथासङ्ख्यं विज्ञेयम्। न तु निमित्तकार्यिणोः, 'न शादि'ति सूत्रारम्भात्॥ **सस्य, शश्च षश्च शषौ** ॥ श्चवर्गष्टवर्गाभ्यां योग इत्यनुवर्तते। श्योततीत्यादौ धातोरादिभूतः सकारो विज्ञेयः, नकारजावनुस्वारपञ्चमौ धुटि धातुषु। सकारजः शकारश्च षष्टवर्गस्तवर्गजः॥ इत्यभियुक्तोक्तेः। अनेन सूत्रेण तस्य शकारो जातः, एवं वृश्चतीत्यत्रापि। दोस् सुप्, 'सोरुः' सस्य 'शषसे' सत्वं 'नाम्यन्तस्था' इति सव्यवधानेऽपि सोः षत्वम्, दोस् षु, अनेन षः। अट पट गतौ, कुटिलं पटसि, पापट्षि, 'गत्यर्थे यङ्', 'सन्यङश्चे'ति द्वित्वम्। 'व्यञ्जनस्यानादेर्लुगि'ति टलोपे, 'आ गुणावन्यादेरि'ति वा, 'बहुलं लुप्' यङ् लोपः, अनेन षः॥ **न, शात्** ॥ तवर्गस्य चवर्ग इत्यनुवर्तते। अशश् भोजने,

नाम्नगरीनवतिवर्जस्य तवर्गस्य सस्य च टवर्गषौ न स्याताम्। षट्तयं, षण्नयाः, षट्सु । अनाम्नगरीनवतेरिति किम् ? षण्णाम्, षण्णगरी, षण्णवतिः ॥ **षि तवर्गस्य** ॥६४॥ पदान्तस्थस्य तवर्गस्य षे परे टवर्गो न स्यात् । तीर्थकृत्षोडशः शान्तिः ॥ **लि लौ** ॥६५॥ पदा-

---

वर्तमाने तिव्, क्रयादेः श्ना अश्नाति । ' तवर्गस्ये 'ति सूत्रेण यश्चवर्गः प्राप्तः सोऽनेन सूत्रेण निषिध्यते । पृच्छतीति प्रश्नः ॥ पदान्तात्, टवर्गान्त, नाम् च नगरी च नवतिश्च, न विद्यते नाम्नगरीनवतिर्यस्मिन्, तस्य ॥ तवर्गस्य, सस्य, टवर्गः, षः, नेत्येतेषामनुवृत्तिः । नामिति, आमादेशभूतो नाम् गृह्यते, ' प्रत्ययाप्रत्ययय' प्रत्ययस्यैव ग्रहणमि 'ति न्यायात् । षट् अवयवा यस्य तत्, षट्तयम्, 'अवयवात्तयट्', षष्तयम, 'धुटस्तृतीयः' षड्, 'अघोषे' इति डस्य टः, अत्र 'तवर्गस्ये'ति तकारस्य टत्वे प्राप्तेऽनेन निषेधः । षट् च ते नयाश्च षण्नयाः, षष् नयाः, ' धुटस्तृतीये 'ति षस्य डः, 'तृतीयस्य पञ्चमे', षण् नयाः, 'तवर्गस्ये'ति सूत्रेण नकारस्य णत्वं प्राप्तमनेन निषिध्यते । एवं षट्स्वपि भाव्यम् । ' सङ्ख्यानां र्णा 'मिति आमो नाम्, षष् नाम्, 'धुटस्तृतीय' 'तृतीयस्य पञ्चमे' षण् नाम्, अत्र नामो वर्जनात् ' तवर्गस्ये 'ति णत्वम्, एवमग्रेऽपि । षण्णां नगरी षण्णगरी । षड्भिरधिका नवतिः षण्णवतिः ॥ षि, तवर्गस्य ॥ पदान्तात् टवर्गो नेत्यनुवर्तन्ते । तीर्थं करोतीति तीर्थकृत्, षड्भिरधिका दश, इति षोडश, षोडशानां पूरणः षोडशः । अत्र तकारस्य टकारे प्राप्तेऽनेन निषेधः ॥ लि, लृच लृच लौ । 'स्यादावसङ्ख्येय' इत्येकस्य लस्य लोपः । लकारद्वयोक्त्यानुनासिकाननुनासिकौ लौ ॥ पदान्तात्, तवर्गस्येति चानुवर्तते । तत् लूनम्, अनेन सूत्रेण तकारस्य निरनुनासिको लः । भवान्, लुनाति, अत्र च नकारस्य सानुनासिको लकारः । यद्यपि ' आसन्न ' इति सूत्रेण

न्तस्थस्य तवर्गस्य ले परे लौ स्याताम् । तल्लूनम्, भवाल्लुनाति ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधान-
स्वोपज्ञशब्दानुशासनलघुवृत्तौ प्रथमाध्यायस्य
तृतीयः पादः समाप्तः ॥

निरनुनासिकस्य स्थाने निरनुनासिकस्य, सानुनासिकस्य स्थाने सानुनासिकस्य च लस्य प्राप्तिर्भविष्यतीति लाविति द्विवचनं निरर्थकं तथाप्यन्यत्रानुनासिकस्यापि स्थानेऽननुनासिको भवतीति सूचनार्थं द्विवचनम्, तेन अष्टन् शब्दे 'वाष्टनः स्यादौ' इति सूत्रेण नकारस्य स्थाने निरनुनासिकः आकारो भवति ॥

॥ इति प्रथमाध्याये तृतीयपादस्यावचूरिपरिष्कारः समाप्तः ॥



चतुर्थः पादः

अत आः स्यादौ जस्भ्याम्ये ॥ १ ॥ स्यादौ जसि भ्यामि ये च परेऽकारस्य आः स्यात् । देवाः, आभ्याम्, सुखाय । स्यादाविति किम् ? बाणान् जस्यतीति क्विप्–बाणजः ॥ **भिस**

अतः षष्ठी, **आः**, सिरादिर्यस्य स तस्मिन्, जस् च भ्यां च यश्च तस्मिन् ॥ देवेत्यस्य ' अधातुविभक्ती'त्यनेन नामत्वे ' नाम्नः प्रथमैकद्विबहावि 'ति बह्वर्थवृत्तेर्देवशब्दाज्जसि जकारलोपे ' समानानामि 'ति दीर्घं बाधित्वा ' लुगस्यादेत्यपदे 'इत्यनेनालोपे प्राप्तेऽनेन सूत्रेणाऽऽकारः, तेन देवा असिति जातं ततश्च ' समानानामि 'त्यनेन दीर्घः ' रो रुः ' ' रः पदान्ते 'देवाः । इदम् भ्याम् ' आद्वेरः ' ' अनशि 'त्यनेनेदमोऽदाऽऽदेशः, अनेन दीर्घश्च, आभ्याम् । एवं सुखायेत्यादि । अत्र यस्य ' स्थानीवाऽवर्णविधावि 'तिपरिभाषया स्यादित्वं बोध्यम् । जसूच् मोक्षणे, बाणान् जस्यतीति बाणजः, क्वि, ' अप्रयोगीत् ' ' दीर्घऽञ्याबि 'ति सिलोपः । बाण जस्, अत्रानेन सूत्रेण जस्परत्वात्पूर्वस्याकारस्याऽऽकारः प्राप्तः, तद्वारणाय स्यादिग्रहणम् । ननु ' प्रत्ययाऽप्रत्ययोः प्रत्ययस्यैव ग्रहणमि'ति न्यायेन स्यादिग्रहणाभावेऽपि जसादिप्रत्ययस्यैव प्राप्त्या बाणज इत्यादौ जस्प्रत्ययाभावान्नाऽऽकारः प्राप्नोति, तत्र जस्भ्यांग्रत्ययौ स्यादावेव वर्तेते नान्यत्र, तत्साहचर्याद्यप्रत्ययोऽपि स्यादेरेव गृह्यते, तेन' वने साधुरि 'ति साध्वर्थे यप्रत्यये परेऽपि न दीर्घः,सत्यम्, तथाप्यधिकारार्थं स्यादावित्युक्तम् । तेन शुचिशब्दात् स्त्रीलिङ्गे ङीप्रत्यये कृते, 'ङित्यदिती'ति सूत्रेण नैकारः, ङीप्रत्यवस्य स्यादित्वाभावात् । **भिसः** षष्ठी,

ऐस् ॥ २ ॥ आत्परस्य स्यादेर्भिस ऐस् स्यात् । देवैः । ऐस्करणा-दतिजरसैः ॥ **इदमदसोऽक्येव ॥ ३ ॥** इदमदसोरक्येव सति

ऐस् प्रथमा ॥ अतः स्यादावित्येतयोरभिसम्बन्धः । ' अर्थवशाद्वि-भक्तिविपरिणाम' इति षष्ठ्यन्तस्यातोऽत्र पञ्चम्यन्तत्वम् । देव भिस्, अनेनैस्, ' ऐदौदि 'ति देवैः । अनेन भिसः ऐस्कर्त्तव्ये ' षष्ठ्या-ऽऽन्त्यस्ये 'ति **परिभाषासूत्रेण** सकारस्यैसादेशे प्राप्ते ' **अनेकवर्णः** सर्वस्ये 'ति **परिभाषासूत्रेण** सर्वस्य स्थाने ऐसादेशः । 'एद्बहुस्भोसी' त्येकारः प्राप्तः, तं निरवकाशत्वादिदं सूत्रं बाधित्वा प्रवर्तते । निर-वकाशत्वादिदं सूत्रं ' **निरवकाशं सावकाशाद्बलवदि** 'ति **न्यायस्य** ज्ञापकम् । यद्यपि भिस ऐसिति सूत्रवचनादपि देवैरित्यादिरूपं सिद्ध्यति, तथाऽप्यतिजरसैरित्यादि न सिद्ध्येदित्याह–**ऐस्करणादि**ति । जरा-मतिक्रान्तानि यानि कुलानीति विग्रहे ' **क्लीबे** ' ह्रस्वः, अतिजर भिस्, अत्रानेन सूत्रेणैस्, ' **एकदेशविकृतमनन्यवदि** 'ति **न्यायात्** ' जरायाः जरस्वे 'ति जरशब्दस्य जरसादेशः, तथा चातिजरसैरिति रूपम् । एस्विधाने त्वतिजरसेरित्यनिष्टं रूपं स्यात् । इदमेव ऐस्विधानं ' **सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्ये** 'ति **न्यायस्यानित्यतां** *ज्ञापयति, अन्यथाऽकाराज्जायमानस्यैसोऽकारविनाशेऽनिमित्तत्वेन* जरसादेशाभावेन भिस एस्विधानादेवातिजरैरिति रूपसिद्धावैस् विधानं व्यर्थं स्यादिति । पाणिनीयास्तु अतिजरैरित्येवेच्छन्ति ॥ इदं च अदस् च तस्य, अकि, एत्र ॥ अतः भिस ऐस् इत्यनुवर्तन्ते । कुत्सितैरल्पैरज्ञातैर्वा एभिरमीभिर्वा इमकैःअमुकैः । इदंशब्दात् 'त्यादि-सर्वादेरि 'ति सूत्रेणाकि, इदकमिति जाते ' आद्वेरः ' ' लुगस्या ' इदक भिस्, अनेन नियमसूत्रेण ऐस्, ' दो मः स्यादावि 'ति दस्य मकारे इमकैः, एवं अमुकैः, भिस ऐस्त्यनेनैव सिद्धे इदमदसो-रक्येव ऐसादेशार्थमिदं सूत्रम्, तेन इदंशब्दात् भिस्यनगिति

आत्परस्य भिस ऐस् स्यात् । इमकैः, अमुकैः । अक्येवेति किम् ? एभिः, अमीभिः ॥ **एद्बहुस्भोसि** ॥ ४ ॥ बह्वर्थे स्यादौ सादौ भादावोसि च परे अत एत्स्यात् । एषु, एभिः, देवयोः ॥ **टाङसो-रिनस्यौ** ॥ ५ ॥ आत्परयोष्टाङसोर्यथासङ्ख्यं इनस्यौ स्याताम् । तेन, यस्य ॥ **ङेङस्योर्यातौ** ॥ ६ ॥ आत्परस्य ङेर्ङसेश्च यथा-

---

इदमोऽकारे कृते अ भिसिति जाते भिस ऐस् न भवति, किन्तु ' एद्बहुस्भोसी'त्येत्वम्, एभिः, इदमदस एवाऽकि ' भिस ऐस् ' न त्वन्यशब्देभ्य इत्यनिष्टावधारणव्यावृत्तये एवकारः, अन्यथा तकैः विश्वकैरित्यादेरसिद्धिप्रसङ्गात् । **एत्**, स् च भ् च स्भौ, बहुषु स्भौ, बहुस्भौ च ओस् च तस्मिन् ॥ अत इत्यनुवर्तते । बहुशब्दोऽत्र न वैपुल्यवाची, किन्तु त्रित्वादिपरार्धान्तसङ्ख्याव्यापकधर्मविशेषावच्छिन्नपरः, अत एव बह्वर्थविषय इत्युक्तम् । कथं तर्हि दारा इति, अवयवबहुत्वस्यावयविन्यारोपात् । न चैकस्मिन्नपि वृक्षे तथैव बहुवचनापत्तिरिति वाच्यम्, तत्राऽऽरोपे प्रमाणाभावात् । दारादौ तु नित्यबहुवचनान्तत्वग्राहककोशादेर्वृद्धव्यवहारस्य च प्रमाणत्वेन वैषम्यात् । देव ओस्, अनेनैकारः ' एदैतोऽयाय् ' देवयोः ॥ टा च ङस् च टाङसौ तयोः, इनश्च स्यश्च इनस्यौ ॥ अत इत्यनुवर्तते, यथासङ्ख्यन्यायश्च । तद् टा, यद् ङस् ' आद्वेरः ' ' लुगस्यादेत्यपदे ' अनेन सूत्रेणेनस्याऽऽदेशौ यथाक्रमम् । त इन, ' अवर्णस्ये'ति गुणः ॥ ङेश्च ङसिश्च तयोः, यश्च आच्च यातौ ॥ अनुवृत्तिः पूर्ववत् । देव ङे, अनेन सूत्रेण ङेः यादेशः ' अत आः स्यादावि'त्यनेनाकारस्याऽऽकारः, देवाय । ननु ' अत आः स्यादावि 'ति सूत्रं कथमत्र प्रवर्तते, स्यादौ यस्य पाठाभावेन स्यादित्वाभावात्, मैवम्, ' स्थानीवावर्णविधावि ' ति सूत्रेण यादेशस्य स्यादित्वात् । सन्निपातपरिभाषाऽपि नात्र प्रवर्तते, तस्या अनित्यत्वात् । देव ङसि, अनेन सूत्रेणादादेशः

सङ्ख्यं य आद्य स्याताम् । देवाय, देवात् ॥ **सर्वादेः स्मैस्मातौ** ॥ ७ ॥ सर्वादेरदन्तस्य सम्बन्धिनोर्ङेङस्योर्यथासङ्ख्यं स्मैस्मातौ स्याताम् । सर्वस्मै, सर्वस्मात् । सर्व, विश्व, उभ, उभयट्, अन्य,

---

' समानानां ' । नन्वदित्येव विधीयताम्, दीर्घेण च देवादित्यादिरूपसिद्धेः । न चाद्विधाने ' लुगस्यादेत्यपदे ' इत्यनेनाकारलोपेऽनिष्टं रूपं प्रसज्येतेति वाच्यम्, तथा सति त् इत्येव कुर्यात्, तथाऽकृत्वा अत्करणात्तत्सूत्रस्याप्रवृत्तिरिति कल्पनादिति चेन्न, अतिजरसादिति-रूपसिद्ध्यर्थं तथोक्तेः ॥ सर्व आदिर्यस्य सः सर्वादिस्तस्य, स्मै च स्माच्च स्मैस्मातौ ॥ अतः, ङेङस्योरिति चानुवर्तते । ननु सर्व आदिर्यस्येति विग्रहे यस्य समुदायस्यादौ सर्वशब्दो विद्यते स समुदायः सर्वादिरुच्यते, एवञ्च सति सर्वशब्दस्य सर्व्वादित्वं न स्यादिति चेन्न, तद्गुणसंविज्ञानबहुव्रीहेराश्रयणात्तस्यान्यपदार्थस्य गुणा उपसर्जनानि वृत्तिघटकपदार्था इति यावत्, संविज्ञायन्ते क्रियान्वयित्वेन यत्र स बहुव्रीहिस्तद्गुणसंविज्ञानबहुव्रीहिरित्यर्थः । तथा चैककियान्वयित्वन वृत्तिघटकपदार्थविशिष्टान्यपदार्थवाचकत्वं तद्गुणसंविज्ञानबहुव्रीहित्वम्, यथा लम्बकर्णमानयेत्यत्रान्यपदार्थस्याऽऽनयनक्रियायामन्वये वृत्तिघटकपदार्थस्य श्रोत्रस्यापि तस्यामन्वयोऽनुभवसिद्ध इत्ययं तद्गुणसंविज्ञानबहुव्रीहिः । प्रकृते समुदायरूपान्यपदार्थान्वयिनि सर्वशब्दस्याप्यन्वय इति तद्गुणसंविज्ञानम् । स्यादीनां नाम्नो भावान्नाम्नामाक्षेपे तस्य सर्वादेर्विशेषणत्वे ' विशेषणमन्त ' इति परिभाषया तदन्तविधावदन्तं यत्सर्वाद्यन्तं नाम तत्सम्बन्धिन इत्यर्थो विज्ञेयोऽन्यथा ' न सर्वादेरि 'ति द्वन्द्वे सर्वादिनिषेधो व्यर्थः स्यात् । ' ग्रहणवता नाम्ना न तदन्तविधिरि 'ति न्यायस्याप्यप्रवृत्तेः, तेन परमसर्वस्मै इत्यादिसिद्धिः / न च सर्वस्मै इति न सिद्ध्येत्, सर्वाद्यन्तत्वाभावादिति वाच्यम् । 'आद्यन्तवदेकस्मिन्नि'ति न्यायेन तस्यापि सर्वाद्य-

अन्यतर, इतर, डतर, डतम, त्व, त्वत्, नेम, समसिमौ सर्वार्थौ, पूर्वापरावरदक्षिणोत्तरापराधराणि व्यवस्थायाम्, स्वमज्ञातिधनाख्यायाम्, अन्तरं बहिर्योगोपसंव्यानयोरपुरि, त्यद्, तद्, यद्, अदस्,

---

न्तत्वात्। ननु सर्वशब्दस्य बुद्धिस्थानेकार्थवाचित्वेन बहुवचनमेव स्यान्नैकवचनमिति चेन्न, बुद्धिस्थानेकसङ्ख्याकावयवाऽऽरब्धसमुदाये सर्वशब्दस्य शक्तत्वेन यदानुद्भूतावयवः समुदायस्तदैकवचनं भवत्येव, यथा सर्वो लोक इति। तादृक्समुदायद्वित्वादिविवक्षायां द्विवचनादि। उद्भूतावयवभेदविवक्षायां तु बहुवचनमेव सर्वे घटा इति। अत्र उभद्विशब्दयोः स्वार्थिकप्रत्ययद्वित्वविषययोः स्मेप्रभृतयो न स्युः, तयोर्गणपाठस्तु हेत्वर्थप्रयोगे ' सर्वादेः सर्वा ' इति सर्वविभक्त्यर्थः। एवं युष्मद्भवत्वस्मदामपि। डतरडतमौ प्रत्ययौ, केवलयोस्तयोः प्रयोगासम्भवात् प्रकृत्याक्षेपेण यस्माच्छब्दादिमौ प्रत्ययौ सम्भवतः तदादिशब्दा ऽतरडतमान्ता इह डतरडतमशब्दाभ्यां गृह्यन्ते, ' प्रत्ययः प्रकृत्यादेरि 'ति परिभाषासूत्रात्। तथा डतरग्रहणेनैव सिद्धेऽन्यतरग्रहणं डतमप्रत्ययान्तस्यान्यशब्दस्य सर्वादित्वनिवृत्त्यर्थम्। अन्ये त्वाहुः नायं डतरप्रत्ययान्तोऽन्यतरशब्दः, किन्त्वव्युत्पन्न एव तरोत्तरपदस्तरबन्तो वा, तन्मते डतमान्तस्याप्यन्यशब्दस्य सर्वादित्वम्, डतरडतमयोः पृथगुपादानमत्राऽन्यस्वार्थिकप्रत्ययान्तानामग्रहणार्थम्॥

पूर्वापरावरेति स्वाभिधेयापेक्षाऽवधिनियमलक्षणव्यवस्थावाचीन्येतानि सर्वादीनीत्यर्थः। अवध्यंशे नित्यसाकांक्षं यद्रूपं तद्रूपावच्छिन्नवाचकत्वं व्यवस्थावाचकत्वम्, यद्धर्मावच्छिन्नज्ञानोत्तरमवधिविशेषविषयिणी जिज्ञासा नियमेनोदेति तद्धर्मावच्छिन्नवाचकत्वमिति यावत्। स्वशब्द आत्माऽऽत्मीयज्ञातिधनार्थवृत्तिः, ज्ञातिधनार्थवृत्तौ तु न तस्य सर्वादित्वम्। ' अन्तरमवकाशावधिपरिधानान्तर्द्धिभेदतादर्थ्ये छिद्रात्मीयविनाबहिरवसरमध्येन्तरात्मनि चे 'ति कोशादन्तरशब्दो नानार्थ-

इदम्, एतद्, एक, द्वि, युष्मद्, अस्मद्, भवतु, किम् इत्यसंज्ञायां सर्वादिः ॥ **डेः स्मिन्** ॥ ८ ॥ सर्वादेरदन्तस्य डेः स्मिन् स्यात्। सर्वस्मिन् ॥ **जस इः** ॥ ९ ॥ सर्वादेरदन्तस्य जस इः स्यात्।

तत्र बहिर्योगे उपसंव्याने चार्थे एव तस्य सर्वादित्वम्। बहिरित्यनावृतो देशो बाह्यश्चोच्यते, तत्राद्येऽन्तरेऽन्तरा वा गृहाः नगरबाह्याश्चाण्डालादिगृहा इत्यर्थः। द्वितीये च नगराभ्यन्तरगृहा इत्यर्थः। उपसंव्यानेऽर्थे यथा, अन्तरस्मै पटाय, पटचतुष्टये तृतीयाय चतुर्थाय वेत्यर्थः। शाटकानां त्रये शरीरसंयुक्तस्य तृतीयस्य, चतुष्टये तु चतुर्थस्य बहिर्योगाभावादुपसंव्यानग्रहणम्। सत्यपि बहिर्योगे पुरीविषयतायां न सर्वादित्वम्, यथाऽन्तरायां पुरि। त्यदादिशब्दौ पूर्वोक्तपरामर्शकौ। यच्छब्द उद्देश्यपरामर्शकः। एतदिदमौ प्रत्यक्षोपस्थिते। अदस् व्यवहिते। एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा साधारणे समानेऽल्पे सङ्ख्यायाश्च प्रयुज्यते। द्विशब्दो द्वित्वविशिष्टे। सम्बोधनैकविषयो युष्मदर्थः, अस्मच्छब्दस्तूच्चारयित्रर्थः। भवतुशब्दः सलिङ्गसम्बोधनव्यभिचारी च। किंशब्दः प्रश्ने आक्षेपे च। सर्वे चामी प्राधान्येनोपस्थितिविषयप्रसिद्धस्वीयसर्वार्थवाचका यदा भवन्ति तदैव सर्वादयो भवन्ति। प्राधान्येनोपस्थितिविषयेति निर्देशादुपसर्जनव्यावृत्तिः। अत्र उपसर्जनत्वञ्च सर्वादिविशिष्टत्वम्, वैशिष्ट्यञ्च स्वान्तपर्याप्तशक्तिनिरूपकार्थनिष्ठविशेष्यतानिरूपितोपस्थितीयप्रकारताप्रयोजकत्वसम्बन्धेन, अत एव सर्वेषां पुत्रः परस्मैपदं अतिभवकान्, सर्वस्मिन् शयः इत्यादौ साम् स्मायादयः सिद्ध्यन्ति। तेन 'सर्वो नाम कश्चित्तस्मै सर्वाय देहीत्यत्र न सर्वादेः सर्वादित्वम्। सर्वादेरिति षष्ठीनिर्देशेन तत्सम्बन्धिविज्ञानात् प्रियाः सर्वे यस्य तस्मै प्रियसर्वायेत्यादौ न स्मायादयः ॥ डेः षष्ठी, स्मिन् प्रथमा ॥ अतः, सर्वादेरिति पदद्वयमनुवर्तते। अर्थः पूर्ववज्ज्ञेयः ॥ **जसः** षष्ठी, इः प्रथमा ॥

सर्वे ॥ **नेमार्द्धप्रथमचरमतयायाल्पकतिपयस्य वा ॥१०॥** नेमादीनि नामानि तयायौ प्रत्ययौ तेषामदन्तानां जस इर्वा स्यात् । नेमे, नेमाः । अर्द्धे, अर्द्धाः । प्रथमे, प्रथमाः । चरमे, चरमाः । द्वितये, द्वितयाः । त्रये, त्रयाः । अल्पे, अल्पाः । कतिपये, कतिपयाः ॥ **द्वन्द्वे वा ॥ ११ ॥** द्वन्द्वसमासस्थस्यादन्तस्य सर्वादेर्जस इर्वा स्यात् । पूर्वोत्तरे, पूर्वोत्तराः ॥ **न सर्वादिः ॥ १२ ॥** द्वन्द्वे

अनुवृत्तिः पूर्ववत् । अयमादेशः 'षष्ठ्यान्त्यस्ये'ति जसः सकारस्य प्राप्तोऽपि 'प्रत्ययस्ये'ति सूत्रेण सर्वस्य जसो भवति ॥ नेमश्च अर्धश्च प्रथमश्च चरमश्च तयश्च अयश्च अल्पश्च कतिपयश्च तस्य, वा ॥ अतः जस इः इत्येतेषामनुवृत्तिः । सूत्रे तयायौ प्रत्ययौ ग्राह्यौ, केवलयोस्तयोः प्रयोगासम्भवात्तदन्तस्य नाम्नो ग्रहणम् । तयप्रत्ययसाहचर्यादयप्रत्ययोऽपि तद्धितो ग्राह्यः । नेमस्य जसो नित्यमित्वे प्राप्त इतरेषाञ्चाप्राप्ते विकल्प्यते । द्वौ अवयवौ येषान्ते द्वितये 'अवयवात्तयट्' त्रयोऽवयवा येषान्ते त्रये त्रयाः, 'द्वित्रिभ्यामयड्वे'त्ययट्प्रत्ययः । अयि, वयि पयि गतौ । कतिपयंते इति कतिपयाः, 'लिहादिभ्यो अच्' । व्यवस्थितविभाषाऽऽश्रयणादर्द्धादीनामपि संज्ञाया इरादिर्न भवति । व्यवस्थितं मर्यादानतिक्रान्तं प्रयोगजातं विशेषेण भाषत इति व्यवस्थितविभाषा ॥ द्वन्द्वे, वा ॥ अतः, सर्वादेः, जसः इरित्यनुवर्तन्ते । पूर्वे चोत्तरे च पूर्वोत्तरे । उत्तरेण प्रतिषेधे प्राप्ते प्रतिप्रसवार्थो योगः ॥ न, सर्वादिः ॥ सर्वादेरिति विभक्तिविपरिणामेनाऽनुवर्तते, द्वन्द्वे इति च । पूर्वश्चापरश्च पूर्वापरं तस्मै, डेर्यः, पूर्वस्य च आः । द्वयोर्मध्ये प्रकृष्टाः के इति कतरे । बहूनां मध्ये प्रकृष्टाः के इति कतमाः । कतरे च कतमे च कतरकतमाः, तेषाम् 'ह्रस्वापश्च' नाम् । कुत्सिता अल्पा अज्ञाता वा कतरकतमकाः । अत्र सर्वादित्वनिषेधादकप्रत्ययाऽभावे स्वार्थिके कप् प्रत्यये सति स्वार्थिकप्रत्ययान्तस्य सर्वादाव-

सर्वादिः सर्वादिर्न स्यात्। पूर्वापराय, पूर्वापरात्, पूर्वापरे। कतरकतमकाः॥ **तृतीयान्तात् पूर्वावरं योगे** ॥ १३ ॥ तृतीयान्तात्परौ पूर्वावरौ योगे सम्बन्धे सति सर्वादी न स्याताम्। मासेन पूर्वाय, मासपूर्वाय। दिनेनावराय, दिनावराय। दिनेनावराः दिनावराः। तृतीयान्तादिति किम्? पूर्वस्मै मासेन॥ **तीयं ङित्कार्ये वा** ॥१४॥ तीयान्तं नाम ङेङसिङस्ङीनां कार्ये सर्वादिर्वा स्यात्। द्वितीयस्मै, द्वितीयाय। द्वितीयस्यै, द्वितीयायै। ङित्कार्य इति किम्? द्वितीय-

---

ग्रहणात् 'द्वन्द्वे वे'ति जस इ र्न भवति। सर्वादौ स्वार्थिकप्रत्ययान्ताग्रहणं डतरडतमग्रहणेन ज्ञापितम्, तौ हि प्रकृतेरन्ते भवतः, तयोरेव ग्रहणात् प्रकृत्यन्तर्भाविप्रत्ययान्तरानुपादानाच्च न तदन्तस्य सर्वादिगणप्रविष्टत्वम्। अक्प्रत्ययस्त्वन्त्यवर्णपूर्वभावित्वेन तत्प्रत्यये सति सर्वादिविहितं कार्यं भवत्येव, यथा सर्वके इत्यादि॥ **तृतीया** अन्ते यस्य तस्मात्, पूर्वश्चावरश्च पूर्वावरम्, योगे॥ न सर्वादिरिति सम्बध्यते। योगः तृतीयासमासेन तृतीयासमासार्थवाक्येन च ग्राह्यः। मासपूर्वायेत्यादौ 'ऊनार्थे'ति समासः, 'ऐकार्थ्य' इति विभक्तेर्लुप् तस्याः 'स्थानीवावर्णविधावि'ति सूत्रेण तृतीयान्तत्वं विज्ञेयम्। तृतीयाया अत्र लुपि सत्यां 'लुप्यय्वृल्लेनदि'ति सूत्रेण लुप्तप्रत्ययनिमित्तकसर्वकार्यप्रतिषेधेऽपि 'प्रत्ययलोपेऽपि प्रत्ययलक्षणं कार्यं विज्ञायत' इति न्यायेन लुप्तप्रत्ययान्तनिर्दिष्टमत्र सर्वादित्वनिषेधलक्षणं कार्यं भवत्येव। **तीयम्**, ङितां कार्यं तस्मिन्, वा॥ सर्वादिरित्यनुवर्तते। 'प्रत्ययग्रहणे तदन्तग्रहणमि'ति न्यायेन तीयपदेन तीयान्तं ग्राह्यम्। सोऽपि तीयप्रत्ययः अर्थवानेव ग्राह्यः। वाऽन्यस्मिन् कार्ये, तेन 'त्यादिसर्वादेरि'त्यक्कृन भवति, किन्तु कप्प्रत्ययान्तः स्यात्तत्र चाऽसर्वादित्वात् स्मायादयो न भवन्ति, सर्वादौ स्वार्थिकप्रत्ययान्ताऽग्रहणात्। तेन द्वितीयकायेत्यादि रूपम्। वैतिकथनात् नेति

काय ॥ **अवर्णस्यामः साम्** ॥ १५ ॥ अवर्णान्तस्य सर्वादेरामः साम् स्यात् । सर्वेषाम्, विश्वासाम् ॥ **नवभ्यः पूर्वेभ्य इस्मात्स्मिन्वा** ॥ १६ ॥ पूर्वादिभ्यो नवभ्यो ये इस्मात्स्मिनो यथास्थानमुक्तास्ते वा स्युः । पूर्वे, पूर्वाः । पूर्वस्मात्, पूर्वात् । पूर्वस्मिन्, पूर्वे; इत्यादि, नवभ्य इति किम्? त्ये ॥ **आपो ङितां यैयास्यास्याम्** ॥ १७ ॥ आबन्तस्य ङिताम् ङेङसिङस्ङीनां यथा-

---

निवृत्तम् ॥ अर्थवद्ग्रहणेनानर्थकस्य ग्रहणमिति न्यायात्, तेन पटुजातीयायात्र न भवति, जातीयर्प्रत्ययत्वात् । द्वयोः पूरणो द्वितीयः 'द्वेस्तीयः' इति तीयप्रत्ययः, ङित्कार्यं इत्युक्तेस्तत्रैव सर्वादित्वं अवर्णस्य, आमः षष्ठी, साम् प्रथमा ॥ सर्वादेरिति वर्तते । 'विशेषणमन्त' इति परिभाषाऽपि वर्तते । सर्व आम्, अनेन साम्, 'एद्बहुस्भोसी'त्येत्वम्, सन्निपातलक्षणन्यायस्यानित्यत्वात् । नाम्यन्तस्थेति षत्वम् । सर्वादेरित्यत्र सम्बन्धे षष्ठ्या सर्वादिसम्बन्धिन एवामः सामो विधानात् सर्वादेर्गौणत्वे साम्न प्रवर्तते ॥ नवभ्यः पूर्वेभ्यः पञ्चमी, इच्च स्माच्च स्मिन् चेस्मात्स्मिन् वा ॥ ननु नवभ्य इत्यत्रैद्बहुस्भोसी ति कथमेत्वं न, उच्यते, स्वादिविधौ नलोपस्यासत्वात्, णषमसत्परमित्यसदधिकारात् । पूर्वेभ्य इति बहुवचनं पूर्वादिशब्दग्रहणार्थम्, त्यद् 'आद्देरः' 'लुगस्या' 'जस इः' 'अवर्णस्य' एत्वम् । अस्य पूर्वादिनवशब्दबर्हिर्भूतत्वान्न विकल्पत इः त्ये ॥ आपः षष्ठी, ङ् इत् येषां तेषाम्, यैच यास्च यास्च याम् च ॥ सामर्थ्यान्नाम्नो लाभः, तस्य आप इति विशेषणम् । 'विशेषणमन्त' इति तदन्तविधिः । तथा चाबन्तनामसम्बन्धिनामित्यर्थस्तेन बहुखट्वाय पुरुषायेत्यादौ ङेर्विभक्तेराबन्तनामसम्बन्धित्वाभावान्न यायाऽऽदेशः । आबन्तात्परेषामित्युक्तौ त्वत्र यायादेशप्रसङ्गः, सीमन्शब्दात् स्त्रीत्वे 'ताभ्यां वाऽऽप् ङिदि' त्यनेन डाप्यपि ङिद्वचनेषु यायादयो (यै+आढयो याय्+यादयो) भवन्ति

सङ्ख्यं यैयास्यास्यामः स्युः । खट्वायै, खट्वायाः, खट्वायाः, खट्वायाम् ॥ **सर्वादेर्डस्पूर्वाः** ॥ १८ ॥ सर्वादेराबन्तस्य ङिताम् यैयास्यास्यामस्ते डस्पूर्वाः स्युः । सर्वस्यै, सर्वस्याः, सर्वस्याः, सर्वस्याम् ॥ **टौस्येत्** ॥ १९ ॥ आबन्तस्य टौसोः परयोरेकारः स्यात् । बहुराजया, बहुराजयोः ॥ **औता** ॥ २० ॥ आबन्तस्य औता सहैकारः स्यात् । माले स्तः पश्य वा ॥ **इदुतोऽस्त्रेरीदूत्** ॥ २१ ॥ स्त्रेरन्यस्येदन्तस्योदन्तस्य च औता सह यथासङ्ख्यमीदूतौ

' एकानुबन्धग्रहणे न द्व्यनुबन्धकस्ये 'ति न्यायस्यानित्यत्वेनाप्रवृत्तेः । **सर्वादेः** षष्ठी, डस् पूर्वो येभ्यस्ते ॥ आपो ङितामिति संपूर्णं सूत्रमनुवर्तते । सर्वा ङे, इत्यत्रऽऽपो ङितामिति सूत्रेण यायादेशः, अनेन च डस्पूर्वः, सर्वा डस् यै इति जाते डलोपे 'ङित्यन्त्यस्वरादेरि'त्यनेनाऽऽकारलोपे सर्वस्यै इति सिद्ध्यति, एवमग्रेऽपि । अस्यै, अस्याः अस्यामित्यत्र इदम्शब्दस्य मकारस्य 'आद्वेरः' इत्यत्वे कृते 'लुगस्या' इत्यकारलोपे 'आत्' इत्यापि, ' आपो ङितामि 'ति यैप्रभृत्यादेशे कृते परत्वादनगित्यादेशेऽनेन डस्पूर्वत्वे ङित्यन्त्येत्यकारलोपे, अस्यै इत्यादिरूपसिद्धिः । टाश्च ओस्च तस्मिन्, एदित्यनुवर्तते । बह्वो राजानो यस्याः सा बहुराजा तया । अनेन सूत्रेण टापरे आबन्तस्यैकारः, ॥ **औता** तृतीया ॥ आप एदित्यनुवर्तते ॥ अत्रार्थवशादाबन्तस्येति द्विधा भाव्यम्, तेनाबन्तस्य सम्बन्धिनौता सहाबन्तस्यैव स्थाने एकारः स्यादित्यर्थः । अत्रौदिति प्रथमाद्वितीयाद्विवचनस्य ग्रहणमविशेषात् । अत एवोदाहरणे प्रथमाद्विवचनापेक्षया स्त इति द्वितीयाद्विवचनापेक्षया पश्येति क्रियापदद्वयमुपन्यस्तम् ॥ **इच्च** उच्च इदुत् तस्य न स्त्रिः अस्त्रिः तस्य, ईच्च ऊच्च ईदूत् ॥ औता इत्यनुवर्तते । *अत्र स्त्रिवर्जनादिदुत इति षष्ठी न तत्सम्बन्धिनी, स्त्रियमतिक्रान्तौ* यौ नरौ तावतिस्त्रियौ, ' गोश्चान्ते ' ' स्त्रिया ' इतीय् । ननु

स्याताम् । मुनी, साधू । अस्त्रेरिति किम् ? अतिस्त्रियौ नरौ ॥ **जस्येदोत् ॥ २२ ॥** इदुदन्तयोर्जसि परे यथासङ्ख्यमेदोतौ स्याताम् । मुनयः, साधवः ॥ **ङित्यदिति ॥ २३ ॥** अदिति ङिति स्यादौ परे इदुदन्तयोर्यथासङ्ख्यमेदोतौ स्याताम् । अतिस्त्रये साधवे, अतिस्त्रेः साधोरागतं स्वं वा । अदितीति किम् ? बुद्ध्याः, धेन्वाः । स्यादाविति किम् ? शुची स्त्री ॥ **टः पुंसि ना ॥ २४ ॥** इदुदन्तात्परस्याः

किमर्थमत्र स्त्रिवर्जनम्, परत्वात् 'स्त्रिया' इत्यनेन इयादेशेऽनेन सूत्रेणेदादेशस्याप्राप्तेः, उच्यते, निरर्थकं ह्यस्त्रिग्रहणं परेणापीयादेशेनेदूत्कार्यं न बाध्यत इति ज्ञापयति, तेनातिस्त्रयः पुरुषाः, इत्यादि सिद्धम् । अत्र वक्ष्यमाणसूत्रेण जस्येदादेशः ॥ **जसि** सप्तमी, **एच ओच एदोत्** ॥ इदुत इत्यनुवर्तते ॥ **ङिति**, द्इत् अनुबन्धो यस्य स, न दित् अदित् तस्मिन् ॥ **इदुतः**, एदोदिति पदद्वयमभिसम्बध्यते । स्त्रियमतिक्रान्तो यः सोऽतिस्त्रिः तस्मै, ' गोश्चान्ते ' । धीयतेऽस्याः पय इति धेनुः । बुद्ध्याः धेन्वा इत्यादौ ङसि दास्भवति, स च दित्, नन्वेदोतावन्तरङ्गाविकारोकारमात्रापेक्षत्वात्, दायाद्यादेशो बहिरङ्गः स्त्रीत्वविशिष्टेकारोकारापेक्षत्वात्, तथा च 'अन्तरङ्गं बहिरङ्गादि'ति न्यायेनान्तरङ्गकार्यमेव प्रथमं स्यात्, ततश्च न दायादयः इकारोकाराभावात् । न च स्थानिवत्त्वं वर्णविधित्वात्, न चायमवर्णविधिः, इदुदन्तादादेशविधानादिति वाच्यम्, अप्रधानेऽपि वर्णविधिप्रतिषेधादिति चेन्न, अनवकाशत्वेन पूर्वं दायाद्यादेशस्य प्रवृत्तेः पुनश्चादितीति प्रतिषेधात् । न च दायाद्यादेशे सति पश्चान्नेदोतौ भवतः ' सन्निपात ' लक्षणन्यायादिति वाच्यम् यत्वस्याप्यभावप्रसंगात्तस्मादितीति प्रतिषेधो वर्णविधावयं न्यायो नोपतिष्ठत इति ज्ञापनार्थः । तेन च दायाद्यादेशे कृते एदोतौ न भवतो यत्वन्तु भवतीति, शुचेः स्त्रीत्वे ङीप्रत्यये सति तस्य स्यादित्वाभावान्नैदोतौ भवतः ॥ **टः** षष्ठी,

पुंविषयायाष्टाया ना स्यात्। अतिस्त्रिणा, अमुना। पुंसीति किम्? बुद्ध्या॥ **ङिर्डौ॥ २५॥** इदुदन्तात्परो ङिर्डौः स्यात्। मुनौ, धेनौ। अदितीत्येव? बुद्ध्याम्॥ **केवलसखिपतेरौः॥ २६॥** केवलसखिपतिभ्यामिदन्ताभ्यां परो ङिरौः स्यात्। सख्यौ, पत्यौ। इत इत्येव? सखायमिच्छति, पतिमिच्छति, सख्यि, पत्यि। केवलेति किम्? प्रियसखौ, नरपतौ॥ **न नाङिदेत्॥ २७॥** केवलसखि-

---

पुंसि, ना प्रथमा॥ इदुत इत्यनुवर्तते। स्त्रीमतिक्रान्तो यः सोऽतिस्त्रिः तेन, अनेन टो ना, रषृवर्णेति णत्वम्। अदस्टा 'आद्वेरः' 'लुगस्या' 'मोऽवर्णस्येति' दकारस्य मकारः, 'प्रागिनात्' पूर्वमुत्वं पश्चादेनेन नाभावः, अमुना कुलेनेत्यत्र तूत्वे कृते पश्चात् 'अनाम् स्वरे नोन्त' इति भवति। ङिः प्रथमा, डौ प्रथमा॥ इदुतोऽदितीति पदद्वयमभिसम्बध्यते। डेर्डाविति कृते पञ्चम्येकवचनस्य भ्रान्तिः स्यादतो ङिर्डावित्युक्तम् डकारोऽन्त्यस्वरादिलोपार्थः। बुद्ध्यामिति, नच दाम् विधानसामर्थ्यादेवाऽत्र डौर्न भवति, किमदितीति वाच्यम्, तस्य 'ङित्यदिती'त्येत्वनिषेधकत्वेन चरितार्थत्वात् डौप्रवृत्तिर्भवेदेव,॥ सखिश्च पतिश्च सखिपतिः केवलश्चासौ सखिपतिश्च तस्मात्, औः, इतो ङिरित्यनुवर्तते। सखि ङि, अनेन सूत्रेण औ, इवर्णादेरिति यत्वम्, एवं पत्यावपि। सखिशब्दस्येदन्तत्वाव्यभिचारादित इति विशेषणं किमर्थमित्यत्राऽऽहेत इत्येवेति। सखाययमिच्छति सखीयति सखीयतीतिव्युत्पत्तौ क्विपि यलोपे सखीरिति भवति, अत्र ङेरौत्ववारणायेत इत्युक्तम्। अत्र 'योऽनेकस्वरस्ये'ति यत्वे सख्यीति रूपम्। प्रियः सखा यस्य तस्मिन्। नराणां पतिस्तस्मिन्, अत्र केवलपदोपादानात् 'ग्रहणवता नाम्ना न तदन्तविधिरि'ति न्यायोऽनित्य इति ज्ञायते। तन्न्यायस्य प्रवृत्तौ हि सूत्रे केवलपदाभावेऽपि प्रियसखावित्यादावौत्वनिषेधः सिद्ध्यत्येवेति केवलशब्दो व्यर्थः स्यात्॥ न, ङिति

पते'र्यष्टाया ना' 'ङिति परे ए'च्चोक्तः स न स्यात्। सख्या, पत्या सख्ये, पत्ये सख्युः, पत्युः, आगतं स्वं वा । सख्यौ, पत्यौ । ङिदिति किम् ? पतयः ॥ **स्त्रियाः ङितां वा दैदास्दास्दाम् ॥२८॥** स्त्रीलिङ्गादिदुदन्तात्परेषां ङितां ङेङसिङस्ङीनां यथासङ्ख्यं दैदास् दास्दामो वा स्युः । बुद्ध्यै, बुद्धये । बुद्ध्याः, बुद्धेः आगतम् स्वम् वा । बुद्ध्याम्, बुद्धौ । धेन्वै, धेनवे । धेन्वाः, धेनोः । धेन्वाम्, धेनौ । प्रियबुद्ध्ये, प्रियबुद्धये, पुंसे स्त्रियै वा ॥ **स्त्रीदूतः ॥ २९ ॥**

एत् ङिदेत्, ना च ङिदेच्च नाङिदेत् ॥ केवलसखिपतेरित्यनुवर्त्तते । सख्या पत्या इत्यत्र टाया नानिषेधः । सख्ये पत्ये इत्यत्र ङेपरे इवर्णस्यैत्वनिषेधः । सर्वत्र ' योऽनेकस्वरस्ये 'ति यत्वम् । सख्युः पत्युरिवर्णादेर्यत्वे कृते सति ' खितिखीती य उर्, ' सख्यौ पत्यावित्यत्रौरीत्यादेशे कृते ङित्यदितीति प्राप्नोति, न तु पूर्वम्, यतस्तद्बाधको ङिर्डौः । ततोऽपि केवलसखि पतीत्यौत्वं तत 'स्तदादेशास्तद्वद्भवन्ती 'ति न्यायात् स्यादित्वे सत्येत्वं प्राप्तमनेन निषिद्धम् । **स्त्रियाः** पञ्चमी, ङितां षष्ठी, वा, दैश्च दास् च दास् च दाम् च ॥ इदुत इत्यनुवर्तते । केवलसखिपतेरिति नानुवर्तते, पत्युर्नेति निर्देशात्तथाच विशेष्यतयाऽऽक्षेपलब्धस्य नाम्न एव ग्रहणमतः सामान्येनोक्तमिदुदन्तात्परेषामिति, इदुदन्तान्नाम्नः परेषामित्यर्थः । परेषामित्युक्तत्वात् तत्सम्बन्धिनामन्यसम्बन्धिनां वा ङितां ग्रहणम् । बुद्ध्यै इति ङे दायादेशे कृते, बुद्धये इति तु ' ङित्यदिती 'त्येत्वे, अयादेशे च सिद्ध्यति । एवं बुद्ध्या इत्याद्यपि । प्रिया बुद्धिर्यस्य यस्या वा, प्रियबुद्धिस्तस्मै तस्यै वेति समानमेव रूपं समासार्थस्य पुरुषादौ वृत्तावपि तद्घटकबुद्ध्यादिशब्दानां स्त्रीत्वाद्वा दायादयः । ईच्च ऊच्च ईदूत्, स्त्रियाः ईदूत् स्त्रीदूत् तस्मात् ॥ ङितां दैदास्दास्दामित्यनुवर्त्तते । नद, गौरादित्वात् ङीः, 'अस्य ङ्यां लुक् । कुरोरपत्यं स्त्री, 'दुनादी'त्यादिना ञ्यस्तस्य ' कुरोर्वो 'ति लुपि ' उतोऽप्राणिनश्चे ' त्यूङि कुरूः

नित्यस्त्रीलिङ्गादीदूदन्ताच्च परेषां स्यादेर्ङितां यथासङ्ख्यं दैदास्दास्दामः स्युः । नद्यै, नद्याः, नद्याः, नद्याम् । कुर्व्यै, कुर्व्वाः, कुर्व्वाः, कुर्व्वाम् । अतिलक्ष्म्यै पुंसे स्त्रियै वा । स्त्रीति किम् ? ग्रामण्ये, खलप्वे पुंसे स्त्रियै ॥ **वेयुवोऽस्त्रियाः ॥ ३० ॥** इयुव्स्थानिनौ यौ स्त्रीदूतौ तदन्तात् स्त्रीवर्ज्जात्परेषां स्यादेर्ङितां यथासङ्ख्यं दैदास्दास्दामो वा

तस्यै कुर्व्वै । लक्ष्यते पुण्यकर्मानयेति लक्ष्मीः, लक्ष्मीमतिक्रान्तोऽतिक्रान्ता वासावतिलक्ष्मीः, तस्मै तस्यै वा । अर्थान्तरसङ्क्रमात्पूर्वं लिङ्गबोधके वृत्तिघटकशब्दे वर्तमानं नित्यस्त्रीत्वमादाय तस्य वृत्तावर्थान्तरसङ्क्रमात् स्त्र्याख्त्राभावेऽपि दामादयो भवन्ति । ग्रामं नयतीति ग्रामणीः । खलं पुनातीति खलपूः तस्मै तस्यै वा । स्त्रिया इत्यनुवर्तमाने पुनः स्त्रीग्रहणं नित्यस्त्रीविषयार्थम्, तेनेह न भवति, क्रियाशब्दत्वेन त्रिलिङ्गत्वात्, नित्यस्त्रीत्वञ्च प्रवृत्तिनिमित्तैक्ये लिङ्गान्तरविशिष्टार्थानभिधायकत्वम्, यत्प्रवृत्तिनिमित्तं स्त्रीत्वस्यान्वयितावच्छेदकं स्त्रीत्वेतरलिङ्गस्यान्वयितावच्छेदकञ्च भवति तद्रूपविशिष्टार्थानभिधायकत्वमित्यर्थः, अर्थात् स्त्रीत्वान्वयितावच्छेदकं स्त्रीत्वेतरलिङ्गान्वयितानवच्छेदकञ्च यत्प्रवृत्तिनिमित्तं तादृशप्रवृत्तिनिमित्तविशिष्टार्थाभिधायकत्वमिति भावः, कुमारीमिच्छति कुमारीयति, कुमारीयतीति कुमारी तस्मै तस्यै वा कुमार्यै । अस्य लिङ्गान्तरविशिष्टार्थाभिधायकत्वान्नित्यस्त्रीत्वाभावे प्रसक्ते तद्वारणाय प्रवृत्तिनिमित्तैक्ये इत्युक्तम्, प्रकृतिभूतकुमारीशब्दस्य नित्यस्त्रीत्वात्, वृत्तावपि विशेषणतया नित्यस्त्रीलिङ्गरूपार्थबोधकत्वेन च दायादयो भवन्तीति । ग्रामण्यादिशब्दास्तु न नित्यस्त्रीविषयाः, ग्रामनयनकर्तृत्वलक्षणप्रवृत्तिनिमित्तस्य स्त्रीत्वान्वयितावच्छेदकत्वात् स्त्रीत्वेतरलिङ्गान्वयितावच्छेदकत्वाच्च । पदान्तरं विनाऽपि स्त्रियां वर्तमानत्वं नित्यस्त्रीत्वमित्यपि लक्षणम् । वा, इय् च उव् च इयुव् तस्मात्, न स्त्री अस्त्री तस्याः पञ्चमी ॥ स्त्रीदूतः ङितां दैदास्दास्दामित्यनुवर्तते । इयुवः इति स्त्रीदूतो विशेषणम्, तेन इयुवस्थानिनौ यौ स्त्रीदूताविति

स्युः । श्रियै, श्रिये । श्रियाः, श्रियः २ । श्रियाम्, श्रियि । अतिश्रियै, अतिश्रिये, पुंसे स्त्रियै वा । भ्रुवै, भ्रुवे । भ्रुवाः, भ्रुवः । भ्रुवाः, भ्रुवः । भ्रुवाम्, भ्रुवि । अतिभ्रुवै, अतिभ्रुवे, पुंसे स्त्रियै वा । इयुव इति किम् ? आध्यै । अस्त्रिया इति किम् ? स्त्रियै ॥ **आमो नाम्वा** ॥ ॥ ३१ ॥ इयुवोः स्थानिभ्यां स्त्रीदूदन्ताभ्यां परस्य आमो नाम् वा स्यात्, न तु स्त्रियाः । श्रीणाम्, श्रियाम् । भ्रूणाम्, भ्रुवाम् ।

लभ्यते श्रिग् सेवायाम्, श्रयति पुण्यकर्म्माणमिति श्रीः, ' दिद्युद्द्रुच्छे 'ति श्रीनिपातः श्रीङ् इत्यादौ ' संयोगादि 'ति इयो योग्येवर्णसद्भावेनानेन सूत्रेण विकल्पतो दैकृते इयादेशे च श्रियै, पक्षे केवलमियादेशे श्रिये, इति रूपद्वयम् । समासार्थस्य पुंस्त्वे वा सूत्रमिदं प्रवर्तते इति मत्वाऽऽह—अतिश्रियै अतिश्रिये पुंसे स्त्रियै वेति । श्रियमतिक्रान्तोऽतिक्रान्ता वाऽसावतिश्रीस्तस्मै तस्यै वा । भ्रुवमतिक्रान्तोऽतिक्रान्ता वाऽसावित्यतिभ्रूः, तस्मै तस्यै वा ' भ्रुवनोरित्युव् । ध्यै चिन्तायाम्, आध्यायतीत्येवंशीला आधीः, नित्यस्त्रीलिङ्गोऽयं शब्दः पदान्तरं विनाऽपि स्त्रियां वर्तमानत्वं स्त्रीत्वमिति लक्षणाश्रयणात् । ' दिद्युद्द्रिः ' क्वि, अत्रेकारस्येय्स्थानित्वाभावात् ' स्त्रीदूत ' इति दै, ' क्विब्वृत्तेरि 'ति यत्वम्, यद्यप्यसावीकारः इयस्थान्येव, तत्प्राप्तौ ' क्विव्वृत्तेरि 'ति यत्वस्य भावात्, तथा चेयुव्स्थानत्वाद्वा दायादयः प्रसज्यन्ते, तथापि बाधकाविषययोरियुवोः स्थानिनोर्ग्रहणान्न वा दायादयः । अस्त्रिया इति निर्देशात् परादपि इयुव्यत्वादिकार्यात्प्रागेव स्त्रीदूदाश्रितं कार्यं भवति तेन स्त्रियै स्त्रीणां भ्रूणां आध्यै इत्यादि सिद्धम् । अन्यथा प्रथममेव इयुवादेशे दैदासादयो न स्युः ॥ **आमः षष्ठी, नाम् वा** ॥ **स्त्रीदूतः** इयुवोऽस्त्रियाः इत्यनुवर्तन्ते स्पष्टम् ॥ **ह्रस्वश्च** आप् च ह्रस्वाप् तस्मात् च, आमो नामित्यनुवर्त्तते । चशब्देन स्त्रीदूत इति गृह्यते, अत एव तस्य चाऽनुकृष्टत्वान्नोत्तरसूत्रेष्वनु-

अतिश्रीणाम्, अतिश्रियाम् । अतिभ्रूणाम्, अतिभ्रुवाम्, नृणां स्त्रीणां वा । इयुव इत्येव ? । प्रधीनाम् ॥ **ह्रस्वापश्च ॥ ३२ ॥** ह्रस्वान्तादाबन्तात् स्त्रीदूदन्ताच्च परस्यामो नाम् स्यात् । देवानाम्, मालानाम्, स्त्रीणाम्, वधूनाम् ॥ **सङ्ख्यानां र्ण्णाम् ॥ ३३ ॥** रषनान्तानां सङ्ख्यावाचिनामामो नाम् स्यात् । चतुर्ण्णाम्, षण्णाम्, पञ्चानाम्, अष्टानाम् ॥ **त्रेस्त्रयः ॥ ३४ ॥** आमः सम्बन्धिनस्त्रेस्त्रयः

वृत्तिः, ' चानुकृष्टं नानुवर्तते ' इति न्यायात् । ' विशेषणमन्तः ' विशेष्यञ्च नाम एव । देवानामिति, ' दीर्घोनामी 'ति दीर्घः सन्निपातलक्षणन्यायस्यानित्यत्वात् । सङ्ख्यानां, र्च ष्च न्च र्ण्णः तेषाम् आमो नामित्यनुवर्तते, अत्र सम्बन्धे षष्ठी । सङ्ख्याशब्देन च सङ्ख्याप्रकारकसङ्ख्येयविशेष्यकबोधजनकशब्दो ग्राह्यः, अन्यथा सङ्ख्याशब्दस्यैकत्वादिसङ्ख्यापरत्वे विशेष्यविशेषणभावासम्भवात्, र्ण्णामिति शब्दनिर्देशाच्छब्दार्थयोश्च सामानाधिकरण्यासम्भवात्, र्ण्णामित्यत्र निमित्तनिमित्तिनोरेकपदत्वाभावान्न ' ऋषवर्णे 'ति णत्वं किन्तु ' *तवर्गस्ये 'ति णत्वम्। पञ्चन् आम्, अत्रानेन नाम्* ' दीर्घोनामी 'ति दीर्घः ' नाम्नो नोऽनहः ' इति नलोपः पञ्चानाम् । न च कथमनेन दीर्घः निमित्तनिमित्तिनोर्नकारेण व्यवधानादिति वाच्यम्, तथा सति अतिसृचतसृषु इति षूर्वर्जनस्य व्यर्थत्वाऽऽपत्तेः । षण्णां चतुर्णामित्यादौ हि षकाररकारव्यवधानादेव दीर्घनिषेधसिद्धौ षूर्वर्जनं ' येन नाव्यवधानं तेन व्यवहितेऽपि स्यादि 'ति न्यायं ज्ञापयति । तेन भूतपूर्वनान्ताया अपि । अष्टानां ' वाऽष्टन ' इति परत्वात् प्रथमं नस्य आः ततश्च भूतपूर्वगत्या नान्तत्वादनेन नाम् । न च ' भूतपूर्वकस्तद्वदुपचार ' इति न्यायेनैव अष्टानामित्यस्य सिद्धौ बहुवचनं व्यर्थमिति वाच्यम्, अस्य न्यायस्यानित्यत्वज्ञापनार्थत्वात् । तत्सम्बन्धिविज्ञानादिह न स्यात् प्रियचतुराम् ॥ त्रेः षष्ठी, त्रयः प्रथमा ॥ आमः इत्यनुवर्तते । परमाश्च ते त्रयश्च परमत्रयः तेषाम्, तत्सम्ब-

स्यात् । त्रयाणाम्, परमत्रयाणाम् ॥ **एदोद्व्यां ङसिङसो रः** ॥ ॥३५॥ एदोद्व्यां परयोः प्रत्येकं ङसिङसो रः स्यात् । मुनेः, मुनेः । धेनोः, धेनोः । गोः, गोः । द्योः, द्योः ॥ **खितिखीतीय उर्** ॥ ॥ ३६ ॥ खितिखीतीसम्बन्धिनोर्यात्परयोर्ङसिङसोरुर् स्यात् । सख्युः, सख्युः । पत्युः, पत्युः । सखायं पतिं चेच्छतः सख्युः २, पत्युः २ ।

न्धिविज्ञानादिह न स्यादतित्रीणाम् ॥ **एच ओच** एदोतौ ताभ्याम्, ङसिश्च ङस् च ङसिङस् तस्य, रः प्रथमा । वचनभेदो यथासङ्ख्यानिवृत्त्यर्थः । मुनि असिति स्थिते ' ङित्यदिती 'त्येत्वेऽनेन सूत्रेणासो रेफः, स च ' प्रत्ययस्ये 'ति परिभाषया सर्वस्य भवति । ननु मुनेरित्यत्रैकारस्य लाक्षणिकत्वात्, सूत्रे च ' लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणामि 'ति न्यायेन स्वाभाविकस्यैवैदोतोर्ग्रहणेन कथमत्र रकार, इति चेन्न, एदोद्व्यामिति तकारस्य स्वरूपमात्रग्रहणसूचनपरत्वात्तेन लाक्षणिके प्रतिपदोक्ते चायं प्रवर्तते । अत एव मुनेः धेनोः, गौः द्यौः इत्युभयविधोदाहरणमुपन्यस्तम् । 'इवर्णादेरस्वे' इत्यादिसूत्रनिर्देशेनोक्तन्यायस्याऽनित्यत्वात् ॥ **खिश्च** तिश्च खीश्च तीश्च, खितिखीतीनां य् खितिखीतीय् तस्मात् उर् ॥ ङसिङस इत्यनुवर्तते । सखि ङस्, अत्र ' इवर्णादेरि 'ति यत्वमनेन ङस उर्, सख्यु र्, ' रः पदान्ते ' । एवमग्रेऽपि । सखायं पतिं वा इच्छति सखीयति पतीयति 'अमाव्ययात्' क्यन्, ततः क्विः सखीः पतीः, ततो ङसि ' योऽनेकस्वरस्ये 'ति यत्वेऽनेन उर्, सख्युः पत्युः । पाणिनीये त्वस्मिन्विग्रहे प्रथमैकवचने सखा इति रूपं भवति । सखायमतिक्रान्तो यः सोऽतिसखा, अधिकं पतिः अधिपतिः, तस्मादिति पञ्चमीविभक्तौ ' स्पर्द्धे ' इति सूत्रेण ' इवर्णादेरिति ' यत्वं न भवति, एत्वं भवत्येव, सख्युरित्यत्राऽपि कथमेत्वं न, उच्यते, ' न नाङ्दिदे 'ति केवलसखिपतिशब्दयोरेत्वं न भवति ॥ **अतः** पञ्चमी, डुर् । ङसिङस इत्यनु-

य इति किम् ? अतिसखेः, अधिपतेः ॥ **ऋतो डुर् ॥ ३७ ॥** ऋतः परयोः ङसिङसोर्डुर् स्यात् । पितुः, पितुः ॥ **तृस्वस्रृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्त्रो घुट्यार् ॥ ३८ ॥** तृच्तृन्नन्तस्य स्वस्रादीनाञ्च ऋतो घुटि परे आर् स्यात् । कर्त्तारम्, कर्त्तारौ २, कर्त्तारः । स्वसारम्, नप्तारम्, नेष्टारम्, त्वष्टारम्, क्षत्तारम्, होतारम्, पोतारम्, प्रशास्तारम् । घुटीति किम् ? कर्तृ कुलं पश्य ॥ **अर्डौ च ॥ ३९ ॥** ऋतो ङौ घुटि च परे अर् स्यात् । नरि, नरम् ॥ **मातुर्मातः पुत्रेऽर्हे सिनाऽऽमन्त्र्ये ॥ ४० ॥** मातुरामन्त्र्ये, पुत्रे वर्त्तमानस्य सिना सह मातः स्यात्, अर्हे प्रशंसायाम् । हे गार्गी-

---

वर्तते । पितृ अस्, अत्रानेन ङसः डुर्, ड इत्, ' डित्यन्त्ये 'ति ऋकारलोपः पितुः ॥ ता च स्वसा च नप्ता च नेष्टा च त्वष्टाच क्षत्ता च होता च पोता च प्रशास्ता च तस्य, घुटि, आर् ॥ ऋत इत्यनुवर्तते । तृपदेन तृच्तृन्नोर्ग्रहणम् । व्युत्पत्तिपक्षे तृग्रहणेनैव सिद्धे नप्त्रादिग्रहणं नियमार्थम्, तेनान्येषामौणादिकानां न भवति, यथा भ्रातरौ पितरौ इत्यादि । अव्युत्पत्तिपक्षे तु तृशब्देन सार्थकेन नप्त्रादिसंज्ञाशब्दघटकतृशब्दस्य निरर्थकस्य ग्रहणासम्भवात्तेषां पृथगुपादानम् । नात्र पक्षे नियमः । अव्युत्पत्तिपक्षे इदमेव तृग्रहणं ' अर्थवद्ग्रहणे नानर्थकस्ये 'ति न्यायं सूचयति, अन्यथा तृशब्देन नप्त्रादीनामव्युत्पन्नत्वेऽपि ग्रहणसम्भवान्नप्त्राद्युपादानं व्यर्थं स्यात् । करोतीति कर्ता, तम्, कर्तृ अम्, अनेन सूत्रेण घुटि परे ऋकारस्यार् भवति कर्तारम्, स्वसारमिति स्त्रीलिङ्गे द्वितीयैकवचनम् ॥ अर् प्रथमा । ङौ सप्तमी, च ॥ ऋतः इत्यनुवर्तते । चशब्देन घुटोऽनुकर्षो निमित्तशब्दानन्तरं श्रवणात् । नरीति ङेरुदाहरणम् ॥ मातुः षष्ठी, मातः प्रथमा पुत्रे अर्हे सिना तृतीया आमन्त्र्ये ॥ अत्र मातृशब्दः पुत्रेऽर्थे बहुव्रीहौ सत्येव वर्तते, समस्तेन च मातृद्वारेण पुत्रप्रशंसायां गम्यमानायां मातादेशः, कचोऽ-

मात ! । पुत्र इति किम् ? हे मातः ! हे गार्गीमातृके वत्से ! । अर्ह इति किम् ? अरे गार्गीमातृक ! ॥ **ह्रस्वस्य गुणः** ॥४१॥ आमन्त्र्यार्थवृत्तेर्ह्रस्वान्तस्य सिना सह गुणः स्यात् । हे पितः !, हे मुने ! ॥ **एदापः** ॥ ४२ ॥ आमन्त्र्यार्थवृत्तेराबन्तस्य सिना सहैकारः स्यात् । हे माले !, हे बहुराजे ! ॥ **नित्यदिद्विस्वराम्बार्थस्य ह्रस्वः** ॥ ४३ ॥ नित्यं दिद्दैदास्दासुदामादेशा येभ्यस्तेषां द्विस्वराम्बार्थानाञ्चाबन्तानामामन्त्र्यवृत्तीनां सिना सह ह्रस्वः स्यात् । हे स्त्रि !, हे

पवादः । हे गार्गीमात । गार्गीमाता यस्य तत्सम्बोधने । श्लाघ्यया मात्रा तत्पुत्रव्यपदेशयोग्यतया पुत्रः प्रशस्यते । हे गार्गीमातृके वत्से ! इत्यत्र न मातृशब्दः पुत्रे, किन्तु वत्सायाम् । अरे गार्गीमातृक ! अत्र पुत्रपरत्वेऽपि न प्रशंसा गम्यते, किन्त्वरे इति शब्देन निन्दा गम्यते । **ह्रस्वस्य गुणः** ॥ सिनाऽऽमन्त्र्ये इत्यनुवर्तते, ह्रस्वस्य नाम्नो विशेषणत्वेन तदन्तविधिः । सिना सह गुणस्तु ह्रस्वस्यैव, श्रुतत्वात्, न तु ह्रस्वान्तस्यानुमितत्वात् ' श्रुतानुमितयोश्च श्रौतो विधिर्बलीयानि 'ति न्यायात् । हे पितः ! अत्र सिना गुणः स च सह ऋकारस्य गुणोऽरेदोत् अत्राऽऽसन्न इत्यर् । **एत्**, आश्चासावाप् च तस्य । सिनाऽऽमन्त्र्ये इत्यनुवर्तते । बहवो राजानो यस्याः सा तस्याः सम्बोधनम् । आ आपः इत्याकारप्रश्लेषादिह न भवति, प्रिया खट्वा यस्य सः तस्य सम्बोधने हे ! प्रियखट्व !, अत्र नैकारान्तादेशो भवति । नित्यं दित् यस्मात् नित्यदित् द्वौ स्वरौ यस्य द्विस्वरः । अम्बार्थो यस्य, अम्बार्थश्च नित्यदिच्च द्विस्वरार्थश्च तस्य, ह्रस्वः ॥ सिनाऽऽमन्त्र्ये आप इत्यनुवर्तन्ते । आप इति द्विस्वराम्बार्थस्य विशेषणम्, स्तृणाति पुरुषस्य रत्नत्रयं स्त्रीः । लक्षीण् दर्शनाङ्कनयोः, लक्ष्यते पुण्यकर्मानयेति लक्ष्मीः । हे अम्ब ! हे वधु ! पर्यन्तं नित्यदित उदाहरणम् । हे अम्ब ! हे अक्क ! इति द्विस्वराम्बार्थस्याऽऽबन्तस्योदाहरणम् ॥

लक्ष्मि !, हे श्वश्रु !, हे वधु !, हे अम्ब !, हे अक्क ! नित्यदिदिति किम् ? हे हूहूः ! द्विस्वरेति किम् ? हे अम्बाडे ! । आप इत्येव ? हे मातः ! ॥ **अदेतः स्यमोर्लुक्** ॥४४॥ अदन्तादेदन्ताच्च आमन्त्र्यवृत्तेः परस्य सेरमश्च लुक् स्यात् ! हे देव !, हे उपकुम्भ !, हे अतिहे ! ॥ **दीर्घङ्याब्व्यञ्जनात्सेः** ॥ ४५ ॥ **दीर्घङ्याबन्ताभ्यां**

अच्च एचादेत्तस्मात्, सिश्चाम् च स्यमौ तयोर्लुक् ॥ आमन्त्र्येति वर्तते। आमन्त्र्ये अमोऽसम्भवात् सेरादेशभूतोऽमत्र ग्राह्यः। हे देव! इत्यत्र सेर्लुक्। कुम्भस्य समीपमुपकुम्भम्। 'अमव्ययीभावस्यातो पञ्चम्या' इति सेरम्, अनेन लोपः। हिनोतीति हेः, हयमतिक्रान्तोऽसौ तस्य सम्बोधनमेदन्तस्योदाहरणमिदम्। स्यादेशत्वेनैवामोऽपि लुकि सिद्धौ पृथग्वचनमन्यस्यादेशस्य लुगभावार्थम्, तेन हे कतरदित्यादौ लुग्न भवति ॥ अत्र 'पञ्चतोऽन्यादेरि'ति **सेर्दादेशः** ॥ **ङी चाप् च ङ्यापौ**, दीर्घौ च तौ ङ्यापौ च, **दीर्घङ्यापौ च व्यञ्जनश्च तस्मात्, सेः** षष्ठी॥ लुग् वर्तते। सूत्रे सेरनुवृत्तिसम्भवेऽपि पुनः सिग्रहणमामन्त्र्यनिवृत्तिं सूचयति। दीर्घेति ङ्याबोरेव विशेषणम्, न तु व्यञ्जनस्यासम्भवात्। आक्षिप्तस्य नाम्नोः विशेषणात्तदन्तविधिः। व्यञ्जनाद्येत्यस्य व्यञ्जनान्ताद्येत्यर्थः। राजन् सि, ' नि दीर्घः ' अनेन सिलुक्, ' नाम्नो-नोऽनह्न ' इति नलुक्। न चात्र ' पदस्ये 'ति सेर्लुकि राजेति सिद्धौ व्यञ्जनग्रहणं व्यर्थमिति वाच्यम्, 'पदस्ये'ति लोपस्यासत्त्वेन 'नाम्नो न' इति प्रथमं नलोपे सति, ततः सेर्लुगसम्भवात्। न च 'पदस्ये'ति लोपोऽत्र नासन्, ' नाऽऽमन्त्र्ये ' इति सूत्रेण लुग् निषेधाज्ज्ञापकादिति वाच्यम्, उखास्रदित्यादौ 'संयोगस्यादौ' स्कोर्लुकि दत्वाभावप्रसङ्गात्। न च सौ परे लुकः पूर्वं दत्वं प्राप्नोतीति वाच्यम्, परे लुकि ' *स्रंसध्वंसि* 'ति सूत्रस्यासिद्धत्वात्, *परस्येति, न त्विदं विहित*-विशेषणमिति भावः, अन्यथा या सा इत्यादौ सिलोपाभावप्रसङ्गः,

व्यञ्जनाच्च परस्य सेर्लुक् स्यात् । नदी, माला, राजा । दीर्घेति किम् ? निष्कौशाम्बिः, अतिखट्वः ॥ **समानादमोऽतः** ॥ ४६ ॥ समानात्परस्यामोऽस्य लुक् स्यात् । देवम्, मालाम्, मुनिम्, नदीम्, साधुम्, वधूम् ॥ **दीर्घो नाम्यतिसृचतसृषूः** ॥ ४७ ॥ तिसृ चतसृ षरान्तवर्जस्य समानस्य नामि परे दीर्घः स्यात् । वनानाम्, मुनीनाम्, साधूनाम्, पितॄणाम् । अतिसृचतसृषू इति किम् ? तिसृणाम्, चतसृणाम्, षण्णाम्, चतुर्णाम् ॥ **नुर्वा** ॥ ४८ ॥ नुः समानस्य

यच्छब्दाद्धि स्त्रीत्वविवक्षायां सिविभक्तौ 'आद्वेर' इत्यत्वे 'आदि' त्यादि सेर्दीर्घीभूताद्विहितत्वाभावेन सिलोपो न स्यात् । न च व्यञ्जनान्ताद्विहितत्वात् सेर्लोपो भवतीति वाच्यम्, य इत्यादौ सिलोपप्रसङ्गात् व्यञ्जनान्ताद्विहितत्वादतः परस्येत्युक्तम् । निर्गतः कौशाम्ब्या निष्कौशाम्बिः 'गोश्चान्ते' ह्रस्वः । खट्वामतिक्रान्तो यः सः । अत्र ङ्याबन्तत्वेऽपि दीर्घङ्याबन्तत्वाभावान्न सिलोपः । न चात्र समस्तस्य ङ्याबन्तत्वं नास्तीति कथं सिलोपप्राप्तिरिति वाच्यम्, समासान्तर्गतोत्तरपदस्य ङ्याबन्तत्वेन सेस्ततः परत्वाल्लुक् प्राप्तेः, विहितविशेषणत्वस्याविवक्षितत्वात् ॥ **समानात्** अमः षष्ठी, अतः षष्ठी ॥ लुगित्यनुवर्तते । देव अम्, अत्रानेनामोऽकारलोपः, अन्यथा 'समानानामि'ति दीर्घः स्यात् । अत्र स्यादेरेवामो ग्रहणम्, स्याद्यधिकारात् । तेनासुनवमित्यादौ नामोऽकारलोपः ॥ **दीर्घः** नामि, तिसा च चतसा च ष् च र् च, न तिसृचतसृषू तस्य ॥ विभक्तिविपरिणामेन समान इत्युनुवर्तते । नामीत्यादेशभूतो नाम् गृह्यते स्याद्यधिकारात् । अषू इति प्रतिषेधेन नकारेण व्यवहितेऽपि नामि दीर्घो ज्ञाप्यते पञ्चानाम् । न च मुनीनामित्यादौ ह्रस्वनिमित्तो नाम्, अनेन दीर्घे कृते ह्रस्वस्य नाशेऽपि 'निमित्ताभावे नैमित्तिकस्याप्यभाव' इति न्यायेन न नश्यति, तन्न्यायस्यानित्यत्वात् । **नुः षष्ठी वा** ॥ दीर्घः समानस्य नामीत्यस्य

नामि परे दीर्घो वा स्यात् । नृणाम्, नृणाम् ॥ **शसोऽता सश्च नः पुंसि** ॥ ४९ ॥ शसोऽता सह पूर्वसमानस्य दीर्घः स्यात् । तत्सन्नियोगे च पुंसि शसः सो नः । देवान्, मुनीन्, वातप्रमीन्, साधून्, हूहून्, पितॄन् । पुंसीति किम् ? शालाः ॥ **सङ्ख्यासाय-वेरह्स्याहन् ङौ वा** ॥ ५० ॥ सङ्ख्यावाचिभ्यः सायविभ्याश्च परस्याहतस्य ङौ परेऽहन्वा स्यात् । द्व्यहनि, द्व्यह्नि, द्व्यह्ने । सायाहनि, सायाह्नि, सायाह्ने । व्यहनि, व्यह्नि, व्यह्ने ॥ **नियआम्** ॥

चानुवृत्तिः ॥ शसः षष्ठी, अता तृतीया सः षष्ठी, च नः प्रथमा पुंसि समानस्य दीर्घ इत्यनुवर्तते । अत्राता सह समानस्य दीर्घ इत्युक्तावत् समानश्च स्थानी भवति, तत्र अत् अप्रधानभूतः स्थानी, समानश्च प्रधानभूतः, दीर्घश्च प्रधानभूतस्थान्यासन्न एव ग्राह्य इति सूचनाय पूर्वसमानस्येत्युक्तम् । वर्णक्रमेणोदाहरणानि दर्शितानि । अत्र विधानद्वयम्, शसोऽता इत्येकम्, शश्च नः पुंसीत्यपरम्, आद्यश्च प्रधानमपरश्चाप्रधानमप्रधानता चान्वाचयार्थेन चशब्देन सूच्यते । गौणत्वेन समुच्चयोऽन्वाचयः, अनेन चशब्देन निर्देशात् 'नान्वाचीयमाननिवृत्तौ प्रधानस्ये 'ति न्यायः सूच्यते, गौणस्य निवृत्तौ मुख्यं न निवर्तत इत्यर्थः । तेन बुद्धीः धेनुरित्यादौ पुंस्त्वाभावेन नत्वाभावेऽपि दीर्घो भवति । वातं प्रमिमीते इति वातप्रमीः, स निःशृङ्गो मृगाकृतिर्जन्तुविशेषः, अयं शब्द उणादिनिष्पन्नो ग्राह्यः, क्विबन्तनिष्पन्नस्य तु शसि वातप्रम्य इति भवति ॥ सङ्ख्या च सायश्च विश्च तस्मात् अहस्य अहन् ङौ वा । द्वयोरह्नोर्भव इत्यत्र ' भवे ' इत्यण् विषये 'सर्वांशे ' त्यादिनाट्, अह्नादेशश्च, ततो ' द्विगोरनपत्ये ' इत्यण् लोपस्तस्मिन् द्व्यह्नि, अहनादेशश्च । ' ईर्ङौ र्वे 'त्यलोपः । पक्षे अवर्णस्य ए । साय-*महः सायाह्नः तस्मिन् । अत एव सूत्रनिर्देशान्मलोपः, अकारान्तो* वा सायशब्दः । शेषं पूर्ववत् । विगतमह्नो व्यह्नस्तस्मिन् ॥ नियः

॥ ५१ ॥ नियः परस्य ङेराम् स्यात् । नियाम्, ग्रामण्याम् ॥ **वाऽष्टन आः स्यादौ** ॥ ५२ ॥ अष्टनः स्यादौ परे आ वा स्यात् । अष्टाभिः, अष्टभिः । प्रियाष्टाः, प्रियाष्टा ॥ **अष्ट और्जस्शसोः** ॥ ५३ ॥ अष्टनः कृतात्वस्य जस्शसोरौः स्यात् । अष्टौ,

---

पञ्चमी आम् ॥ ङौ इत्यस्य विभक्तिविपरिणामेनानुवृत्तिः । नी ङिः, अत्रानेनाम्, धातोरिवर्णोवर्णस्ये 'तीय्, नीशब्दात् षष्ठीबहुवचने तु ' आमो नाम्वे 'ति नामादेशो न भवति, तत्र नित्यस्त्रीदूतोरधिकृतत्वात् । ग्रामण्यामित्यत्र साक्षान्नी नास्ति, किन्तु णी इति, अत आम् न प्राप्नोति, सत्यम्, स्यादिविधौ णत्वमसिद्धम् ॥ वा अष्टनः षष्ठी आः प्रथमा सिरादिर्यस्य तस्मिन् ॥ अयं स्यादिः स्वसम्बन्धिरन्यसम्बन्धिर्वा ग्राह्यः । स्वसम्बन्धिन उदाहरणमष्टाभिः, अष्टन् भिसित्यत्रानेन ' षष्ठ्यान्त्यस्ये 'ति परिभाषया नकारस्याकारः, ' समानानां तेन दीर्घः ' अष्टाभिः । आत्वाभावपक्षे ' नाम्नोनोऽह्न ' इति सूत्रेण नलोपे अष्टभिः अन्यसम्बन्धिन उदाहरणं प्रियाष्टाः । प्रिया अष्टौ यस्य स प्रियाष्टाः, अनेनाऽऽत्वे ' सोरुः ' आत्वाभावपक्षे, प्रियाऽष्टन् इत्यत्र च ' नि दीर्घः ' ' दीर्घङ्या ' नलोपश्च । बहुव्रीहावष्ट शब्दः सर्वासु विभक्तिषु प्रचलतीति सूचनाय प्रथमैकवचनमुदाहृतम् । पाणिनीये तु भ्यामादिष्वज्झनविभक्तावेव प्रियाष्टनादिगौणशब्दस्य वैकल्पिकमात्वं दृश्यते, अन्यत्र तु प्रियाष्टेत्यादि राजवदूपम् ॥ **अष्टः** षष्ठी, औः प्रथमा जस् च शस् च जस्शसौ तयोः । सूत्रेऽष्ट इति कृतात्वस्याष्टन् शब्दस्य निर्देशः । तथा च यदा 'वाष्टनः आः स्यादावि' त्यात्वं भवति, तदैवात्वविशिष्टाष्टन्शब्दस्य सम्बन्धिनोर्जसूशसोरौः स्यान्नान्यदा, तेनात्वाभावपक्षे जस्शसोः ' ङतिश्णः ' इति लुप्यष्ट इति रूपं भवति, तत्सम्बन्धिविज्ञानाच्च प्रियाष्टाः तिष्ठन्ति प्रियाष्टः पश्य, इति न जसशसोरौत्वम् । अष्टवाचक्षते इति णिचि क्विप्यष्टा-

अष्टौ ॥ **डतिष्णः सङ्ख्याया लुप्** ॥ ५४ ॥ डति-षनान्तानां सङ्ख्यानां जस्शसोर्लुप् स्यात् । कति, कति । षट्, षट् । पञ्च, पञ्च ॥ **नपुंसकस्य शिः** ॥ ५५ ॥ नपुंसकस्य जस्शसोः शिः स्यात् । कुण्डानि, पयांसि ॥ **औरीः** ॥ ५६ ॥ नपुंसकस्य औरीः स्यात् ।

विति रूपं केचिदिच्छन्ति, तदप्यष्टेति तन्त्रेण सङ्गृहीतम् ॥ डतिश्च ष् च न् तस्य डतिष्णः, सङ्ख्यायाः षष्ठी, लुप् ॥ जस्शसोरित्यनुवर्तते । का सङ्ख्या मानमेषां कति डत्यन्तत्वादनेन जस्शसोर्लुप्, षष्, पञ्चन् ' नाम्नो ' ' ध्रुटस्तृतीय ' इति पस्य डः, अनेन जस्शसोर्लुप् ' विरामे वा ' टः । तत्सम्बन्धिविज्ञानादिह न भवति प्रियकतयः इत्यादि ॥ ननु शतानि सहस्राणीत्यादौ शतशब्दाज्जसि, जसः शिकृते ' स्वराच्छावि 'ति नोन्ते शतन् इ इति जाते जसादेशस्य शेः स्थानिवद्भावेन लुप् स्यादिति चेन्न, सन्निपातपरिभाषया शिनिमित्तनकारसम्पादितनान्तत्वस्य शिविघातेऽनिमित्तत्वात् । न च सन्निपातलक्षणन्यायस्यानित्यत्वान्नात्र तस्य प्रवृत्तिरिति वाच्यम्, इष्टस्थलेऽप्यप्रवृत्तौ न्यायस्याकिञ्चित्करत्वापत्तेः ॥ स्त्रीश्च पुमांश्च स्त्रीपुंसौ, स्त्रियाः पुंसः ' द्वन्द्वे ये 'ति समासान्तः, न स्त्रीपुंसाविति नपुंसकम् । नखादित्वान्नञऽदादेशाभावः, स्त्रीपुंसशब्दस्य पृषोदरादित्वात् पुंसकादेश इति नपुंसकः तस्य शिः ॥ जस्शसोरित्यनुवर्तते । कुण्डशब्दाज्जसोऽनेन शिः, स्वराच्छाविति ' नोन्तः, ' नि दीर्घः' । पयस् 'धुटां प्राक्' नोन्तः, 'न्समहतो' दीर्घः, तत्सम्बन्धिविज्ञानादिह न स्यात्, प्रियाणि कुण्डानि येषान्ते प्रियकुण्डाः, ॥ औः प्रथमा, ईः प्रथमा ॥ नपुंसकस्येत्यनुवर्तते । औरीरित्यभेदनिर्देशः सर्वादेशार्थः, अन्यथा षष्ठ्या निर्दिश्यमाने सत्यौकारस्य अ ओ इत्येवं सन्ध्यक्षररूपतया, ' षष्ठ्यान्त्यस्ये 'ति न्यायादोकारस्यैव ई आदेशः स्यात् । कुण्डे, औरीः गुणश्च । तत्सम्बन्धिविज्ञानाच्च नपुं-

कुण्डे । पयसी ॥ **अतः स्यमोऽम्** ॥५७॥ अदन्तस्य नपुंसकस्य स्यमोरम् स्यात् । कुण्डम्, हे कुण्ड ! ॥ **पञ्चतोऽन्यादेरनेकतरस्य दः** ॥ ५८ ॥ पञ्चपरिमाणस्य नपुंसकस्यान्यादेः स्यमोर्दः स्यादेकतरवर्जम् । अन्यत्, अन्यतरत्, इतरत्, कतरत्, कतमत् । अनेकतरस्येति किम् ? एकतरम् ॥ **अनतो लुप्** ॥ ५९ ॥

सकादविहितः औरीः न भवति ॥ अतः षष्ठी, सिश्च अम् च स्यम् तस्य, अम् ॥ नपुंसकस्येत्यनुवर्तते, तदन्तविधिश्च सम्बन्धे षष्ठी । तथा चाऽकारान्तनपुंसकाद्विहितयोः स्यमोरिति भावार्थः । ननु दधीत्यादौ स्यमोः ' अनतो लुबि ' ति बाधकसूत्रेण लुपि दधीत्यादि सिद्धेरतः स्यमोऽमित्यत्राऽतो ग्रहणं निरर्थकमिति चेन्न, ' अनत ' इत्यत्र नञः पर्युदासप्रसज्यरूपतासन्देहनिवारणार्थत्वात् । अद्ग्रहणेन च प्रसज्य एव नञिति निश्चीयते । हे कुण्ड ! अनेन सेरमि कृते, 'अदेतः स्यमोर्लुक्' । अमोऽकारोच्चारणं जरसादेशार्थम्, तेनातिजरसं कुलं तिष्ठतीति सिद्धम् । स्थानिमध्ये अमग्रहणमुत्तरार्थम्, तेनाऽन्यत्पश्येत्यादौ ' पञ्चतोऽन्यादेरि 'ति अमो दकारो भवति ॥ **पञ्च** इति सङ्ख्या मानमस्य पञ्चत् तस्य, अन्य आदिर्यस्यान्यादित्तस्य, न एकतरो यस्मिन् तस्य, दः प्रथमाः ॥ नपुंसकस्य स्यमोरित्यनुवर्तते, दकारेऽकार उच्चारणार्थः । द्वयोर्मध्ये प्रकृष्टमन्यदन्यतरत् । अन्यतरशब्दात् सेरनेन दः । एवं कतरत्, बहूनां मध्ये प्रकृष्टं किमिति कतमत् । द्वयोर्मध्ये प्रकृष्टमेकमेकतरम ॥ **न अदनत्** तस्य, लुप् ॥ नपुंसकस्य स्यमोरित्यनुवर्त्तते । लुगमकृत्वा लुप्करणं स्यमोः *स्थानिवद्भावेन यत्कार्यं तस्य निषेधार्थम्*, तेन यत् तत्, अत्र त्यदादित्वादत्वं न भवति । करोतीति कर्तृ नपुंसकस्य सेरनेन लुप् ॥ ' नञुक्तं तत्सदृशे, ' नञा सहोक्तं पदं नञुक्तपदसदृशे विशेष्यभूते

अनकारान्तस्य नपुंसकस्य स्यमोर्लुप् स्यात् । कर्तृ, पयः ॥ **जरसो वा** ॥ ६० ॥ जरसन्तस्य नपुंसकस्य स्यमोर्लुब्वा स्यात् । अतिजरः, अतिजरसम्, अतिजरम् ॥ **नामिनो लुग्वा** ॥ ६१ ॥ नाम्यन्तस्य नपुंसकस्य स्यमोर्लुग्वा स्यात् । हे वारे !, हे वारि ! । प्रियतिस्रि, प्रियत्रि कुलम् ॥ **वाऽन्यतः पुमांष्टादौ स्वरे** ॥ ६२ ॥ अन्यतो विशेष्यवशान्नपुंसको नाम्यन्तष्टादौ स्वरे परे पुंवद्वा स्यात् ।

विश्राम्यतीत्यर्थकेन न्यायेन वर्णत्वेनाकारसदृशोऽकारभिन्नश्च वर्णो ग्राह्यस्तादृशाश्चाकारेण भिन्नाः सर्वे स्वराः सर्वे व्यञ्जनाश्च ततः परस्य स्यमोर्लुप् भवति । स्वराभिप्रायेणोदाहरणं कर्तृ, व्यञ्जनाभिप्रायेणोदाहरणं पयः ॥ **जरसः षष्ठी वा** ॥ नपुंसकस्य स्यमोर्लुबित्येतेषामनुवृत्तिस्तदन्तविधिश्च । जरामतिक्रान्तं यत्कुलं तदतिजरः, ' ह्रीवे ' ह्रस्वः, ' अतः स्यमोऽम् ' ' जराया जरस्वा ', अनेन वा लुप् ॥ **नामिनः षष्ठी, लुग्, वा** ॥ नपुंसकस्य स्यमोरित्यनुवर्त्तते तदन्तविधिश्च । वारिशब्दात् सम्बोधने सिप्रत्ययेऽनेन सूत्रेण सेर्लुकि तस्य च स्थानिवद्भावेन तन्निमित्तः ' ह्रस्वस्य गुणः ' इति गुणःहे वारे ! पक्षे ' अनतो लुबि 'ति सेर्लुपि तन्निमित्तगुणाभावे हे वारि । प्रियाः तिस्रः यस्य तदिति विग्रहे, प्रिया जस्, त्रि जसिति स्थिते, ' लुबन्तरङ्गेभ्यः ' इति न्यायेन तिस्रादेशेऽकृते एव विभक्तिलोपे ' परतः स्त्री पुंवदि 'ति प्रियशब्दस्य पुंवद्भावे समासात् सिप्रत्यये तस्याऽनेन सूत्रेण वा लुकि, तन्निमित्तकतिस्रादेशाभावे प्रियत्रीति रूपम्, पक्षे ' अनतो लुबि 'ति लुपि तन्निमित्तकार्यस्य भावात्, ' त्रिचतुरः ' इत्यनेन तिस्रादेशे प्रियतिस्रि इति रूपम् । यद्यप्यत्र समासघटकस्त्रिशब्दो निरर्थकत्वेन न स्त्रीत्वे वर्तते, तथापि भूतपूर्वगत्या स्त्रियां वर्तमानत्वादादेशः ॥ वा, अन्यस्मादित्यन्यतः, पुमान्, टा आदिर्यस्य स तस्मिन्, स्वरे ॥ नपुंसकस्य, नामिन इति विभक्तिविपरिणामेना-

ग्रामण्या ग्रामणिना कुलेन, कर्त्रोः कर्तृणोः कुलयोः । अन्यत इति किम् ? पीलुने फलाय । टादाविति किम् ? शुचिनी कुले नपुंसक इत्येव !, कल्याण्यै स्त्रियै ॥ **दध्यस्थिसक्थ्यक्ष्णोऽन्तस्यान्** ॥

भिसम्बध्यते । यथा पुंसि नोऽन्तह्रस्वौ न भवतः, तथात्रापि क्लीबे, ग्रामणी टा, ' योऽनेकस्वरस्ये 'ति यत्वम्, ग्रामण्या । पुंवदभावे तु 'क्लीबे' ह्रस्वनोन्तौ भवतो ग्रामणिना, एवमग्रे । कर्तृणोः, नोन्तः णत्वम् । अत्र कुलेन कुलयोरित्युपन्यासो विशेष्यसूचनाय, तद्वशाद्ग्रामण्यादीनां नपुंसकत्वात्, क्रियाशब्दत्वात् । पीलुर्वृक्षः, पीलोः फलमिति वा पीलु ' प्राण्यौषधी ' त्यण्, ' फले ' इत्यणूलोपोऽत्र विशेष्यबलादेव पीलुशब्दो नपुंसके न वर्तते, किन्त्वर्थविशेषबलादपि । यद्यपि पीलुने फलायेत्यादौ फलशब्दासमभिव्याहारे पीलुशब्दः पीलुफलवृत्तिरिति विज्ञातुं न शक्यते, तथापि व्युत्पन्नस्य व्युत्पत्तिबलाद्विशेष्यविरहेऽपि भवत्येव । एवञ्च यत्प्रवृत्तिनिमित्तं पुंस्त्वस्यान्वयितावच्छेदकं तदेव यत्र नपुंसकस्याप्यन्वयितावच्छेदकं भवति स टादौ स्वरे वा पुंवद्भवति पीलुशब्दस्य वृक्षत्वव्याप्यजातिरूपं प्रवृत्तिनिमित्तं यत्पुंस्त्वस्याऽन्वयितावच्छेदकं न तन्नपुंसकत्वस्यान्वयितावच्छेदकम् । फलत्वव्याप्यजातिरूपप्रवृत्तिनिमित्तस्य नपुंसकत्वान्वयितावच्छेदकत्वात्, तच्च न पुंस्त्वस्यान्वयितावच्छेदकमिति न तत्रातिप्रसङ्गः । ग्रामण्या ग्रामणिना कुलेनेत्यादौ तु ग्रामनयनकर्तृत्वलक्षणप्रवृत्तिनिमित्तमेव पुंस्त्वस्य नपुंसकत्वस्य चाऽन्वयितावच्छेदकमिति । पुंवदित्यनुक्त्वा पुमानित्यत्र वतेरभावेऽपि परार्थे प्रयुज्यमानः शब्दो वतिमन्तरेणाऽपि वत्यर्थं गमयती 'ति न्यायाद्वत्यर्थेस्वापि बोधः, अन्यथा पुंवदिति ब्रूयात्, नपुंसके परार्थे प्रयुज्यमानः पुंशब्दो नपुंसकोऽपि सन् पुंस्त्वकार्याणि लभत इति भावः ॥ दधि च अस्थि च सक्थि चाक्षि च तत्तस्य, अन्तस्य अन् ॥ नपुंसकस्य, नामि-

॥ ६३ ॥ एषां नपुंसकानां नाम्यन्तानामन्तस्य टादौ स्वरे परे अन् स्यात् दध्ना, अतिदध्ना, । अस्थ्ना, अत्यस्थ्ना । सक्थ्ना, अतिसक्थ्ना। अक्ष्णा, अत्यक्ष्णा ॥ **अनाम्स्वरे नोन्तः** ॥ ६४ ॥ नाम्यन्तस्य

नष्टादौ स्वर इत्यनुवर्तन्ते ॥ अक्ष्ण इति षष्ठी न सम्बन्धे किन्तु शेषे, तेन तत्सम्बन्धिन्यन्यसम्बन्धिनि वा टादौ स्वरे परेऽन् भवति। दधि टा, इत्यत्राऽनेन सूत्रेण दधिशब्दान्तस्येकारस्यानादेशे 'अनोऽस्ये' त्यकारलोपे, दध्नेति रूपम् । दध्यतिक्रान्तस्तेनाऽतिदध्ना, तत्सम्बन्धिविज्ञानाभावादत्राप्यन् । एवमग्रेऽपि । दधिमतिक्रान्ता, तयेति विग्रहेऽनादेशे नान्तत्वात् ङीः अतिदध्न्येति रूपम्, स्त्रियामतिदध्नेत्येवेति कौमुदीकारः । दध्ना परमदध्नेत्यादौ विशेषविधानादनादेशः परमपि नागमं बाधते ॥ **न आम्, अनाम् चासौ स्वरश्च तस्मिन्, नोन्तः** ॥ नामिनः नपुंसकस्येत्यनुवर्तते स्वरे इत्यस्याप्यनुवृत्तिसम्भवे पुनः स्वरे इति ग्रहणं टादावित्यस्य निवृत्त्यर्थम् । स्यादेरधिकारात् स्यादौ स्वरे परे इत्युक्तम् । नोन्त इत्यत्राऽन्तग्रहणाभावे नस्य प्रत्ययत्वं स्यात् । तथा च सति नकारस्य प्रत्ययस्याऽपि सम्भवात् । 'निदीर्घ' इत्यत्र ' प्रत्ययाप्रत्ययययोः प्रत्ययस्यैव ग्रहणमि 'ति न्यायेन प्रत्ययस्यैव नकारस्य ग्रहणप्रसङ्गेन राजानमित्यादौ दीर्घो न स्यात्, किन्तु वनानीत्यादावेव स्यादतोऽन्तग्रहणं कृतम् । वारि औ, अत्र ' औरीः अनेन नोन्तः वारिन्, ' रषृवर्णादि 'ति णत्वम् वारिणी । प्रियाः तिस्रो यस्य तस्येति विग्रहे, प्रिया जस् त्रिजस् इति स्थिते विभक्तिलोपे ' परतः स्त्री पुंवदि 'ति प्रियत्रि इति जाते, ततः ङसि परत्वात्तिस्रादेशेऽनेन नोन्तः, प्रियतिसृन् अस्, ' रषृवर्णादि 'ति णत्वं प्रियतिसृणः पुंवद्भावात् प्रियतिस्रः प्रियतिसृणइति रूपद्वयमिति कौमुदीकारः । न च पूर्वमेव नागमे सति स्वाङ्गस्याव्यवधायकत्वात्तिस्रादेशसम्भवेन परत्वात्तिस्रादेश इति कथमुच्यत इति वाच्यम्;

नपुंसकस्याऽऽम्वर्ज्जे स्यादौ स्वरे परे नोऽन्तः स्यात् । वारिणी, वारिणः । कर्तृणी, कर्तृणः । प्रियतिस्रृणः । अनामिति किम् ? वारीणाम् । स्वर इति किम् ? हे वारे ! । स्यादावित्येव ? तौम्बुरवं चूर्णम् ॥ **स्वराच्छौ** ॥६५॥ शौ परे स्वरान्तान्नपुंसकात्परो नोऽन्तः स्यात् । कुण्डानि । स्वरादिति किम् ? चत्वारि ॥ **धुटां प्राक्** ॥ ॥ ६६ ॥ स्वरात्परा या धुट्जातिस्तदन्तस्य नपुंसकस्य शौ परे

नाऽऽगमस्य प्रियत्रि इत्यस्यैवाङ्गत्वात्, तस्मादेव नागमस्य भावात्, तिस्रादेशस्य चाऽवयवभूतत्रिशब्दस्यैव भावादवयवस्यावयवेन व्यवधानात्तिस्रादेशाभावः स्यादिति । वारीणाम्, आमि नागमे सति **दीर्घो न स्यादित्याम्वर्जनम्** । **तुम्बुरुण** वृक्षस्य विकारः फलं वा ' प्राण्यौषधिवृक्षेभ्योऽण् ' ' फले ' इत्यण् लोपः । तुम्बुरुणः फलस्य विकारस्तौम्बरवम्, ' विकारे अण्, ' ' वृद्धिः स्वरे ' इत्यादिवृद्धिः । अस्वयंभुवोऽव् ॥ **स्वरात्, शौ** सप्तमी ॥ विभक्तिविपरिणामेन नपुंसकस्येति नोन्त इति चाऽनुवर्तते । ननु शौ परे इवर्णादेर्नाऽऽगमोऽनाम्स्वर इत्यनेन सिद्ध एव, आकारान्तनपुंसकशब्दस्तु नास्त्येव, नपुंसके ह्रस्वविधानात्, तथा च व्याप्यरूपेण सूत्रसम्भवे व्यापकरूपेण तत्करणे प्रयोजनाभावात्, ' अतः शौ ' इत्येव कर्तव्यमिति चेत्, सत्यम्, **उत्तरार्थं स्वरादित्युक्तम्** । **कुण्ड जस्**, ' **नपुंसकस्य शिः** ' अनेन **नोन्तः**, ' **नि दीर्घः** ' चतुर् नपुंसकात्परत्वाभावान्न नोन्तः ॥ **धुटां** षष्ठी, प्राचि देशे इति **प्राक्** अव्ययम् ॥ नपुंसकस्य नोन्तः स्वराच्छावित्यनुवर्तन्ते । स्वरादिति धुटो विशेषणम्, धुटामिति नपुंसकस्य विशेषणम्, प्राक्त्वञ्च धुडभ्य एव विवक्षितम्, तथा च स्वरात्परेत्यादि । पयस् जस् । अतिक्रान्ता जरा यैस्तानि, अतिजर जस् । 'नपुंसकस्य' जरसादेशः, अनेन नोन्तः । ' न्समहत ' दीर्घः, ' शिड्हेऽनुस्वारः ' धुटामिति बहुवचनमनेकधुट्सद्भावेऽपि नाऽऽगमार्थम्,

धुड्भ्य एव प्राग् नोन्तः स्यात्। पयांसि, अतिजरांसि, काष्टतङ्क्षि। स्वरादित्येव ? गोमन्ति ॥ **लोंवा** ॥ ६७ ॥ रलाभ्यां परा या धुट्-जातिस्तदन्तस्य नपुंसकस्य शौ परे धुड्भ्य एव प्राक् नोन्तो वा स्यात्। बहूर्ज्जि, बहूर्जि। सुवल्ज्जि, सुवल्गि। लं इति किम् ? काष्टतङ्क्षि। धुटामित्येव ? सुफुल्लि ॥ **घुटि** ॥ ६८ ॥ निमित्तविशेषोपादानं विना आपादपरिसमाप्तेर्यत्कार्यं वक्ष्यते तद् घुटि वेदितव्यम्

तेन काष्ठानि तक्ष्णुवन्तीति विग्रहे काष्टतक्ष् इति क्विपि सिद्धे जस्-विभक्तेः 'नपुंसकस्ये'ति शिकृते काष्ठतक्ष् इ इति जाते क् ष् लक्षणा-ेकधुट्सद्भावेऽप्यनेन सूत्रेण धुड्भ्यः प्राङ्नाऽऽगमे काष्ठतन् क्ष् इ, इति स्थिते 'म्नांधुड्वर्गेण' इति नकारस्य ङकारे ाष्टतङ्क्षि इति सिद्धम्। गावो विद्यन्ते येषु कुलेषु तानि गोमन्ति 'तदस्या' मत्, 'ऋदुदितः' इत्यनेन नागमे गोमन्त इ इति जाते धुडन्तनपुंसकस्य सद्भावेन पुनरनेन सूत्रेण नोन्तत्वं प्राप्नोति, अतःस्वरादित्युक्तम्। अत्र धुट्तकारो न स्वरात्परः, यश्च स्वरात्परो नकारः स न धुट् इति नानेन नागमः। धुटामिति बहुवचनोपादानात् 'वर्णग्रहणे जाति-ग्रहणमिति न्यायोऽनित्यः, अन्यथा धुडित्येकवचनेनाऽपि बहूनां धुटां लाभसम्भवाद्बहुवचनं व्यर्थं स्यात्॥ र् च ल् च लँ तस्मात् वा॥ नपुंसकस्य, नोन्तः शौ धुटां प्रागित्यनुवर्तन्ते। लं इति धुटां विशेषणम्। ऊर्जण् बलप्राणनयोः। ऊर्जयन्तीति, 'दिद्युद' किप्, बहव ऊर्जो येषु कुलेषु तानि, 'नपुंसकस्य,' अनेन जकरात् प्राङ् नोन्तः। सुष्ठु वल्गन्तीति किपि रूपम्। फुल्ल विकसने सुष्ठु फुल्ल-न्तीति किपि रूपम्। घुटि सप्तमी। अधिकारसूत्रमिदम्, न तु विधायकम्। विधायकत्वे हि नपुंसकस्य घुटि नोन्तो भवतीति स्यात्, विधानञ्चैदमनर्थकं नपुंसके शिमन्तरेणान्यस्य घुट्त्वाभावात्, तत्र च 'स्वराच्छावि' त्यादिभिर्नागमस्य विहित्वात्। घुटीति सामा-

अचः ॥ ६९ ॥ अञ्चतेर्धातोर्धुडन्तस्य धुटः प्राक् नोन्तो घुटि स्यात् । प्राङ्, अतिप्राङ्, प्राञ्चौ । प्राञ्चि कुलानि ॥ **ऋदुदितः** ॥ ७० ॥ ऋदुदितो धुडन्तस्य घुटि परे धुटः प्राक् स्वरात्परो नोन्तः स्यात् । कुर्वन्, विद्वान्, गोमान् । घुटीत्येव ? गोमता ॥ **युञ्जोऽसमासे** ॥ ७१ ॥ "युजृंपी योगे" इत्यस्यासमासे धुडन्तस्य धुटः प्राक् नोन्तः स्यात् । युङ्, युञ्जौ । युञ्जि कुलानि । बहुयुङ् । असमास इति किम् ? अश्वयुक् । युञ्ज इति किम् ? "युजिंच् समाधौ",

---

न्यतयोक्तेः नपुंसकस्येति निवृत्तम् ॥ **अचः** षष्ठी ॥ घुटामिति वचनविपरिणामेन सम्बध्यते, नोन्तः प्राक् च । प्राञ्चतीति किप्, ' अञ्चोऽनर्चायामि 'ति नलोपः, ' अप्रयोगीत्, ' अनेन नोन्तः, ' पदस्ये 'ति चलोपः, ' युजञ्च क्रुञ्चो नो ङ ' इति नस्य ङः, प्राञ्चमतिक्रान्तः अतिप्राङ् । अत्र स्याद्याक्षिप्तस्य नाम्नोऽच इति विशेषणात्तदन्तविधिश्च समासेऽपि नागमस्य प्राप्तिर्नागमे तदन्तविधिश्च, ' युञ्जोऽसमासे ' इत्यत्रासमासग्रहणाज्ज्ञाप्यते ॥ **ऋच्च** उच्च ऋदुतौ, तावितौ यस्य स ऋदुदित् तस्य ॥ अनुवृत्तिः पूर्ववत् । करोतीति विग्रहे ' शत्रानशावि 'ति शतृप्रत्यये, ' कृगतनादेरि 'त्युप्रत्यये, ' नामिनो गुणः ' इत्यर् कृते, कुरु अत् इति जाते ' अतः शिती 'त्युत्वे, ' इवर्णादेरि 'ति वत्वे कुर्वत् सि इति सञ्जाते ऋदित्वादनेन नागमे ' दीर्घङ्याबि 'ति सिलोपे ' पदस्ये 'ति तलोपे कुर्वन् । वेत्तीति विद्वान्, कसुरुदित्वादनेन नोन्तः ' न्समहतोः, ' 'पदस्ये' तिसलोपः । उदितः स्वरान्नोन्त ' इत्यत्र धात्वधिकारात् । अत्र चोदित इति पृथगारम्भाद्भ्वादेरेवोदितो ग्रहणात्, तत्साहचर्याद्दिवादेरुदितोऽप्यभ्वादेरेवेति सूत्रमिदं भ्वादिव्युदासार्थं विज्ञेयम् । **युञ्जः** षष्ठी, न समासोऽसमासस्तस्मिन् ॥ पूर्ववदनुवृत्तिः । युनक्तीति–किप्, युङ्, ईषद्युङिति बहुयुङ्, ' नाम्नः प्राग्बहुर्वे 'ति पूर्वं बहुप्रत्ययः । अश्वान् युनक्तीत्य-

युजमापन्ना मुनयः ॥ **अनडुहः सौ** ॥ ७२ ॥ अनडुहो धुडन्तस्य धुटः प्राक् सौ परे नोन्तः स्यात् । अनड्वान्, प्रियानड्वान् ॥ **पुंसोः पुमन्स्** ॥ ७३ ॥ पुंसोः पुमन्स् धुटि स्यात् । पुमान्, पुमांसौ, पुमांसः । प्रियपुमान्, प्रियपुमांसि ॥ **ओत औः** ॥ ७४ ॥ ओतो धुटि परे औः स्यात् । गौः, गावौ । द्यौः, द्यावौ । प्रियद्यावौ । ओत

श्वयुक्, योजनं युक् ॥ अनडुहः षष्ठी, सौ सप्तमी ॥ अनुवृत्तिः पूर्ववत् । सावितिनिमित्तविशेषोपादानादधिकारप्राप्तमपि धुटीतिपदं न सम्बध्यते । धुडधिकारात् सावितिसेरेव सप्तम्या रूपम् न तु सप्तमीविभक्तेरुत्सृष्टानुबन्धस्य सुपः । अनः शकटं वहतीत्यर्थे अनस्पूर्वात् वहधातोः क्विपि सस्य डत्वे ' यजादिवचेरि 'ति वस्योत्वे अनडुह् सि, अनेन नोन्तः, ' वाः शेषे ' इति डकारोत्तरवर्त्युकारस्य वात्वेऽनड्वान्द्, 'पदस्ये 'ति हलोपेऽनड्वानिति रूपम् । ' स्रंसध्वंस इति सूत्रेण न दकारो नकारविधानसामर्थ्यात् । प्रिया अनड्वाहो यस्यासौ । एकत्ववृत्तेरनडुहः ' पुमनडुन्नो पयोलक्ष्म्या एकत्वे ' इति स्यादतो बहुत्वेन समासः ॥ पुंसोः इति षष्ठी, पुंमन्स् ॥ पुंस् शब्दात् सिविभक्तावनेन पुमन्सादेशः, सिलोपः ' ' न्समहतोः ' ' पदस्य ' सलोपः । प्रियाः पुमांसो येषान्तानि, नपुंसकस्य शिः, ' पुम्नस् ' ' न्समहतोः, ' ' शिड्हेऽनुस्वारः ' । अत्राप्येकत्ववृत्तेः कच् स्यात्, पुंसोरुदित्वात् । प्रियपुंसितरा प्रियपुंस्तरा इत्यादौ ङेः ह्रस्वपुंवद्भिकल्पाश्च भवन्ति ॥ **ओतः** षष्ठी, औः प्रथमा ॥ स्याद्याक्षिप्तस्य नाम्नो विशेषणत्वेन तदन्तविधावोकारान्तस्य नाम्नस्तद्विहितघुटि परे ओकारादेशो भवति, यथा गोशब्दात् सिविभक्तौ सेरोदन्तनाम्नो विहितत्वेन तस्मिन्परे गोशब्दघटितौकारस्यौकारादेशः, एवमग्रेऽपि । प्रिया द्यौर्ययोस्तौ प्रियद्यावौ, इत्यत्राऽप्यौविभक्तेरोकारान्ताद्विहितत्वादौकारो भवति, ततश्चाऽऽवादेशः । चित्रगुरित्यादौ तु परत्वात्

इति किम् ? चित्रगुः ॥ **आ अम्शसोऽता** ॥ ७५ ॥ ओतोऽम् शसोरता सह आः स्यात् । गाम्, सुगाम्, गाः । द्याम्, अतिद्याम्, द्याः, सुद्याः ॥ **पथिन्मथिन्ऋभुक्षः सौ** ॥ ७६ ॥ एषां नान्तानामन्तस्य सौ परे आः स्यात् । पन्थाः हे पन्थाः ! । मन्थाः, हे

पूर्वं ह्रस्वे कृते, पश्चाद्धुट्योकाराभावान्नौकारः, स्थानिवद्भावोऽप्यत्र न भवति, वर्णविधित्वात् ॥ **आः प्रथमा, अम् च शस् च तस्य, अता तृतीया** ॥ ओत इति सम्बध्यते । पूजिता गौः सुगौः, तामनेन आः, ' गोस्तत्पुरुषादि ' त्यट्प्राप्नोति, परन्तु ' पूजास्वतेरि ' ति निषेधः । द्यामतिक्रान्तो योऽसावतिद्यौः ताम्, शोभना द्यावः सुद्यावः ताः । अत्र गा इत्यादौ ' शसोऽता सश्चे ' त्यनेन दीर्घोऽभवने, ' आ अम्शसोऽते 'त्यात्वे कृते सति शसोऽकाराभावलक्षणो हेतुर्दृश्यते, परन्तु सकारस्य नत्वाभावे न कश्चिद्यत्नो दृश्यते, तेन विज्ञायते, 'सन्नियोगशिष्टानामेकापायेऽन्यतरस्याप्यपाय' इति न्यायस्यास्तित्वम् । यत्र द्वे कार्ये सन्नियोगेनोक्ते तत्र कार्यस्यैकस्याभावेऽपरमपि न भवतीति तदर्थस्तेनात्र ' शसोऽता सश्चे 'ति दीर्घाभावे नकारोऽपि न जात इति ॥ **पन्थाश्च मन्थाश्च ऋभुक्षाश्च तत्तस्य, सौ, आः** इत्यनुवर्त्तते । ' षष्ठ्यान्त्यस्ये 'त्यन्तस्य आः आदेशः भवति । पथिन्, नस्य आः । एरित्यनेनेकारस्याऽऽकारः, ' समानानामि 'ति दीर्घः, पथा सिति जाते थोन्थित्यनेन न्थादेशे सकारस्य विसर्गे पन्थाः, एवमग्रेऽपि । अत्र नकारस्य सानुनासिकस्य स्थाने निरनुनासिक एव आ भवति, ' लिलावि 'ति द्विवचनग्रहणाज्ज्ञापकात् । पथीरित्यादौ पन्थानमैश्छदिति विग्रहे क्यनि नकारलोपे किपि च दीर्घे पथीशब्दात् सिविभक्तेरुत्वे विसर्गे च पथीः भवति, अत्र नान्तः पथिशब्दो नास्ति, तेन नाऽऽकारः । पाणिनीयेऽत्राऽपि पन्थाः पन्थियौ

मन्थाः, ! । ऋभुक्षाः, हे ऋभुक्षाः ! । नान्तनिर्देशादिह न स्यात्– पन्थानमैच्छत् पथीः ॥ **एः** ॥ ७७ ॥ पथ्यादीनां नान्तानामितो घुटि परे आः स्यात् । पन्थाः पन्थानौ, पन्थानः, पन्थानम्, सुपन्थानि कुलानि । मन्थाः ऋभुक्षाः नान्तनिर्देशादिह न स्यात् पथ्यौ, पथ्यः ॥ **थो न्थ्** ॥ ७८ ॥ पथिन्मथिनोर्नान्तयोस्थस्य घुटि परे न्थ् स्यात् । तथैवोदाहृतम् ॥ **इन् ङीस्वरे लुक्** ॥ ७९ ॥ पथ्यादीनां नान्तानां

पन्थिय इत्येवंप्रकारं रूपमिष्यते ॥ **एः** । इशब्दस्य षष्ठ्यन्तं रूपम् ॥ आः पथिन्मथिन्ऋभुक्ष इत्यनुवर्तन्ते । शोभनं पन्थाः येषु तानि सुपन्थानि । अत्रापि शेर्घुट्त्वादाकारादय आदेशाः पूर्ववद्भाव्याः । पथ्यावित्यादौ नान्तपथिशब्दाभावान्नाकारादिकार्यम् । थः षष्ठी, न्थ प्रथमा ॥ पथिन्मथिनिति सम्बध्यते, न तु ऋभुक्षिन्नसम्भवात् ॥ **इन् ङीश्च स्वरश्च तस्मिन् लुक्** ॥ ङीसाहचर्यात् स्वरोऽघुट्रूपो ग्राह्यः, स च स्वरः स्याद्यधिकारात् स्यादिसम्बन्ध्येव । स्वरादिस्यादिघुटि तु पथ्यादीनामिनो विशेषविध्याक्रान्तत्वादघुट्स्वरे इत्येव निश्चीयते । इन् लुक् इत्यभेदनिर्देशः सर्वादेशार्थः, षष्ठ्या निर्देशे तु ' षष्ठ्यान्त्यस्ये 'ति नकारस्यैव लोपः स्यात् । शोभनः पन्थाः यस्याः सा, ययोस्ते इति वा, विग्रहे व्युत्पत्तिपक्षाश्रयणे सुभ्रूवादित्वादुणादीनामव्युत्पन्नत्वे इन्नन्तत्वाभावात् कच् न भवति, समासान्तविधेरनित्यत्वाच्च ' ऋक्पूरि ' त्यपि न भवति नान्तत्वात्, स्त्रियां नृत ' इति ङीः । अत्र ङ्यां परतः सुपथिन् सम्बन्धिनः इनो लुक् । नपुंसके तु सुपथिन् शब्दादौविभक्तौ ' औरीरि 'तीकृते स्याद्यघुट्स्वरपरत्वादिनो लोपः । एवमग्रेऽपि । न विद्यते ऋभुक्षा इन्द्रो यस्याः सा ययोस्ते वा अनृभुक्षी ॥ **वा उशनसः षष्ठी नः प्रथमा च आमन्त्र्ये सौ** ॥ च शब्देन लुकोऽनुकर्षः । ' षष्ठ्यान्त्यस्ये 'ति परिभाषा प्रवर्तते । उशनस् शब्दात् सम्बोधने सौ ' सर्वविधिभ्यो लोपो

ङ्यामघुट्स्वरादौ च स्यादौ परे इन् लुक् स्यात् । सुपथी स्त्री कुले वा, पथः । सुमथी स्त्री कुले वा, मथः । अनृभुक्षी सेना कुले वा, ऋभुक्षः ॥ **वोशनसो नश्चामन्त्ये सौ** ॥ ८० ॥ आमन्त्यवृत्तेरुशनसो नलुकौ सौ परे वा स्याताम् । हे उशनन् !, हे उशन, हे उशनः ! । आमन्त्य इति किम् ? उशना ॥ **उतोऽनङुचतुरो वः** ॥ ८१ ॥ आमन्त्यवृत्त्योरनङुचतुरोरुतः सौ परे वः स्यात् । हे अनड्वन् ! हे प्रियचत्वः ! । हे अतिचत्वः ! ॥ **वाः शेषे** ॥ ८२ ॥ ' आमन्त्यविहितात् सेरन्यो घुट्शेषस्तस्मिन्परे अनङुचतुरो रुतो वाः स्यात् । अनड्वान्, अनड्वाहौ । प्रियचत्वाः, प्रियचत्वारौ । शेष इति किम् ? हे अनड्वन् ! । हे प्रियचत्वः ! ॥ **सख्युरितोऽशावैत्** ॥ ८३ ॥ सख्युरिदन्तस्य शिवर्जे शेषे

बलवानि 'ति न्यायेन सेर्लुकि तस्य स्थानिवद्भावेन प्रकृतसूत्रेण वा नान्तादेशे हे उशनन् इति । अन्तस्य वा लुकि हे उशन ! उभयोरप्यभावे ' सोरुः ' हे उशनः इति रूपत्रयम् । आमन्त्याभावे च ' ऋदुशनसित्यादि 'ना सेर्डा ' डित्यन्त्यस्वरादेरि 'त्यस्लोपे उशना । उतः षष्ठी, अनड्वांश्च चत्वारश्च तस्य वः प्रथमा ॥ आमन्त्ये सौ इति सम्बध्येते । स्वरसहितो वकारादेशो बोध्यः । अनडुह् आमन्त्ये, ' अनडुहः सौ ' नोन्तः, उतोऽनेन वः ॥ वाः प्रथमा, शेषे ॥ उतोऽनडुचतुर इत्यनुवर्तन्ते । अनडुह् सि नोन्तः । अनेन उतः वाः । ' दीर्घङ्याब् ' ' पदस्य ' इलोपः । प्रियाश्चत्वारो यस्य प्रियचत्वाः । सेर्लुक्, प्रियाश्चत्वारो ययोस्तौ प्रियचत्वारौ ॥ सख्युः षष्ठी, इतः षष्ठी, न शिः अशिः तस्मिन् ऐत् ॥ शेषे इति वर्तते शेषश्चात्राऽऽमन्त्यविहितसिभिन्नो घुट् ग्राह्यः । स च शेषघुट् शिरपि भवतीति तद्वर्जनायाऽशावित्युक्तम् । इत इति सख्युर्विशेषणम्, तेन तदन्तविधिः । सखि औ, अत्रानेन ' षष्ठ्यान्त्यस्ये 'ति परिभाषयेवर्ण-

घुटि परे ऐत् स्यात्। सखायौ, सखायः, सखायम्। इत इति किम्? सख्यौ स्त्रियौ। अशाविति किम्? अतिसखीनि। शेष इत्येव? हे सखे! ॥ **ऋदुशनस्पुरुदंशोऽनेहसश्च सेर्डा** ॥ ८४ ॥ ऋदन्तादुशनसादेः सख्युरितश्च परस्य शेषस्य सेर्डा स्यात्। पिता, अति-

---

स्यैत्, तकार उच्चारणार्थस्ततश्चाऽऽयादेशः एवमन्यत्र। सख्युर्भार्या सखी, ' नारीसखीपङ्क्ष्वे 'ति ङीप्रत्ययः। ततश्च औविभक्ताविदन्तत्वाभावान्नैत्। सखायमतिक्रान्तानि यानि कुलानि तानि। अत्र जसः ' नपुंसकस्ये 'ति शौ कृते ' स्वराच्छावि 'ति नोन्ते सति ' नि दीर्घः। नन्वशावित्यभावेऽपि न दोषः, शौ कृते ' आदेशादागमो बलवानि 'ति न्यायेन ऐदादेशं बाधित्वा नागमे सति तेन व्यवधानात् पुनरैत्वाप्राप्तेः। कृते वा ऐकारे ' ह्रीबे ' इति ह्रस्वस्य भावेन ततो नागमे दीर्घे चातिसखीनीति च सिद्धौ तथाप्यशावित्यस्य वैयर्थ्यमिति चेन्न, घुङ्निमित्तस्यैकारस्य बहिरङ्गत्वेन ह्रस्वे कर्तव्येऽसिद्धत्वात्। अत्रेत इति वचनं सखीशब्दस्यैत्वनिषेधार्थं कृतम्, तत्कथं सखीशब्दस्य स्त्रीत्वे ऐत्वप्राप्तिः, सूत्रे सखिशब्दस्यैव साक्षादुक्तेरिति चेद्व्यर्थं सदिद्ग्रहणं ' नामग्रहणे लिङ्गविशिष्टस्याऽपि ग्रहणमि 'ति न्यायं सूचयति तथाऽस्मादेवेद्ग्रहणात् सूचितात्, ' एकदेशविकृतमनन्यवदि ' तिन्यायात् सखायमिच्छति सखीयति, सखीयति क्यनि क्विप्यौविभक्तावैत्वप्राप्तौ तन्निवारणाय इद्ग्रहणमिति, **ऋच्च उशनाच पुरुदंशा च अनेहा च तस्मात् च सेः** षष्ठी, डा प्रथमा इतः शेषे घुटीत्यनुवर्तन्ते। चशब्देन सखिशब्दस्यानुकर्षः, स्याद्याक्षिप्तस्य नाम्न ऋदिति विशेषणात्तदन्तविधिः। शेषः सिरामन्त्यभिन्न उच्यते। पितृशब्दात् सिविभक्तावर्द्धौ चेत्यर् प्राप्तोऽनेन सेर्डा कृते ' डित्यन्त्ये 'ति ऋकारलोपे पिता। उशनसादित्रयाणां 'दीर्घङ्याबि 'ति सिलोपे प्राप्तेऽनेन डा। सखिशब्दस्य चैत्वे प्राप्तेऽनेन

पिता, कर्त्ता, उशना, पुरुदंशा, अनेहा सखा ॥ **नि दीर्घः** ॥८५॥ शेषे घुटि परे यो नस्तस्मिन् परे स्वरस्य दीर्घः स्यात् । राजा, राजानौ, राजानः, राजानम् । वनानि, कर्तृणि । शेष इत्येव ? हे राजन् ! ॥ **न्समहतोः** ॥ ८६ ॥ *न्सन्तस्य महतश्च स्वरस्य* शेषे घुटि परे दीर्घः स्यात् । श्रेयान्, श्रेयांसौ । महान्, महान्तौ ॥ **इन्हन्पूषार्यम्णः शिस्योः** ॥ ८७ ॥ इन्नन्तस्य हनादेश्च स्वरस्य

डा । सख्युरिति विशेषणात् स्त्रीप्रत्ययान्तात्क्विप्प्रत्ययान्ताच्च सखिशब्दात् परस्य सेर्डा न भवति ॥ नि सप्तमी, दीर्घः ॥ शेषे घुटीति सम्बध्यते । राजन् शब्दात् सिनिभक्तौ परत्वात् 'नि दीर्घ' इति दीर्घे 'दीर्घ ङ्याबि' ति सिलोपे ' नाम्नो ' नलोपे च राजा, स्यादिविधौ कर्त्तव्ये नलोपरस्यासत्त्वात् प्रथमं लुग् न । हे राजनित्यत्र ' नामन्त्ये 'ति नस्य लुग् न ॥ **नकारेण युक्तः स् न्स्, न्स च महच्च** तयोः ॥ **दीर्घःशेषे घुटीत्यनुवर्तन्ते** । महदित्यौणादिको ग्राह्यः, न तु शत्रन्तस्तस्य लाक्षणिकत्वात्, ' लक्षणप्रतिपदोक्तयोरि 'ति न्यायात् । श्रेयानित्यादौ ' ऋदुदितः ' इत्यनेन नोन्तः, ' पदस्ये 'ति लोपस्यासिद्धत्वान्नलोपो न ॥ **इन् च हन् च पूषा च अर्यमा** तस्य, शिश्च सिश्च शिसी तयोः । इनिति नाम्नो विशेषणम् । दीर्घः इत्यनुवर्तते । ' नि दीर्घ ' इति दीर्घे सिद्धे ' सिद्धे सत्यारम्भो नियमार्थ' इति न्यायेनानेनैव सूत्रेण ज्ञापितेन नियमार्थमिदं सूत्रम्, अत एवोक्तं शिस्योरेव परयोर्दीर्घः स्यादिति । तेन दण्डिनावित्यादौ ' नि दीर्घ ' इत्यनेनापि न दीर्घः । यद्ययं न्यायो न भवेत्तर्हि सूत्रमिदं विधायकं भवेत्, तथा चैतत्सूत्रविहितकार्यस्य ' नि दीर्घ ' इत्यनेनैव सिद्ध्या सूत्रमिदं व्यर्थं स्यात्, यच्चारब्धं तदेतन्न्यायेन नियमसूत्रमिदं भविष्यतीति मत्वा । यद्यप्यत्र ' अर्थवद्ग्रहणे नानर्थकस्य ग्रहणमिति न्यायात् सार्थकस्येन्प्रत्ययान्तस्यैव दीर्घः, न तु स्रग्वीत्यादौ निरर्थ-

शिस्योरेव परयोर्दीर्घः स्यात्। दण्डीनि, स्रग्वीणि, दण्डी, स्रग्वी, भ्रूणहानि, भ्रूणहा, बहुपूषाणि, पूषा, स्वर्यमाणि, अर्यमा। शिस्योरेवेति किम्? दण्डिनौ, वृत्रहणौ, पूषणौ, अर्यमणौ ॥ **अपः** ॥ ८८ ॥ अपः स्वरस्य शेषे घुटि परे दीर्घः स्यात्। आपः, स्वापौ ॥ **नि वा** ॥ ८९ ॥ अपः स्वरस्य नागमे सति घुटि परे दीर्घो वा स्यात्।

कत्वादिनः, विन एव तत्र सार्थकत्वात्तथापि ' अनिनस्मन् ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ती 'ति न्यायान्निरर्थकोऽपीन् शब्दो गृह्यते, तेन स्रग्वीत्यादावप्यनेन दीर्घः॥ **अपः** षष्ठी, सूत्रत्वादेकवचनम् ॥ शेषे घुटि दीर्घ इत्यनुवर्तन्ते। शोभना आपो ययोस्तौ स्वापौ ॥ नि सप्तमी, वा ॥ शोभना आपो येषु तडागेषु तानि स्वाप्नि ' घुटां प्राक् ' ' म्नां धुट् ' नस्य मः, समासान्तविधेरनित्यत्वात्। बह्व्य आपो येषु तडागेष्विति विग्रहेऽप्यनेन वा दीर्घः ॥ **भूरादिर्यस्य** स भ्वादिः, न भ्वादिः, तस्य, अतुश्च अस् च तस्य सौ ॥ शेषे दीर्घ इत्यनुवर्तते। भवतीति भवान्, भातेर्डवतु नोन्तः ' पदस्य ' तलोपः। नागमे सत्यपि ' आगमोऽनुपघाती 'ति न्यायेनानेनात्वन्तलक्षणो दीर्घः। यवा विद्यन्तेऽस्य मतुप्रत्ययः ' नोर्म्यादिभ्यो ' मस्य वः, यद्यप्यतुरत्र नाऽर्थवानिति तदन्तविधिर्न भवति, तथाऽपि मत्वादीनामुकारानुबन्धकरणादनर्थकस्याप्यतोस्तदन्तविधौ प्रयोजकत्वम्, उकारानुबन्धस्य प्रयोजनान्तराभावात्। अप्सरस् अनेन दीर्घः, गोमन्तमिच्छति क्यन् किप्, ' अत्तः ' अलोपः ' योऽशीति, यलुक् 'ऋदुदित' नोन्तः भ्वादेरेव वर्जनादनेन दीर्घः। एवं स्थूलशिरा इत्यत्रापि, पिण्डं ग्रसत इति पिण्डग्रः, अत्र पिण्ड ग्रस् स इति स्थितेऽसो भ्वादिधात्ववयवत्वान्नानेन दीर्घः। न चार्थवद्ग्रहणे इति परिभाषया सार्थकस्यैवाऽसो ग्रहणेनाऽत्र धात्ववयवस्याऽसो निरर्थकत्वादेव दीर्घाप्राप्तेरभ्वादेरिति वचनं व्यर्थमिति

स्वाम्पि, स्वम्पि । बह्वाम्पि, बह्वम्पि ॥ **अभ्वादेरत्वसः सौ** ॥ ९० ॥ अत्वन्तस्यासन्तस्य च भ्वादिवर्जस्य शेषे सौ परे दीर्घः स्यात् । भवान्, यवमान्, अप्सराः । गोमन्तं स्थूलशिरसं वेच्छन् गोमान् स्थूलशिराः । अभ्वादेरिति किम् ? पिण्डग्रः ॥ **कुश-स्तुनस्तृच् पुंसि** ॥ ९१ ॥ कुशो यस्तुन् तस्य शेषे घुटि परे तृच् स्यात् पुंसि । क्रोष्टा, क्रोष्टारौ । पुंसीति किम् ? कृशक्रोष्टूनि वनानि ॥ **टादौ स्वरे वा** ॥ ९२ ॥ टादौ स्वरादौ परे कुशस्तुनस्तृज्वा स्यात् पुंसि । क्रोष्ट्रा, क्रोष्टुना, क्रोष्ट्रोः, क्रोष्ट्वोः ॥ **स्त्रियाम्** ॥ ९३ ॥ कुशः परस्य तुनः स्त्रीवृत्तेस्तृच् स्यात्, निर्निमित्त एव ।

वाच्यम् । ' अनिनस्मन् ग्रहणानी 'ति न्यायज्ञापनार्थत्वात् । कुशः पञ्चमी, तुनः षष्ठी, तृच् पुंसि ॥ शेषे घुटीत्यनुवर्तते । क्रोशतीति क्रोष्टा ' कृमिकम्यमी 'ति तुन्, अनेन प्रत्ययस्येति समग्रस्य तृनः तृच् । गुणः, ' यजसृजे 'ति शस्य षः, ' तवर्गस्ये 'ति क्रोष्ट् ' सेर्डा, ' कृशाः क्रोष्टारो येषु तानि कुशक्रोष्टूनि । अत्र क्रोष्टोः क्रोष्ट् पुंसीत्यकृत्वा तुनस्तृजादेशविधानम् ' तृस्वस्रोरि 'ति सूत्रेण ऋत आराऽऽदेशार्थम् । टा आदिर्यस्य स टादिस्तस्मिन्, स्वरे, वा ॥ पूर्वसूत्रं सकलमनुवर्तते । क्रोष्टु टा अनेन वा तृच् ' इवर्णादेरि 'ति रत्वम्, क्रोष्ट्रा, पक्षे ' टः पुंसि ने 'ति क्रोष्टुना । क्रोष्टूनामित्यत्र तु नित्यत्वात् ' ह्रस्वापश्चे 'ति पूर्वं नामादेशे, ततः स्वराभावान्न तृच् ॥ स्त्रियाम्, कृशस्तुनस्तृजित्यनुवर्तते । कुशतुनस्तृच् पुंसि स्त्रियां चेत्येकं सूत्रमकृत्वा पृथक्करणात् घुटीति न सम्बध्यते । अत्र प्रागेव तृजादेशे ऋदन्तत्वात् ङीः क्रोष्ट्री । पञ्चभिः क्रोष्ट्रीभिः क्रीताः पञ्चक्रोष्टारः 'मूल्यैः क्रीते' इकण्, 'अनाम्न्यद्विप्लुप्' इकण् लोपः । ' ङ्यादेर्गौणस्य ' ति ङीनिवृत्तिः । अत्र निर्निमित्तत्वादादेशस्य

क्रोष्टी, क्रोष्ट्र्यौ, क्रोष्ट्रीभ्याम् । पञ्चक्रोष्टृभी रथैः ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधान-
स्वोपज्ञशब्दानुशासनलघुवृत्तौ प्रथमाध्यायस्य
चतुर्थः पादः समाप्तः । १ । ४ ॥

ङीनिवृत्तावपि तृजादेशो न निवर्त्तते ॥

इति प्रथमाध्यायस्य चतुर्थपादः ।

॥ अथ द्वितीयाध्याये प्रथमः पादः ॥

त्रिचतुरस्तिसृचतसृ स्यादौ ॥ १ ॥ स्त्रियामिति वर्त्तते । स्यादौ परे स्त्रीवृत्त्योस्त्रिचतुरोर्यथासङ्ख्यं तिसृ चतसृ इत्येतौ स्याताम् । तिस्रः, चतस्रः । तिसृषु, चतसृषु । प्रियतिसा, प्रियचतसा ना । प्रियतिसृ कुलम्, प्रियत्रि कुलम् । स्यादाविति किम् ? प्रियत्रिकः, प्रियचतुष्कः ॥ **ऋतो रः स्वरेऽनि** ॥ २ ॥ तिसृचतसृस्थ-

---

त्रयश्च चत्वारश्च त्रिचतुर् तस्य, तिसा च चतसा च तिसृचतसृ, सिरादिर्यस्य तस्मिन् ॥ तिस्रः चतस्र इत्यादौ जसि त्रिचतुरोः ' अनेकवर्णः सर्वस्ये 'ति **परिभाषया** तिसृचतस्रादेशौ, ततो ' अर्ङौ चे 'त्यरप्राप्तौ, ' ऋतो रः स्वरेऽनी' ति रः । शसि तु ' शसोऽता सश्चे 'ति दीर्घे प्राप्ते ' ऋतो र 'इति रः । प्रियास्तिस्रश्चतस्रो वा यस्य पुरुषस्य कुलस्य वा पुंसि ' लुबन्तरङ्गेभ्य ' इति न्यायेन पूर्वविभक्तिलोपे ततः समासाद्या विभक्तिरत्तस्यां परतः ' निर्दिश्यमानस्यादेशा भवन्ती'ति न्यायेन तिस्रादेशः, पूर्वस्य 'परतः स्त्री पुंवदि'ति **पुंवद्भावः**, जहत्स्वार्थवृत्तिपक्षे भूतपूर्वगत्या त्रिशब्दस्य स्त्रियां वृत्तिर्विज्ञेया । **अन्तरङ्गपरिभाषयाऽन्तरङ्गे** कचि कर्तव्ये विभक्तिनिमित्तकत्वेन बहिरङ्गत्वात् तिसृचतस्रादेशस्यासिद्धत्वान्न समासान्तः कच्, **सेर्डा**, **क्लीबे** ' नामिनो लुग्वे 'ति सेर्लुकि तस्य च **स्थानिवद्भावात्** तिस्रादेशः, पक्षे ' अनत ' इत्यनेन लुपि स्थानिवद्भावाभावान्न तिस्रादेशः । प्रियास्तिस्रश्चतस्रो वा यस्यासौ प्रियत्रिकः प्रियचतुष्कः, ' शेषाद्वे 'ति कच्, तेन व्यवहितत्वान्न आदेशः ॥ ऋतः षष्ठी, रः प्रथमा, स्वरे, न न् अन् तस्मिन् ॥ तिसृचतसृपदं सम्बध्यते । ऋत

स्य ऋतः स्वरादौ स्यादौ परे रः स्यात् । अनि, नविषयादन्यत्र । तिस्रः, चतस्रः, प्रियतिस्रौ, प्रियचतस्रौ । स्वर इति किम् ? तिसृभिः, चतसृभिः । अनीति किम् ? तिसृणाम्, चतसृणाम् ॥ **जरायाः जरस्वा** ॥ ३ ॥ स्वरादौ स्यादौ परे जरायाः जरस्वा स्यात् । जरसौ, जरसः । जरे, जराः । अतिजरसौ, अतिजरौ । अतिजरसम्, अतिजरं कुलम् ॥ **अपोऽद्भे** ॥ ४ ॥ भादौ स्यादौ परे अपोऽत् स्यात् । अद्भिः,

---

इत्यनुवृत्तितिसृचतसृशब्दयोः षष्ठ्यन्तत्वलाभार्थम् । **अनीति** नकारः प्रत्ययरूप आगमरूपो वा ग्राह्यः । **तिसृणां चतसृणामित्यादौ** आमि परे परत्वात्तिसृचतस्रादेशे सति नामादेशः, ' दीर्घो नामी 'त्यत्र तिसृचतसृवर्जनान्न दीर्घः, अनीत्यकृतेऽत्रापि ऋतो ररुः स्यात् । एतावन्मात्रार्थत्वेऽनामीत्येवासन्दिग्धार्थमुच्येत, तथाऽनुक्त्वा साधारणशब्देन नकारविषयवर्जनं कृतं तेन नागमस्यापि वर्जनं वेदितव्यम्, न च स्वरादौ स्यादौ परे 'आदेशादागमो बलवानि'ति **न्यायेन** पूर्वं नागमे कृते नागमव्यवधानेन तिस्राद्यादेशस्यैवाभावान्नागमे परे तिस्रादे ऋकारस्य रत्वमेव न प्राप्नोतीति वाच्यम्, अनयैव नकारविषयवर्जनोक्त्या 'आगमात्सर्वादेशो बलवानि'ति न्यायस्य ज्ञापनात् । तेन च प्रियतिसृणः कुलादित्यादौ प्रथमं तिस्रादेशे ततो नागमे रत्वा भावायानीत्युक्तम् ॥ **जरायाः** षष्ठी, **जरस्**, वा ॥ स्यादौ, स्वरे, इत्यनुवर्तते । ' अनेकवर्णः सर्वस्य ' सोऽपि निर्दिश्यमानस्यैव, तेनातिजरसावित्यादौ जराशब्दस्यैव जरस् । यद्यप्यत्र जराशब्दो नास्ति तथाप्येकदेशविकृतस्यानन्यत्वाज्जरशब्दस्य जरसादेशः । नपुंसके स्यमोरमकृते जरसादेशस्तेनातिजरसं अतिजरम् । स्वसम्बन्धिन्यन्यसम्बन्धिनि च स्यादावयमादेश इति सूचनाय समस्तव्यस्तोदाहरणानि । **अपः** षष्ठी, अद् प्रथमा, भे सप्तमी ॥ स्यादाविति वर्तते । शोभना आपो ययोस्ताभ्यामिति विग्रहे ' पूजास्वतेः प्राक्टात् ' इति

स्वद्भ्याम् । भ इति किम् ? अप्सु ॥ **आ रायो व्यञ्जने** ॥ ५ ॥ व्यञ्जनादौ स्यादौ परे रैशब्दस्य आः स्यात् । राः, रासु, अतिराभ्यां कुलाभ्याम् । व्यञ्जन इति किम् ? रायः ॥ **युष्मदस्मदोः** ॥ ६ ॥ व्यञ्जनादौ स्यादौ परे युष्मदस्मदोराः स्यात् । त्वां माम्, अतित्वां अतिमाम्, युष्मासु अस्मासु ॥ **टाङ्योसि यः** ॥ ७ ॥ टाङ्योस्सु परेषु युष्मदस्मदोर्यः स्यात् । त्वया मया, अतियुवया

समासान्तप्रतिषेधे भ्यामि तत्सम्बन्धिविज्ञानाभावेन चानेन सूत्रेण निर्दिश्यमानस्याप एवादादेशः ॥ आः प्रथमा, रायः षष्ठी, व्यञ्जने ॥ स्यादाविति वर्तते, एवमग्रिमसूत्रेष्वपि । 'षष्ठ्याऽन्त्यस्य' अतिराभ्यामित्यादा ' वेकदेशविकृतस्यानन्यत्वा ' दतिरीति प्रकृतावपि रैशब्दसद्भावेन 'षष्ठ्यान्त्यस्ये'ति परिभाषया इकारस्याऽऽकारः । स्भीत्येव सिद्धे व्यञ्जनग्रहणमुत्तरार्थम् । आमि तु अतिरीणाम्, रायमतिक्रान्तानि यानि तेषामिति विग्रहः, 'ह्रीबे' इति ह्रस्वः, ततो नाम्, सन्निपातपरिभाषया च नात्रास्य सूत्रस्य प्रवृत्तिः । तत्परिभाषाया अनित्यत्वाच्च ' दीर्घो नामी ' ति दीर्घः, न्यायानां स्थविरयष्टिन्यायेन प्रवृत्तेः । उत्तरार्थव्यञ्जनग्रहणस्यात्रैव कृतत्वात् अतिराणामिति केषाञ्चिदिष्टं रूपं स्वमतेऽपि सम्मतत्वख्यापनायेहार्थमपि, अत्र पक्षे सन्निपातपरिभाषाया अनित्यत्वाश्रयेणाऽऽकारो विधेयः । युष्मच्च अस्मच्च युष्मदस्मदौ तयोः । आः, व्यञ्जने, इति सम्बध्येते । युष्मद् अम्, ' अमो म ' इत्यमो मकृते, ' त्वमौ प्रत्ययोत्तरपदे ' इति मन्तभागस्य त्वाऽऽदेशे त्व अद् म् इति जाते, 'लुगस्ये'त्यकारलोपेऽनेन सूत्रेण दकारस्याऽऽत्वे दीर्घे च त्वाम्, एवं मामित्याद्यपि । नामाधिकारात्तदन्तप्रतिपत्तौ त्वामतिक्रान्तोऽतित्वम्, तम् ॥ टा च ङि च ओसौ च तस्मिन् यः प्रथमा ॥ युष्मदस्मदोरित्यनुवर्तते । त्वद् टा, इति जातेऽनेन दस्य यकारः । त्वामतिक्रान्तेनेति विग्रहेऽप्यतित्वया ।

अत्यावया, त्वयि मयि, युवयोः आवयोः। टाङ्योसीति किम्? त्वत् मत्॥ **शेषे लुक्॥८॥** यस्मिन्नायौ कृतौ ततोऽन्यः शेषः, तस्मिन् स्यादौ परे युष्मदस्मदोर्लुक् स्यात्। युष्मभ्यम्, अस्मभ्यम्; अतित्वत् अतिमत्। शेष इति किम्? त्वयि, मयि॥ **मोर्वा॥९॥** शेषे स्यादौ परे युष्मदस्मदोर्मोर्लुग्वा स्यात्। युवां युष्मान्वा, आवां अस्मान्वाऽऽचक्षाणेभ्यो णिचि क्विपि च लुकि च, युष्मभ्यम्, युषभ्यम्। अस्मभ्यम्, असभ्यम्॥ **मन्तस्य युवावौ द्वयोः॥१०॥** द्वयर्थवृत्त्योर्युष्मदस्मदोर्मान्तावयवस्य स्यादौ परे यथासङ्ख्यं

युवामतिक्रान्तेनेति विग्रहे तु युष्मदस्मदोः द्वयर्थवृत्तित्वात् युवादेशेन अतियुवयेति भवति युष्मानतिक्रान्तेनेति विग्रहे चातियुष्मया॥ शेषे, लुक्॥ युष्मस्मदोरिति वर्तते। आत्वयत्वविधाननिमित्तभिन्नस्यादिप्रत्ययः शेषः। 'षष्ठ्यान्त्यस्ये' ति न्यायाद्दकारस्यैव लुक्। त्वामतिक्रान्तादिति विग्रहे अतित्वत्। त्वयि मयीत्यादौ ङेः 'टाङ्योसी'ति यत्वे निमित्तत्वान्न शेषत्वम्। अत्र शेषग्रहणाभावे टाङ्योसीत्यधिकार आगच्छेत्। **मोरिति** षष्ठीद्विवचनम्, वा॥ मोरनुवृत्तयुष्मदस्मदोर्विशेषणत्वेन तदन्तविधिः। शेषे, लुगित्यप्यनुवर्तते। युवां युष्मान्वा आचष्टे युष्मयति, आवामस्मान् वाऽऽचष्टे अस्मयति, ततः क्विपि तल्लुकि च युष्म् अस्म् इति युष्मदस्मदोर्मान्तत्वम्, अनयोः सिजस्ङेङस्सु प्रत्ययेषु परत्वात्त्वमहमादय एवाऽऽदेशाः स्युः। अमौभ्यामसुपरत्वात् त्वमाद्यादेशे पश्चादात्वम्। टाङ्योसि 'परान्नित्यमिति' न्यायेन नित्यत्वात्त्वमादिकार्येभ्यः प्रथममेव पूर्वेण मकारस्य यत्वे युष्या अस्या। भ्यसोऽभ्यमादेशेऽनेन सूत्रेण युष्म् अस्म् शब्दयोर्मकारस्य वा लुकि युष्मभ्यम् युषभ्यम्, अस्मभ्यम् असभ्यम्॥ **म् अन्ते** यस्य स मन्तस्तस्य, **युवश्च आवश्च युवावौ, द्वयोः॥** युष्मदस्मदोरित्यनुवर्तते, एवमग्रेऽपि

युव आव, इत्येतौ स्याताम्। युवाम्, आवाम्। अतियुवाम्, अत्यावाम्। अतियुवासु, अत्यावासु। मन्तस्येति किम्? युवयोः। आवयोरित्यत्र दस्य यत्वं यथा स्यात्। स्यादावित्येव? युवयोः पुत्रो युष्मत्पुत्रः आवयोः पुत्रोऽस्मत्पुत्रः॥ **त्वमौ प्रत्ययोत्तरपदे चैकस्मिन्॥११॥** स्यादौ प्रत्ययोत्तरपदयोश्च परयोरेकार्थवृत्त्योर्युष्मदस्मदोर्मन्तावयवस्य यथासङ्ख्यं त्व म इत्येतौ स्याताम्। त्वाम्, माम्। अतित्वाम्, अतिमाम्। अतित्वासु, अतिमासु। त्वदीयः, मदीयः। त्वत्पुत्रः मत्पुत्रः। प्रत्ययोत्तरपदे

द्वयोरिति युष्मदस्मदोर्विशेषणम्। युष्मद् अस्मद् औ, इति स्थितेऽनेन सूत्रेण मपर्यन्तस्य युष्म् अस्म् इति विभागस्य युव आव आदेशे कृते 'लुगस्ये'त्यकारलोपे, 'अमौ मः' इति सूत्रेण औ विभक्तेर्मादेशे 'युष्मदस्मदो'रित्यनेनाऽऽत्वे दीर्घे च युवाम् आवाम्। युवामतिक्रान्तौ अतियुवाम्, युवामतिक्रान्तासु अतियुवासु। मन्तग्रहणाभावे युष्मदस्मदोरोसि सर्वस्य युवावादेशे 'टाङयोसि य' इत्यकारस्य यकारे युव्योः आव्योरित्यनिष्टं रूपं स्यात्तन्मा भूदिति मन्तस्येत्युक्तम्। तथा च मपर्यन्तस्य युवावाऽऽदेशौ 'लुगस्ये' त्यलुकि दकारस्य यत्वे युवयोः आवयोरिति॥ त्वश्च मश्च त्वमौ, उत्तरश्च तत् पदं चोत्तरपदम्, प्रत्ययश्चोत्तरपदं च तस्मिन्, च, एकस्मिन्॥ मन्तस्येत्यनुवर्तते। चशब्देन स्यादेः समुच्चयः। तथा च स्यादौ प्रत्यये उत्तरपदे च परत एतावादेशौ स्तः। यद्यपि स्यादिरपि प्रत्यय एव, तथाप्युत्तरार्थमनुवर्तमानः स्यादिरत्रापि सम्बध्यते। स्यादेरुदाहरणं त्वाम् मामित्यादि, त्वदीयः मदीय इति तु प्रत्ययस्य, त्वत्पुत्रो मत्पुत्र इत्युत्तरपदस्य। ननु त्वदीयः मत्पुत्रः इत्यादौ युष्मद् अस् ईयस्, अस्मद् अस् पुत्र स् इति स्थिते इदानीमेव स्यादौ परेऽनेन सूत्रेण त्वमादेशे सिद्धे प्रत्ययोत्तरपदग्रहणं व्यर्थम्, न च परत्वा 'दैकाध्ये' इति स्यादेर्लुपि 'प्रत्ययलोपेऽपि प्रत्ययलक्षणं कार्यं

चेति किम् ? अधियुष्मद्, अध्यस्मद् । एकस्मिन्निति किम् ? युष्माकम्, अस्माकम् ॥ **त्वमहं सिना प्राक्चाकः** ॥ १२ ॥ सिना सह युष्मदस्मदोर्यथासङ्ख्यं त्वमहमौ स्याताम्, तौ चाक्प्रसङ्गेऽकः प्रागेव । त्वम्, अहम् । अतित्वम्, अत्यहम् । प्राक्चाक इति किम्? त्वकम्, अहकम् ॥ **यूयंवयं जसा** ॥ १३ ॥ जसा सह युष्मदस्मदोर्यथासङ्ख्यं यूयंवयमौ स्याताम् । यूयम्, वयम् । प्रिययूयम्,

---

विज्ञायते' इति न्यायस्य 'लुप्यें' इय्वृल्लेनत् इति प्रतिषेधात् स्यादेरभाव इति वाच्यम् । प्रकृतिप्रत्ययाद्यपेक्षत्वेन ' ऐकार्थ्य 'इति लुपो बहिरङ्गत्वेन विभक्तिमात्रापेक्षत्वमादेशयोरेव प्रवृत्तेरिति चेन्न, इदमेव हि प्रत्ययोत्तरपदग्रहणं 'लुबन्तरङ्गेभ्योऽपि बलवती'ति न्यायं ज्ञापयति । त्वयीति अधियुष्मदित्यव्ययीभावे विभक्तेर्लुपि न त्वमा देवा, प्रत्ययोत्तरपदत्वाभावात् । त्वं चाहं च त्वमहम्, सिना तृतीया, प्राक्, च, अकः पञ्चमी ॥ त्वां युवां युष्मान्वा, मां आवां अस्मान् वाऽतिक्रान्तोऽतित्वमत्यहम् । कुत्सितोऽल्पोऽज्ञातो वा त्वमहं त्वकमहकम् । ' त्यादिसर्वादेः स्वरेष्वन्त्यात् पूर्वोऽणि ' त्यनेन सकारादिस्यादिपरत्वादन्त्यस्वरात्पूर्वे अकि कृते युष्मकद् सि, अस्मकद् सीति स्थिते प्राक्चाक इत्यनुक्तौ ' तन्मध्यपतितस्तद्ग्रहणेन गृह्यत ' इति न्यायेनाक्सहितस्यैव त्वमहमादेशे त्वकमहकमित्यक्श्रवणं न स्यादतः प्राक्चाकं इत्युक्तम्, तथा च पूर्वं त्वमहमादेशे सति पश्चादकि त्वकमहकमिति रूपं सिद्ध्यति । प्राक्चाक इत्यनेन च ' तन्मध्यपतित ' इति न्यायो ज्ञाप्यते । एतन्न्यायेनाक्सहितस्याऽऽदेशः स्यादिति शङ्कया ह्यक्श्रवणार्थं प्राक्चाक इति प्रोक्तम् । तथा त्वमहमित्यत्र प्रकृतिमात्राऽऽदेशत्वेनान्तरङ्गत्वा ' त्वमौप्रत्ययोत्तरपद ' इति प्रथमं त्वमादेशे कृते सूत्रमिदं प्रवृत्त्यवकाशाभावाद्व्यर्थं सत् ज्ञापयति बहिरङ्गमपि 'अन्तरङ्गाच्चानवकाशं बलवदि'ति न्यायम् ॥ यूयं च वयं च यूयंवयम्, जसा

प्रियवयम् । प्राक्चाक इत्येव ? यूयकम्, वयकम् ॥ **तुभ्यंमह्यं ङया ॥ १४ ॥** ङया सह युष्मदस्मदोर्यथासङ्ख्यं तुभ्यंमह्यमौ स्याताम् । तुभ्यम्, मह्यम् । प्रियतुभ्यम्, प्रियमह्यम् । प्राक्चाक इत्येव ? तुभ्यकम्, मह्यकम् ॥ **तवमम ङसा ॥ १५ ॥** ङसा सह युष्मदस्मदोर्यथासङ्ख्यं तवममौ स्याताम् । तव, मम । प्रियतव, प्रियमम । प्राक्चाक इत्येव ? तवक, ममक ॥ **अमौ मः ॥ १६ ॥** युष्मदस्मद्भ्यां परयोरम् औ इत्येतयोर्मे इति स्यात् । त्वाम्, माम् । अतित्वाम्, अतिमाम् । युवाम्, आवाम् । अतियुवाम्, अत्यावाम् ॥ **शसो नः ॥ १७ ॥** युष्मदस्मद्भ्यां परस्य शसो न इति स्यात् ।

तृतीया ॥ प्राक्चाकः इति वर्तते । प्रियस्त्वम्, प्रियौ युवाम्, प्रिया यूयं वा येषान्ते प्रिययूयम् ॥ एकत्वद्वित्वयोः युष्मदस्मदोर्वर्तमानत्वात् 'त्वमौ प्रत्ययोत्तरपदे चे'ति 'मन्तस्य युवावावि'ति च त्वमाद्यादेशानन्यत्र सावकाशान् बाधित्वा यूयं वयमित्यत्र सावकाशौ यूयंवयमादेशौ परत्वादुभयप्राप्तौ सत्यामपि भवतः ॥ **तुभ्यं च** मह्यं च तुभ्यंमह्यम्, ङया तृतीया ॥ प्राक्चाक इति वर्तते । प्रियस्त्वम्, प्रियौ युवाम्, प्रियाः यूयम्, यस्य सः प्रियत्वम्, तस्मै प्रियतुभ्यम् । एवं प्रियमह्यम् ॥ **तव च मम च** तवमम, ङसा तृतीया ॥ प्राक्चाक इति सम्बध्यते । त्वां युवां युष्मान्वाऽतिक्रान्तोऽसौ तस्य ॥ **औश्च** औश्च आवौ, 'स्यादावसङ्ख्येय' इत्येकशेषः, अम् च आवौ च अमौ तस्य, लुप्तषष्ठ्येकवचनान्तं पदम्, मः प्रथमा ॥ विभक्तिविपरिणामेन युष्मदस्मदोः सम्बन्धः, एवमग्रेऽपि । म इत्यत्राकार उच्चारणार्थः । नन्वत्र सूत्रेऽम्ग्रहणं किमर्थम्, युष्मद्-अम् इति स्थिते त्वादेशे, 'शेषे लुगि'ति दलुकि, 'समानादमोऽत' इत्यमोऽस्य लुकि 'युष्मदस्मदो' रित्यात्वे च त्वामिति सिद्धेः, मैवम्, अकारलुगो युष्मदस्मदोरित्यात्वापेक्षया बहिरङ्गत्वेनासिद्धत्वात् ॥ शसः षष्ठी, नः प्रथमा ॥ नकारेऽकार उच्चार-

युष्मान्, अस्मान्। प्रियत्वान्, प्रियमान् ॥ **अभ्यं भ्यसः** ॥ १८ ॥ युष्मदस्मद्भ्यां परस्य चतुर्थीभ्यसोऽभ्यं स्यात्। युष्मभ्यम्, अस्मभ्यम्। अतियुवभ्यम्, अत्यावभ्यम् ॥ **ङसेश्चाद्** ॥ १९ ॥ युष्मदस्मद्भ्यां परस्य ङसेः पञ्चमीभ्यसश्च अदिति स्यात्। त्वद्, मद्। अतियुवद्, अत्यावद्। युष्मद्, अस्मद्। अतित्वद्, अतिमद् ॥ **आम आकम्** ॥ २० ॥ युष्मदस्मद्भ्यां परस्य आम आकं स्यात्।

णार्थः। युष्मद्–शसित्यत्र शेषे लुगित्यपेक्षया नित्यत्वादनेन सूत्रेण 'प्रत्ययस्ये'ति परिभाषया सकलस्य शसो नादेशे, 'युष्मदस्मदो'रित्यात्वे दीर्घे युष्मानिति भवति। ननु तथापि युष्मद्शसित्यत्र 'शेषे लुगि'त्यन्त्यलुकि 'शसोऽतासश्चे'ति युष्मानिति रूपं भवत्यतः किमर्थमिदं सूत्रमिति चेन्न, युष्मदस्मदोरलिङ्गत्वेन पुंस्त्वाभावतो नकारासम्भवात् ॥ **अभ्यम्, भ्यसः षष्ठी** ॥ प्रथमोपस्थितत्वादग्रिमसूत्रे पञ्चमीभ्यसः कार्यान्तरविधानाच्चाऽत्र चतुर्थीभ्यस एव ग्रहणम्। अभ्यमित्यत्राकारो व्यञ्जनादित्वव्यावर्त्तनार्थः। युवां युष्मान्वाऽऽचक्षाणेभ्य इति विग्रहे णिचि क्विपि निष्पन्नयुष्मशब्दात् चतुर्थीबहुवचने युषभ्यं युष्मभ्यमिति रूपसिद्धेस्तत्राऽकारस्य श्रूयमाणत्वान्नाकारस्य 'अप्रयोगीदि'ति निवृत्तिः। युवामावाम् वाऽतिक्रान्तेभ्य इत्यतियुवभ्यम्, अत्यावभ्यम् ॥ **ङसेः षष्ठी, च, अद्** ॥ चकारेण भ्यसोऽनुकर्षः, स च ङसिसाहचर्यात् पञ्चमीविभक्तिः ग्राह्यः। अत्रापि अदित्यत्राऽकारः आत्वबाधनार्थः, युष्मद् युषद् इत्यादौ श्रूयमाणत्वाच्च 'अप्रयोगीदि'ति नाऽकारनिवृत्तिः। **आमः षष्ठी, आकम् प्रथमा** ॥ अत्राप्याकारः युष्माकं युषाकं, अस्माकं असाकं, इत्यादौ श्रूयमाणार्थः, अन्यथा कंमात्रविधानेनापि आत्वेन युष्माकमित्यादिरूपसिद्धेराकमिति विधानं व्यर्थं स्यात् ॥ **पदात्**, युज्यते इति युग्, विभज्यते प्रकटीक्रियतेऽर्थोऽनेनेति विभक्तिः, युग् चासौ

युष्माकम्, अस्माकम्; अतियुवाकम्, अत्यावाकम् । युष्मानस्मान्वाऽऽचक्षाणानां युष्माकम्, अस्माकम् ॥ **पदाद्युग्विभक्त्यैकवाक्ये वस्नसौ बहुत्वे** ॥ २१ ॥ बहुत्वविषयया समविभक्त्या सह पदात्परयोर्युष्मदस्मदोर्यथासङ्ख्यं वस्नसौ वा स्याताम्, तच्चेत्पदं युष्मदस्मदी चैकस्मिन् वाक्ये स्तः । अन्वादेशे नित्यं विधानादिह विकल्पः । एवमुत्तरसूत्रत्रयेऽपि । धर्म्मो वो रक्षतु, धर्मो नो रक्षतु, धर्म्मो युष्मान् रक्षतु, धर्म्मोऽस्मान् रक्षतु । एवं चतुर्थीषष्ठीभ्यामपि । पदादिति किम् ? युष्मान् पातु । युग्विभक्त्येति किम् ? तीर्थे यूयं यात । एकवाक्य इति किम् ? अतियुष्मान् पश्य ! ओदनं पचत ! युष्माकं भविष्यति ॥ **द्वित्वे वाम्नौ** ॥ २२ ॥ पदात्परयोर्युष्मदस्मदोर्द्वित्वविषयया युग्विभक्त्या सह यथासङ्ख्यं वाम् नौ इत्येतौ वा स्याताम्,

---

विभक्तिश्च तया, एकं च तद्वाकयं तस्मिन्, वस्च नस्च, बहुत्वे । युष्मदस्मदोरित्यनुवर्तते । बहुत्व इति विषयसप्तमी युग्विभक्तयेत्यस्य विशेषणम् । युग्विभक्तिरविषमविभक्तिर्द्वितीयाचतुर्थीषष्ठीरूपा । निमित्तकार्यिणोरेकवाक्यघटकत्वमाविष्करोति तच्चेत्पदमिति । अव्ययकारकविशेषणविशिष्टमाख्यातमत्रैकवाक्यं ग्राह्यम् । नित्यमन्वादेश इति सूत्रेणाग्रे वस्नसादीनां नित्यत्वविधानादत्र वसादयो विकल्पेन बोध्या इत्येतमर्थं सूचयति—अन्वादेश इति । धर्मो वो रक्षतु, अत्र द्वितीयाविभक्तिसहितस्य युष्मदो वसादेशः समविभक्त्या सहेत्युक्तत्वात्, एवमग्रेऽपि । वाक्यग्रहणादेकपदेऽतियुष्मान्पश्येत्यादौ न वसादेशः, वाक्यस्यैकत्वेन विशेषणाच्च ओदनं पचत, युष्माकं भविष्यतीत्यादौ वसादेशव्यावृत्तिः, तिबन्तद्वययोगेनैकवाक्यत्वविरहात्, एतदेवाहैकवाक्य इति किमिति ॥ द्वयोर्भावो द्वित्वं तस्मिन् विषयसप्तमी, द्वयोरिति विभक्तिविशेषणं योग्यत्वादत एव द्वित्वविषयया युग्विभक्त्येत्युक्तम् । वाम् च नौ च वाम्नौ ॥ पदाद्युग्विभक्त्यैकवाक्य इत्यनुवर्तते ॥ ङे च

एकवाक्ये । धर्म्मो वां पातु, धर्म्मो युवां पातु; धर्म्मो नौ पातु, धर्म्म आवां पातु, एवं चतुर्थीषष्ठीभ्यामपि ॥ **ङेङसा तेमे** ॥२३॥ ङेङस्भ्यां सह पदात्परयोर्युष्मदस्मदोर्यथासङ्ख्यं ते मे इत्येतौ वा स्याताम्, एकवाक्ये । धर्मस्ते दीयते, धर्म्मस्तुभ्यं दीयते; धर्म्मो मे दीयते, धर्म्मो मह्यं दीयते; धर्म्मस्ते स्वम्, धर्म्मस्तव स्वम्; धर्म्मो मे स्वम्, धर्म्मो मम स्वम् ॥ **अमा त्वामा** ॥२४॥ अमा सह पदात्परयोर्युष्मदस्मदोर्यथासङ्ख्यं त्वामा इत्येतौ वा स्याताम्, एकवाक्ये । धर्म्मस्त्वा पातु, धर्म्मस्त्वां पातु; धर्म्मो मा पातु, धर्म्मो मां पातु ॥ **असदिवामन्त्र्यं पूर्वम्** ॥२५॥ आमन्त्र्यार्थं पदं युष्मदस्मद्भ्यां पूर्वमसदिव स्यात् । जना ! युष्मान् पातु धर्म्मः, साधू ! युवां पातु धर्म्मः, साधो ! त्वां पातु तपः । पूर्वमिति किम् ? मयैतत्सर्व्वमाख्यातं युष्माकं मुनिपुङ्गवाः ! ॥

ङस् च, ते च मे च तेमे लुप्तद्विवचनान्तं पदम्। पदादेकवाक्य इत्यनुवर्तते । एवमग्रिमसूत्रेऽपि । ङेङसेत्येकवचनं स्थानिभ्यामादेशाभ्याञ्च यथासङ्ख्यनिवृत्त्यर्थम् ॥ **अमा** तृतीया, त्वा च मा च त्वामा ॥ अम् पदेन द्वितीयैकवचनस्याम एव ग्रहणम्, न तु 'अतः स्यमोऽम्' इति विहितस्याव्ययीभावसम्बन्धिनो वा । युष्मदस्मद्भ्यां द्वितीयैकवचनभिन्नस्यासम्भवात्। **न सत्** असत्, इव, आमन्त्र्यते यत्तदामन्त्र्यम्, पूर्वम् ॥ आमन्त्र्ये पुरुषाद्यर्थं कार्यासम्भवात्तद्वाचकं पदमत्रामन्त्र्यपदेन विवक्षितमत एवाऽऽमन्त्र्यार्थं पदमित्युक्तम् । **जना ! युष्मान्पातु धर्मः**, अत्र युष्मानिति पदात्परत्वेऽपि युग्विभक्तिमत्त्वेऽपि बहुत्वविषयकत्वेऽप्यनेन सूत्रेण जना इत्यामन्त्र्यपदस्याविद्यमानत्वारोपात्पदात्परत्वासम्भवेन न वसादेशः । एवमग्रेऽपि । **मयैतत्सर्वमाख्यातं युष्माकं मुनिपुङ्गवाः !** । अत्र मुनिपुङ्गवा इत्यामन्त्र्यार्थं पदम्, सूत्रे पूर्वमित्यस्यानुपादाने परपदस्यासद्भावः प्रसज्यते, तथा च मुनिपुङ्गवा इत्यस्यासद्भावेन युष्माकं मुनिपुङ्गवा इति नियताक्षरपि-

जस्विशेष्यं वाऽऽमन्त्र्ये ॥ २६ ॥ युष्मदस्मद्भ्यां पूर्वं जसन्तमामन्त्र्यार्थं विशेष्यवाच्यामन्त्र्ये पदेऽर्थात्तद्विशेषणे परेऽसदिव वा स्यात् । जिनाः ! शरण्या युष्मान् शरणं प्रपद्ये, जिनाः ! शरण्या ! वः शरणं प्रपद्ये । जिनाः शरण्या अस्मान् रक्षत, जिनाः ! शरण्या ! नो रक्षत । जसिति किम् ? साधो ! सुविहित ! वोऽथो शरणं प्रपद्ये, साधो ! सुविहित ! नोऽथो रक्ष । विशेष्यमिति किम् ? शरण्याः साधवो युष्मान् ! शरणं प्रपद्ये । आमन्त्र्य इति किम् ? आचार्या युष्मान् शरण्याः शरणं प्रपद्ये । अर्थात्तद्विशेषणभूत इति किम् ? आचार्या उपाध्याया युष्मान्

ण्डलक्षणपादत्वस्य व्याघातात् 'पादाद्यो' रितिसूत्रेण वस्नसादिप्रतिषेधस्याप्रवृत्तिप्रसक्त्या ' पदाद्युग्विभक्त्ये 'ति सूत्रेणात्र वसादेशः प्रसज्येताऽतः पूर्वमित्युक्तम् । असदिवेतीवशब्दोपादानं यस्याऽसद्भाव उक्तो न तस्य प्रयोगनिवृत्तिस्तेन विवक्षिता, अपितु तन्निमित्तककार्यप्रतिषेध एवेष्ट इति सूचयितुम्, न च लोपपदमनुक्त्वाऽसदितिगुरूच्चारणादेवातिदेशप्राप्त्या तेन च प्रयोगानिवृत्तेः सिद्धौ व्यर्थमिवग्रहणमिति वाच्यम्, आतिदेशिकेन विरुद्धस्य स्वाश्रयकार्यस्य बाधनार्थत्वादिवशब्दोपादानात्, इवशब्दोपादानसामर्थ्याद्विरुद्धमपि स्वाश्रयं कार्यं एकान्तरतादि न निवर्त्त्यत इति भावः । **जस् च तद् विशेष्यं च, वा, आमन्त्र्ये ॥** पूर्वसूत्रमनुवर्तते । जसः विशेषणत्वात्तदन्तविधिः । **आमन्त्र्ये** इति, विशेषणभूतस्याऽऽमन्त्र्यस्य बोधकम् । **जिनाः शरण्या युष्मान् शरणं प्रपद्ये,** अत्र जिना इति विशेष्यमामन्त्र्यपदम्, तद्विशेषणभूतमामन्त्र्यञ्च शरण्या इति । पूर्वेण नित्यमसद्भावे प्राप्तेऽनेन विकल्प्यते । साधो ! सुविहित ! इति वाक्ये ' असदिवे 'ति द्वयोरसत्त्वे प्राप्ते नान्यदित्यनेन साधो इत्यस्यासत्त्वाभावः, ' नित्यमन्वादेश ' इत्यनेन वस्नसौ । ' शरण्याः साधव 'इत्यत्र द्वयोरप्यामन्त्रययो ' रसदिवे 'त्यसद्भावः ॥

शरणं प्रपद्ये ॥ **नान्यत् ॥ २७ ॥ युष्मदस्मद्भ्यां पूर्वं** जसन्तादन्यदामन्त्र्यं विशेष्यमामन्त्र्ये तद्विशेषणे परेऽसदिव न स्यात् । साधो सुविहित ! त्वां शरणं प्रपद्ये । साधो सुविहित ! मा रक्ष ॥ **पादाद्योः ॥ २८ ॥** नियतपरिमाणमात्राक्षरपिण्डः पादः । पदात्परयोः पादस्यादिस्थयोर्युष्मदस्मदोर्वस्नसादिर्न स्यात् । " वीरो विश्वेश्वरो देवो युष्माकं कुलदेवता । स एव नाथो भगवानस्माकं पापनाशनः " ॥ १ ॥ पादाद्योरिति किम् ? " पान्तु वो देशनाकाले जैनेन्द्रा दशनांशवः । भवकूपपतज्जन्तुजातोद्धरणरज्जवः " ॥ २ ॥ **चाहहवैवयोगे ॥ २९ ॥** एभिर्योगे पदात्परयोर्युष्मदस्मदोर्वस्नसादिर्न स्यात् । ज्ञानं युष्मांश्च रक्षतु । एवं अह ह वा एवैरप्युदाहार्यम् । योग इति किम् ? ज्ञानञ्च शीलञ्च ते स्वम् ॥ **दृश्यर्थैश्चिन्तायाम् ॥ ३० ॥** दृशिना समानार्थैश्चिन्तार्थैर्धातुभिर्योगे युष्मदस्मदोर्वस्नसादिर्न स्यात् । जनो युष्मान् सन्दृश्या-

---

न, अन्यत् ॥ जस्विशेष्यम्, आमन्त्र्येऽसदिव, पूर्वमित्येतेषामनुवृत्तिः । जसन्तविशेष्यादन्यत्वं बोध्यम् ॥ **पादस्यादी पादादी तयोः** ॥ पदादिति, वस्नसादयो निखिला आदेशा नेति च सम्बध्यन्ते । एवमग्रेऽपि । नियतेति, यत्र मात्रा अक्षराणि च **नियत**परिमाणानि भवन्ति तादृशमात्राक्षरपिण्डविशेषः पाद उच्यत इत्यर्थः । पादाद्योरितिद्विवचनं युष्मदस्मदोर्विशेषणाभिप्रायेण । एकवचनान्ततया निर्देशे आमन्त्र्यविशेषणतासंशयप्रसङ्गः ॥ **चश्चाहश्च हश्च वाश्चैवश्च तैर्योगस्तस्मिन्** ॥ **ज्ञानञ्चेति** वाक्ये चेन योगः ज्ञानशीलशब्दयोरेव न युष्मदः, अतोऽत्राऽऽदेशः स्यादेव । चाहहवैरित्येव सिद्धौ योगग्रहणं चादेः साक्षाद्युष्मदस्मद्भ्यां योग एव निषेधप्रतिपत्त्यर्थम्, न तु व्यवधानेन ॥ दृशेरर्थो दर्शनमालोचनं येषाम्, दृशिरर्थो येषामिति वा दृश्यर्थस्तैश्चिन्तायाम् । **जनो वो मन्यत** इति, नाऽयं दृश्यर्थः । दृश्यर्थो हि चाक्षुषं ज्ञानमतोऽत्र न निषेधः ॥ **नित्यम्**, अनु पश्चा-

गतः, जनोऽस्मान् सन्दृश्यागतः। जनो युवां समीक्ष्यागतः, जन आवां समीक्ष्यागतः। जनस्त्वामपेक्षते, जनो मामपेक्षते। सर्वत्र मनसा चिन्तनं दृश्यर्थानामर्थः। दृश्यर्थैरिति किम् ? जनो वो मन्यते। चिन्तायामिति किम् ? जनो वः पश्यति ॥ **नित्यमन्वादेशे** ॥ ३१ ॥ किञ्चिद्धिधातुं कथितस्य पुनरन्यद्धिधातुं कथनमन्वादेशस्तस्मिन् विषये, पदात्परयोर्युष्मदस्मदोर्वस्नसादिर्नित्यं स्यात्। यूयं विनीतास्तद्वो गुरवो मानयन्ति, वयं विनीतास्तन्नो गुरवो मानयन्ति। धनवांस्त्वमथो त्वा लोको मानयति, धनवानहमथो मा लोको मानयति ॥ **सपूर्वात् प्रथमान्ताद्वा** ॥ ॥ ३२ ॥ विद्यमानपूर्वपदात् प्रथमान्तात्पदात्परयोर्युष्मदस्मदोरन्वादेशे वस्नसादिर्वा स्यात्। यूयं विनीतास्तद्वुरवो वो मानयन्ति, तद्वुरवो युष्मान् मानयन्ति। वयं विनीतास्तद्वुरवो नो मानयन्ति, तद्वुरवोऽस्मान् मानयन्ति। युवां सुशीलौ तज्ज्ञानं वां दीयते, तज्ज्ञानं युवाभ्यां दीयते। आवां सुशीलौ तज्ज्ञानं नौ दीयते, तज्ज्ञानमावाभ्यां दीयते ॥

दादेशोऽन्वादेशस्तस्मिन्, कस्यचिद्द्रव्यस्य काञ्चित्क्रियां जातिं गुणं द्रव्यं वा प्रतिपादयितुं कथितस्य तेन तदितरेण वा शब्देन पौनरुक्त्यं मा भूदिति विशेषान्तरं प्रतिपादयितुं पुनः कथनमन्वादेशः। **यूयं विनीतास्तद्वो गुरवो मानयन्ति,** अत्र प्रथमं युष्मच्छब्देन विनीतत्वमुक्त्वा पुनर्युष्मच्छब्देन गुरुमाननं विधीयते, अतोऽत्र युष्मदो द्वितीयान्तस्य वसादेशः। एवमग्रे ॥ **सह** पूर्वेण वर्तते तस्मात्। प्रथमाऽन्ते यस्य तत्प्रथमान्तं तस्मात्, वा ॥ सहशब्दो विद्यमानवचनः पूर्वशब्दो व्यवस्थार्थः सह विद्यमानं पूर्वपदं यस्मादिति वा समासः। प्रथमायाः प्रत्ययत्वात् 'प्रत्ययः प्रकृत्यादेरि'त्यादिनान्तस्य लब्धत्वादन्तग्रहणं तदनुवादार्थम्। **गुरवो वो मानयन्ति** अत्र गुरव इति प्रथमान्तं विद्यमान पूर्वपदम्। ततः परस्य युष्मदो वसादेशः। पूर्वेण नित्ये प्राप्ते विकल्पार्थं वचनम् ॥ त्यदां षष्ठी, एनद् प्रथमा, एतदः षष्ठी, द्वितीया च

त्यदामेनदेतदो द्वितीयाटौस्यवृत्त्यन्ते ॥ ३३ ॥ त्यदादीनामेतदो द्वितीयायां टायामोसि च परेऽन्वादेशे एनद् स्यात्, न तु वृत्त्यन्ते । उद्दिष्टमेतदध्ययनमथो एनदनुजानीत, एतकं साधुमावश्यकमध्यापय, अथो एनमेव सूत्राणि । अत्र साकः । एतेन रात्रिरधीता, अथो एनेनाहरप्यधीतम् । एतयोः शोभनं शीलमथो एनयोर्महती कीर्तिः । त्यदामिति किम् ? संज्ञायामेतदं सङ्गृहाण,अथो एतदमध्यापय । अवृत्त्यन्त इति किम् ? अथो परमैतं पश्य ॥ **इदमः ॥ ३४ ॥** त्यदादेरिदमो द्वितीया–टौसि परेऽन्वादेशे एनत् स्यात्, अवृत्त्यन्ते । उद्दिष्टमिदमध्ययनमथो एनदनुजानीत । अनेन रात्रिरधीता अथो एनेनाहरप्यधीतम् । अनयोः शोभनं शीलमथो एनयोर्महती कीर्तिः ॥ **अद्व्यञ्जने ॥ ३५ ॥** त्यदादेरिदमो व्यञ्जनादौ स्यादौ परेऽन्वादेशे अः

टा च ओस् च, तस्मिन्, वृत्तेरन्तो वृत्त्यन्तः, न वृत्त्यन्तोऽवृत्त्यन्तस्तस्मिन् । अन्वादेशे इति वर्तते । **अत्र साक** इति, अक्सहितस्याप्येतदोऽत्र प्रयोगे एनदादेश इत्यर्थः । **एतेन रात्रिरिति,** अत्राविवक्षितकर्मण इङ्धातोर्योगे रात्रिलक्षणस्याप्याधारस्य कालाध्वभावदेशमिति कालस्य कर्मत्वे ततश्चाधीतेत्यत्र कर्मणि क्ते सति कर्मण उक्तत्वाद्रात्रिशब्दात्प्रथमा, अथवा रात्रिसहचरितमध्ययनमप्युपचाराद्रात्रिशब्देनोच्यते, ततः साऽधीतेति । **एतदं सङ्गृहाणे**त्यादिवाक्ये एतच्छब्दस्संज्ञायां वर्तते नातस्त्यदादिरित्यादेशाभावः । **परमैतमिति,** परमश्चासावेषश्च तमित्यत्रैतच्छब्दस्समासवृत्त्यन्ते वर्ततेऽत एनदादेशाभावः ॥ त्यदामिति नाममात्रनिर्देशेन 'नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमि'ति न्यायेन स्त्रीत्वादिविशिष्टानामपि त्यदादीनां ग्रहणात्तत्राप्यादेशो भवति ॥ इदमः षष्ठी ॥ एतद इति रहितं सकलं पूर्वसूत्रमनुवर्तते । योगविभाग उत्तरार्थः ॥ **अद् प्रथमा,** व्यञ्जने ॥ त्यदामिद-

स्यात्, अवृत्त्यन्ते । इमकाभ्यां शैक्षकाभ्यां रात्रिरधीता, अथो आभ्यामहरप्यधीतम् । इमकेषु, अथो एषु । अनगिति वक्ष्यमाणादिह साकोऽपि विधिः ॥ **अनक्** ॥ ३६ ॥ त्यदादेर्व्यञ्जनादौ स्यादौ परेऽग्वर्ज इदं अः स्यात् । आभ्याम्, आभिः, एषु, आसु । अनगिति किम् ? इमकाभ्याम् । त्यदामित्येव ? अतीदंभ्याम् ॥ **टौस्यनः** ॥ ३७ ॥ त्यदां टायामोसि च परेऽनक इदमोऽनः स्यात् । अनेन, अनया, अनयोः, अनयोः । त्यदामित्येव ? प्रियेदमा । अनक इत्येव ? इमकेन ॥ **अय-**

मोऽन्वादेशेऽवृत्त्यन्ते, इत्येतेषामनुवृत्तिः । इदम इति षष्ठ्यन्तमप्यत्र सूत्रे स्थानिनोऽनुपादानाज्ज्ञापितेन 'अर्थवशाद्विभक्तिविपरिणाम' इति न्यायेन सर्वादेशार्थं प्रथमान्ततया विपरिणम्यते, अन्यथा षष्ठ्यन्तस्यैवानुवर्तने 'षष्ठ्यान्तस्ये'ति परिभाषया मस्यैवादादेशः प्राप्नुयात्, सम्पूर्णस्य चेष्टः, अस्येत्यादिप्रयोगदर्शनात्तस्मात् । प्रथमान्त इदं शब्दः स्थानिभूतो ग्राह्यः । स्यादेरधिकाराद्व्यञ्जनादिपरे आदेशः । अदित्यत्र तकार उच्चारणार्थः, अन्यथा सौ 'सोरु'रित्यादौ कृते ओ इत्यनिष्टं रूपं स्यात् । **न विद्यते अक् यस्य** सोऽनक् । त्यदाम्, इदमोऽद्व्यञ्जने इति सम्बध्यते । अत्रापीदमः प्रथमान्तत्वेन विपरिणामः कर्तव्यः, अनगिति विशेषणबलात् । अनगिति सूत्रमपि 'अर्थवशाद्विभक्तिविपरिणाम' इत्यस्य निर्णायकम् । पृथक्सूत्रकरणादन्वादेशेऽवृत्त्यन्त इति च निवृत्तम् । त्यदामिति षष्ठी सम्बन्धेऽर्थे व्यञ्जने इत्यस्य विशेषणम्, त्यदादितो विहिते व्यञ्जनादौ स्यादौ परे इति भावार्थः । अत एवातीदंभ्यामित्यादौ नेदमोऽदादेशः । इदम्भ्यामित्यत्रानेनेदमोऽदादेशे 'अतः आः स्यादा'वित्यात्वे आभ्याम् । इदमतिक्रान्तौ ताभ्यामतीदंभ्यामिति ॥ **टा च औस् च तस्मिन्**, अनः प्रथमा ॥ त्यदामिदमोऽनगित्यनुवर्तन्ते । प्रियोऽयं यस्यासौ प्रियेदम् तेन, अत्र टाविभक्तेस्त्यदादिसम्बन्धित्वाभावान्नादेशः ॥ **अयं च इयं**

मियं पुंस्त्रियोः सौ ॥ ३८ ॥ त्यदां सौ परे इदमः पुंस्त्रियोर्यथासङ्ख्यमयमियमौ स्याताम् । अयं ना, इयं स्त्री । त्यदामित्येव ? अतीदं ना स्त्री वा ॥ **दो मः स्यादौ** ॥ ३९ ॥ त्यदां स्यादौ परे इदमो दो मः स्यात् । इमौ, परमेमौ, इमकाभ्याम् । त्यदामित्येव ? प्रियेदमौ ॥ **किमः कस्तसादौ च** ॥ ४० ॥ त्यदां स्यादौ तसादौ च प्रत्यये परे किमः कः स्यात् । कः, साकोऽपि कः । कदा, कर्हि । तसादौ चेति

च अयमियम्, पुमांश्च स्त्री च पुंस्त्रियौ तयोः, सौ ॥ त्यदामिदम इत्यनुवर्तते ॥ परमश्चासौ अयञ्च परमायम्, अत्र स्यादिपुल्लिङ्गापेक्षत्वेनायमादेशस्य बहिरङ्गत्वादन्तरङ्गं 'अवर्णस्येवर्णादिने' त्येत्वरूपं सन्धिकार्यं स्यात्, तत'श्चोभयस्थाननिष्पन्नोऽन्यतरव्यपदेशभागि'ति न्यायादेकारस्येदंशब्दसम्बन्धित्वे एकदेशविकृतन्यायेनानन्यत्वादेदमित्यस्यायमादेशे परमयमिति रूपं स्यात्, पूर्वपदसम्बन्धित्वे च दमित्यस्यैवावयवे समुदायोपचारेणेदंरूपत्वव्यपदेशादयमादेशे परमेऽयमिति रूपं स्यात्, द्वैधाऽपि चानिष्टापत्तिरेवञ्च 'पूर्वं पूर्वोत्तरपदयोः कार्यं कार्यम्, पश्चात्सन्धिकार्यमि'ति न्यायेन बहिरङ्गेऽप्ययमादेशे प्रथमं कृते ततश्च 'समानानामि'ति सन्धिकार्यं भवति, ततः परमायमिति सिद्धम् । साकोऽप्ययमादेशः प्रवर्तते ॥ **दः** षष्ठी, मः प्रथमा स्यादौ ॥ पूर्ववदनुवर्त्तनम् । स्याद्यधिकारे स्यादावित्युपादानात्स्यादिरेवानुवर्तते, न तु किञ्चित्तद्विशेषणम् । परमौ च तौ इमौ परमेमौ । प्रियोऽयं ययोस्तौ प्रियेदमौ, नात्र दस्य मः त्यदादिसम्बन्धिस्यादिपरत्वाभावात् ॥ **किमः** षष्ठी, कः प्रथमा, तस् आदिर्यस्य तस्मिन्, च ॥ त्यदाम्, स्यादावित्यनुवर्तते । कदेति, तसादावुदाहरणं, तसन्तन्तु नोदाहृतम्, निपातनात्कुत इति भावात् । तथाप्यत्र जसादाविति ग्रहणमुत्तरार्थम् । 'किं यत्र सर्वे कान्ये'ति दाप्रत्यये, कदा । कस्मिन्ननद्यतने काले कर्हि । तसादावित्यत्राऽऽदिशब्दस्य व्यवस्थावाचित्वेन तसादयस्थमवसाना

किम् ? किंपश्य, किन्तराम् । त्यदामित्येव ? प्रियकिमौ ॥ **आद्वेरः** ॥ ॥ ४१ ॥ द्विशब्दमभिव्याप्य त्यदां स्यादौ तसादौ च परे अः स्यात् । स्यः, त्यौ, द्वौ, ततः । त्यदामित्येव ? अतितदौ ॥ **तः सौ सः** ॥ ४२ ॥ आद्वेस्त्यदां सौ परे तः सः स्यात् । स्यः, स्या, सः, सा, एषा । त्यदामित्येव ? प्रियत्यत् ॥ **अदसो दः सेस्तु डौ** ॥ ४३ ॥ त्यदां सौ परेऽदसो दः सः स्यात्, सेस्तु डौ । असौ, असकौ, हे असौ ! हे असकौ !। त्यदामित्येव ? अत्यदाः ॥ **असुको वाऽकि** ॥ ४४ ॥ त्यदां सौ परेऽदसोऽकि सत्यसुको वा स्यात् ।

ग्राह्याः । तदुत्तरेषु तरबादिप्रत्ययेषु परतो न भवति, यथा किन्तरामित्यादि ॥ **आ अव्ययम्, द्वेः पञ्चमी, अः प्रथमा** ॥ त्यदाम्, स्यादौ, तसाविति वर्त्तन्ते । त्यद् स् इत्यत्रानेन दकारस्याकारे, 'लुगस्ये'त्यकारलोपे, तः सौ सकारे रुत्वविसर्गयोः स्य इति रूपम् । तत इति तस्युदाहरणम् ॥ **तः षष्ठी, सौ, सः प्रथमा** ॥ त्यदाम्, आद्वेरित्यनुवर्तते । एतच्छब्दात्स्त्रीत्वविवक्षाया 'माद्वेर' इत्यकारे, अलोपे 'आदि' त्यनेन आपि, दीर्घे ततः सिविभक्तावनेन तकारस्य सकारे 'नाम्यन्तस्थे 'ति षत्वे, 'दीर्घङ्याबि 'ति सिलोपे एषा इति रूपम् ॥ **अदसः षष्ठी, दः षष्ठी, सेः षष्ठी, तु, डौ प्रथमा** ॥ त्यदाम्, सौ, सः, इति वर्त्तन्ते । अदस् स् इति स्थितेऽनेन सेर्डावादेशे दकारस्य सत्वे, 'डित्यन्त्ये 'त्यस्लोपे असौ, डकारस्य सत्त्वविधानसामर्थ्यादन्त्यस्वरादिलोपानन्तर 'माद्वेर' इति न प्रवर्तते । ह्रस्वोऽसौ असकौ । अमुमतिक्रान्तो योऽसौ अत्यदाः, 'अभ्वादे' रिति दीर्घः, त्यदादिसम्बन्धित्वाभावान्न सेर्डौ ॥ **असुकः प्रथमा, वा, अकि सप्तमी** ॥ त्यदाम्, सौ, अदस इत्येतेषामनुवृत्तिः ॥ **मः प्रथमा, अवर्णस्य** ॥ त्यदामदसो द इत्य-

असुकः, असकौ, हे असुक! हे असकौ! ॥ **मोऽवर्णस्य** ॥ ४५ ॥ अवर्णान्तस्य त्यदामदसो दो मः स्यात्। अमू नरौ स्त्रियौ कुले वा। अमी, अमूदृशः। अवर्णस्येति किम्? अदः कुलम्॥ **वाद्रौ** ॥४६॥ अदसोऽद्रावन्ते सति दोर्म्वा स्यात्। अदमुयङ्, अमुद्रयङ्, अमुमुयङ्, अदद्रयङ्॥ **मादुवर्णोऽनु** ॥ ४७ ॥ अदसो मः परस्य वर्णस्य उवर्णः स्यात्। अनु–पश्चात्कार्यान्तरेभ्यः। अमुम्, अमू, अमुमुयङ्। अन्विति किम्? अमुष्मै, अमुष्मिन्॥ **प्रागिनात्** ॥४८॥

नुवर्तन्ते। अदस् औ इति स्थिते 'आद्वेरः', 'लुगस्ये' त्यलुकि अद् औ इति जातेऽनेन सूत्रेण दकारस्य मकारे 'ऐदौत्सन्ध्यक्षरैरि' त्यमाविति जाते, 'मादुवर्णोऽन्वि'ति मकारोत्तरौकारस्य दीर्घत्वादूकारे अमू इति। असाविव दृश्यते अमूदृशः। 'त्यदाद्यन्यसमानादुपमानादि'ति टक् प्रत्ययः, 'अन्यत्यदादे.।' इति सस्यात्वमनेन मः, 'मादुवर्ण' इति आ उ॥ **वा, अद्रौ** सप्तमी॥ अदसो दो म इत्यनुवर्तन्ते। अदमुयङित्यादिरूपं प्रागेव साधितम्॥ **मात्, उवर्णः, अनु**॥ अदस इति वर्तते। अमुष्मै इत्यादौ, अम स्मै इति जातेऽधुनैव मपरस्याकारस्योवर्णे कृतेऽदन्तत्वाभावेन स्मायादयो न स्युरतोऽनुग्रहणम्। न च यदि पूर्वमेवोवर्णः क्रियते तदा 'प्रागिनादि'ति सूत्रं व्यर्थं सद्यदि कार्यान्तरात्प्रागुवर्णः स्यात्तदा इनादेवेति नियमपरं भवतीति स्मायाद्यादेशानन्तरमेवोवर्णस्य भावान्नामुष्मै इत्यादावदोष इति वाच्यम्, इनादेशस्य प्रत्ययादेशरूपतया प्रत्ययादेशादेव पश्चादुवर्णः, न तु प्रकृत्याऽऽदेशादित्याशङ्कासम्भवेन अमुया अमुयोरित्यादीनामसिद्धिप्रसङ्गात्। अत्र हि पूर्वमेवोत्वे आबन्तत्वविरहेण 'टौस्येदि'त्येत्वं न स्यात्॥ **प्राक्, इनात्**॥ अदसः, मादुवर्ण इत्यनुवर्तेते। अम टा इति स्थिते इनादेशे प्राप्तेऽनेन सूत्रेणावर्णस्य उः, ततः 'टः पुंसि ने'त्यमुना, अन्वित्यस्यापवादोऽयम्॥

अदसो मः परस्य वर्णस्येनादेशात्प्रागुवर्णः स्यात्, अमुना । इनादिति किम् ? अमुया ॥ **बहुष्वेरीः** ॥४९॥ बह्वर्थवृत्तेरदसो मः परस्य एत ईः स्यात् । अमी, अमीषु । एरिति किम् ? अमूः स्त्रियः । मादित्येव ? अमुके ॥ **धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये** ॥ ५० ॥ धातोरिवर्णोवर्णयोः स्वरादौ प्रत्यये परे यथासङ्ख्यमियुवौ स्याताम् । नियौ, लुवौ, अधीयते, लुलुवुः । प्रत्यय इति किम् ? न्यर्थः, स्वर्थः

बहुषु, एः इति षष्ठी, ईः प्रथमा ॥ अदसो म इत्यनुवर्तते । बहुष्वित्यदसो विशेषणम् । अम जसिति स्थिते ' जस इः ', गुणः, अमे इति जातेऽनेन सूत्रेण एरीत्वम् । अमुके इत्यत्राकस्तन्मध्यपतितस्य तद्ग्रहणेन ग्रहणेऽप्युकारेण व्यवधानान्न ईत्वम् ॥ धातोः षष्ठी इवर्णश्चोवर्णश्च तस्य, इय् च उव् च उयुव्, स्वरे, प्रत्यये ॥ स्वरे इत्यत्र ' सप्तम्या आदि ' रिति परिभाषया स्वरादाविति लभ्यते । ' प्रत्ययाप्रत्ययय्यो 'रिति न्यायेन प्रत्यये एव भविष्यति, किं प्रत्ययग्रहणेनेति चेन्न, ' न्यायाः स्थविरयष्टिप्राया ' इति न्यायेन न्यायानां प्रवृत्तेः । **यथासङ्ख्य**मिति, इवर्णोवर्णस्येति द्रव्यार्थादेशे, ' वर्णग्रहणे जातिग्रहणमि 'ति न्यायेन चेत्वोत्वसामान्यापेक्षया यथासङ्ख्यं विज्ञेयमन्यथा पर्यायार्थादेशेन प्रत्येकमष्टादशविधेवर्णोवर्णयोः प्राप्त्या यथासङ्ख्यत्वं दुर्घटं स्यात् । अत्र 'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्यय' इति न्यायो न प्रवर्तते, तेन मुख्यधातुष्वधीयते लुलुवुरित्यादौ किबन्तत्वेन गौणधातुषु नियौ लुवावित्यादौ च इयुवौ सिद्धौ । न च नियौ लुवावित्यादावियुवौ न स्याताम्, ' धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानमि 'ति न्यायेन किबन्तजनाम्ना विहिते प्रत्यये परे धातुनिमित्तकार्यनिषेधादिति वाच्यम्, 'किब्वृत्तेरसुधियस्तावि'ति सूत्रे सुधीशब्दस्थेवर्णस्य यत्ववर्जनत्वोक्त्यात्र प्रकरणे उक्तन्यायाप्रवृत्तिसूचनात् । नियौ लुवावित्यादौ ' किबन्ता धातुत्वं नोज्झन्ति

नयनं नायक इत्यादौ परत्वाद्गुणवृद्धी ॥ **इणः** ॥ ५१ ॥ इणो धातोः स्वरादौ प्रत्यये परे इय् स्यात् । यापवादः । ईयतुः ईयुः ॥ **संयोगात्** ॥ ५२ ॥ धातोरिवर्णोवर्णयोः संयोगात्परयोः स्वरादौ प्रत्यये परे इयुवौ स्याताम् । यवक्रियौ, कटप्रुवौ, शिश्रियुः ॥ **भ्रूश्नोः** ॥ ५३ ॥ भ्रूश्नोरुवर्णस्य संयोगात्परस्य स्वरादौ प्रत्यये परे उव् स्यात् । भ्रुवौ, आप्नुवन्ति । संयोगादित्येव ? चिन्वन्ति ॥ **स्त्रियाः** ॥ ५४ ॥ स्त्रिया इवर्णस्य स्वरादौ प्रत्यये परे इय् स्यात् । स्त्रियौ,

---

शब्दत्वञ्च प्रतिपद्यन्त ' इति न्यायाद्धातुत्वं नामत्वञ्च भाव्यम् । प्रत्यय इत्युक्तत्वात्स्याद्यधिकारनिवृत्तिः ॥ इणः षष्ठी ॥ धातोः इय्, स्वरे, प्रत्यये इत्येतेषामनुवृत्तिः । यापवाद इति, ' योऽनेकस्वरस्ये 'ति प्राप्तस्य यत्वस्यापवादः । इण् धातोः परोक्षे अतुसि द्वित्वे ' वर्णात्प्राकृतं बलीय ' इति वर्णमुच्चार्य विहितात्कार्यात्प्रकृतिमुच्चार्य यत्कार्यमुक्तं तद्वलवदित्यर्थकेन न्यायेन इणधातुरूपप्रकृतिमुच्चार्य विहित इयादेशः प्रथमं प्रवर्तते, ततो दीर्घः ॥ संयोगात् ॥ धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यय इतिसूत्रं सम्बध्यते । यवान् क्रीणात इति यवक्रियौ, कटेन प्रवेते क्विपि कटप्रुवौ । ' क्विब्वृत्तेः ' ' योऽनेकस्वरस्ये 'ति विहितयोर्यत्वक्वत्वयोरपवादः । ' पूर्वेऽपवादाः अनन्तरान्विधीन्बाधन्ते नोत्तरानि 'ति न्यायस्यानित्यत्वेनात्राप्रवृत्तेः । धातुना संयोगस्य विशेषणादिह न भवति, उन्वौ ॥ अत्र संयोगो न धातुमात्रसम्बन्धी ॥ भ्रूश्च भुश्च तस्य । उवर्णस्य, संयोगात्, स्वरे, प्रत्यय इत्यनुवर्तन्ते । संयोगादिति भ्रोरेव विशेषणम्, न तु भ्रूशब्दस्याव्यभिचारात् ॥ स्त्रियाः षष्ठी ॥ इवर्णस्य इय्, स्वरे प्रत्यये इति सम्बध्यन्ते । पृथग्योग उत्तरार्थः । ' ग्रहणवता नाम्ने ' ति तु न प्रवर्तते, ' वेयुवोऽस्त्रिया ' इति निर्देशात्, ' अर्थवद्ग्रहणे नानर्थकस्य ग्रहणमि 'ति न्यायेन शस्त्रीशब्दसम्बन्धिनः स्वरे परे

अतिस्त्रियौ ॥ **वाऽम्शसि** ॥ ५५ ॥ स्त्रिया इवर्णस्याम्शसोः परयोरिय्वा स्यात् । स्त्रियम्, स्त्रीम् । स्त्रियः, स्त्रीः ॥ **योऽनेकस्वरस्य** ॥ ५६ ॥ अनेकस्वरस्य धातोरिवर्णस्य स्वरादौ प्रत्यये परे यः स्यात् । चिच्युः, निन्युः । पतिमिच्छति पत्यि ॥ **स्यादौ वः** ॥ ५७ ॥ अनेकस्वरस्य धातोरुवर्णस्य स्वरादौ स्यादौ परे वः स्यात् । वसुमिच्छ-

---

न इय् भवत्यनर्थकत्वात् ॥ **वा**, अम् च शस् च अम्शस् तस्मिन् ॥ स्त्रियाः इवर्णस्य इय् इत्यनुवर्तन्ते । पक्षे ' समानादमोऽतः ' । स्त्रीशब्दात्तद्धितशस्प्रत्ययस्यासम्भवेन द्वितीयाबहुवचनस्यैव शसो ग्रहणात्तत्साहचर्यात्तत्पूर्ववर्त्तित्वाच्च द्वितीयैकवचनमेवाम् गृह्यते । अतो न षष्ठीबहुवचनाशङ्का ॥ **यः प्रथमा**, न एकः अनेकः, अनेकः स्वरो यस्य, तस्य ॥ धातोः इवर्णस्य, स्वरे, प्रत्यये इत्यनुवर्तन्ते । ' विशेषातिदिष्टो विधिः प्रकृताधिकारं न बाधत ' इतिन्यायेन ' भ्रूश्वोः ' ' स्त्रियाः ' ' वाम्शसी 'ति सूत्रत्रये विशेषातिदेशसद्भावेनानुक्तोऽपि धातोरित्यधिकारोऽनुटितत्वादत्र पुनः प्रादुर्भवति, अयमेव मण्डूकप्लुतिन्याय उच्यते । पत्यीति नामधातुसम्बन्धीवर्णस्य सत्त्वात्स्वरे परे यः, **पतिमिच्छती**ति सप्तम्या रूपम् ॥ **स्यादौ**, वः प्रथमा ॥ धातोरुवर्णस्य, स्वरे, प्रत्यये, अनेकस्वरस्येत्येषामनुवर्तनम् । **वस्वाविति**, यद्ययमनेकस्वरो धातुस्तर्हि ततः स्यादिविभक्तेर्न प्रसङ्गस्तस्याः नाम्नो भावात्, यदि च नामत्वं वसूशब्दस्य तर्हि न यत्वं प्रसज्यत इति धातुत्वनामत्वयोः कार्यमेकस्य कथमिति चेत्तर्हि सूत्रमिदं व्यर्थं सत्, ' क्विबन्ता धातुत्वं नोज्झन्ति, शब्दत्वञ्च प्रतिपद्यन्त ' इति न्यायमाविर्भावयति । अनेन च क्विबन्तानां धातुत्वनामत्वयोरव्याहतत्वादुभयाश्रितं कार्यं भवति । एवं ' गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्यय ' इति न्यायोऽप्यत्र न प्रवर्तते । सूत्रमिदं हि वस्वावित्यादौ वत्वसिद्ध्यर्थम्, तच्च

न्तौ वस्वौ। स्यादाविति किम् ? लुलुवुः ॥ **क्किब्वृत्तेरसुधियस्तौ** ॥ ५८ ॥ क्किबन्तेनैव या वृत्तिस्समासस्तस्याः सुधीशब्दादन्यस्याः सम्बन्धिनो धातोरिवर्णोवर्णस्य, स्वरादौ स्यादौ परे तौ य व इत्येतौ स्याताम्। उन्यौ, ग्रामण्यौ, सुल्वः, खलप्वः। क्किबिति किम् ? परमौ नियौ परमनियौ। वृत्तेरिति किम् ? नियौ कुलस्य। असुधिय इति किम् ? सुधियः ॥ **दृन्पुनर्वर्षाकारैर्भुवः** ॥ ५९ ॥ दृनादि-

---

'इवर्णादेरस्वे स्वर' इत्यनेनापि सिद्ध्येत्, परन्तु 'वर्णात् प्राक्तनमि'ति न्यायात्परत्वा 'ऋवर्णादेरि'ति वत्वं बाधित्वा 'धातोरिवर्णोवर्णस्येत्यनेन उवेव प्रवर्तते, तद्बाधनार्थमिदं सूत्रम्, यदि च गौणमुख्यन्यायोऽत्र प्रवर्तेत तदा 'धातोरि'त्यस्याप्राप्त्या तद्बाधनार्थमिदं सूत्रं न कुर्यादिति ॥ **क्किप वृत्तिः** क्किब्वृत्तिस्तस्याः, न सुधीः असुधीस्तस्यास्तौ प्रथमा ॥ धातोरिवर्णोवर्णस्य, स्यादौ, स्वरे, प्रत्यय, इत्यभिसम्बध्यन्ते। **वृत्तेरसुधियस्ताविति** वृत्तिस्थधातोः स्यादौ परे कार्यविधानात् केवलधातोर्वृत्त्यसम्भवाद्वृत्तिग्रहणादेव क्किपो लाभे क्किब्ग्रहणमवधारणार्थम्। अत एवोक्तं **क्किबन्तेनैव या वृत्तिरिति**। उन्यौ, ग्रामण्यौ, सुल्वः, खलप्वः, एषु विभक्त्युत्पत्तेः पूर्वमेव क्किबन्तेन समासः। परमौ च तौ नियौ चेति परमनियौ, अत्र स्याद्यन्तेन कर्मधारयः, न तु क्किबन्तेन समासः। सुधिय इति, सुष्ठु ध्यायत इति क्किब्वृत्तावपि सुधीवर्जनान्न यत्वम् ॥ **दृन् च पुनश्च, वर्षा च कारश्च तैः, भुवः षष्ठी** ॥ क्किब्वृत्तेः, उवर्णस्य, स्यादौ, स्वरे, प्रत्यय, इति वर्तन्ते। दृन् हिंसन् भवत इति दृन्भ्वौ, पुनर्भवत इति पुनर्भ्वौ, वर्षासु भवन्तीति वर्षाभ्वः, राजलभ्यो भागः कारः, कारेषु कारैर्वा भवन्तीति कारभ्वः। दायकग्राह-

भिः सह या क्विब्वृत्तिस्तत्सम्बन्धिन एव भुवो धातोरुवर्णस्य स्वरादौ स्यादौ परे वः स्यात्। द्वन्भ्वौ, पुनर्भ्वौ, वर्षाभ्वः, कारभ्वः। द्वनादिभिरिति किम्? प्रतिभुवौ ॥ **णषमसत्परे स्यादिविधौ च** ॥६०॥ इतः सूत्रादारभ्य यत्परं कार्यं विधास्यते तस्मिन्, स्याद्यधिकारविहिते च पूर्वस्मिन्नपि कर्त्तव्ये, णत्वं षत्वं चासदसिद्धं स्यात्। एतत्सूत्रनिर्दिष्टयोश्च णषयोः परे षे णोऽसन्। पूष्णः तक्ष्णः, पिपठीः, अर्वाणौ,

---

कयोरन्तरान्तराले प्रतिभवत इति प्रतिभुवौ, एतैरेव भुवो नान्यैः। पूर्वेण सिद्धे नियमार्थमिदम् ॥ **णश्च षश्च** णषम्, न सदंसत्, परे, स्यादेर्विधिः स्यादिविधिस्तस्मिन्, च ॥ षणमिति विपर्ययनिर्देशे त्वभिषुणोतीत्यादि न सिद्ध्येत्, षत्वस्योपसर्गात् सुगिति विहितस्य णत्वे परेऽसत्त्वेन 'रषृवर्णादि'ति णत्वं न स्यात्। अतः क्रमं त्यक्त्वा णषमिति कृतम्। क्रमश्च विधानक्रमो ज्ञेयः, अग्रे हि प्रथमं षत्वं ततो णत्वं विधीयते। अत्रासद्विधौ पक्षद्वयं कार्यासिद्धत्वपक्षः शास्त्रासिद्धत्वपक्षश्चेति। कार्यासिद्धत्वपक्षाश्रयणे पूष्ण इत्यादौ अनोऽकारलोपो न स्यात्, यथा हि देवदत्तस्य हन्तरि हते सति न देवदत्तस्य दर्शनं तथात्र णत्वस्यासिद्धत्वेऽपि न नकारस्य दर्शनमस्तीति 'अनोऽस्ये'ति न प्रवर्तेत, तस्माच्छास्त्रासिद्धत्वपक्षः आश्रयणीयः। तत्पक्षे पूर्वमन्तरङ्गादिहेतुतः प्रवृत्तेऽसच्छास्त्रेऽसिद्धत्वबोधनेन तद्विहितादेशे लक्ष्ये जातत्वबुद्ध्यभावस्य तत्कृतस्थानिनिवृत्तिबुद्ध्यभावस्य च बोधनेन अनोऽकारलोपविधायकसूत्रप्रवृत्तिसम्भवेन पूष्ण इत्यादिरूपसिद्धिः। यत्र च द्वयोः सूत्रयोः सहप्रसङ्गस्तत्रासच्छास्त्रेऽभावारोपेण तस्याप्रवृत्तिरेव भवति। अत्रासदित्याहार्यारोपरूप एवासद्भावो वेदितव्यः, न त्वनाहार्यज्ञानरूपोऽसद्भावः, सर्वथा तल्लोपप्रसक्तेः। पूष्णः तक्ष्णः, अत्र णत्वस्यासत्त्वादनोऽकारलोपो भवति। पिपठीः, अत्र षत्वस्यासिद्धत्वात् सस्य रुर्भवति। 'पदान्त' इति दीर्घः, न

सर्प्पींषि । असत्पर इत्यधिकारो " रात्स " इति यावत् ; स्यादिविधौ चेति तु " नोर्म्यादिभ्य " इति ॥ **क्तादेशोऽषि ॥ ६१ ॥** केनोपलक्षितस्य तस्यादेशः षादन्यस्मिन् परे पूर्वस्मिंश्च स्यादिविधावसन् स्यात् । क्षामिमान्, लून्युः । अषीति किम् ? वृक्णः ॥ **षढोः कस्सि**

च पिपठिषित्यस्याभ्वादिरूपत्वात्कथं दीर्घ इति वाच्यम्, भ्वाद्यवयवेन पठित्यनेन योगात् समुदायस्यापि पिपठिषो भ्वादिरूपत्वात् । न चैवं कुर्कुरीयतीत्यादौ धातुत्वमनेन प्रकारेण भ्वादित्वमप्यस्तीति दीर्घः स्यादिति वाच्यम्, तत्र धातुत्वसत्त्वेऽपि पिपठीः इत्यादिवन्न भ्वाद्यवयवात्ततः प्रत्ययो विधीयते, किन्तु नाम्न एव तद्भ्वाद्यवयवयोगाभावात् कुर्कुरीयेत्यादिसमुदायस्य न भ्वादित्वम् । अर्वाणौ, सर्पींषि, अत्र णत्वषत्वयोरसिद्धत्वादुपान्त्य दीर्घत्वं सिद्धम् ॥ ककारेणोपलक्षितस्तः क्तस्तस्यादेशः क्तादेशः, न ष् अष् तस्मिन् ॥ केनोपलक्षितस्येति क्तक्तवतूक्तिक्तानां ग्रहणम् । परे इत्येतत्सूत्रापेक्षया परे, न तु क्तादेशविधायकसूत्रापेक्षया । अन्यथा क्तादेशविधायक सूत्रापेक्षया 'यजसृजे'ति षत्वविधायकसूत्रस्य परत्वाभावेन अषीति प्रतिषेधो व्यर्थः स्यात्, एतत्सूत्रापेक्षया च परत्वे ' यजसृजे 'ति षत्वस्य परत्वात्तस्मिन्नप्यसत्त्वे प्राप्ते अषीतिप्रतिषेधः सार्थकः स्यात्, अतः एतत्सूत्रापेक्षया परत्वं ग्राह्यम् । क्षामस्याऽपत्यं क्षामिः सोऽस्यास्तीति **क्षामिमान्** । क्षामशब्दस्तु क्षै धातोः क्तेन निष्पन्नः 'क्षैशुचिपचोमकवमि'ति तस्य मः, तस्यासत्त्वा 'न्मावर्णान्ते'त्यादिना मतोर्मो वो न भवति । लून्युरिति, लूनमिच्छतीति क्यनि क्विपि लूनिः, षष्ठ्यां तु लून्युः, अत्र ' ऋत्वादे 'रिति विहितस्य नत्वस्यासत्त्वात् ' खितिखीतीय उरि 'त्युर्भवति । वृक्ण इति, व्रश्च्यते स्म क्तः, 'ग्रहव्रश्चे'ति क्यृत् ' सूयत्वाद्योदितः ' तस्य नः, 'संयोगस्यादौ' सलोपः, वृच् न इति जातेऽत्र सूत्रे अषीत्यभावे 'यजसृजे'ति षत्वे-

॥ ६२ ॥ से परे ष-ढोः कः स्यात् । पेक्ष्यति, लेक्ष्यति ॥ **भ्वादेर्नामिनो दीर्घो वोर्व्यञ्जने** ॥ ६३ ॥ भ्वादेर्धातोर्यौ रवौ तयोः परयोस्तस्यैव नामिनो दीर्घः स्याद्व्यञ्जने । हूर्च्छा, आस्तीर्णम्, दीव्यति। भ्वादेरिति किम् ? कुर्कुरीयति, दिव्यति ॥ **पदान्ते** ॥६४॥ पदान्तस्थयोर्भ्वादेः वोः परयोर्भ्वादेर्नामिनो दीर्घः स्यात्। गीः, गीरर्थः।

ऽपि कर्तव्ये नत्वस्यासिद्धत्वापत्त्या षकारापत्तिः स्यादतोऽषीति कृतम्। तथा षत्वे कर्त्तव्ये नत्वं नासिद्धमतो धुट्प्रत्ययपरत्वाभावान्न षत्वम्। 'चजः कगमि 'ति कत्वे कर्तव्ये तु नत्वमसद्धवति, तेन धुट्प्रत्ययपरत्वात् 'चजः कग 'मिति कः । 'रषृवर्णे 'ति नस्य णः ॥ **षश्च ढश्च षढौ** तयोः, कः प्रथमा, सि सप्तमी ॥ पिष्लृंप् सञ्चूर्णने । लिहींक् आस्वादने । आद्ये उदाहरणे स्यति परे षस्य कः, द्वितीये च ढस्य कः ॥ **भू आदिर्यस्य** तस्य, नामिनः षष्ठी, दीर्घः, र् च व् च वौ तयोः, **व्यञ्जने** ॥ भ्वादेरिति प्रत्यासत्त्या वोरित्यनेन नामिन इत्यनेन च सम्बध्यते। एकप्रयत्नेन द्वयोरुपादानं प्रत्यासत्तिः, शब्दान्तरं प्रतीत्य शब्दान्तरस्यासत्तिः प्रत्यासत्तिरिति व्युत्पत्तेः । हूर्च्छा कौटिल्ये, अनेन दीर्घः । आस्तीर्यते स्म आस्तीर्णम् । दिवूच् क्रीडादौ । कुर्कुरमिच्छति कुर्कुरीयति, दिवमिच्छतीति क्यन्, नामधातुत्वादत्र दीर्घो न स्यात्। एतत्सूत्रविहितो दीर्घोऽनित्यः, 'स्थानिवद्भावपुंवद्भावैकशेषद्वन्द्वैकत्वदीर्घत्वान्यनित्यानी 'ति न्यायात्, नित्यत्वे हि हुर्च्छादीनामिव स्फूर्ज ऊर्ज ऊर्ण्णु, इत्यादीनामप्यकृतदीर्घानां धातुषु पाठः स्यात् दीर्घपाठाद्विज्ञायतेऽनेन सूत्रेण विहितो दीर्घोऽनित्य इति।। **पदस्य** अन्तस्तस्मिन्॥ भ्वादेर्नामिनो दीर्घो वोरित्यनुवर्तते । गिरणं गीः, 'क्रुत्सम्पदादिभ्यः क्विप्' । 'ऋतां क्ङितीरि'ति इरादेशः । अत्र क्विप्सम्बन्धिवकारव्यञ्जनद्वारा 'नामसिदय्व्यञ्जन' इति पदत्वं तु 'क्विपि व्यञ्जनकार्यमनित्यमि 'ति न्यायान्न भवति । गिर लुव इति जसन्तं रूपम्, पदान्ते वोरभावान्न

पदान्त इति किम् ? गिरः, लुवः ॥ **न यि तद्धिते ॥ ६५ ॥** यादौ तद्धिते परे यौ वौं तयोः परयोर्नामिनो दीर्घो न स्यात्, धुर्यः । यीति किम् ? गीर्वत् । तद्धित इति किम् ? गीर्यति, गीर्यते ॥ **कुरुच्छुरः ॥ ६६ ॥** कुरुच्छुरोर्नामिनो रे परे दीर्घो न स्यात् । कुर्यात्, छुर्यात् । कुर्व्वित्युकारः किम् ? कुरुत् शब्दे-कूर्यात् ॥ **मो नो म्वोश्च ॥ ६७ ॥** मन्तस्य धातोरन्तस्य पदान्तस्थस्य म्वोश्च

दीर्घः ॥ न, यि सप्तमी, तद्धिते ॥ नामिनो दीर्घो वोरित्यनुवर्तन्ते । धुरं वहतीति धुर्यः ' धुरो यैयणि 'ति यप्रत्ययः ॥ अत्रान्तर्वर्त्तिनीं विभक्तिमाश्रित्य पदान्तत्वे दीर्घे प्राप्तेऽनेन निषेधः । गीरिव गीर्वत् 'स्यादेरिवे' इति वत्प्रत्ययः, ' पदान्त ' इति दीर्घः । गिरमिच्छति, ' अमाव्ययात् ' क्यन्प्रत्ययः गीर्यति, गीरिवाचरति, क्यङ्प्रत्ययः गीर्यते । ये इत्यकृत्वा यीति व्यञ्जनमात्रोपादानान्निरनुबन्धसानुबन्धयोर्ग्रहणम्, अकारसहितस्योपादाने तु निरनुबन्धयप्रत्ययस्य सम्भवा ' न्निरनुबन्धग्रहणे न सानुबन्धकस्ये 'ति न्यायेन सानुबन्धस्य यादेः प्रत्ययस्य ग्रहणं न स्यादत एतन्न्यायशङ्कया सानुबन्धस्यापि यकारस्य ग्रहणार्थं ये इति न कृतम्, अत एवोक्तन्यायस्याभ्युपगमः सूचितः ॥ कुरुश्च छुर्च तस्य ॥ नामिनो दीर्घो नेति पदानि सम्बध्यन्ते । डुकृंग् करणे, सप्तमीयात्प्रत्ययः, ' कृगतनादेरु; ' ' नामिनो गुणः', ' अतः शित्युदि 'ति उः, ' क्रगो यि चे 'त्युकारलोपः । ' भ्वादे 'रिति दीर्घे प्राप्तेऽनेन निषेधः ॥ मः षष्ठी, नः प्रथमा, म् च व् च म्वौ तयोश्च ॥ भ्वादेरिति वर्तते । चकारेण पदान्त इत्यस्य समुच्चयः । म इति पदान्त इति च भ्वादेर्विशेषणम् । प्रशाम्यतीति प्रशान् । सिलोपेऽनेन मस्य नः । अस्यासिद्धत्वा ' न्नाम्नो नोऽनह्न ' इति नलोपो न । कुटिलं गच्छामीति जङ्गन्मि । अत्र नकारस्य चरितार्थत्वात्प्रशानित्यादौ विधानसामर्थ्यान्नस्य लोपो नेति नाशङ्कनीयम् ॥ क्वस् चासौ स् च क्वस्, ध्वंस् च ध्वंस् च क्वस्

परयोर्नः स्यात् । प्रशान्, प्रशान्भ्याम्, जङ्गन्मि, जङ्गन्वः ॥ **स्रंस्ध्वंस्वनडुहो दः ॥ ६८ ॥** संस्ध्वंसोः क्वस्प्रत्ययान्तस्य च सन्तस्य, अनडुहश्च पदान्तस्थस्य दः स्यात् । उखास्रद्, पर्णध्वद्,

---

च अनडुह् च तस्य, दः ॥ पदान्त इति वर्तते । क्वस्सिति प्रत्ययः तेन तदन्तं ग्राह्यम् । उखया स्रंसते उखास्रद्, अत्र उखास्रस् इत्यस्य ' षष्ठ्यान्त्यस्ये 'ति सस्य दः । एवमग्रेऽपि । शोभनोऽनड्वाहो यत्र स्वनडुद् । अत्र तकारे विधीयमानेऽपि ' धुटस्तृतीय ' इति दकारो भविष्यतीति किं दकारविधानेनेति चेन्न, धुटस्तृतीय ' इति दत्वस्य परेऽसदिति वचनादसिद्धत्वेन दकारस्य श्रवणाभावप्रसङ्गात् । **विद्वानिति,** क्वसस्सकारस्य 'पदस्ये'ति लोपेन विद्यमानत्वाभावान्नात्र दः । क्वसित्यत्र ककारग्रहणं वस्धातुपरिहारार्थम् । क्वसः सकारो विशेषितो विद्यमानतालाभाय । एवं तर्हि अनड्वानित्यादौ नकारस्य दकारः स्यादत्र कस्यापि विशेषणस्याभावादिति चेन्न, नकारविधान-सामर्थ्यादुत्वाभावात् । न चानड्वान्ह इति दशायां ' पदस्ये 'ति लोपं बाधित्वानेन दत्वं स्यादिति वाच्यम्, ' येन नाप्राप्ते यो विधिरा-भ्यते स तस्यैव बाधक ' इति न्यायेन रुत्वढत्वयोरेवास्य बाधक-त्वात्, न तु ' पदस्ये 'त्यस्य, संयोगान्तलोपस्य प्राप्तावप्राप्तौ च सत्यामेतत्सूत्रारम्भात् । विद्वत्कुलमित्यादिषु संयोगान्तलोपस्या-प्राप्तावपि विद्वानित्यादौ तत्प्राप्तावपि हीदमारभ्यते । हे विद्वानित्या-दिलिङ्गत्रयेऽपि तु सर्वत्र ' सोरु ' रिति रुत्वस्य हे अनड्वनित्यादि-लिङ्गत्रये सर्वत्र च ढत्वस्यावश्यं प्राप्तौ सत्यां दत्वविधिरारभ्यते । संयोगान्तलोपस्याबाधकत्वादेव च क्वसः सितिविशेषणमुपात्तम्, इदमेव च विशेषणमुक्तन्यायं व्यञ्जयति । यदि सूत्रमिदं रुत्वढत्वे इव संयोगान्तलोपमपि बाधते, तर्हि सितिविशेषणं व्यर्थं स्यात्, क्वसः क्वापि सन्तत्वाव्यभिचारात् ॥ ऋत्विज् च दिश्च, दृश्च,

विद्वत्कुलम्, स्वनडुद्। क्वस्सिति द्विसकारपाठादिह मा भूत्, विद्वान्॥ **ऋत्विज्-दिश्-दृश्-स्पृश्-स्रज्-दधृषुष्णिहो गः ॥ ६९ ॥** एषां पदान्तस्थानां गः स्यात्। ऋत्विग्, दिग्, दृग्, अन्यादृग्, घृतस्पृग्, स्रग्, दधृग्, उष्णिग्॥ **नशो वा ॥७०॥** नशः पदान्ते ग् वा स्यात्। जीवनग्, जीवनड्॥ **युजश्चक्रुश्चो नो ङः ॥ ७१ ॥** एषां नस्य पदान्ते ङः स्यात्। युङ्, प्राङ्, क्रुङ्॥ **सोरुः ॥ ७२ ॥** पदान्ते सोरुः स्यात्। आशीः, वायुः॥ **सजुषः**

स्पृश्च, स्रज च दधृष् चोष्णिह् च, तस्य गः॥ पदान्त इति वर्तते, एवमग्रेऽपि। एते शब्दाः सूत्रनिर्देशादेवंरूपतया भाव्याः, पदान्ते गश्च। ऋत्विग्दिगित्येवं गान्तानां निपातने गत्वसन्नियोगशिष्टतैव निपातनस्य ज्ञायमानतया ततो व्यावृत्तौ दृक्षावुष्णिहौ न स्याताम्। गत्वस्य विधाने च निपातनं सर्वत्र भवतीति॥ **नशः** षष्ठी, वा॥ ग इत्यनुवर्तते। जीवस्य नशनं **जीवनग्**। 'भ्वादिभ्यो वे 'ति क्विप्, 'यजसृजे 'ति षः, 'धुटस्तृतीयः' षस्य डः, अनेन वा गः॥ युज् च अञ्च् च क्रुञ्च् च, तस्य, नः षष्ठी, ङः प्रथमा। युनक्तेः क्विपि, घुटि नागमे संयोगान्तलोपेऽनेन ङः। अञ्चतेरर्चायां नलोपे घुटि नागमे, अर्चायान्तु नलोपाभावेऽनेन ङः। एवं क्रुञ्चतेरपि। अत एव निर्देशात् क्रुञ्चेर्नलोपो न। नन्वत्र 'षष्ठ्यान्त्यस्ये 'ति नकारस्यैव ङकारो भवति, किं न इति मैवम्, युजिच् समाधावित्यस्यापि पदान्ते युङित्यापत्तेः, इष्यते च युगिति॥ **सोः** षष्ठी, उः प्रथमा॥ आशीः, षत्वस्यासिद्धत्वाद्रुत्वम्, पदान्त इति दीर्घत्वम्॥ **सजुषः** षष्ठी॥ रुरिति वर्तते। 'षष्ठ्यान्त्यस्य' जुषैति प्रीतिसेवनयोः। सहजुषते इति क्विप्, सूत्रनिर्देशात् सहस्य सः, 'अप्रयोगीत्' 'दीर्घङ्याबि 'त्यनेन रः, 'पदान्त' इति दीर्घः। सजूरिव सजूर्वत्, 'स्यादेरिवे' इति वत्। 'धुटस्तृतीय' इत्यस्या-

॥ ७३ ॥ पदान्ते सजुषोः रुः स्यात् । सजूः, सजूर्वत् ॥ **अह्नः** ॥ ७४ ॥ अह्नः पदान्ते रुः स्यात् । हे दीर्घाहो निदाघ ! दीर्घाहा निदाघः ॥ **रो लुप्यरि** ॥ ७५ ॥ अरेफे परे पदान्ते अह्नो लुपि सत्यां रः स्यात् । अहरधीते, अहर्दत्ते । लुपीति किम् ? हे दीर्घाहोऽत्र । अरीति किम् ? अहोरूपम् । **धुटस्तृतीयः** ॥ ७६ ॥ पदान्ते धुटां तृतीयः स्यात् । वाग्, वाग्भिः, अज्भिः ॥ **गडद-**

पवादः । तदन्तेऽप्येतत्प्रवर्तते, तेन प्रियसजूरित्यत्रापि रुत्वं भवति ॥ **अह्नः** षष्ठी ॥ रुरित्यनुवर्तते । दीर्घान्यहानि यस्मिन् स दीर्घाह्, तस्य सम्बोधनं हे दीर्घाहः, अत्रानेन नकारस्य रुः, अस्य रुत्वस्यासिद्धत्वान्नान्तलक्षणो दीर्घो भवति, तथा च दीर्घाहाः । निदह्यतेऽस्मिन्निति निदाघः ॥ **रः** प्रथमा, लुपि, न र् अर्तस्मिन् ॥ पदान्ते, अह्न इति पदद्वयं वर्तते । अहरधीत इति ' कालाध्वनो ' र्द्वितीया, अत्र सेर्लुपि सत्यां अरेफपरत्वाद्रोरपवादभूतः रान्तादेशो भवति । रविधानाच्चात्रातोऽति रोरुरिति सूत्रेण न उः । यद्यपि हे दीर्घाहोऽत्रेत्यत्र विभक्तेर्लुबस्ति तथापि यदपेक्षया लुप् तदपेक्षया पदत्वमत्र नास्ति, वाक्यविभक्त्यपेक्षया लुप् साक्षाद्विभक्त्यपेक्षया तु पदत्वमस्तीत्येकापेक्षत्वविरहेण न दोषः । प्रकृष्टमहः अहोरूपम् ॥ **धुटः** षष्ठीतृतीयः प्रथमा ॥ अज्भिरिति चस्यानेन जत्वे ' अजि 'ति संज्ञाशब्दत्वान्न ' चजः कगम् ', संज्ञाशब्दत्वेऽप्यचो जत्वे न विवक्षितसंज्ञाया अप्रतिपत्तिः, कत्वे कृते त्वका अचो बोधो न स्यात्तस्य प्रत्याहारान्तरत्वात् ॥ **गश्च डश्च दश्च बश्च गडदबं** तदादिर्यस्य तस्य, चतुर्थोऽन्ते यस्य तस्य, एकः स्वरो यस्य तस्यादेः षष्ठी, चतुर्थः प्रथमा, स् च ध्व च स्दवै तयोश्च, प्रत्यये ॥ चकारेण पदान्त इत्यस्यानुकर्षणमुत्तरत्र च नानुवृत्तिरत एव ' चानुकृष्टं नानुवर्तत ' इति न्यायात् स्ध्वोः प्रत्ययययोर्धात्वव्यभिचारितया तयो-

बादेश्चतुर्थान्तस्यैकस्वरस्यादेश्चतुर्थः स्ध्वोश्च प्रत्यये ॥ ॥ ७७ ॥ गडदबादेश्चतुर्थान्तस्यैकस्वरस्य धातुरूपशब्दावयवस्यादेश्चतुर्थः स्यात् । पदान्ते, सादौ ध्वादौ च प्रत्यये । पर्णधुट्, तुण्डिभमाचक्षाणः तुण्ढिप् । एवं गर्द्धप्, धर्म्मभुत्, निधोक्ष्यते, न्यधूढ्वम्, धोक्ष्यते, अधुग्ध्वम्, भोत्स्यते, अभुद्धम् । गडदबादेरिति किम् ?

ग्रहणाद्धातोर्लाभः, अवयवे षष्ठी, अत्र धातुरूपावयवस्येति विशेष्यं षष्ठ्यन्तत्रयञ्च विशेषणम् । अस्य समासद्वयम्, धातुरूपश्चासौ अवयवश्चेति, धातुरूपस्यावयव इति च । आद्ये समासे पर्णधुडित्यादौ धातुरूपोऽवयवो गुहित्यादिः, पर्णगुहित्यादिसमुदायोऽवयवी, द्वितीये च समासे धातुरूपस्य तुण्डिभित्यस्यावयवो डिभित्यादिः, अथवा धातुरूपस्यावयव इति षष्ठीसमास एव स्वीक्रियते, तथा च तुण्डिभित्यादीन्याद्यन्तवदेकस्मिन्निति न्यायं विनैव सिद्ध्यन्ति, पर्णधुडित्यादीनि च धातुरूपस्य गुहित्यादेरवयवः ' आद्यन्तवदेकस्मिन्नि 'ति न्यायेन स एवेति तेऽपि सिद्ध्यन्ति । पर्णानि गूहतीति क्विप्, सिलोपे ' हो धुट्पदान्त ' इति ढत्वेऽनेनादिगस्य घकारे, ' धुटस्तृतीयः ' 'विरामे वा' । धर्म्मं बुध्यते, क्विप् । गुह् स्यते, ' हो धुट् ', अनेन घः, 'षढोः कः सि', 'नाम्यन्तस्था' । न्यधूढ्वम, अद्यतन्या ध्वमि, सकि, 'दुहदिह' इति तस्य लुकि, अटि, ढत्वे, धत्वे, ' तवर्गस्ये 'ति धस्य ढत्वे 'ढस्ढे' इति ढलोपे रूपमिदम् । एवमग्रे बोध्यम् । जभेर्यङ्लुपि ह्यस्तन्या रूपं अजङ्गप् । दामलिहमिच्छन् दामलिट् । अत्र सूत्रे ' प्रत्ययाप्रत्ययो 'रिति न्यायात्प्रत्ययत्वे लब्धेऽपि पुनः प्रत्ययशब्दोपादान ' मुभयस्थाननिष्पन्नोऽन्यतरव्यपदेशभागि 'ति न्यायं सूचयति । धाधातोः वसि द्वित्वे पूर्वस्य ह्रस्वे 'द्वितीयतुर्ययोः पूर्वावि' ति दत्वे ' झश्चात ' इति धातोरात्लुकि, ' अदीर्घादि 'ति धस्य द्वित्वे दध् ध्वसिति स्थिते ध्वस्य प्रकृतिप्रत्ययस्थानजन्यत्वेन एत-

अजज्ञप् । एकस्वरस्येति किम् ? दामलिट् ॥ **धागस्तथोश्च** ॥ ७८ ॥ धागश्चतुर्थान्तस्य दादेरादेर्दस्य तथोः स्ध्वोश्च प्रत्यययोः परयोश्चतुर्थः स्यात् । धत्तः, धत्थः, धत्से, धद्ध्वे । तथोश्चेति किम् ? दध्वः । चतुर्थान्तस्येत्येव ? दधाति ॥ **अधश्चतुर्थात्तथोर्धः** ॥ ७९ ॥ चतुर्थात्परयोर्धारूपवर्ज्जाद्धातोर्विहितयोस्तथोर्धः स्यात् । अदुग्ध, अदुग्धाः । अलब्ध, अलब्धाः । अध इति किम् ? धत्तः, धत्थः ।

न्यायबलात्प्रत्ययत्वे तस्मिन्परे दध् इति भागस्य चतुर्थान्तत्वादादिदकारस्य चतुर्थत्वापत्तिः स्यात्, यद्यस्मिन्सूत्रे साक्षात्प्रत्ययोपादानं न स्यात् । तदुपादानाच्च न्यायानपेक्षप्रत्ययस्यैव विवक्षितत्वेन नोक्तस्थले चतुर्थत्वप्रसङ्गः । यद्येतन्न्यायो न स्यात्, प्रत्ययग्रहणमप्यत्र निरर्थकं स्यात् ॥ **धागः** षष्ठी, तश्च थश्च तयोः समाहारः, च ॥ चतुर्थान्तस्य, आदेः, चतुर्थः, प्रत्यये, इत्येते आगच्छन्ति । चशब्देन स्ध्वोरित्यस्यानुकर्षः । डुधांक् धातोः वर्तमाने तसि, द्वित्वे, पूर्वस्य ह्रस्वे दकारे च, आलोपे दध् तसिति जातेऽनेन धत्वम् । एवमग्रेऽपि । न च चग्रहणं किमर्थम्, सकारे ध्वशब्दे च परे पूर्वेणैव सिद्धत्वादिति वाच्यम्, यङ्लुपि क्रियाव्यतिहारे इत्यात्मनेपदे से द्वित्वादिकृते व्यतिदाध् से इति जाते पूर्वसूत्रेण चतुर्थत्वप्रसङ्गात् । अत्र सूत्रे चकारं विधाय तेन तदनुकर्षे कृतेऽत्र धाधातोरनुबन्धेन साकं निर्देशात् ' तिवा शवानुबन्धेन निर्दिष्टं यद्गणेन च, एकस्वरनिमित्तं च पञ्चैतानि न यङ्लुपी 'ति न्यायेन चतुर्थत्वं न भवति, व्यतिदात्से इति सिद्ध्यति ॥ **न धा** अधा तस्मात्, चतुर्थात्, त च थ च तथौ तयोः षष्ठी, धः प्रथमा ॥ तथोरित्यस्यानुवृत्तिसम्भवेऽपि पुनस्तथोर्ग्रहणं कार्यित्वार्थम् । पूर्वसूत्रे हि तथोरित्यस्य सप्तम्यन्ततया निमित्तत्वेनोपादानं कृतम् । दुह् धातोरद्यतने तप्रत्यये सकि, लोपे हकारस्य घत्वेऽनेन धत्वं घस्य च गः, अडागमश्च एवमग्रेऽपि । ज्ञानं बुध्यत इति ज्ञानभुत्तस्य भावः, अत्र त्वप्रत्ययो

विहितविशेषणं किम् ? ज्ञानमुत्त्वम् ॥ **नाम्यन्तात् परोक्षाद्यतन्याशिषो धो ढः** ॥ ८० ॥ रान्तान्नाम्यन्ताच्च धातोः परासां परोक्षाद्यतन्याशिषां धो ढः स्यात् । तुष्टुढ्वे, अतीर्ढ्वम्, चेषीढ्वम्, तीर्षीढ्वम् । नाम्यन्तादिति किम् ? अपगध्वम्, आसिध्वम् ॥ **हान्तस्थाञ्झीड्भ्यां वा** ॥ ८१ ॥ हादन्तस्थायाश्च परात् झेरिटश्च परासां परोक्षाद्यतन्याशिषां धो द् वा स्यात् । अग्राहिढ्वम्, अग्राहिध्वम्,

---

नाम्नो विहितो न तु धातोः, अत्र अध इतिवर्जनेन शुद्धधातोरेव विवक्षिततया ' क्विबन्ता धातुत्वं नोज्झन्ती'ति न्यायाश्रयणेऽपि धो न भवति ॥ **र् च नामी च नामिनौ** तावन्ते यस्यासौ नाम्यन्तस्तस्मात्, परोक्षा चाद्यतनी चाशीश्च तस्य, धः षष्ठी ढः प्रथमा ॥ आक्षिप्तधातोर्नामीति विशेषणात्तदन्तविधिलाभेऽप्यन्तग्रहणं सुखार्थम् । स्तुधातोः **परोक्षायां** ध्वे परे द्वित्वे आद्यसलोपे षत्वे ष्टुत्वे चानेन धस्य ढत्वे तुष्टुढ्वे । तॄधातोरद्यतन्यां ध्वम्यडागमे सिचि च तलोपे ऋतः इरि दीर्घेऽनेन ढे अतीर्ढ्वम् । चेषीढ्वमिति चिधातोराशिषस्तीर्षीढ्वमिति च तॄधातोराशिषि रूपम् । अपगध्वमित्यत्र न नाम्यन्तात्परो ध्वः, आसिध्वमित्यत्र तु नाम्यन्ताद् ध्वस्य परत्वेऽपि नाम्यन्तादिति धातोर्विशेषणत्वेन नाम्यन्तधातुत्वाभावान्न ढः ॥ **हश्चान्तस्था** च तस्मात्, **ञिश्च इट् च ताभ्याम्, वा** ॥ परोक्षाद्यतन्याशिषो धो ढ इत्यनुवर्तन्ते । वचनभेदो यथासङ्ख्यनिवृत्त्यर्थः । अग्राहिढ्वमत्र हकारात् ञिटः परस्याद्यतनीधकारस्य वा ढः । ग्राहिषीढ्वमित्याशिषो रूपम् । अनायिढ्वमित्यन्तस्थायाः ञेः परस्याद्यतनी धस्य वा ढः । अकारिढ्वमिति इटः । जगृहिढ्वे इत्यादि परोक्षायाः । ञिटः स्वतन्त्रत्वात्, इटस्तु प्रत्ययावयवत्वेन प्रत्ययत्वात्, धातोर्नाम्यन्तत्वाभावे पूर्वेण ढस्याप्राप्तौ विकल्पार्थमिदं सूत्रम् ॥ **हः षष्ठी, धुट् च पदान्तश्च तस्मिन्** ॥ ढ इति वर्तते । तृचि परे लिह्धातोर्हस्यानेन ढः । मधुलेढीति

ग्राहिषीढ्वम्, ग्राहिषीध्वम्, अनायिढ्वम्, अनायिध्वम् । नायिषीढ्वम्, नायिषीध्वम् । अकारिढ्वम्, अकारिध्वम् । अलाविढ्वम्, अलाविध्वम् जगृहिढ्वे, जगृहिध्वे । आयिढ्वम्, आयिध्वम् । हान्तस्थादिति किम् ? घानिषीध्वम्, आसिषीध्वम् ॥ **हो धुट्पदान्ते** ॥ ८२ ॥ धुटि प्रत्यये पदान्ते च हो द् स्यात् । लेढा, मधुलिट्, गुडलिण्मान् । धुट्पदान्त इति किम् ? मधुलिहौ ॥ **भ्वादेर्दार्देर्घः** ॥ ८३ ॥ भ्वादेर्धातोर्यो दादिरवयवस्तस्य हो धुटि प्रत्यये परे पदान्ते च धः स्यात् । दोग्धा, धोक्ष्यति, अधोक्, गोधुक् । भ्वादेरिति किम् ? दामलिट् ॥ **मुहद्रुहष्णुहष्णिहो वा** ॥ ८४ ॥ एषां हो धुटि प्रत्यये पदान्ते च घ् वा स्यात् । मोग्धा मोढा । उन्मुक् उन्मुट् । द्रोग्धा द्रोढा । मित्रध्रुक् मित्रध्रुट् । स्नोग्धा स्नोढा । उत्स्नुक् उत्स्नुट् । स्नेग्धा स्नेढा । चेल-

---

मधुलिट् क्विं, पदान्तत्वादनेन हो ढः । गुडं लेढीति गुडलिट् सोऽत्रास्तीति गुडलिण्मान्, अत्र ढत्वतृतीयत्वयोरसत्त्वान्मावर्णेत्यादिना न वः । मधुलिहाविति यत्र मधुलेढीति विग्रहे 'गतिकारकङस्युक्तानां विभक्त्यन्तानामेव कृदन्तैर्विभक्तयुत्पत्तेः प्रागेव समास' इति न्यायेन विभक्तयुत्पत्तेः प्रागेव समासेऽन्तर्वर्तिन्या विभक्तेरभावान्न पदत्वप्राप्तिर्येनान्तर्वर्त्तिविभक्त्याश्रयेण पदान्तत्वाद्धत्वप्राप्त्याशङ्का स्यात् । लीढे इति लिड्, मधुनो लिड् मधुलिड् तौ, मधुलिहाविति समासेऽपि नात्र लिहित्यस्य पदत्वं वृत्त्यन्तोऽसषे इति पदत्वनिषेधात् ॥ **भ्वादेः षष्ठी, द आदिर्यस्य स** दादिस्तस्य घः प्रथमा ॥ पूर्वसूत्रमनुवर्तते । दोग्धीति दोग्धा तृच्, धुट्परत्वादनेन हस्य घः । धोक्ष्यतीत्यत्रानेन धकारे गडदवेत्यादेर्दस्य धकारः । एतदर्थमेव गो न विहितः । गां दोग्धीति गोधुक् । दामलिहमिच्छति, ततः किपि दामलिट्, अयं दकारादिनामधातुः, न तु भ्वादिः, ॥ मुहश्च द्रुहश्च ष्णुहश्च ष्णिहश्च तस्य, वा ॥ द्रुहो नित्यं प्राप्तेऽन्येषां चाप्राप्ते वि-

स्निक् चेलस्निट् ॥ **नहाहोर्द्धतौ** ॥८५॥ नहेर्ब्रूस्थानाहश्च धातोर्हो, धुटि प्रत्यये पदान्ते च, यथासङ्ख्यं धतौ स्याताम्। नद्धा, उपानद्भ्यामात्थ ॥ **चजः कगम्** ॥ ८६ ॥ धुटि प्रत्यये पदान्ते च, चजोः कगौ स्याताम्। वक्ता, वाक्, त्यक्ता, अर्द्धभाक् ॥ **यजसृजमृजराजभ्राजभ्रस्जव्रश्चपरिव्राजः शः षः** ॥ ८७ ॥ यजादीनां धातूनाञ्चजोः शस्य च, धुटि प्रत्यये पदान्ते च षः स्यात्। यष्टा, देवेट्। स्रष्टा, तीर्थसृट्। मार्ष्टा, कंसपरिमृट्। राष्टिः, सम्राट्। भ्राष्टिः, विभ्राट्।

कल्पः। पक्षे तु हो धुट् पदान्ते इति ढः। ऊर्ध्वं मुह्यतीति उन्मुक् क्विप् ॥ **नह् चाह् च तयोः षष्ठी, धश्च तश्च धतौ** ॥ हो धुट् पदान्त इति सम्बध्यन्ते। आहोऽन्यस्यासम्भवाद्ब्रूस्थानेत्युक्तम्। आत्थेत्याहःआदेशान्तरकरणमधश्चतुर्थात्तथोर्ध इति थस्य धत्वनिवृत्त्यर्थम्। **चश्च ज् च तस्य, कश्च गश्च कगम्** ॥ धुट्पदान्ते इति प्रवर्त्तते। चजोर्यद्यपि कगान्यतरविधानादपीष्टसिद्धिस्तथापि कविधाने लग्नादीनां गविधाने पकादीनामसिद्धिः स्यादतो यथासङ्ख्येनोभयविधानम् ॥ **यजश्च सृजश्च मृजश्च राजश्च भ्राजश्च भ्रस्जश्च व्रश्चश्च परिव्राजश्च तस्य, शः षष्ठी, षः प्रथमा** ॥ धुट् पदान्ते चज इति वर्तते। यजतीति यष्टा तृच्, देवान्यजत इति देवेट् 'यजादिवचेः', सृजतीति स्रष्टा तृच्, 'अः सृजिदृशोऽकित्य' कारागमः, कंसं परिमार्ष्टीति कंसपरिमृट्, राजनं राष्टिः, अस्मान्नान्यो धुट्प्रत्ययः परो लभ्यते इटा व्यवधानादत्र तु 'क्ते ग्रहादिभ्य' इति नियमात् क्तौ इडभावः, एवं भ्राजोऽपि। राजिसहचरितस्य टुभ्राजृग् दीप्तावित्यस्यैव ग्रहणादेजृङ् भ्रेजृङ् भ्राजि दीप्तावित्यस्य गत्वमेव। धानाः भृज्जतीति धानाभृट् क्विप्, मूलं वृश्चतीति मूलवृट् क्विप्, परिव्रजतीत्येवंशीलः परिव्राट्, परित्यज्य सर्वं व्रजतीति वा, लिशं ऋषैत् गतौ, लिशतीति लेष्टा, प्रच्छंत् ज्ञीप्सायां पृच्छतीति तृच्, 'अनुनासिके च च्छ्वः शूडि' ति शोऽनेन षः, शब्दं पृच्छतीत्येवंशीलः शब्दप्राट्। आदेशोऽपि

भ्रष्टा, धानाभृट्। व्रष्टा, मूलवृट्। परिव्राट्। लेष्टा, प्रष्टा, शब्दप्राट्। यजादिसाहचर्याच्छोऽपि धातोरेव स्यात्। इह मा भूत्, निज्भ्याम्। चज इत्येव ? वृक्षवृश्चमाचष्टे वृक्षव्॥ **संयोगस्यादौ स्कोर्लुक्॥ ८८॥** धुट्प्रत्यये पदान्ते च संयोगादिस्थयोः स्कोर्लुक् स्यात्। लग्नः, साधुलक्, वृक्णः, मूलवृट्, तृष्टः, काष्ठतट्॥ **पदस्य ॥८९॥** पदस्य संयोगान्तस्य लुक् स्यात्। पुमान्, पुंभिः, महान्। पदस्येति किम् ? स्कन्त्वा॥ **रात्सः॥ ९०॥** पदस्य संयोगान्तस्य यो रस्ततः परस्य सस्यैव लुक् स्यात्। चिकीः, कटचिकीः। स एवेति

शकारोऽत्र सूत्रे गृह्यते। निशाभ्यां अत्र मासनिशासनस्येत्यन्तलुकि धुटस्तृतीयः, शस्य जः, जस्य तु परे गत्वेऽसत्त्वाच्चजः कगमिति गत्वं न भवति। पाणिनीये तु निड्भ्यामिति षत्वमिष्यते। वृक्षवृश्चेति व्रश्चधातोः सद्भावेऽपि चकारो नास्ति॥ **संयोगस्य, आदौ, स् च क् च स्कौ** तयोः षष्ठी, **लुक्॥** धुट्पदान्त इत्यायाति। वैयाकरणसम्प्रदायाद्व्यञ्जनैरानन्तर्यं संयोगः। ओलस्जैङ् लज्जायां क्तप्रत्ययः, 'सूयत्याद्योदितः' तस्य नः, चजः कगमनेन सलुक्। साधु लज्जत इति साधुलक्। मूलं व्रश्चतीति मूलवृट्, काष्ठानि तक्ष्णोतीति काष्ठतट् कलोपः॥ **पदस्य ॥** संयोगस्य लुगित्यनुवर्तते। पुंभिरनेन सकारलोपः, महानित्यत्र तु तकारलोपः। स्कन्दृंगतिशोषणयोः। त्वाप्रत्यये सति दलोपो न॥ **रात्पञ्चमी, सः षष्ठी॥** संयोगस्य, लुक्, पदस्येत्यनुवर्तते। पूर्वसूत्रेण सिद्धे नियमार्थमिदम्। चिकीर्षतीति चिकीः, सिलोपेऽनेन सलोपः षत्वस्य परेऽसत्त्वात्। ऊर्जयतीति ऊर्क्। न्युपसर्गान्मृजेर्दिवि दिव्लोपे षत्वे ढत्वे टत्वे न्यमार्ट्, अत्र कटयोर्न लोपः, रात्सस्यैव लुग्नियमात्। ' पुंवदि 'त्यादिनिर्देशाद्रादेव सस्य लुगिति न विपरीतनियमः। **असदधिकारो निवृत्तः॥ नाम्नः षष्ठी, नः षष्ठी,** न हन् अहन् तस्य॥ पदस्य लुगित्यनुवर्तते। पदस्य

किम् ? ऊर्क्, न्यमार्ट् ॥ **नाम्नो नोऽनह्नः** ॥ ९१ ॥ पदान्ते नाम्नो नस्य लुक् स्यात् । स चेदह्नो न स्यात् । राजा, राजपुरुषः । अनह्न इति किम् ? अहरेति ॥ **नामन्त्ये** ॥ ९२ ॥ आमन्त्यार्थस्य नाम्नो नस्य लुग् न स्यात् । हे राजन् ! ॥ **क्लीबे वा** ॥९३॥ आमन्त्यार्थस्य नाम्नः क्लीबे नस्य लुग्वा स्यात् । हे दाम !, हे दामन् ! ॥ **मावर्णान्तोपान्त्यापञ्चमवर्गान् मतोर्मो वः**

नो विशेषणत्वात्तदन्तविधिः । स्यादिविधावित्यस्याधिकारसत्त्वेन तद्विधावयं नलोपोऽसिद्धः, अत एव राजभ्यां राजभिः राजस्वित्यादावदन्तत्वविरहेण दीर्घत्वैस्त्वैत्वानि न भवन्ति। अहरेतीत्यत्र रो लुप्यरीति रत्वम् ,रस्य परत्वाज्जायमाने नलोपविधावसत्त्वान्नलोपः प्राप्तोऽतोऽनह्न इत्युक्तम् । स्यादिविधावसत्त्वादेव राजायत इत्यादौ 'दीर्घश्चियङ्यक्येषु चे'ति दीर्घो भवति । **न, आमन्त्ये** ॥ **नाम्नो नो** लुगित्यभिसम्बध्यन्ते ॥ अनेन सूत्रेण नाम्नो नोऽनह्न इत्यनन्तरसूत्रविहितस्य नकारलुको निषेधः क्रियते, न तु परम्परैः रात्स इत्यादिपूर्वसूत्रैर्विहितानां सकारलुगादीनामनन्तरस्यैव विधिर्निषेधो वे'ति न्यायात् ॥ **क्लीबे**, वा **आमन्त्ये**, **नाम्नो नो** लुगिति पदानि सम्बध्यन्ते । **मश्चावर्णश्च मावर्णौ**, **अन्तश्चोपान्त्यश्चान्तोपान्त्यौ**, मावर्णावन्तोपान्त्यौ यस्य, नास्ति पञ्चमो यस्मिन्सोऽपञ्चमः, अपञ्चमश्चासौ वर्गश्चापञ्चमवर्गः, मावर्णान्तोपान्त्यश्च अपञ्चमवर्गश्च मावर्णान्तोपान्त्यापञ्चमवर्गस्तस्मात्, मतोः षष्ठी, मःषष्ठी, वः प्रथमा ॥ नाम्न इति पञ्चम्यन्ततया सम्बध्यते, तस्य विशेषणं वर्गान्तपदं ततस्तदन्तविधिः । किं विद्यतेऽस्य किंवान्, मकारान्तस्योदाहरणमिदम् । शमी विद्यतेऽस्मिन्देश इति शमीवान्, मकारोपान्त्यस्योदाहरणम् । वृक्षोऽत्रास्तीति वृक्षवान्, अवर्णान्तस्योदाहरणम् । अहो विद्यतेऽस्येत्यहर्वान्, अवर्णोपान्त्यस्योदाहरणम्। मरुद्विद्यतेऽत्रेति मरुत्वान्, अपञ्च-

॥ ९४ ॥ मावर्णौ प्रत्येकमन्तोपान्त्यौ यस्य तस्मात्पञ्चमवर्जवर्गान्ताच्च नाम्नः परस्य मतोर्मो वः स्यात् । किंवान्, शमीवान्, वृक्षवान्, मालावान्, अहर्वान्, भास्वान्, मरुत्वान् ॥ **नाम्नि** ॥९५॥ संज्ञायां मतोर्मो वः स्यात् । अहीवती मुनीवती नद्यौ ॥ **चर्मण्वत्यष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वत्** ॥ ९६ ॥ एते मत्वन्ताः संज्ञायां निपात्यन्ते । चर्मण्वती नाम नदी, अष्ठीवान् जानुः, चक्रीवान् खरः, कक्षीवान् ऋषिः, रुमण्वान्गिरिः ॥ **उदन्वानब्धौ च** ॥ ९७ ॥ अब्धौ जलाधारे नाम्नि च मतावुदन्वान्निपात्यते । उदन्वान्घटः, उदन्वान्समुद्रः, ऋषिराश्रमश्च । **राजन्वान्सुराज्ञि** ॥ ९८ ॥ सुराजकेऽर्थे राजन्वान्मतौ निपात्यते । राजन्वान्देशः, राजन्वत्यः प्रजाः ॥

मवर्गान्तस्योदाहरणम् । **नाम्नि सप्तमी** ॥ **मतोर्मो** व इति सम्बध्यते । नाम द्विधा, रामकृष्णादिनाम लौकिकमस्यैव संज्ञेति प्रसिद्धिः, अधातुविभक्तीति सूत्रविहितं नाम शास्त्रीयमत्र शास्त्रीयस्यैव नाम्नो ग्रहणे प्रसक्ते नामाधिकारेणैव तदर्थस्य लाभादिदं नामातिरिच्यमानं लौकिकं नाम ज्ञापयति, अत एव संज्ञायामित्युक्तम् । अहीनामदूरभवा, अहिभिर्निर्वृत्ता, अहयो यत्र सन्ति नद्याम् । मतुरिति चातुरर्थिको मतुः, 'अनजिरादी'ति दीर्घत्वम् ॥ चर्मण्वती चाष्ठीवच्च चक्रीवच्च कक्षीवच्च रुमण्वच्च । नाम्नीति वर्तते । संज्ञायामेते शब्दा एवंरूपा एवेत्यर्थः ॥ चर्मन्शब्दस्य नलोपाभावो णत्वञ्च निपात्यते, अस्थिशब्दस्याष्ठीभावः, चक्रशब्दस्य चक्रीभावः, चक्रीवान्नाम राजा, कक्ष्याशब्दस्य कक्षीभावः, लवणस्य रुमण्भावः ॥ **उदन्वान्प्रथमाब्धौ सप्तमी, च** ॥ चशब्देन नाम्नीति शब्दस्यानुकर्षः । उदक्शब्दस्योदन्भावो निपात्यते उदकमत्रास्तीति मतुः प्रत्ययः ॥ **राजन्वान् शोभनो राजा यस्मिन्तस्मिन्** ॥ नलोपाभावः निपात्यते ॥ **न, ऊर्मिरादिर्येषु तेभ्यः** ॥ मतोर्मो व इत्यनुवर्तते । ऊर्मिमानित्यत्र

नोर्म्यादिभ्यः ॥ ९९ ॥ ऊर्म्यादिभ्यो मतोर्मो वो न स्यात्। ऊर्म्मिमान्, दर्म्मिमानित्यादि ॥ **मासनिशासनस्य शसादौ लुग्वा ॥१००॥** शसादौ स्यादावेषां लुग्वा स्यात्। मासः मासान्, निशः निशाः, आसनि आसने ॥ **दन्तपादनासिकाहृदयासृग्यूषोदकदोर्यकृच्छकृतो दत्पन्नस्हृदसन्यूषन्नुदन्दोषन्यकञ्छकन्वा ॥१०१॥** शसादौ स्यादौ दन्तादीनां यथासङ्ख्यं ददित्यादयो वा स्युः। दतः, दन्तान्। पदः, पादान्। नसा, नासिकया। हृदि, हृदये। अस्ना, असृजा। यूष्णा, यूषेण। उद्ना, उदकेन। दोष्णा, दोषा। यक्ना, यकृता। शक्ना, शकृता ॥ **यस्वरे पादः पदणिक्यघुटि ॥ १०२ ॥** णिक्यघुट्वर्जे यादौ

मोपान्त्यत्वाद्वत्वे प्राप्ते निषेधः। बहुवचनमाकृतिगणार्थं तेन यस्य सति निमित्ते मतोर्वत्वं न दृश्यते स ऊर्म्यादिषु द्रष्टव्यः। स्यादिविधावसदधिकारोऽत्र निवृत्तः ॥ **मासश्च निशा चासनश्च तस्य,** शस् आदिर्यस्य तस्मिन्, लुग्, वा ॥ षष्ठ्यान्त्यस्येति मासशब्दस्य शस्यकारलोपः। एवमग्रे। शसादिर्न स्यादिभिन्नो भवत्यतः स्यादावित्युक्तम्। तद्धितशसः सम्भवेऽप्यादिपदं व्यर्थं स्यात्, मण्डूकप्लुत्या वा स्यादिरनुवर्त्तनीयः, आदिशब्दस्य व्यवस्थावाचित्वाद्वा स्यादिरेव लभ्यते ॥ **दन्ताश्च पादौ च नासिका च हृदयञ्चासृक्च यूषञ्च उदकञ्च दोश्च यकृच्च शकृच्च तस्य,** दच्च पच्च नश्च हृद्चासन् च, यूषन्च उदन्च दोष्णन्च यकन्च छकन्च, वा ॥ शसादावित्यनुवर्त्तते ॥ **यश्च स्वरश्च तस्मिन्पादः षष्ठी, पद् प्रथमा,** णिश्च क्यश्च घुट् च, न णिक्यघुट् अणिक्यघुट् तस्मिन् ॥ व्याघ्रस्येव पादावस्येति व्याघ्रपाद् 'पात्पादस्याऽहस्त्यादे' स्तस्यापत्यं वैयाघ्रपद्यः, 'गर्गादेर्यञ्' अनेन पादः पद्। द्वौ पादौ येषान्ते द्विपादः 'सुसङ्ख्यात्' पादस्य पादादेशस्ताननेन पद्। पादन्तस्य नाम्नो पदादेशविधानेन

स्वरादौ च प्रत्यये पादन्तस्य पद् स्यात् । वैयाघ्रपद्यः, द्विपदः पश्य । पादयतेः क्विपि ? पाद् । पदी कुले । यस्वर इति किम् ? द्विपाद्भ्याम् । अणिक्यघुटीति किम् ? पादयति, व्याघ्रपाद्यति, द्विपादौ ॥ **उदच उदीच्** ॥ १०३ ॥ अणिक्यघुटि यस्वरे उदच उदीच् स्यात् । उदीच्यः, उदीची । अणिक्यघुटीत्येव ? उदयति, उदच्यति, उदञ्चः ।

'**अनेकवर्णः सर्वस्ये**'ति परिभाषया पादन्तस्य नाम्नः सर्वस्य पद्भावः प्राप्नोति, तथापि '**निर्दिश्यमानस्यैवादेशाः स्युरि**'ति न्यायेन पाद एव सूत्रे निर्देशेन श्रुतत्वात्पादन्तनाम्नश्चानुमितत्वात् '**श्रुतानुमितयोरि**'ति न्यायेन च पाद एव पद्भावो भवति । पादयतेः क्विपि सौ पादिति रूपं ततः ङीबे औप्रत्यये परेऽनेन पदादेशे पदी, व्यपदेशिवद्भावेन पादन्तत्वम् । पादयतीत्यत्र पाच्छब्दाण्णौ, 'नैकस्वरस्ये'ति लोपाभावे णिपरत्वादनेन पदादेशाभावात्पादयति । नायं **पादशब्दस्य** प्रयोगः । णिच्यलोपस्य स्थानित्वेन पाच्छब्दाभावात् । **क्येति** क्यन्क्यङोः सामान्येन ग्रहणम् । व्याघ्रपादमिच्छति व्याघ्रपादिवाचरति वा णिक्यघुटां प्रत्ययत्वात्तत्पर्युदासेन प्रत्ययस्य प्राप्तौ 'सप्तम्या आदिरि'ति यादौ स्वरादौ प्रत्यय इति लभ्यते, तथा च सति णिवर्ज्जनं व्यर्थं णेरेकस्वरत्वेन स्वरादित्वाभावात्, तथा च तद् '**आद्यन्तवदेकस्मिन्नि**' ति न्यायं गमयति, सत्यन्यस्मिन्यस्मात्पूर्वं नास्ति परमस्ति स आदिरित्युच्यते, सत्यन्यस्मिन्यस्मात्परं नास्ति पूर्वमस्ति सोऽन्त इत्युच्यते, सत्यन्यस्मिन्नाद्यन्तवद्भावात्, एतस्मात्कारणादेकस्मिन्नाद्यन्तापदिष्टानि कार्याणि न सिद्ध्यन्तीतीष्यन्ते चैवमर्थमयं न्यायः । एकशब्दोऽसहायवचनः, एकस्मिन्नित्युपमेये सप्तमीनिर्देशादाद्यन्तवदित्युपमानात्सप्तम्यन्ताद्वृतिर्विज्ञायते । एवञ्च यत्रैक एव वर्णो नाम वास्ति, कार्यन्तु तदादिकस्य तदन्तस्य वोक्तं तत्र तदेवैकमादित्वेनान्तत्वेन च

उदच इति किम् ? नि मा भूत्, उदञ्चा, उदञ्चे ॥ **अच्च् प्राग्दीर्घश्च** ॥ १०४ ॥ अणिक्यघुटि यस्वरादौ प्रत्ययेऽच् चः स्यात्, प्राक्स्वरस्य दीर्घः ॥ प्राच्यः, दधीचा । अणिक्यघुटीत्येव ? दध्यति, दध्यच्यति, दध्यञ्चः । अचिति किम् ? नि मा भूत्, साध्वञ्चा ॥ **क्वसुष्मतौ च** ॥ १०५ ॥ अणिक्यघुटि यस्वरे मतौ च प्रत्यये

प्रकल्प्य तत्कार्यं विधेयमिति तदर्थः । तथा च स्वरमात्रस्यापि णेरेत्न्यायात्स्वरादित्वं भवतीति पदादेशे प्राप्ते तत्प्रतिषेधाय णिवर्ज्जनम् ॥ **उदचः षष्ठी, उदीच् प्रथमा** ॥ यस्वरे, अणिक्यघुटीति वर्तते । उदञ्चतीति क्विप्, अञ्चू गतौ, अञ्चोऽनर्चायां नलोपः, उदीचि भवः उदीच्यः, 'द्युप्रागपागुदक्प्रतीचो य' इति यः प्रत्ययः । उदीची अञ्च इति ङीः । उदञ्चेर्णौ ' त्रन्त्यस्वरादे ' रित्यञ्चो लुक्युदयतीति भवत्यतो णिवर्ज्जनम्, न च उदीचादेशेऽपि लुक्युदयतीति रूपसिद्धौ णिवर्जनमनर्थकमिति वाच्यं 'सकृद्गते स्पर्द्धे यद्बाधितं तद्बाधितमेवे'ति न्यायज्ञापनार्थत्वात्, सत्यस्मिन्न्याये लुकं बाधित्वा विशेषविहितत्वादुदचादेशे पश्चादुक्तन्यायेन लुगप्राप्त्या उदीचयतीत्येव स्यादतो णिवर्जनं कृतम् । पाणिनीये उदञ्चमाचष्टे उदीचयतीत्येव रूपमुदयतीति तु इटकिटकटी गतावित्यत्र प्रक्षिप्तस्य इधातोः रूपमिति ॥ **उदच इति किमिति**, उदञ्च इत्यनुक्त्वा लुप्तनकारस्याञ्चतेर्निर्देशः किमर्थ इति प्रश्नार्थः । नकारस्य सद्भावे मा भूत्, पूजायां हि नलोपाभावान्नकारस्य सद्भावोऽघुट्यपीति तत्रादेशप्रतिषेधः ॥ **अच् प्रथमा, च् प्रथमा, प्राक्, दीर्घः, च** ॥ पूर्ववदनुवर्त्तनम् । प्राचि भवः प्राच्यः, अञ्चोऽनर्चायामनेनाचः च्, पूर्वस्य च दीर्घः, स च स्वरस्य, 'स्वरस्य ह्रस्वदीर्घप्लुता' इति न्यायादन्यथा दृषदमञ्चन्तीति क्विपि द्वितीयाबहुवचने दृषच्चः इति भवति, अत्रापि दकारस्य प्राक्स्थितस्य प्रत्यासन्नो ऋदीर्घः प्राप्नुयात् । दध्यञ्चतीति क्विप् तेन । दध्यञ्च-

कस् उष् स्यात् । विदुष्यः, विदुषा, विदुष्मान् । अणिक्यघुटीत्येव ? विद्वयति, विद्वस्यति, विद्वांसः ॥ **श्वन्युवन्मघोनो ङीस्याद्यघुट्स्वरे च उः** ॥ १०६ ॥ ङ्यां स्याद्यघुट्स्वरे च श्वनादीनां व उः स्यात् । शुनी, शुनः । अतियूनी, यूनः । मघोनी, मघोनः । ङीस्याद्यघुट्स्वर इति किम् ? शौवनम्, यौवनम्, माघवनम् ॥ **लुगातोऽनापः** ॥ १०७ ॥ आब्वर्जस्यातो ङीस्याद्यघुट्स्वरे लुक् स्यात् । कीलालपः हाहे देहि । अनाप इति किम् ? शालाः ॥ **अनोऽस्य** ॥ १०८ ॥ ङीस्याद्यघुट्स्वरेऽनोऽस्य लुक् स्यात् । राज्ञी राज्ञः ॥

माचष्टे दध्ययति ॥ **कस्, उष्, मतौ, च** ॥ अनुवृत्तिः पूर्ववत् । विदक् ज्ञाने, वेत्तीति विद्वान् 'वेत्तेः कसुः' विदुषि साधुः, 'तत्र साधौ यः' प्रत्ययः, वसो उष् । विद्वांसो विद्यन्ते यत्रासौ विदुष्मान् । विद्वांसमाचष्टे णिच् विद्वयति, विद्वांसमिच्छति क्यन् विद्वस्यति ॥ इट्सहितस्यापि कसोरुषादेशः, 'आगमा यद्गुणीभूतास्तद्ग्रहणेन गृह्यन्त इति न्यायात् । इटो लोपार्थं सेटः कसोरुषादेशार्थं सूत्रान्तराकरणेनायं न्यायो ज्ञाप्यते । पेचुषीत्यादौ हि 'घसेकस्वरातः कसोरित्यनेन कसोरिट् भवति । तथा च पेचिवस् शब्दात्स्त्रीत्वे ङीकृते स्वरादिप्रत्ययपरत्वेनानेन सूत्रेण सेटः कसोरुषादेशः । एतन्न्यायाभावे हीटो दृश्यमानता स्यादिति ॥ **श्वा च युवा च मघवा च तस्य, न घुट् अघुट्, अघुट् चासौ स्वरश्च, स्यादेरघुट्स्वरः, ङीश्च स्याद्यघुट्स्वरश्च तस्मिन्, वः प्रथमा उः प्रथमा** ॥ श्वन् ङीः, अनेन वस्य उः शुनी, युवानमतिक्रान्ता 'स्त्रियां नृतोऽस्वस्रादेर्ङीरि' त्यतियूनी, अनेन वस्य उः, दीर्घश्च । मघोनः भार्या मघोनी, 'धवाद्योगादपालकान्तादि'ति ङीः, रि उःगुणः । शुनः इदं 'तस्येदं' अण् 'यवः पदान्तात्प्रागैदौदि'ति शकारवकारयोर्मध्ये औकारागमः । युनो भावो यौवनम् । मघोन इदम् । **लुक्, आतः षष्ठी, न आबनाप् तस्य** ॥ ङीस्याद्यघुट्स्वर इत्यनुवर्तते । कीलालं

ईङौ वा ॥१०९॥ ईकारे ङौ च परेऽनोऽस्य लुग्वा स्यात्। साम्नी, सामनी। राज्ञि, राजनि ॥ **षादेहन्घृतराज्ञोऽणि ॥ ११० ॥** षादेरनो हनो घृतराज्ञश्चातोऽणि प्रत्यये लुक् स्यात्। औक्ष्णः, ताक्ष्णः, भ्रौणघ्नः, धार्तराज्ञः ॥ **न वमन्तसंयोगात् ॥ १११ ॥** वान्तान्मान्ताच्च संयोगात्परस्यानोऽस्य लुग्न स्यात्। पर्वणा, कर्मणी ॥ **हनो ह्नो घ्नः ॥ ११२ ॥** हन्तेर्ह्नो घ्नः स्यात्। भ्रूणघ्नी, घ्नन्ति। ह्न इति किम्? वृत्रहणौ ॥ **लुगस्यादेत्यपदे ॥ ११३ ॥** अपदादावकारे एकारे च परेऽस्य लुक् स्यात्। सः, पचन्ति, पचे। अपद इति किम्? दण्डाग्रम् ॥ **डित्यन्त्यस्वरादेः ॥ ११४॥** स्वराणां

पिबन्ति तान्, विच्, आकारलोपः। हाशब्दं ओहाङ्गतौ—जिहीते गीतकाले कर्त्तव्यत्याऽऽप्नोतीति विच् तस्मै। पाणिनीयेऽपि हाहाशब्दस्य व्युत्पत्तिपक्षे, अव्युत्पत्तिपक्षे तु धातुसम्बन्धिन एवाऽऽकारस्य लोपकथनादव्युत्पन्नस्य च धातुनिष्पन्नत्वाभावाच्चतुर्थ्यैकवचने हाहै इति रूपमेवमन्यत्राप्यघुट्स्वरे नाऽऽलोपस्तन्मते॥ **अनः षष्ठी, अस्य षष्ठी ॥** ङीस्याद्यघुट्स्वरे लुगित्यनुवर्त्तन्ते। राजन् शसित्यत्राघुट्स्वरपरत्वादनेनालोपः। 'तवर्गस्ये'ति नकारस्य णकारः, न च 'स्वरस्य परे प्राग्विधाविं'ति सूत्रे प्राचो विधिः प्राग्विधिरिति पञ्चमीसमासस्यापीष्टतया स्वरादेशात्परस्य विधौ णत्वे कर्त्तव्ये स्वरादेशस्य लोपस्य स्थानिवद्भावात्कथं ण इति वाच्यम्। 'न सन्धिङीयङिद्विदीर्घासद्विधावस्त्रुकी'ति सूत्रेणासन्धिविधौ स्थानिवद्भावप्रतिषेधाद्राज्ञः इति रूपम्॥ **ईश्च ङिश्च तस्मिन् वा ॥** अनोऽस्य लुगित्यनुवर्तते। ङिसाहचर्यादीकारोऽपि विभक्तिरूप एव ग्राह्यः। **ष आदिर्यस्य षादिः, षादिश्च हन् च घृतराजन् च तस्य, अणि ॥** लुगिति वर्तते। उक्ष्णः तक्ष्णोऽपत्ये अणि, अनेन षादित्वादनोऽस्य लुक्। भ्रूणं हतवान्, 'ब्रह्मभ्रूणे'ति किप्, भ्रूणघ्नोऽपत्यं, 'ङसोऽपत्येऽण्, अनेनालोपे 'हनो ह्नो घ्न' इति घ्नः। धृता राजानो येन, धृतराज्ञोऽपत्य-

योऽन्त्यस्वरस्तदादेः शब्दस्य डिति परे लुक् स्यात् । मुनौ, साधौ, पितुः ॥ **अवर्णादश्नोऽन्तो वाऽतुरीङ्योः** ॥ ११५ ॥ श्नावर्जादवर्णात् परस्यातुः स्थानेऽन्तो वा स्यात्, ईङ्योः । तुदन्ती, तुदती कुले स्त्री वा । एवं—भान्ती, भाती । अवर्णादिति किम् ? अदती । अश्न इति किम् ? लुनती ॥ **इयशवः** ॥ ११६ ॥ इयाच्छवश्च परस्याऽतुरीङ्योः परयोरन्त इत्यादेशः स्यात् ॥ दीव्यन्ती,

---

मिति धार्त्तराज्ञः । **न व्रश्च मृच वमौ, वमावन्तौ यस्य**, वमन्तश्चासौ संयोगश्च, तस्मात् ॥ अनोऽस्य लुगित्यनुवर्तन्ते । वमोः संयोगविशेषणत्वेन तदन्तत्वे लब्धेऽप्यन्तग्रहणं स्पष्टार्थम् । **पर्वणे**ति, तत्र अनोऽस्येति लोपे प्राप्तेऽनेन निषेधः, वान्तसंयोगात्परत्वादेवमग्रे । **हनः षष्ठी, हू च न् च हु तस्य, घ्नः** प्रथमा ॥ भ्रूणं हतवती भ्रूणघ्नी, 'ब्रह्मभ्रूणे'ति क्विप्, 'नवा शोणादेरि'ति ङीः 'अनोऽस्य' लुक् । घ्नन्तीति 'गमहनजने' त्यलोपः । वृत्रं हतवन्तौ वृत्रहणौ ॥ **लुग्, अस्य, अच्च एच्चादेत्तस्मिन्**, न पदमपदं तस्मिन् ॥ अपद इति अदेतोर्विशेषणं 'सप्तम्या आदिः' ॥ **दण्डाग्रमिति**, नन्वत्र वृत्त्यन्तोऽसषे इति प्रतिषेधादग्रमित्यस्य पदत्वाभावात्कथं नाकारलोपः ? सत्यम्, सावधारणत्वेन व्याख्यानादस्यापदे एवेति, अत्र तु वृत्तेः पूर्वं पदत्वमासीत् ॥ **ङ इदनुबन्धो यस्य, तस्मिन्, अन्त्यश्चासौ स्वरश्च**, स आदिर्यस्य, तस्य ॥ लुगिति वर्तते । अन्ते भवोऽन्त्यः । **मुनावित्यादाविवर्णादेरि**ति प्राप्ते परत्वात्सेर्डावित्यादौ डकारोच्चारणसामर्थ्याच्च लुगेव । 'आद्यन्तवदेकस्मिन्नि'ति न्यायेनेकारादीनां केवलानामपि व्यपदेशिवद्भावेनान्त्यस्वरादित्वं बोध्यम् । **अवर्णात्, न श्ना अश्ना तस्मात्**, अन्तः, वा, अतुः षष्ठी ईश्च ङीश्च तयोः ॥ तुदीत् व्यथने, तुदति तुदते इति वा, 'शत्रानशा' शतृप्रत्ययः तुदादेरः । 'अधातूदित' इति स्त्रियां ङीः, क्ङीचे औरीरनेन शतुरन्त इत्यादेशः, लुगस्यादेत्यपद इत्यलोपः । अतुरवर्णादित्यश्न इति च विशेषणात्तुदन्ती भान्ती-

पचन्ती ॥ **दिव औः सौ** ॥ ११७ ॥ दिवः सौ परे औः स्यात्। द्यौः ॥ **उः पदान्तेऽनूत्** ॥ ११८ ॥ पदान्तस्य दिव उः स्यात्। अनूत्, स तु दीर्घो न स्यात्। द्युभ्याम्, द्युषु। पदान्त इति किम्? दिवि। अनूदिति किम्? द्युभवति ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां श्रीसिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ द्वितीयस्याध्यायस्य प्रथमः पादः समाप्तः ॥ २ । १ । ११८ ॥

त्यादौ लुगस्यादेत्यपदे इति लोपस्य समानानामिति दीर्घस्य च वर्णमात्राश्रयत्वेनान्तरङ्गत्वात्पूर्वमेव कृते अतुरवर्णात्परत्वाभावेऽपि लोपदीर्घाभ्यां पूर्वमेवानेनान्तादेशः ॥ **इयश्च शव् च तस्मात्** ॥ अन्तोऽतुरीङ्योरित्यनुवर्तन्ते। दीव्यतीति दीव्यन्ती, पचतीति पचन्ती, शतृप्रत्ययः, इयः शव् च। अधातूदृदित इति ङीः। अथवा क्लीबे औरीः। अनेनान्तादेशः, लुगस्यादेत्यपदे ॥ **दिवः षष्ठी, औः प्रथमा, सौ** ॥ 'षष्ठ्यान्त्यस्य', दिव् सि, अनेन वस्य औ, यत्वं विसर्गः। अत्रौकारस्य स्थानिवद्भावेन व्यञ्जनत्वाद्दीर्घङ्याबित्यनेन यद्यपि सेर्लोपः प्राप्तस्तथापि वर्णविधौ स्थानिवद्भावनिषेधाल्लोपो न। स्थानिवर्णाश्रयेण यत्कार्यं भवति स वर्णविधिरुच्यते। सोऽयं वर्णविधिर्वर्णात्परस्य विधिः, वर्णे परतो विधिः, वर्णस्य स्थाने विधिः, वर्णेन विधिः, अप्रधानवर्णाश्रयो वा विधिरिति समासभेदाद्भवति। अत्र सर्वत्र चावर्णविधाविति प्रतिषेधो भवति। प्रकृते वर्णात्परस्य विधिः प्राप्तः, स प्रतिषिद्धः ॥ अत्राव्युत्पन्नस्य दिवो ग्रहणं न तु दिवू क्रीडायामिति धातोः, 'निरनुबन्धग्रहणे न सानुबन्धस्ये'ति न्यायात्तेनाक्षैर्दीव्यतीत्यक्षद्यूरित्यादौ न भवति ॥ **उः प्रथमा, पदान्ते, न ऊदनूत्प्रथमा** ॥ दिवः इति वर्तते। द्युभ्यामिति, अनेन वस्य उर्यत्वम्। अद्यौर्द्यौर्भवति, च्विः प्रत्ययः, अप्रयोगीत्, अव्ययस्य, दीर्घश्च्वयङीति दीर्घे प्राप्तेऽत्रानूदिति विधानात्प्रतिषेधः ॥

इति द्वितीयाध्याये प्रथमपादस्यावचूरिपरिष्कारः समाप्तः ॥

॥ अथ द्वितीयाध्याये द्वितीयः पादः ॥



क्रियाहेतुः कारकम् ॥ १ ॥ क्रियाया निमित्तं कर्त्रादि

क्रियाया हेतुः क्रियाहेतुः, करोतीति कारकम् ॥ संज्ञासूत्रमिदम् । कारकमिति संज्ञानिर्देशः, क्रियाहेतुरिति संज्ञिनिर्देशः । कारकमिति महासंज्ञाकरणात्करोतीति कारकमित्यन्वर्थसंज्ञा विज्ञायते । न चान्वर्थसंज्ञाश्रयणे कर्तुरेव स्वतन्त्रस्य कर्तृसंज्ञावत्कारकसंज्ञाऽपि स्यात्, न तु करणादीनां कर्तृपरतन्त्राणाम् । तथा च करणं कारकं सम्प्रदानं कारकमित्यादिव्यवहारो न स्यादिति वाच्यम्, करणादीनामपि स्वस्वव्यापारे स्वातन्त्र्यात्कारकत्वसिद्धेः, पच्यादिधातूपात्तव्यापारे च पारतन्त्र्यात्करणत्वादिसम्भवाच्च । अत एव क्रियाहेतुरित्यत्र सामान्यभूता क्रिया ग्राह्या, तस्या हेतुर्निर्वर्तकम् । सर्वेषां हि कारकाणां क्रिया साध्यत्वेन साधारणी, ततश्च सर्वेषां तां प्रति कर्तृत्वम् । अत एव कर्ता कारकमिति प्रयोगोऽप्युपपद्यते । करोतीति कर्तेति व्युत्पादनेऽपि स्वतन्त्रः कर्त्तेति विधानात् स्वतः स्वातन्त्र्यमेव यस्य तस्यैव कर्तृत्वम् । कर्तृप्रत्ययान्तसिद्धा कारकसंज्ञा तु वस्तुतो विद्यमानमुद्भूतत्वेनाविवक्षितं स्वातन्त्र्यमाश्रित्य प्रवर्तते । अत एव कर्त्रादि कारकमित्युक्तम्, तच्च कारकं द्रव्याणां सामर्थ्यरूपम् । द्रव्यस्य कारकत्वे तु तस्य स्वरूपेण सिद्धस्वभावत्वात् क्रियाया हेतुर्न स्यात्, तथा कार्यवैचित्र्यं नोपपद्येत, दृश्यते च घटं पश्य, घटेन जलमाहर, घटेन जलं निधेहीत्यादौ कार्यवैचित्र्यम् । न च शक्तिभेदेऽपि द्रव्यस्यैकरूपत्वेन तत्रैकस्मिन्कथं कार्यवैचित्र्यं न बाधितमिति वाच्यम्, सर्वस्य द्रव्यस्य सर्वशक्त्याश्रयत्वेऽपि कदाचित्कस्याश्चिद्विवक्षया तत्त-

कारकं स्यात्। करोतीति कारकमित्यन्वर्थाश्रयणाच्च निमित्तत्वमात्रेणाना-

---

द्विचित्रानेककार्योपपत्तेः, क्वचिच्छक्त्याविष्टद्रव्यस्याऽपि साधनत्वेन व्यवहारः दण्डो घटसाधनमित्येवंरूपः, शक्तिशक्तिमतोरभेदस्यापि सत्त्वात्। शक्त्या करोतीत्यादौ शक्तेरपि द्रव्यायमाणतया शक्त्यन्तरयोगः। अत्र कर्तृकर्मणोः स्वाश्रयसमवेतक्रियाजनकता, यथा चैत्र आस्ते, ओदनं पचति, करणादीनामाश्रयान्तरसमवेतक्रियाजनकता, यथा दण्डेन घटं करोतीत्यादि, न हि करणादिषु क्रिया समवैतीति न तेषां स्वाश्रयसमवेतक्रियाजनकत्वम्, गौणक्रियापेक्षया तु सर्वेषां स्वाश्रयसमवेतक्रियाजनकत्वमेव, सर्वेषाञ्च कारकाणां स्वस्वावान्तरक्रियाद्वारा प्रधानक्रियानिष्पादकत्वम्। न च सम्प्रदानासत्त्वेऽपि तज्ज्ञानमात्रेणैव तदुद्देशेन दानदर्शनात्सम्प्रदानस्य क्रियाजनकत्वाभावेन कारकत्वं न स्यादिति वाच्यम्, असन्निहितसम्प्रदानस्यापि दातृबुद्धिस्थत्वावश्यकत्वेन दातृज्ञानपूर्वकालकत्वेनैव जनकत्वात्, तावतैव दानक्रियानिष्पत्तेः। घटं करोति स्मरतीत्यादौ बौद्धघटादेः पूर्वकालत्वेन स्मृत्यादिनिष्पादकत्वमूह्यम्। ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीत्यादौ ब्राह्मणस्य न कारकत्वं पुत्रेणान्यथासिद्ध्या कारकत्वाभावात्। तच्च द्रव्यगतशक्तिरूपं कारकं द्रव्यसहजातं यावद्द्रव्यमवस्थितञ्च, यथा शस्त्रादीनां विदारणशक्तेः सहजायाः यावद्द्रव्यभाविन्या अपि क्रियाकाले एवाभिव्यक्तेः, तथा कारकशक्तिरपि स्वकार्यनिष्पादनकाले एव प्रकाशते, प्रकाशकश्च न सिद्धस्वभावार्थाभिधायी शब्दः, किन्तु यथायथं विभक्त्यादिः। ननु यत् क्रियाया निर्वर्तकं तत्कारकसंज्ञं भवतीत्युक्तौ हेत्वादेरपि क्रियानिर्वर्तकत्वेन कारकत्वप्रसङ्ग इति चेन्न, कारकमित्यन्वर्थसंज्ञाश्रयणेन क्रियानिर्वर्तकस्यैव कारकसंज्ञात्वात्, हेत्वादेश्च व्यापारमनाश्रित्य विवक्षितार्थसिद्धौ योग्यतामात्रेण निमित्तत्वात्। कारकमित्येतावन्मात्रोक्तौ संज्ञाया

श्रितव्यापारस्य हेत्वादेः कारकसंज्ञा न स्यात् ॥ **स्वतन्त्रः कर्त्ता**

एव निर्देशः कृतः स्यान्न तु विशिष्टसंज्ञिनः । तथा च ग्रामस्य समीपादागच्छतीत्यादावकारकस्य ग्रामस्यापादानसंज्ञा स्यात् । न चात्र ग्रामो नापाययुक्तः किन्तु समीपमतो न दोष इति वाच्यम्, ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीत्यादौ पुत्रवद् ब्राह्मणस्याप्यप्रधानप्रयुक्तकर्मसंज्ञाप्रसङ्गादतः क्रियाहेतुरिति विशिष्टसंज्ञिनो निर्देशः कृतः । द्वितीयादिवत्प्रथमापि कारकविभक्तिरेव, क्रियायोगस्य तत्रापि सत्त्वादन्ततोऽस्तिक्रियायाः सर्वत्र सद्भावात्, आख्यातार्थकर्त्रादिनाऽभेदान्वयेन तद्द्वारको क्रियायोगो बोध्यः । अन्ये तु प्रकृत्यर्थस्य साक्षात्क्रियायोगेन प्रथमादिविभक्तीनां कारकविभक्तित्वं? परम्परया तद्योगेन वा? नाद्यः, प्रथमाप्रकृत्यर्थस्याश्रयाभेदद्वारकव्यक्तित्वसम्बन्धेन क्रियायामन्वयेन प्रथमायाः कारकविभक्तित्वानापत्तेः, नान्त्यः, माणवकस्य पितरं पन्थानं पृच्छतीत्यादौ माणवकपदोत्तरषष्ठ्या अपि कारकविभक्तित्वापत्तेः, परम्परया तद्योगस्य सत्त्वात् । न च क्रियानिष्ठविशेष्यतानिरूपितसंसर्गानवच्छिन्नप्रकारताप्रयोजकत्वमेव कारकविभक्तित्वमिति विवक्षणेनाभेदस्य संसर्गत्वाभावेन प्रथमायाः संसर्गानवच्छिन्नप्रकारताप्रयोजकत्वेन षष्ठ्याश्च जन्यजनकभावसंसर्गावच्छिन्नप्रकारताप्रयोजकत्वेनादोष इति वाच्यम्, सुन्दरस्य माणवकस्य पितरं पृच्छतीत्यादौ सुन्दरपदोत्तरषष्ठ्याः कारकविभक्तित्वापत्तेः संसर्गानवच्छिन्नप्रकारताप्रयोजकत्वादिति चेन्न, क्रियानिष्ठविशेष्यतानिरूपितकर्मत्वादिषट्केतरसम्बन्धघटितसम्बन्धानवच्छिन्नप्रकारताप्रयोजकत्वस्य कारकविभक्तित्वस्वीकारेणादोषात् ॥ **स्वतन्त्रः, कर्त्ता** ॥ स्वतन्त्रशब्दो रूढिवचनः समासप्रतिरूपकः प्रधानार्थः, अवयवार्थस्तु घटनामात्ररूपः, स्वशब्दः आत्मवचनः, तन्त्रशब्दः प्रधानार्थः । स्वमात्मा तन्त्रं प्रधानमस्य, करणादीनां हि परः कर्त्तैव तन्त्रं प्रधानमप्रयोज्य-

॥ २ ॥ क्रियाहेतुः क्रियासिद्धौ स्वप्रधानो यः स कर्त्ता स्यात् । मैत्रेण

त्वात्, क्रियासिद्धौ हि तेन प्रयुज्यते करणादीनि, कर्ता त्वनन्यप्रयोज्यः स्वतन्त्र इत्युच्यते । क्व स्वतन्त्र इत्याशङ्कायामाह—क्रियाहेतुः क्रियासिद्धौ स्वप्रधान इति । कारकाधिकारात्क्रियाहेतुरिति लभ्यते, तथा च क्रियासिद्धौ स्वातन्त्र्येण विवक्षितो यः कारकविशेषः सः कर्ता स्यादिति भावः । वृत्तेः यथाश्रुतार्थश्च धात्वर्थकारकाप्रयोज्यं यद्धात्वर्थनिरूपितकारकत्वं तदाश्रयः । चैत्रः पचतीत्यादौ पचधात्वर्थकर्म्मादिकारकतण्डुलाद्यप्रयोज्यं यत्पचधात्वर्थनिरूपितकारकत्वं तदाश्रयश्चैत्रो भवति, परन्तु स्थाली पचतीत्यादौ स्थाल्यादेः कर्तृत्वं न स्यात्, स्थाल्यादिनिष्ठक्रियाजनकत्वस्य चैत्रादिरूपप्रकृतधात्वर्थनिरूपितकर्तृप्रयोज्यत्वात्, अतः स्वार्थनिरूपितकारकत्वेन विवक्षिताप्रयोज्यं यत्स्वार्थनिरूपितकारकत्वं तदाश्रय इत्यर्थः कर्तव्यः । पाककर्तृत्वेन चैत्रादेरविवक्षितत्वात्स्थाल्यादेः कर्तृत्वमुपपद्यते । न च काष्ठैः स्थाली पचतीत्यादौ काष्ठादेः कर्तृत्वं स्यात्, काष्ठादिव्यापारस्य स्थाल्यादिव्यापाराप्रयोज्यत्वादिति वाच्यम्, कर्तृप्रत्ययसमभिव्याहारे धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयत्वे सति तद्धात्वर्थाश्रयत्वस्यैव स्वातन्त्र्यपदार्थत्वात्तस्यैव च कर्तृत्वादित्यन्ये । पक्वस्तण्डुलो देवदत्तेनेत्यादौ फलस्य विशेष्यत्वेन देवदत्तेऽव्याप्तिपरिहाराय कर्तृप्रत्ययसमभिव्याहार इत्युक्तम्, तत्र फलमुख्यविशेष्यकशाब्दबोधाङ्गीकारात् । गोः पयो दोग्धि चैत्र इत्यत्र विभागावच्छिन्नक्षरणानुकूलव्यापारस्य दुहधात्वर्थत्वात् धात्वर्थनिष्ठप्रकारतानिरूपितविशेष्यत्वमात्रोक्तौ क्षरणेऽतिव्याप्तिः, अतो धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारताऽनाश्रयत्वनिवेशः । ण्यन्तजन्यशाब्दबोधे प्रयोज्यव्यापारस्य प्रयोजकव्यापारविशेषणत्वात्तत्र णिप्रकृतिकधात्वर्थस्य प्राधान्यव्यवहारो न स्यादिति धातौ तत्त्वनिवेशः । तत्तद्धात्वर्थकारकचक्रप्रवर्तकत्वं कर्तृत्व-

मित्यपि लक्षणम् । ननु करणादीनामपि स्वस्वव्यापारे स्वातन्त्र्यान्न कस्यचित्प्रधानतेति चेन्न, सर्वेषां हि साधनानां कर्ता प्रवर्तयिता भवति । कर्ता तु करणादिप्रवृत्तेः प्रागेवार्थित्वादेर्निमित्तान्तरात्सामर्थ्यमासादयति । फलकामो हि कर्ता करणादीनुपार्ज्जयते, अतः स पूर्वमेव शक्तिमान्समर्थः । करणादीनां तु कर्तृविनियोगादेव स्वव्यापारे स्वातन्त्र्यम् । कर्ता च साधनान्यात्माधीनतामापादयति। तदायत्तव्यापाराणि च तानि । फलमर्थ्यमानेन च कर्त्रातिशयवृत्तानि करणादीनि निवर्त्स्यन्ते, कर्त्ता तु फलप्राप्तौ स्वयमेव निवर्तत इति तस्य स्वातंत्र्यम् । तथा चोक्तहेतुभिः कर्तुः करणापेक्षया क्रियासिद्धौ विप्रकृष्टोपकारकत्वेऽपि प्रधानत्वात्कर्तृसंज्ञा, न तु स्वव्यापारे स्वतन्त्र्यभूतस्यापि करणादेः । तच्च कर्तृत्वं क्वचिदारोपितं क्वचिच्चानारोपितम् । स्थाली पचतीत्यादौ प्रथमम्, चैत्रः पचतीत्यादौ द्वितीयम् । यदा यदीयो व्यापारो धातुनाभिधीयते तदा स कर्त्तेत्यपि लक्षणम् । अत्र कल्पे नारोपितत्वानारोपितत्वभेद इति दिक् । मैत्रेण कृत इति, अयं घट इति शेषः । कृत इत्यत्र कर्मणि क्तः, मैत्रेणेत्यत्र "हेतुकर्तृकरणेत्थम्भूतलक्षण" इति तृतीया । घट इत्यत्र तु "नाम्नः प्रथमैकद्विबहावि" ति प्रथमा । कृधातोरुत्पत्त्यनुकूलव्यापारोऽर्थः । घटपदोत्तरप्रथमायाः कर्मत्वमर्थः । मैत्रेणेत्यत्र तृतीयायाः कर्तृत्वमर्थः । तत्र कर्तृत्वं प्रकृतधातूपात्तप्रधानीभूतव्यापाराश्रयत्वम्, एवञ्च व्यापारांशस्य धातुलभ्यत्वादाश्रयत्वमात्रं तृतीयार्थः । तथा च मैत्राऽभिन्नाश्रयको घटकर्मकोत्पत्त्यनुकूलो व्यापार इति धात्वर्थमुख्यविशेष्यकः शाब्दबोधः । ननु घटो हि कर्म, एवञ्च 'कर्म्मणी' ति द्वितीया स्यादिति चेन्न, त्यादिकृत्तद्धितसमासैः कर्मणः कर्तुर्वाभिधानेन द्वितीयाद्ययोगात् । लोकशास्त्रयोरभिहितेऽर्थे शब्दप्रयोगायोगात् । अतो घटः क्रियत इत्यादौ कर्मादिशक्तीनां त्यादिनोक्तत्वात्तदभिधायिन्यो द्वितीयादिविभक्तयो न

कृतः ॥ कर्त्तुर्व्याप्यं कर्म ॥ ३ ॥ कर्त्रा क्रियया यद्विशेषेणाप्तु-

---

भवन्ति, अर्थबोधार्थं हि शब्दः प्रयुज्यते लोके, सोऽर्थो यदि शब्दान्तरेणोक्तः स्यात्तदा किमिति शब्दान्तरप्रयोगेणेति ॥ कर्तुरिति कर्तरीतिसूत्रेण तृतीयाप्राप्तौ कर्तरि षष्ठी, व्याप्यम्, कर्म ॥ कर्तृशब्दश्च सम्बन्धिशब्दत्वेनागृहीतामपि कर्तृप्रतियोगिकां क्रियामाक्षिपतीत्याह-कर्त्रा क्रियेत्यादि, कर्ता च किञ्चिदपि प्राप्तुं क्रियामन्तरेण न समर्थो भवतीत्याक्षिप्तक्रिया करणत्वेनोपतिष्ठते । तथा चाप्निश्चात्र सम्बन्धः, स च समुपस्थितत्वात्कर्तृपदार्थविशेषणीभूतव्यापारद्वारक एव । एवञ्च कर्त्रा स्वनिष्ठव्यापारप्रयोज्यफलेन विशेषेण सम्बद्धुमिष्यमाणमित्यर्थः । ततश्च तण्डुलं पचतीत्यादौ पच्यादिक्रियया कर्त्रा यद्विशेषेणाप्तुमिष्यते तण्डुलादिकं तत्कारकं कर्मेत्यर्थः । देवदत्तवृत्तिपच्यादिक्रियाप्रयोज्यविक्लित्तिरूपफलाश्रयत्वप्रकारकेच्छाविषयत्वात्तण्डुलं कर्म भवतीति तात्पर्यम् । विशेषेणाप्तुमिष्यत इति व्याप्यमित्यस्यार्थः । कर्ता च क्रियया निर्वर्तयितुं गुणान्तराण्यापादयितुं विषयीकर्तुं वा क्रियया कर्म्माप्तुमिष्यते । अत एव कर्म्म निर्वर्त्यं विकार्यं प्राप्यञ्चेति त्रिविधम् । कर्तुः करणादेः प्राप्तीच्छाविषयत्वमस्ति, तथापि न विशिष्टेच्छाविषयत्वं तस्य, कर्मसिद्ध्यर्थमेव तदुपादानात् । अत एवोक्तं विशेषेणाप्तुमिष्यत इति । माषेष्वश्वं बध्नातीत्यादौ कर्मणाश्वेन भक्षणक्रिययाप्तुमिष्यमाणे माषादावतिप्रसङ्गवारणाय कर्तुरित्युक्तं तथा च न माषा बन्धनकर्तृव्याप्याः । व्याप्यं कर्म चेति विधेयमुक्तं तस्यायं भावः, यस्य व्याप्यं प्रसिद्धं तस्य तदनुवादेनाप्रसिद्धं कर्म लक्षणेन विधीयते, यस्य तु कर्म एव प्रसिद्धं तस्य तदनुवादेनाप्रसिद्धं व्याप्यं लक्षणेन विधीयते, यस्य चोभयमप्रसिद्धं तस्योभयमपि विधीयत इति । अत्र कर्तृगतप्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यतद्व्यधिकरणप्रकृतधात्वर्थफलाश्रयत्वेन कर्तुरुद्देश्यत्वं कर्म्मत्वमिति केचित् ।

मिष्यते तत्कारकं व्याप्यं कर्म्म च स्यात् । तत् त्रेधा निर्वर्त्त्यं विकार्यं

अग्नेर्माणवकं वारयतीत्यत्र संयोगानुकूलव्यापाराभावानुकूलव्यापारो वारयतेरर्थः, कर्तृगतेत्यनुपादानेऽग्न्यादावतिव्याप्तिः स्यात् , प्रकृतधात्वर्थसंयोगानुकूलव्यापारोऽपि, तत्प्रयोज्यतद्व्यधिकरणप्रकृतधात्वर्थफलं—संयोगः, तदाश्रयत्वस्याग्नौ सत्त्वात् । चैत्रो ग्रामं गच्छतीत्यादौ चैत्रेऽतिव्याप्तिवारणाय तद्व्यधिकरणेति, कर्तृगतप्रकृतधात्वर्थव्यापारः—उत्तरदेशसंयोगानुकूलो व्यापारः, तत्प्रयोज्यप्रकृतधात्वर्थभूतं फलं—संयोगः, तदाश्रयस्य चैत्रे सत्त्वात् , तद्व्यधिकरणेत्युक्तौ तु तादृशसंयोगानुकूलव्यापारानधिकरणवृत्तित्वविशिष्टप्रकृतधात्वर्थभूत—संयोगाश्रयत्वस्य ग्राम एव सद्भावान्नातिप्रसङ्गः । माषेष्वश्वं बध्नातीत्यादौ माषादावतिप्रसङ्गवारणाय प्रकृतधात्वर्थत्वं फलस्य विशेषणतयोपात्तम् । प्रकृतधातुर्बन्धधातुस्तदर्थो देशान्तरसञ्चारविरोधिशङ्कादिसंयोगानुकूलव्यापारस्तत्प्रयोज्यं फलं गलाधस्संयोगोऽपि, तदाश्रयत्वं माषाणामिति । फले प्रकृतधात्वर्थविशेषणे तु गलाधस्संयोगो न प्रकृतधात्वर्थफलभूत इति विक्लित्तिरूपफलस्यापि व्यपदेशिवद्भावेन फलाश्रयत्वात्कर्मत्वम् , अत एव तत्समानाधिकरणे स्तोकं पचतीत्यादौ कर्मत्वसिद्धिः । एवञ्च कर्मणि विहितद्वितीयायाः कर्मत्वशक्तिमानर्थः । तत्र च प्रकृत्यर्थो विशेषणम् , विशेष्यं धात्वर्थः, एवञ्च हरिं भजतीत्यादौ हरिरूपं यत्कर्म तन्निष्ठशक्तिनिरूपकप्रीत्यनुकूलो व्यापार इति बोधः । प्रीत्यनुकूलो व्यापारश्च भजेरर्थः, एवं सर्वविभक्तीनां तत्तत्कारकशक्तिमद्धर्मिबोधकत्वं विज्ञेयम् । अन्ये तु फलाश्रयः कर्म, तत्र फलस्य धातुना लाभादाश्रयो द्वितीयार्थः । हरिं भजतीत्यत्र च हरिवृत्त्याश्रयतानिरूपकप्रीत्यनुकूलो व्यापार इति बोधः । एवमग्रेऽपीति वदन्ति । कटं करोतीत्यत्रोत्पत्त्याश्रयत्वान्निर्वर्त्यं कर्मत्वमुत्पत्तेर्धात्वर्थत्वात् । ओदनं पचतीत्यादौ विक्लित्याश्रयत्वाद्विकार्य-

प्राप्यञ्च । कटं करोति, काष्ठं दहति, ग्रामं याति ॥ **वाऽकर्मणा-**

कर्मता । जानातीत्यत्रावरणभङ्गरूपधात्वर्थफलाश्रयत्वात्प्राप्यं कर्मत्वम् । अतीतानागतादिपरोक्षस्थले आश्रयाभावेऽपि ज्ञानजन्यस्यावरणभङ्गस्यावश्यकता, अन्यथा यथापूर्वं न जानामीत्यापत्तेः, अतीतादेस्तदाश्रयत्वञ्च यथा नैयायिकैरनुभवानुरोधादतीतादौ विषयतया ज्ञानाश्रयत्वं स्वीक्रियते, तथा सत्कार्यवादाङ्गीकाराद्वोपपद्यत इति । पयसा ओदनं भुङ्क्ते इत्यत्र पयसः करणत्वस्यैव विवक्षणेन प्रकृतधात्वर्थफलाश्रयत्वेनाविवक्षणाच्च न कर्मत्वम्, फलत्वञ्च कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारताश्रयतद्धात्वर्थत्वम् । पश्य ! मृगो धावतीत्यादौ धावनादेः फलत्ववारणाय तद्धात्विति, अन्यथा प्रधानानुरोधिकर्मत्वस्य बलवत्त्वान्मृगस्य कर्तृत्वं न स्यात् । निर्वर्त्यमिति, प्रकृतिवाचकपदासमभिव्याहृतपदोपस्थाप्यत्वे सति निष्पाद्यत्वं निर्वर्त्यत्वम् । यथा कटं करोति, अत्र कटस्य प्रकृतिः काशः, काशानां सत्त्वेऽपि तद्वाचकपदमत्र न विवक्षितमतः प्रकृतिवाचककाशपदासमभिव्याहृतपदं कटपदम् । तदुपस्थाप्यत्वं कटे, निष्पाद्यत्वमपि तत्रैवेति कटः निर्वर्त्यं कर्म उच्यते । यदा च प्रकृतेः परिणामित्वेन विवक्ष्यते यथा मृदा घटं करोति, काशैः कटं करोतीति, तदा घटादिर्विकार्यं कर्म भवति । निष्पाद्यत्वमात्रन्तु विकार्यकर्मण्यपि वर्ततेऽतः सत्यन्तम् । निर्वृत्तिरसत उत्पत्तिरूपा वा, सत एवाभिव्यक्तिरूपा वेत्यन्यदेतत् । विकार्यमिति, प्रतीयमानप्रकृतिविकृतिभावकत्वे सति क्रियानिर्वाह्यविशिष्टासत्त्वोत्पत्त्यन्यतरफलवत्त्वं विकार्यत्वम् । यथा काष्ठं दहति, काशान् कटं करोति, कुसुमानि स्रजं करोति, सुवर्णं कुण्डलं करोति, मृदं घटं करोति, काष्ठं भस्म करोति, तण्डुलानोदनं पचतीत्यादौ काशादिकटाद्योः प्रकृतिविकृतिभावः प्रतीयते, क्रियानिर्वाह्यं यद्विशिष्टासत्त्व-

लक्षणं फलं तत्काशादिप्रकृतिकर्मण्यस्ति, विकृतिकर्मणि कटादौ च क्रियानिर्वाह्योत्पत्त्याश्रयत्वं वर्तत इति लक्षणसङ्गतिः । तत्र क्वचित्काष्ठतण्डुलादिनाशाद्भस्मौदनादि सम्पद्यते, क्वचिद्धर्मिणः सत्त्वेऽपि गुणान्तरोत्पत्त्या कटसन्दर्भादि निष्पद्यते । तथा च काष्ठं भस्म करोतीत्यत्र कृधातोः प्रतियोगित्वविशिष्टनाश उत्पत्तिश्चेति फलद्वयम् । तदनुकूलव्यापारः धातोरर्थः, नाशे प्रतियोगितया काष्ठस्य, उत्पत्तौ चाधेयतया भस्मनोऽन्वयात्, काष्ठप्रतियोगिकनाशानुकूलो भस्मोत्पादको वर्तमानो व्यापार इति बोधः । विकार्यत्वस्येदृशत्वे च काष्ठं दहतीत्यादेः काष्ठं विकुर्वन्भस्मोत्पादयतीत्यर्थः । ओदनं पचतीत्यस्य विक्लित्त्या निर्वर्तयतीत्यर्थः । तण्डुलान्पचतीत्यस्य तण्डुलान्विक्लेदयतीत्यर्थः । प्राप्यमिति, क्रियाप्रयोज्यासाधारणधर्मप्रकारकप्रतीतिविषयतानाश्रयत्वे सति क्रियाजन्यफलाश्रयत्वं प्राप्यत्वम् । निर्वर्यादावतिव्याप्तिवारणाय[illegible] सत्यन्तम् । क्रियाजन्यफलानाश्रयेऽतिव्याप्तिवारणाय विशेष्यम् । आदित्यं पश्यति, ग्रामं यातीत्यादौ क्रियाप्रयोज्योऽसाधारणो धर्मः कश्चिदत्र नास्ति, सन्दर्शनगमनक्रियया कश्चिदसाधारणो धर्मो नादित्यग्रामादाववधार्यत इति क्रियाप्रयोज्यासाधारणधर्मप्रकारकप्रतीतिविषयतानाश्रयत्वमादित्ये ग्रामे च वर्तते, केवलं तत्र क्रियासम्बन्धमात्रं लक्ष्यत इति क्रियाजन्यफलाश्रयत्वमस्तीति लक्षणसमन्वयः । न च ग्रामादौ गमनक्रियाजनितः संयोगविशेषोऽस्तीति वाच्यम्, नगरस्य महापरिमाणत्वेन सतोऽपि संयोगस्यालक्ष्यमाणत्वात् । पुनरप्येकैकं त्रिधा, यदवाप्तुं क्रियाऽऽरभ्यते तदिष्टं कटं करोतीत्यादि । यद्द्विष्टं प्राप्यते तदनिष्टं यथा विषमत्ति, यत्र नेच्छा न च द्वेषस्तदनुभयम्, यथा ग्रामं गच्छन्तृणं स्पृशतीति । नन्वनिष्टोदासीनयोः कर्मणोः कर्त्रा यद्विशेषेणाप्तुमिष्यत इति यल्लक्षणमुक्तं तदव्याप्तम्, उच्यते, स्वाम्यादिभयपीडितस्य व्याधि-

दुःखार्तस्य वा वरं विषभक्षणमेवेति मन्यमानस्य विषभक्षणस्यापीप्सितत्वात्, उदासीनमप्युपसर्पणादिवेलायामीप्सितमेवान्यथोपसर्पणक्रियाविषयत्वमेव नोपेयादित्येवमन्यत्रापि विचार्यम् । पुनस्तत्कर्म द्विविधं प्रधानेतरभेदात्, तच्च द्विकर्मकेषु धातुषु दुहिभिक्षिरुधिप्रच्छिचिञ्चट्ब्रुङ्शास्वर्थेषु याचिजयतिप्रभृतिषु च भवति । गां दोग्धि पय इत्यादीन्युदाहरणानि, यदर्थं क्रियाऽऽरभ्यते तत्प्रधानं कर्म, यथा पयः प्रभृति, तत्सिद्धये तु क्रियया यदन्यद्व्याप्यते तद्गौणं यथा गवादि । यदा तु पयोऽर्था प्रवृत्तिर्न विवक्ष्यते तदा मुख्याऽसान्निध्याद्गवादेरेव मुख्यता, यथाऽऽश्चर्यो गवां दोह इति । एवम्भूता धातवोऽन्तर्भूतणिजर्थाः, एषां प्रयोगे गां दोग्धि पय इत्यादौ कर्तृव्याप्यं कर्मेत्यनेनैव गवादीनामपि कर्मसंज्ञा सिद्धा । तथाहि, गौः पयः क्षरति, देवदत्तस्तां क्षरन्तीं क्षारयतीति दुहेरर्थः, तत्र क्षरणोपसर्जनस्य क्षारणस्य शब्दार्थत्वाद्गौरेव प्रधानं कर्म, क्षरणेनाप्यमानत्वात्पयः कर्म, क्षारणेनाप्यमानत्वाद्गौः, यद्यप्यर्थरूपेण पयः प्रधानभूतं तदुपायभूतस्तु गौः, तथापि गौः पयो दोग्धव्या दुग्धा सुदोहेति वा, प्रथमान्ततया गवादेरुपादानाच्छब्दरूपेण प्रधानभूतो गवादिः । तत्र दुहादीनामप्रधाने कर्मण्येव त्यादिकृत्यखलर्थाः प्रत्यया भवन्ति, यथा गौर्दुह्यते दुग्धा दोह्या वा पय इति । नीवहिहरतिप्रभृतीनान्तु प्रधाने कर्मणि कर्मजः प्रत्ययो भवति, यथा नीयते नेतव्या नीता वा ग्राममजेत्यादि । गत्यर्थानामकर्मणाञ्च णिगन्तानां प्रधाने एव कर्मणि, यथा गमयति मैत्रं ग्रामम् । बोधाहारार्थशब्दकर्मणान्तु णिगन्तानामुभयत्र, यथा बोधयति शिष्यं धर्मम्, बोध्यते शिष्यो धर्मम्, बोध्यते शिष्यं धर्म इति वा । अजां ग्रामं नयति प्रापयतीत्यर्थः, अत्रापि पूर्वेणैव कर्मत्वं प्रापणेन प्रधानेन सम्बन्धादजा प्रधानं कर्म इति । ननु वास्तवरूपेण पय आदेः प्राधान्याद्गवादेः परार्थत्वात्क्रियायोगाभावान्न व्याप्यत्वमिति कर्मसंज्ञा न सिद्ध्यति,

मणिकर्त्ता णौ ॥ ४ ॥ अविवक्षितकर्मणां धातूनां, णिगः प्राग् यः कर्त्ता स णिगि सति कर्म वा स्यात् । पचति चैत्रः, पाचयति चैत्रं चैत्रेण वा ॥ **गतिबोधाहारार्थशब्दकर्मनित्याऽकर्मणामनीखाद्यदिह्वाशब्दायक्रन्दाम्** ॥ ५ ॥ गतिर्देशान्तरप्राप्तिः । शब्दः कर्म्म क्रिया व्याप्यञ्च येषान्ते शब्दकर्म्माणः । नित्यं न विद्यते

किन्तु गां दोग्धि, पयः क्षारयतीत्यत्र **गोः** पय आदत्ते इत्यर्थादपादानत्वं प्राप्नोतीति चेन्न, अवधित्वाद्यविवक्षायां क्रियानिमित्तभावमात्रेण तद्व्याप्यत्वस्य विवक्षितत्वात्पूर्वेणैव सिद्धेः । अवधित्वादिविवक्षायान्त्वपादानत्वमेव **गोः** दोग्धि पय इत्यादि ॥ वा, न विवक्षितं कर्म येषान्तेषाम्, न णिग् अणिग्, अणिगि कर्ता अणिक्कर्ता, णौ ॥ कर्मेति वर्तते । अकर्माणो द्विविधाः, नित्याकर्माणः, अविवक्षितकर्माणश्च । अत्र त्वविवक्षितकर्मणामेव ग्रहणं नित्याकर्मणामुत्तरसूत्रे उपादानात् । पचति चैत्रः, अत्र चैत्रोऽणिक्कर्त्ता, पचिरप्यविवक्षितकर्मा, ततो णिगि सति पाचयति चैत्रं चैत्रेण वा, अनेन सूत्रेण चैत्रस्य वा कर्मत्वम् । पक्षे 'हेतुकर्तृकरणे'ति कर्तरि तृतीया । न च प्रयोज्यकर्तुश्चैत्रस्य प्रयोजकव्यापारेण व्याप्यमानत्वात्कर्मसंज्ञया पक्षे कथं कर्तरि तृतीयेति वाच्यम्, प्रयोज्यो हि स्वस्वातन्त्र्यमपरित्यजन्नेव प्रयोजकव्यापारे पारतन्त्र्यं लभते, न हि प्रयोजकेनास्य स्वातन्त्र्यस्खण्डना क्रियते, अतः प्रयोज्ये चैत्रे प्रकृत्यर्थं प्रति कर्तृत्वस्यैव निरपवादत्वेनावस्थानात्तृतीया सिद्ध्यति । नन्वोदनं पचतीत्यादिप्रयोगदर्शनात्कथमविवक्षितकर्मत्वं पचादेः, मैवम्, शब्दप्रयोगस्य परार्थत्वेन यावती जिज्ञासा परस्य, तावत एव शब्दप्रयोगस्यावश्यकत्वात्, किं करोति चैत्र इति क्रियामात्रजिज्ञासायां चैत्रः पचतीतिप्रयोगादविवक्षितकर्म्मता ॥ **गतिश्च बोधश्च** आहारश्च, गतिबोधाहाराः अर्थो येषान्ते, शब्दःकर्म येषान्ते शब्दकर्माणः, नित्यं न विद्यते

कर्म येषान्ते नित्याकर्म्माणः । गत्यर्थबोधार्थाहारार्थानां शब्दकर्म्मणां नित्याकर्म्मणाञ्च नीखाद्यदिह्वाशब्दायक्रन्दिवर्जानां धातूनामणिकर्त्ता स णौ सति कर्म स्यात् । गमयति चैत्रं ग्रामम्, बोधयति शिष्यं धर्म्मम्, भोजयति बटुमोदनम् । जल्पयति मैत्रं द्रव्यम्, अध्यापयति बटुं वेदम् । शाययति मैत्रं चैत्रः । गत्यर्थादीनामिति किम् ? पाचयत्योदनं चैत्रेण मैत्रः । न्यादिवर्जनं किम् ? नाययति भारं चैत्रेण, खादयत्यपूपं मैत्रेण, आदयत्योदनं सुतेन, ह्वाययति चैत्रं मैत्रेण, शब्दाययति बटुं

कर्म येषान्ते नित्याकर्माणः, ततो द्वन्द्वस्तेषाम्, नीश्च खादिश्चादिश्च ह्वा च शब्दायश्च क्रन्द् च, ततो नञ्समासस्तेषाम् ॥ अणिकर्त्ता णौ, कर्मेति पदानि वर्तन्ते । अर्थशब्दस्य प्रत्येकमन्वयः । गतेः स्वरूपमाह गतिरिति, बोधाहारयोः प्रसिद्धत्वान्न तत्स्वरूपमुक्तम्, कर्मशब्दस्य क्रियार्थकत्वं व्याप्यार्थकत्वञ्च विवक्षितमिति दर्शयति, शब्द इति । ह्वादीनां प्रतिषेधविधानाच्छब्दशब्देनोभयार्थविवक्षणात् । गच्छति चैत्रो ग्राममित्यत्र कर्ता चैत्रः, स णौ सति गमयति चैत्रं ग्राममित्यादौ कर्म भवति । ग्रामकर्मकगमनानुकूलचैत्राश्रयकव्यापारानुकूलो मैत्रकर्तृको व्यापार इति बोधः । शिष्यो धर्मं बुध्यत इत्यत्र बोधार्थे कर्ता शिष्यो णौ सति बोधयति गुरुः शिष्यं धर्ममित्यादौ कर्म भवति । प्रेषणाध्येषणादिना प्रयोजकव्यापारेण णिगन्तवाच्येनाऽणिकर्त्तुर्व्याप्यत्वात्कर्मसंज्ञा सिद्धैव, तथापि नियमार्थं वचनम् । प्रयोजकव्यापारेण व्याप्यमानस्य गत्यर्थादिसम्बन्धिन एव प्रयोज्यस्य कर्तुः कर्मसंज्ञा भवतीति, तेनान्यधातुसम्बन्धिनः कर्तृत्वमेव । जल्पयति मैत्रं द्रव्यमिति शब्दक्रियस्योदाहरणम्, मैत्रो द्रव्यं जल्पति, तद्बोधकवाक्यानि कथयति, देवदत्तः प्रेरयतीति देवदत्तो मैत्रं द्रव्यं जल्पयति । शब्दव्याप्यस्य त्वधीते बटुर्वेदं तमन्यः प्रेरयतीत्यध्यापयति बटुं वेदम्, अत्र शब्दो न धात्वर्थक्रियारूपः किन्तु धात्वर्थस्य कर्मेति भेदः । शब्दकर्मेत्यत्र कर्मपदेन

मैत्रेण, क्रन्दयति मैत्रं चैत्रेण ॥ **भक्षेर्हिंसायाम्** ॥ ६ ॥ भक्षेर्हिंसार्थस्यैवाणिकर्त्ता णौ कर्म्म स्यात् । भक्षयति सस्यं बलीवर्द्दान्मैत्रः ।

क्रियाया अपि विवक्षितत्वात् । ह्वाक्रन्दोः शब्दक्रियत्वेन प्राप्तौ प्रतिषेधः सङ्गच्छते । शाययति मैत्रं चैत्र इति नित्याकर्मकस्योदाहरणम् । अत्र नित्यग्रहणमविवक्षितकर्मणः पूर्वसूत्रे ग्रहणार्थम् । तथा च येषां देशकालादिभिन्नं कर्म न सम्भवति तेऽत्र नित्याकर्मकाः । देशकालाध्वभावापेक्षया सर्वेऽपि धातवः सकर्मकाः । **सकर्मकत्वञ्च** फलतावच्छेदकसम्बन्धेन फलव्यधिकरणव्यापारार्थकत्वम् । यत्र फलं व्यापारश्च भिन्नेष्वधिकरणेषु वर्तेते तद्वाचको धातुः सकर्मकः । यथा तण्डुलं पचतीत्यादौ विक्लित्तिलक्षणं फलं तण्डुलेषु, तदनुकूलव्यापारश्च पाककर्तरीति लक्षणसमन्वयः । **अकर्मकत्वञ्च** फलतावच्छेदकसम्बन्धेन फलाधिकरणवृत्तिव्यापारार्थकत्वम् । यत्र फलं व्यापारश्चैकत्र वर्तेते तद्वाचको धातुरकर्मकः । यथा चैत्रः शेते, अत्र स्वापतदनुकूलव्यापारयोरेकत्रैव चैत्रे वृत्तेरकर्मकत्वम् । नाययति भारं चैत्रेणेति नयतेः प्रापणोपसर्जनप्राप्त्यर्थत्वेन गत्यर्थत्वात्, खाद्यद्योराहारार्थत्वात्, ह्वाशब्दायक्रन्दाश्च शब्दकर्मकत्वात्कर्मत्वे प्राप्ते प्रतिषेधार्थं न्यादिवर्जनम् ॥ **भक्षेः हिंसायाम्** ॥ अणिकर्त्ता णौ कर्मेत्यनुवर्तते । ननु गतिबोधेतिसूत्रेणाणिकर्तुर्णौ कर्मत्वं विधीयते, न तु णौ कर्तुरिति भक्षेः प्राप्तेरेवाभावान्नियमोऽयं व्यर्थ इति चेन्न, प्रयोक्तृव्यापारार्थकणिगन्ते कर्मणो विधीयमानत्वेनाणिगित्यत्र णिगोऽपि प्रयोजकव्यापारार्थकस्यैव ग्रहणान्न तु स्वार्थिकस्य, तेन चुरादिणिजन्तेऽपि भक्षयतेराहारार्थत्वात्प्राप्तेऽस्य सूत्रस्य नियामकत्वात् । सस्यादिवनस्पतीनां चेतनत्वात्तद्भक्षणे परकीयसस्यभक्षणे तत्स्वाम्युपघाताद्वा हिंसात्र बोध्या । आहारार्थत्वात्प्राप्ते नियमार्थं वचनम्, सिद्धे सत्यारम्भो नियमार्थ

हिंसायामिति किम् ? भक्षयति पिण्डीं शिशुना ॥ **वहेः प्रवेयः** ॥ ७ ॥ वहेरणिकर्त्ता प्रवेयो णौ कर्म्म स्यात् । वाहयति भारं बलीवर्दान्मैत्रः । प्रवेय इति किम् ? वाहयति भारं मैत्रेण ॥ **हक्रोर्नवा** ॥ ८ ॥ हक्रोरणिकर्त्ता णौ कर्म्म वा स्यात् । विहारयति देशं गुरुं गुरुणा वा, आहारयत्योदनं बालं बालेन वा, कारयति कटं चैत्रं चैत्रेण वा ॥ **दृश्यभिवदोरात्मने** ॥ ९ ॥ दृश्यभिवदोरात्मनेपदविषयेऽणिकर्त्ता णौ कर्म्म वा स्यात् । दर्शयते राजा भृत्या-

---

इति न्यायात् ॥ **वहेः षष्ठी** ॥ प्रवीयते प्राजनक्रियया व्याप्यते यः सः प्रवेयः ॥ अणिकर्त्ता णौ कर्मेति सम्बध्यते । वहन्ति बलीवर्दा भारं तान्प्रयुङ्क्ते नियोक्ता मैत्र इति वाहयति बलीवर्दान्मैत्रः, वाहयति भारं मैत्रेणेत्यत्र मैत्रः बलीवर्दवन्न प्रवेयः । प्राप्यर्थस्य प्रापणार्थस्य च वहेर्गत्यर्थत्वात्पूर्वेण सिद्धे नियमार्थम् ॥ **हा च का च हक्रौ** तयोः, नवा ॥ अनुवृत्तिः पूर्ववत् । विहारयत्याहारयतीत्यादौ गत्यर्थत्वादाहारार्थत्वाच्च प्राप्ते कारयतीत्यत्राप्राप्ते विकल्पः । एवं हारयति द्रव्यं मैत्रं मैत्रेण वेति चौर्यार्थेऽप्राप्तौ विकल्पः । कारयिता कटस्य देवदत्तं देवदत्तेन वेति प्रापणार्थस्य च प्राप्ते विभाषा ॥ **दृशिश्चाभिवद् च** तयोः, आत्मार्थं पदं आत्मनेपदम् । 'परात्मभ्यां ङे' रित्यलुप्समासः, 'ते लुग्वे' ति पदलोपः । अणिकर्ता णौ कर्म नवेत्येतेषां सम्बन्धः । पश्यन्ति राजानं भृत्यास्तान्भृत्यान्पश्यतो राजैवानुकूलाचरणेन प्रयुङ्क्ते इति दर्शयते राजा भृत्यान्भृत्यैर्वा, अत्राणिकर्मेत्यात्मनेपदम् । अभिवदति गुरुं शिष्यः, तं गुरुः पश्यतीत्यभिवादयते गुरुः शिष्यं शिष्येण वा । दृशेर्बोधार्थत्वेन नित्यं प्राप्ते, अभिवदेस्त्वप्राप्ते विकल्पः । पश्यति रूपतर्को रूपम्, तमन्यः प्रेरयतीति दर्शयति रूपतर्कं रूपम्, रूपतर्को रजतकार्षापणादिपरीक्षकः । नायं विवक्षितफलवत्कर्तृकः, अणिकर्मणिकर्तृको वेति नात्मनेपदविषयः । अत्र बोधार्थत्वाद्वतीत्यनेन नित्यं

न्मृत्यैर्वा, अभिवादयते गुरुः शिष्यं शिष्येण वा। आत्मन इति किम् ? दर्शयति रूपतर्कं रूपम् ॥ **नाथः** ॥ १० ॥ आत्मनेपदविषयस्य नाथो व्याप्यं कर्म्म वा स्यात् । सर्पिषो नाथते, सर्पिर्नाथते । आत्मन इत्येव ? पुत्रमुपनाथति पाठाय ॥ **स्मृत्यर्थदयेशः** ॥ ११ ॥ स्मृत्यर्थानां दयेशोश्च व्याप्यं, कर्म्म वा स्यात् । मातुः स्मरति, मातरं स्मरति, मातुः स्मर्यते, माता स्मर्यते। सर्पिषः सर्पिर्वा दयते, लोकाना-

---

कर्मत्वम् ॥ **नाथः षष्ठी** ॥ आत्मने व्याप्यं कर्म नवेति पदान्यनुवर्तन्ते। पृथग्योगकरणादणिकर्तृ णाविति निवृत्तम् । आत्मनेपदविषयत्वञ्च नाथधातो 'राशिषि नाथ' इत्युपतापैश्वर्याशीर्वचनार्थेषु मध्ये आशिष्येव, तत्रैवायं विधिः । सर्पिषो सर्पिर्वा नाथते, सर्पिर्मे भूयादित्याशास्त इत्यर्थः । उपनाथत्युपयाचत इत्यर्थः ॥ **स्मृतिरर्थो येषान्ते** स्मृत्यर्थाः, **स्मृत्यर्थाश्च दयश्च ईश्च** तस्य ॥ पूर्ववदनुवर्तनमेवमग्रेऽपि । मातुः स्मरति, कर्मत्वाभावपक्षे 'शेष' इत्यनेन षष्ठी । लोकानामीष्टे व्यापारेषु नियुङ्क्ते स्वायत्तीकरोतीत्यर्थः । यद्यप्यत्र कर्मणोऽविवक्षायां माषाणामश्नीयादित्यादिव'च्छेषे' षष्ठी सम्भवति, तथाप्ययं प्रयत्नो मातुः स्मृतमित्यादौ षष्ठीसमासव्यावृत्तये, अन्यथा हि यत्नाच्छेषस्य विधानाभावेन 'षष्ठ्ययत्नाच्छेष' इत्ययत्नजशेषषष्ठीसमासः प्रसज्येत, तथैषां धातूनां कर्मैव शेषरूपेण विवक्ष्यते न कारकान्तरमिति नियमार्थम् ; तेन मात्रा स्मृतमित्यादौ न कर्त्रादेः शेषत्वेन विवक्षा । सर्वधातूनां कर्तृकर्मादिकारकाणि यदि तद्रूपतया विवक्ष्यन्ते तदा कर्तृकर्मादिरूपाणि स्युः, नो चेन्न, एवञ्च स्मृत्यर्थदयेशामपि कर्मणः कर्मत्वं विवक्षावशात्स्याच्च न स्याच्चेत्यप्यागतम । स्मृत्यर्थादीनामपि सर्वधातुग्रहणेन ग्रहणात् , एवञ्च स्मृत्यर्थादीनां कर्मणोऽकर्मत्वविकल्पे उक्तरीत्या '**विवक्षातः कारकाणी**' ति न्यायेन सिद्धे यदि स्मृत्यर्थदयेश इति सूत्रमारब्धं तथा नियमार्थे विश्रान्तं

मीष्टे, लोकानीष्टे ॥ **कृगः प्रतियत्ने** ॥ १२ ॥ पुनर्यत्नः प्रतियत्नस्तद्वृत्तेः कृगो व्याप्यं कर्म्म वा स्यात् । एधोदकस्यैधोदकं वोपस्कुरुते ॥ **रुजार्थस्याऽज्वरिसन्तापेर्भावे कर्त्तरि** ॥ १३ ॥ रुजा पीडा, तदर्थस्य ज्वरिसन्तापिवर्जस्य धातोर्व्याप्यं, कर्म्म वा स्यात् । भावश्चेद्रुजायाः कर्त्ता । चौरस्य चौरं वा रुजति रोगः । अज्वरिसन्तापेरिति किम् ? आद्यूनं ज्वरयति सन्तापयति वा । भाव इति किम् ? मैत्रं रुजति श्लेष्मा ॥ **जासनाटक्राथपिषो हिंसायाम्** ॥ १४ ॥ हिंसार्थानामेषां व्याप्यं, कर्म्म वा स्यात् । चौरस्य चौरं वोज्जासयति,

---

भवति, यदि तु सिद्धं नाभविष्यत्तदेदं सूत्रं नियमार्थं नाभविष्यत्, किन्तु विध्यर्थमेवाभविष्यत् , तदेवमस्य सूत्रस्य यन्नियमार्थत्वं तदिमं न्यायं विनानुपपद्यमानं सदिमं न्यायं ज्ञापयति॥ **कृगः षष्ठी**, पुनर्यत्नः प्रतियत्नस्तस्मिन् ॥ प्रथमं तावदर्थस्यात्मलाभाय यत्नो भवति, ततो लब्धात्मनोऽधिकान्गुणानुत्पादयितुं परिपूर्णगुणस्य वा तादवस्थ्यं रक्षितुं यो यत्नः क्रियते स प्रतियत्नः । एधाश्च उदकानि च तदेधोदकम् । उपाद्भूषासमवायेति स्सट् , 'गन्धने'त्यात्मनेपदम् ॥ रुजा पीडा अर्थो यस्य तस्य, ज्वरिश्च सन्तापिश्च ज्वरिसन्तापि, न ज्वरिसन्तापि तस्य, भावे, कर्तरि ॥ भावे कर्तरीत्यस्यार्थमाह, भावश्चेद्रुजायाः कर्तेति । अत्र भावशब्दः सिद्धरूपे भावे वर्तते, न तु साध्यरूपे तस्य कर्तृत्वानुपपत्तेः । चौरस्य चौरं वा रुजति रोगः, अत्र पीडार्थस्य रुजतेः कर्ता रोगः सः सिद्धरूपो भावः । आद्यूनं ज्वरयतीत्यौदरिकं पीडयतीति भावः । श्लेष्मा तु द्रव्यं न भावः, रोगो व्याधिरामयः शिरोऽर्तिरित्यादयो भावरूपा कर्तारः ॥ **जासश्च नाटश्च क्राथश्च पिष् च तस्य, हिंसायाम्** ॥ जस हिंसायां जसण् ताडने इति चौरादिकयोर्ग्रहणं न तु जसूच् मोक्षणे इति दैवादिकस्य, तस्य हिंसार्थत्वाभावात् । नटण् अवस्यन्दने इत्यस्य चौरादिकस्यैव ग्रहणं न तु नट

चौरस्य चौरं वोन्नाटयति, चौरस्योत्क्राथयति चौरमुत्क्रथयति वा। चौरस्य चौरं वा पिनष्टि। हिंसायामिति किम्? चौरं बन्धनाज्ञासयति॥ **निप्रेभ्यो घ्नः** ॥ १५ ॥ समस्तव्यस्तविपर्यस्ताभ्यां निप्राभ्यां परस्य हिंसार्थस्य हन्तेर्व्याप्यं कर्म वा स्यात्। चौरस्य चौरं वा निप्रहन्ति। हिंसायामित्येव? रागादीन्निहन्ति॥ **विनिमेयद्यूतपणं पणिव्यवह्नोः** ॥१६॥ विनिमेयः क्रयविक्रयोऽर्थः, द्यूतपणो द्यूतजेयम्, तौ पणिव्यवह्नो-

---

नृत्ताविति भ्वादेः, अवस्यन्दनं हिंसाविशेषः, क्राथिर्घटाद्यन्तर्गतः। ननु धातुपाठे जसनटक्रथेति वर्तते, तत्कथमत्र जासनाटक्राथेतिनिर्देशः, न च ण्यन्तानां निर्देश इति वक्तव्यम्, तथा सति जासिनाटिक्राथीति निर्देशप्रसङ्गादिति चेदुच्यते, सम्प्राप्ताकाराणां जासादीनां प्रयोगे एव विधेरस्य प्रवृत्तिस्तेन दस्युमुदजीजसदित्यादौ न भवति। न च हिंसाया रुजात्वाद्रुजार्थस्येत्यनेनैव कर्मविकल्पो भविष्यतीति वाच्यम्, भावः कर्ता यत्र न भवति तत्र कर्मविकल्पार्थत्वात्। ननु क्रथधातुर्घटादौ वर्तते, तथा च 'घटादेर्ह्रस्वो दीर्घस्तु वा ञ्णिम् पर' इति सूत्रेण ह्रस्वे चौरस्य चौरं वोत्क्राथयतीति कथम्, सूत्रे च क्राथेतिनिर्देशोऽपि कथमिति चेन्न, अनेनैव निर्देशात्क्रथो घटादित्वेऽपि णिगि सत्याकारस्य भावात्, अणिगन्तस्य क्रथेरकर्मकत्वेन कृते एव णिगि कर्म सम्भवति, तथा च यद्याकारः सर्वत्र स्यात्तर्हि घटादित्वमस्य व्यर्थं स्यादतः कर्माभावपक्षे एव न ह्रस्वः, कर्मणि तु ह्रस्वत्वमेवेति चौरमुत्क्रथयतीति रूपं विज्ञेयम्॥ **नियश्च प्राश्च निप्रास्तेभ्यः, घ्नः** षष्ठी॥ बहुवचनं समस्तव्यस्तविपर्यस्तसङ्ग्रहार्थम्, एवञ्च सर्वत्रात्र व्याकरणे बहुवचनमधिकार्थज्ञापनार्थमित्यवगन्तव्यम्। रागादीन्निहन्तीत्यत्र रागादीनामचेतनतया प्राणव्यपरोपणलक्षणहिंसाया अभावान्न भवति॥ **विनिमेयश्च द्यूतपणश्च, पणिश्च व्यवहा च पणिव्यवहारौ तयोः**॥ दशानां दश वा व्यवहरति, क्रयविक्रये द्यूतपणत्वे

व्याप्यौ वा कर्म्म स्याताम् । शतस्य शतं वा पणायति, दशानां दश वा व्यवहरति । विनिमेयद्यूतपणमिति किम् ? साधून् पणायति ॥ **उपसर्गादिवः** ॥ १७ ॥ उपसर्गात्परस्य दिवो व्याप्यौ विनिमेयद्यूतपणौ वा कर्म्म स्याताम् । शतस्य शतं वा प्रदीव्यति । उपसर्गादिति किम् ? शतस्य दीव्यति ॥ **न** ॥ १८ ॥ अनुपसर्गस्य दिवो व्याप्यौ विनिमेयद्यूतपणौ कर्म्म न स्याताम् । शतस्य दीव्यति ॥ **करणञ्च** ॥ १९ ॥ दिवः करणं कर्म्म करणञ्च युगपत्स्यात् । अक्षान्दीव्यति,

---

वा तद्विनियुङ्क्त इत्यर्थः, साधून् पणायति स्तौतीत्यर्थः, वचनभेदो यथासङ्ख्यनिवृत्त्यर्थः ॥ **उपसर्गात्, दिवः षष्ठी** ॥ विनिमेयद्यूतपणमित्यपि सम्बध्यते । शतस्य दीव्यतीत्यत्र नेत्यग्रिमसूत्रेण व्याप्यस्य कर्मसंज्ञानिषेधः ॥ **न** ॥ पृथग्योगादुपसर्गादिति न सम्बध्यते, विनिमेयद्यूतपणं दिव इत्यनुवर्तते । शतस्य दीव्यतीत्यत्र कर्मणि निषिद्धे 'शेषे' षष्ठ्येव भवति । उपसर्गयुक्तस्य पूर्वसूत्रेण विकल्पविधानादनुपसर्गस्य दिवोऽनेन सूत्रेण व्याप्यस्य कर्मसंज्ञानिषेधः ॥ **करणम्, च** ॥ दिव इति वर्तते । कर्मकरणसंज्ञे युगपद्भवत इत्यर्थः । चकारेण करणस्यैव ग्रहणमन्यस्य समुच्चयस्याभावात्, फलं स्यान्न वा सर्वप्रयोगेषु संज्ञाद्वयं बोध्यम् । कर्मसंज्ञायामक्षान्दीव्यति करणसंज्ञायान्त्वक्षैर्दीव्यति । न च संज्ञाद्वयं युगपन्निरवकाशमिति वाच्यम्, अक्षैर्देवयते मैत्रश्चैत्रेणेत्यत्र करणत्वात्तृतीया, कर्मत्वाच्च 'गत्यादि'सूत्रेण नित्याकर्मकत्वप्रयुक्तमणिकर्तुः कर्मत्वं देवयतेश्चा'णिगि प्राणी'त्यादिनाऽकर्मकलक्षणं परस्मैपदञ्च न भवति । न चाक्षान्दीव्यतीत्यत्र कर्मसंज्ञायाः सत्त्वेऽपि परत्वात्करणतृतीया स्यादिति वाच्यम् । भिन्नविषयत्वेनात्र 'स्पर्धे पर' इति न्यायस्याप्रवृत्तेः, समानविषयोर्हि स्पर्धः, द्वितीयातृतीययोश्च प्रतिनियतकर्मकरणशक्त्यभिधायित्वाद्भिन्नविषयत्वम् । अथवा प्रतिकार्यं संज्ञाभेद इत्यपि दर्शनादत्र संज्ञाद्वयप्राप्तावेकस्या एव विधानेऽपरस्या अनवकाशत्वप्रसङ्गात्पर्यायेण संज्ञाद्वयप्रयुक्ता विभक्तिर्भ-

अक्षैर्दीव्यति, अक्षैर्देवयते मैत्रश्चैत्रेण ॥ **अधेः शीङ्स्थाऽऽस आधारः** ॥ २० ॥ अधेः सम्बद्धानां शीङ्स्थाऽऽसामाधारः कर्म्म स्यात् । ग्राममधिशेते, अधितिष्ठति, अध्यास्ते वा ॥ **उपान्वध्याङ्वसः** ॥ २१ ॥ उपादिविशिष्टस्य वसतेराधारः कर्म्म स्यात् । ग्राममुपवसति, अनुवसति, अधिवसति, आवसति ॥ **वाभिनिविशः** ॥ २२ ॥ अभिनिभ्यामुपसृष्टस्य विशेराधारः कर्म वा स्यात् । ग्राममभिनिविशते, कल्याणेऽभिनिविशते ॥ **कालाध्वभावदेशं वाऽकर्म्म चाकर्म्मणाम्** ॥ २३ ॥ कालादिराधारोऽकर्मणां धातूनां योगे, कर्म्माकर्म्म च युगपद्वा स्यात् । मासमास्ते,

---

वति ॥ **अधेः पञ्चमी, शीङ् च स्था च आस्च तस्य, आधारः** ॥ कर्मेति वर्तते । आध्रियतेऽनेनेत्याधारः । अकर्मका अपि धातवः सोपसर्गाः सकर्मका भवन्तीति सिद्धं सकर्मकत्वम्, आधारबाधनार्थन्तु वचनम् ॥ **उपश्चानुश्चाधिश्चाङ् च**, उपान्वध्याङ्भिर्विशिष्टो वस्तस्य ॥ आधारः कर्मेति वर्तते, एवमग्रेऽपि । शब्दशक्तिप्रामाण्यादन्वादिपूर्वो वसतिः स्थानमाचष्टे तत्साहचर्यादुपपूर्वस्यापि वसः स्थानार्थस्यैव परिग्रहः, न तु भोजननिवृत्तिवचनस्योपवासस्य, तेन ग्रामे उपवसति भोजननिवृत्तिमुपवासं करोतीत्यर्थे तु सप्तम्येव । अत्रादाद्यनदाद्योरनदादेरेव ग्रहणमिति न्यायेन वस आच्छादने इत्यदादेर्वस्तेर्न ग्रहणं किन्तु वस निवासे इत्यादेः ॥ वा, अभिपूर्वो निः अभिनिः, अभिनेः परो विट् तस्य ॥ वाशब्दो न विकल्पार्थः किन्तु प्रयोगव्यवस्थार्थोऽर्थाद्व्यवस्थितविभाषापरस्तेन क्वचित्कर्मसंज्ञैव, क्वचिदाधारसंज्ञैव ॥ **कालश्चाध्वा च भावश्च देशश्च तत्**, वा, न कर्म अकर्म, च, न विद्यते कर्म येषान्तेऽकर्माणस्तेषाम् ॥ कालो मुहूर्तादिः कालत्वेन प्रसिद्धस्तेन घटमास्त इति घटस्य कालत्वेऽपि न भवति, गन्तव्यत्वेन प्रसिद्धो नियतपरिमाणः क्रोशादिरध्वा, अत एवाध्वानं

क्रोशं शेते, गोदोहमास्ते, कुरूनास्ते । पक्षे–मासे आस्ते इत्यादि । अकर्म चेति किम् ? मासमास्यते । अकर्मणामिति किम् ? रात्रावुद्देशोऽधीतः ॥ **साधकतमं करणम्** ॥ २४ ॥ क्रियायां प्रकृष्टोप-

---

स्वपितीति न प्रयोगः । भावः क्रिया गोदोहादिः, देशो जनपदग्रामनदीपर्वतादिः । **युगपदिति**, येषामाधारः कर्मसंज्ञो वा भवति, अकर्म च, यत्रापि पक्षे कर्मसंज्ञा तत्राकर्मसंज्ञापि वा भवतीत्यर्थः । **मासमास्यत** इत्यत्राकर्मसंज्ञाया अभावे कर्मणि सति भावे आत्मनेपदं न स्यात्सकर्म्मकत्वात् । कर्मण्यात्मने पदे तु तेनैवाभिहितत्वात्कर्मणो द्वितीया न स्यात्, न ह्यभिहिते कर्मणि व्याप्तावपि द्वितीया इष्यते, ततः कर्मसंज्ञा अकर्मसंज्ञा च युगपद्भवतः ॥ **साधयतीति साधकः**, बहूनां मध्ये प्रकृष्टं साधकं साधकतमम्, प्रकृष्टार्थे तमप्रत्ययः, क्रियतेऽनेनेति करणम् ॥ प्रकर्षो ह्यत्राव्यवधानेन फलजनकव्यापारवत्ता, तादृशव्यापारवत्कारणं प्रधानोपकारकं तच्च विवक्षयैव, यत इदमेव वस्तु करणमिति न नियमः । निश्चिताधिकरणादपि हि स्थाली सूक्ष्मत्वाच्छीघ्रतरपाकसाधनत्वेन वैवक्षिकं करणत्वमनुभवति । कर्तृपराधीनस्यापि कारणस्य कारकान्तरापेक्षयैव प्रकृष्टत्वं न तु करणान्तरापेक्षया, कारकसामान्यवाचिनः साधकशब्दात्तमपः कृतत्वेन तत एव प्रकर्षबोधनात्तेनैकस्यां क्रियायामनेकमपि करणं भवति, यथाश्वेन पथा दीपिकया व्रजति । यद्व्यापारानन्तर्येण तु क्रियापरिनिष्पत्तिर्विवक्ष्यते तस्य साधकतमस्येयं संज्ञा । ज्वलनादिव्यापारेण क्वचित्क्रियासिद्धौ काष्ठानां विवक्षितत्वे काष्ठैः पचतीति काष्ठानि करणम् । ननु साधकं करणमित्येव सूत्र्यतां कारकमित्यस्य चानुवृत्तिरस्ति, एवञ्च साधकं कारकं करणसंज्ञं स्यादित्यर्थो लभ्यते । साधकं कारकमिति हि पर्यायः, पर्यायद्वयोपादानेन च प्रकर्षो लभ्यत इति तमग्रहणं व्यर्थमिति चेदुच्यते, तमग्रहणमपादानादिसंज्ञाविधौ तरतमयोगो नास्तीति

कारकं करणं स्यात् । दानेन भोगानाप्नोति ॥ **कर्म्माभिप्रेयः सम्प्रदानम्** ॥ २५ ॥ कर्म्मणा व्याप्येन, क्रियया वा यमभिप्रेयते स सम्प्रदानं स्यात् । देवाय बलिं दत्ते, राज्ञे कार्यमाचष्टे, पत्ये शेते ॥

ज्ञापनार्थं तेन कुशूलात्पचतीत्यादावुद्धरणादिना व्यवहितस्यापि कुशूलस्यापादानत्वम्, गङ्गायां घोषः प्रतिवसतीत्यत्र च तीरे उपचरिताया अपि गङ्गाया अधिकरणत्वम्, अन्यथाऽव्यवहितस्यावधेरेवापादानत्वं स्यात्, यथा वृक्षात्पर्णं पतति, तथा सर्वावयवैः सह यत्रावयवी व्याप्तः यथा गङ्गायां गावः, तिलेषु तैलमित्यादावेव गङ्गादेरधिकरणत्वं स्यात् ॥ अभिप्रेयते इत्यभिप्रेयः, कर्मणाभिप्रेयः कर्माभिप्रेयः, सम्प्रदीयते यस्मै इति सम्प्रदानम् । अभिप्रेयते इत्यभिप्रोपसर्गद्वयपूर्वकस्य दैवादिकस्य ईङ्ङ् गताविति धातोः कर्तरि रूपं नान्यस्यासम्भवात् । श्रद्धानुग्रहादिकाम्यया यमभिसम्बध्नाति सः कर्माभिप्रेयः । देवाय बलिं दत्ते इत्यत्र ददातिनाऽऽप्तुमिष्टत्वाद्बलिः कर्म, तेन देवादिरभिसम्बध्यते इत्यभिसम्बन्धक्रियासाधकतमत्वाद्बल्यादेः करणत्वम्, तथा च करणभूतेन कर्मणा कर्ता श्रद्धानुग्रहादिकाम्यया देवमभिप्रैतीति देवस्य सम्प्रदानता । सम्प्रदानमत्र त्रिधोक्तम्—अनिराकरणात्प्रेरणादनुमतेश्च । तत्र प्रथमं देवाय बलिं ददाति, अत्र देवो न प्रार्थयते नानुमन्यते न निराकरोति चेत्यनिराकरणाद्देवः सम्प्रदानम् । याचकायार्थं प्रयच्छतीत्यत्र याचकः प्रेरणया सम्प्रदानम् । विप्राय गामुत्सृजतीत्यत्रानुमत्या विप्रः सम्प्रदानम् । ननु दानस्य तदर्थत्वात्तादर्थ्ये चतुर्थीप्रयोगात्किमर्थं सम्प्रदानसंज्ञा, उच्यते, दानक्रियार्थं हि सम्प्रदानं न तु दानक्रिया तदर्था, कारकाणां क्रियार्थत्वात्, सम्प्रदानार्थन्तु दीयमानं कर्मेति वाक्यार्थभूताया दानक्रियाया अतादर्थ्यात्तादर्थ्ये चतुर्थ्या अप्राप्तौ तदर्था संज्ञा न्याय्येति । राज्ञे कार्यमाचष्टे, अत्र कार्यकर्मकं

स्पृहेर्व्याप्यं वा ॥ २६ ॥ स्पृहेर्व्याप्यं वा सम्प्रदानं स्यात् । *पुष्पेभ्यः पुष्पाणि वा स्पृहयति* ॥ **क्रुद्रुहेर्ष्यासूयार्थैर्यं प्रति कोपः** ॥ २७ ॥ क्रुधाद्यर्थैर्द्रुह्यादिभिर्योगे, यं प्रति कोपस्तत्सम्प्रदानं स्यात् । मैत्राय क्रुध्यति, द्रुह्यति, ईर्ष्यत्यसूयति वा । यं प्रतीति किम् ? मनसा क्रुध्यति । कोप इति किम् ? शिष्यस्य कुप्यति विन-

---

कथयन्तमनुमन्यमानोऽनिराकुर्वन्वा राजा सम्प्रदानं भवति । एवं पत्ये शेते इत्यत्र शयनक्रियां करणभूतामनिराकुर्वन्ननुमन्यमानो वा पतिः सम्प्रदानं भवति । न चाजां नयति ग्राममित्यत्रापि नयति-क्रियाकर्मभूताजाभिः सम्बध्यमानस्य ग्रामस्य सम्प्रदानत्वापत्तिरिति वाच्यम्, यमभिसम्बध्यते इत्युक्त्या यमिति निर्दिष्टस्य शेषित्वं कर्मणेति निर्दिष्टस्य शेषत्वं लभ्यते, ग्रामस्य चाजां प्रति शेषित्वं नास्ति, अजासंयुक्तो ग्रामो भवत्वित्युद्देश्याभावात्, किन्त्वजा ग्रामसम्बद्धा भवत्वित्येवेच्छा भवति, तथा चोद्देश्यत्वमजाया एव न तु ग्रामस्य । शेषित्वमुद्देश्यत्वं शेषत्वमप्रधानत्वम् ॥ **स्पृहेः षष्ठी; व्याप्यम्, वा** ॥ सम्प्रदानमित्यनुवर्तते । पुष्पेभ्य इत्यत्र कर्तुः स्पृहादिक्रियाव्याप्यत्वात्पुष्पाणां नित्यं कर्मसंज्ञायां प्राप्तायां पक्षे सम्प्रदानसंज्ञा विधीयते, यदा च सम्प्रदानसंज्ञा तदा धातोरकर्मकत्वाद्भावे प्रत्यया भवन्ति ॥ **क्रुध् च द्रुहश्चेर्ष्या चासूया च, ताः अर्थो येषान्तैः, यम्, प्रति, कोपः** ॥ अनुवृत्तिः पूर्ववत् । क्रोधोऽमर्षः, वधाद्यनुकूलव्यापारजनकश्चित्तवृत्तिविशेषः, द्रोहोऽपचिकीर्षा, दुःखजनकक्रियारूपापकारजनकश्चित्तवृत्तिविशेषः, ईर्ष्या परसम्पत्तौ चेतसो व्यारोषोऽक्षमा वा, उत्कर्षविरोधिधर्मारोपानुकूलव्यापारजनकश्चित्तवृत्तिविशेषः, गुणेषु दोषाविष्करणमसूया शौचाचारादिगुणविषये दम्भादिकृतत्वरूपदोषारोपानुकूलश्चित्तवृत्तिविशेषः । कोपपूर्वकाणां सर्वेषां ग्रहणार्थं यं प्रति कोप इत्युक्तं तेन भार्यामीर्ष्यतीत्यादौ कोपकारणकेर्ष्याया भार्यायाम-

यार्थम् ॥ **नोपसर्गात्क्रुद्रुहा** ॥ २८ ॥ सोपसर्गाभ्यां क्रुद्रुहिभ्यां योगे, यं प्रति कोपस्तत्सम्प्रदानं न स्यात् । मैत्रमभिक्रुध्यति, अभिद्रुह्यति। उपसर्गादिति किम् ?मैत्राय क्रुध्यति द्रुह्यति ॥ **अपायेऽवधिरपादानम्** ॥ २९ ॥ अपाये विश्लेषे योऽवधिस्तदपादानं स्यात् । वृक्षात्पर्णं पतति, व्याघ्राद्बिभेति, अधर्म्माज्जुगुप्सते विरमति वा, धर्मात्प्रमाद्यति, चौरेभ्यस्त्रायते, अध्ययनात्पराजयते, यवेभ्यो गां

सम्भवान्न सम्प्रदानसंज्ञा। परैर्ईश्यमानां न सहते इत्यत्रेर्ष्या, एवञ्चानुद्रूता कोपावस्था कोपः, विकृतवाक्कायव्यापारानुमीयमानावस्थाः क्रोधादय इत्येतयोर्भेदः। **मनसा क्रुध्यतीति**, नात्र मनस उपरि कोपः किन्तु तेन कृत्वाऽन्यस्य पुरुषादेः। शिष्यस्य कुप्यति विनयार्थं शिष्यसम्बन्धिनोऽविनयस्योपर्यत्र कोपो न तु शिष्यस्य । ननु क्रोधद्रोहादीनां भिन्नस्वभावत्ववर्णनाद्यं प्रति कोप इति सामान्येन सर्वेषां विशेषणं कथं घटते, यं प्रति द्रोहः, यं प्रतीर्ष्या, यं प्रत्यसूयेत्येव हि घटते इति चेन्न, द्रुहादीनां कोपहेतुकत्वेन तदितरहेतुकत्वेन च द्वैविध्यात्कोपहेतुकानामेव तेषां ग्रहणार्थं तथोक्तेः ॥ **न, उपसर्गात्, क्रुध् च द्रुह् च तेन** ॥ यं प्रति कोपः सम्प्रदानमित्यनुवर्तन्ते । अभिक्रुध्यतीति, मैत्रमभिगम्याभिमुखीकृत्य वा क्रुध्यति, सोपसर्गत्वात्सकर्मकत्वेन कर्मसंज्ञायां द्वितीया ॥ **अपाये, अत्रधानमवधिः**, अपादीयते यस्मात्तदपादानम् ॥ विश्लेषो विभागस्तज्जनकक्रिया सावधिकं गमनमपि । तत्र यदवधिभूतं विश्लेषक्रियानाश्रितं तत्कारकमपादानसंज्ञं भवति। **प्रकृतधातूपात्तविभागजनकव्यापारानाश्रयत्वे सति प्रकृतधात्वर्थविभागाश्रयत्वमपादानत्वम्** । वृक्षात्पर्णं पततीत्यादौ कर्तुः पर्णादेरपादानत्ववारणाय सत्यन्तम्, धावतोऽश्वात्पततीत्यादौ पततीति प्रकृतधातूपात्तक्रियानाश्रयत्वेनाश्वस्यापादानत्वमक्षतम् । एवं कुड्यात्पततोऽश्वात्पततीत्यादावपि पततीत्युपात्तक्रियानाश्रयत्वेन तां

रक्षति, उपाध्यायादन्तर्द्धत्ते, शृङ्गाच्छरो जायते, हिमवतो गङ्गा प्रभवति, वलभ्याः श्रीशत्रुञ्जयः षड्योजनानि, कार्त्तिक्या आग्रहायणी

प्रत्यश्चस्यापादानत्वमक्षतम् । न च परस्परस्मान्मेषावपसरत इत्यत्र कथमपादानत्वम्, उभयकर्मजविभागस्यैकतया प्रकृतधातूपात्तविभागजनकक्रियानाश्रयत्वाभावादिति वाच्यम्, विभागैक्येऽपि क्रियाभेदेनैककियामादायान्यस्यापादानत्वात्, तत्तन्मेषवृत्तित्वविशिष्टा क्रिया हि भिन्ना, तत्तन्मेषाश्रितैव नान्यमेषाश्रिता । यद्यपि विभागः सम्बन्धपूर्वको भवति, असम्बद्धस्य विभागानुपपत्तेः, तथा च व्याघ्राद्बिभेत्यधर्माज्जुगुप्सते विरमति वा, धर्मात्प्रमाद्यतीत्यादौ नास्ति सम्बन्ध इति व्याघ्रादेरपादानत्वं दुरुद्धरं तथापि वास्तवसम्बन्धपूर्वकस्य बुद्धिपरिकल्पितसम्बन्धपूर्वकस्य च विभागस्य विवक्षितत्वाद्व्याघ्रादिकं कष्टहेतुत्वादिना बुद्धया सम्प्राप्य निवर्तनात्तदुपपत्तिः । तच्चापादानं त्रिविधं निर्दिष्टविषयमुपात्तविषयमपेक्षितक्रियञ्चेति । यत्र साक्षाद्धातुनापायलक्षणो विषयो निर्दिष्टस्तन्निर्दिष्टविषयं यथा वृक्षात्पतति, पतेर्विभागजन्यसंयोगोऽर्थस्तत्र विभागे पञ्चम्यर्थो विशेषणं प्रकृत्यर्थश्च प्रत्ययार्थे, एवञ्च वृक्षरूपापादानकविभागजन्यसंयोगानुकूलं पर्णकर्तृकं पतनम्, एवं ग्रामादागच्छतीत्यादि । यत्र धात्वन्तराङ्गार्थं स्वार्थं धातुराह तदुपात्तविषयं यथा बलाहकाद्विद्योतते विद्युदत्र विद्योततेर्विभागजन्यसंयोगानुकूलक्रियारूपनिस्सरणपूर्वकविद्योतने वृत्तिः, बलाहकापादानकविभागजन्यसंयोगानुकूलक्रियोत्तरकालिकं विद्युत्कर्तृकं विद्योतनमिति बोधः । यत्र तु क्रियावाचिपदं न श्रूयते केवलं क्रिया प्रतीयते तदपेक्षितक्रियं यथा प्रत्यक्षसिद्धमागमनं मनसि निधाय कुतो भवानिति प्रश्ने पाटलिपुत्रादित्युत्तरयति तत्राकाङ्क्षादितः आगमनस्यान्वयो भवति । अधर्माज्जुगुप्सत इत्यनिष्टसाधनताज्ञानरूपनिन्दापूर्वकनिवृत्तिर्जुगुप्सतेरर्थः, विषयता पञ्चम्यर्थः, अनिष्टसाधनताज्ञानपूर्वकं ततो निवर्तते इति भावः ।

मासे, चैत्रान्मैत्रः पटुः, माथुराः पाटलिपुत्रकेभ्य आढ्यतराः ॥

एवञ्च निवृत्त्यङ्गे जुगुप्सा धातुर्वर्तत इति बुद्धिसंसर्गपूर्वकमपादानत्वम् । अधर्माद्विरमति, प्रागभावसाधारणकृत्यभावानुकूलव्यापारपूर्वकनिवृत्तिर्विरमतेरर्थः, य एषः प्रेक्षापूर्वकारी सोऽधर्मं दुःखहेतुं बुद्ध्या सम्प्राप्य नानेन कृत्यमस्तीति ततो निवर्तत इति निवृत्यङ्गत्वाद्विरमणस्याधर्मस्यापादानत्वम् । धर्मात्प्रमाद्यति, अत्रेष्टसाधने वस्तुनि समानदेशत्वसमानकालत्वोभयसम्बन्धेनाधिकारविशिष्टेष्टसाधनत्वाभावज्ञानपूर्वकनिवृत्तिः, अनिष्टसाधनज्ञानपूर्वकनिवृत्तिर्वा धात्वर्थः । य एष मनुष्यो नास्तिकबुद्धिर्भवति स पश्यति, 'नायं कश्चिद्धर्मो नाम, नैनं करिष्यामीति' स्वबुद्ध्या सम्प्राप्य ततो निवर्तत इति, निवृत्त्यङ्गत्वादपादानत्वम् । चौरेभ्यस्त्रायते, अनिष्टपरिहारस्त्राणं तत्पूर्विका निवर्तना धात्वर्थः, चौरापादानिकाऽनिष्टपरिहारफलिका निवर्तनेति बोधः । अध्ययनात्पराजयते, कृत्यसाध्यत्वज्ञानसमानाधिकरणोत्साहाभावपूर्वकनिवृत्तिर्धात्वर्थः । यवेभ्यो गां रक्षति, गवादेर्यवादिसम्पर्कं बुद्ध्या समीक्ष्य विनाशं पश्यन् गवादीन् यवादिभ्यो निवारयत्यतोऽपादानत्वम् । उपाध्यायान्निलीयते, अत्र स्वकर्मैकदर्शनाभावप्रयोजकदेशविशेषस्थितिर्धातोरर्थः । मामुपाध्यायो मा द्राक्षीदिति तिरोभवतीत्यपादानता । शृङ्गाच्छरो जायते, अत्र शृङ्गादिभ्यः शरादयो निर्गच्छन्तीति स्पष्टमेवापादानत्वमेवं हिमवतो गङ्गा प्रभवतीत्यत्राप्यपां सङ्क्रमणादपादानता । वलभ्याः श्रीशत्रुञ्जयः षड्योजनानि, अत्राव्यवहितोत्तरत्वं पञ्चम्यर्थः । स्वाव्यवहितोत्तरवृत्तित्वं प्रथमायाः, एवञ्च वलभ्यव्यवहितोत्तरषड्योजनाव्यवहितोत्तरदेशवृत्तिः श्रीशत्रुञ्जय इति बोधः । कार्त्तिक्या आग्रहायणी मासे, कार्तिक्यवयवकत्रिंशत्तिथ्यात्मकमासाव्यवहितोत्तरकालवृत्तिराग्रहायणी । उभयत्राप्येवमपायः प्रतीयते । चैत्रान्मैत्रः पटुः, माथुराः पाटलिपुत्रकेभ्य आढ्यतराः, अत्र मैत्रादयः पटुत्वादिना धर्मेण ततो विभक्ताः प्रतीयन्त इत्यपादानत्वम् ॥

क्रियाश्रयस्याधारोऽधिकरणम् ॥३०॥ क्रियाऽऽश्रयस्य कर्तुः

आश्रयणमाश्रयः, क्रियाया आश्रयस्तस्य, आधारः, अधिक्रियते स्मेत्यधिकरणम् ॥ लोके द्रव्यगुणक्रियाणामधिकरणं भवति, कारकाधिकारादत्र क्रियाश्रयमेवाधिकरणम् । क्रिया हि साक्षात्कर्मणि कर्तरि च वर्तत इति साक्षात्तस्या अधिकरणं तावेव । एवञ्च साक्षादाधारयोः कर्मकर्त्रोर्व्याप्यस्वतन्त्रपदाभ्यां कर्मकर्तृसंज्ञाभ्यामाक्रान्तत्वात्परम्परया क्रियाधारस्याधिकरणसंज्ञा विधीयते, तदेवोक्तं क्रियाश्रयस्येत्यादिना । परम्पराघटके च कर्तृकर्मण्येव । कटे आस्त इत्यत्रासिक्रियाधारं चैत्रं धारयन्कटादिरधिकरणतां प्रतिपद्यते । स्थाल्यां तण्डुलान् पचतीत्यत्र विक्लित्तिरूपफलाश्रयान् तण्डुलान् धारयन्ती स्थाल्यधिकरणभावमापद्यते । क्रियाश्रयस्य धारणद्वारेण क्रियासिद्धावधिकरणस्योपकारकत्वात्क्रियाहेतुत्वेन कारकत्वम् । तच्चाधिकरणं षोढा, वैषयिकमौपश्लेषिकमभिव्यापकं सामीप्यकं नैमित्तिकमौपचारिकञ्च । अनन्यत्र भावो विषयस्तस्मै प्रभवतीति वैषयिकं यथा दिवि देवाः, नभसि तारका इत्यादि। देवादीनामन्यत्र प्रवृत्त्यभावाद्दिवादयो विषयाः । एकदेशमात्रसंयोग उपश्लेषस्तत्र भवमौपश्लेषिकं यथा कटे आस्ते, पर्यङ्के शेते, गृहे तिष्ठतीत्यादि, कटादिर्हि देवदत्तादिनैकदेशेन संयुज्यते । यस्याधेयेन समस्तावयवसम्बन्धस्तदभिव्यापकम् । तद्ध्याधेयेनाभिव्याप्यते, आधेयं वाभिव्याप्नोति यथा तिलेषु तैलं गवि गोत्वं तन्तुषु पटः, अत्र तिलाद्यवयवान् व्याप्य तैलादिरवतिष्ठते, अत्र सर्वत्र क्रियाया अश्रवणेऽपि प्रतीयमानक्रियापेक्षयाऽऽधारत्वं विज्ञेयम् । यदाधेयसन्निधिमात्रेण क्रियाहेतुस्तत्सामीप्यकं यथा गङ्गायां घोषो बन्धुष्वास्ते, गुरौ वसतीत्यादि, घोषादीनां गङ्गाद्यायत्ता स्थितिरिति सन्निधिमात्रेण गवादीनामाश्रयत्वम् । न हि संयोगसमवायनिमित्तक एवाधाराधेयभावः, यदायत्ता यस्य स्थितिः स विनापि संयोगसमवायौ तस्याश्रयो भवति,

कर्म्मणो वाऽऽधारोऽधिकरणं स्यात् । कटे आस्ते, स्थाल्यां तण्डुलान् पचति ॥ **नाम्नः प्रथमैकद्विबहौ** ॥ ३१ ॥ एकद्विबहावर्थमात्रे

यथा राजाश्रयः पुरुष इति लोकप्रसिद्धिः । न ह्यत्र पुरुषस्य राज्ञा सह संयोगः समवायो वा । निमित्तमेव नैमित्तिकं यथा युद्धे सन्नह्यते, शरदि पुष्यन्ति सप्तच्छदा इत्यादि, अत्र युद्धादिर्नैमित्तिक आधारो न वैषयिकः, सन्नहनादीनां केनचिन्निमित्तेनान्यत्रापि भावात् । अन्यत्रावस्थितस्यान्यत्राध्यारोप उपचारस्तत्र भवमौपचारिकं यथाङ्गुल्यग्रे करिशतमास्ते, स मे मुष्टिमध्ये तिष्ठतीत्यादि । अत्र ह्यन्यत्र स्थितस्य करिशतादेः केनापि प्रयोजनादिनाङ्गुल्यग्रादावारोप्यमाणत्वादौपचारिकाधारत्वम् ॥ **नाम्नः पञ्चमी, प्रथमा, एकश्च द्वौ च बहवश्च तस्मिन्** । कर्मणि द्वितीयेत्यादिसूत्रेण द्वितीयादिविभक्तीनां कर्मादिशक्तिषु वक्ष्यमाणत्वात्प्रथमाया विशेषानभिधानात्परिशिष्टेऽर्थमात्रे प्रथमा । तत्र स्वार्थद्रव्यलिङ्गसङ्ख्याशक्तिस्वरूपः समग्रोऽसमग्रो वा नामार्थोऽर्थमात्रम् । शक्तिपदेन कर्मत्वादिशक्तिभिन्नः शक्तिविशेषो ग्राह्यः । तत्र स्वस्यैवार्थः स्वार्थः, यस्मादर्थे शब्दस्य प्रवृत्तिः, शब्दप्रवृत्तिनिमित्तमिति यावत् । तच्च प्रवृत्तिनिमित्तं त्वतलादिप्रत्ययैरभिधीयते, स्वरूपजातिगुणक्रियाद्रव्यसम्बन्धादिरूपम् । स्वरूपान्तरमनुपादाय स्वाभिधेये यदा शब्दः प्रवर्तते तदा शब्दरूपविशिष्टस्यैवार्थस्य प्रतीतेः शब्दस्वरूपमेव स्वार्थो विशेष्यन्तु द्रव्यं यथा डित्थ इत्यादि । अनुवृत्तिप्रत्ययहेतुर्जातिः यथा गौरित्यादि, अत्र जातिविशिष्टद्रव्यस्य प्रतीत्या जातिः स्वार्थः । गुणः शुक्लादिः शुक्लः पट इत्यादौ गुणविशिष्टस्य द्रव्यस्य प्रतीतेर्गुणः स्वार्थः । कारक इत्यादौ क्रियाविशिष्टस्य द्रव्यस्यावभासनात्क्रिया स्वार्थः । द्रव्यमपि यदा द्रव्यान्तरस्य विशेषणं भवति यथा यष्टीः प्रवेशय कुन्तान्प्रवेशयेत्यादौ तदा यष्ट्यादि द्रव्यं विशेषणभावापन्नं स्वार्थः । द्रव्यान्तरं विशेष्य-

वर्त्तमानान्नाम्नः परा यथासङ्ख्यं सि औ जस्लक्षणा प्रथमा स्यात् ।

भावापन्नं पुरुषादि तु द्रव्यम् । यत्र सम्बन्धनिमित्तः प्रत्ययो भवति तत्र सम्बन्धोऽपि स्वार्थः यथा दण्डी विषाणीत्यादि, अत्र हि दण्ड-विषाणयोः सम्बन्धः स्वार्थः । स्वभावादेव बुद्धिविषयतावच्छेदकत्वोपलक्षिततत्तद्धर्मावच्छिन्नबोधकं सर्वनाम, यस्मिन्धर्मिणि तादृशधर्मं प्रवृत्तिनिमित्तीकृत्य प्रयुज्यते, इदं तदित्यादिरूपेण तद्द्रव्यपदेन व्यवह्रियते, सा च व्यक्तिरेव, तस्या एव सर्वनामपरामर्शयोग्यत्वात्, विशेष्यत्वेन विवक्षितोऽर्थो द्रव्यमित्यपि लक्षणम्, एतत्पक्षे जात्यादेरपि विशेष्यत्वविवक्षायां द्रव्यत्वमिष्टमेव, तिबन्तार्थक्रियायाः किमादिभिः परामर्शात्स्तोकाद्यर्थनिरूपितविशेष्यतावत्त्वाच्च द्रव्यत्वमस्त्येव । इयं जातिरयं गुण इदं कर्मेत्यादि । यदर्थे वर्तमानमवर्तमानं वा केवलं शब्दत एवावसीयते, तद् ङ्याबादिसंस्कारहेतुः स्त्रीपुमान्नपुंसकमिति लिङ्गं यथा नदी खट्वा युवतिरित्यादि । यस्यामेकवचनद्विवचनबहुवचनानि भवन्ति सा भेदप्रतिपत्तिहेतुरेकत्वादिका सङ्ख्या, तया हि पदार्थानां भेदः प्रतीयते भेदपरिगणनलक्षणत्वात्तस्याः । नन्वेको द्वावित्यादावेकादिनामार्थभिन्नतयान्येषां विशेषणीभूतानामेकत्वादीनामभावात्प्रथमाया अभावप्रसङ्ग इति चेन्न, नाम्नः प्रवृत्तिनिमित्तभूतस्यैकत्वादेर्विभक्त्यानभिधानात्, एकत्वसङ्ख्यावतो यदेकत्वं तत्रैव विभक्तिप्रवृत्तेर्यथा वृक्ष इत्यादौ, वृक्षत्ववतो द्रव्यस्य यदेकत्वं तद्विभक्त्या प्रतिपाद्यते, तथात्रापि । आख्यातकृत्तद्धितसमासैरनुक्तायां शक्त्यां द्वितीयाद्या विभक्तयः षष्ठी च भवन्ति, सा च शक्तिः स्वपरगतक्रियोत्पत्तिहेतुः कारकरूपा तत्पूर्वकसम्बन्धरूपा च सा यदाभिहिता भवति तदा न द्वितीयादयः । उपचरितमपि नामार्थो भवति । उपचारश्च सहचरणस्थानतादर्थ्यवृत्तमानधरणसामीप्ययोगसाधनाधिपत्येभ्यो भवति । कुन्ताः प्रविशन्तीति साहचर्यात्कुन्तवत्सू-

डित्थः, गौः, शुक्लः, कारकः, दण्डी ॥ **आमन्त्र्ये** ॥ ३२ ॥ आमन्त्र्यार्थवृत्तेर्नाम्नः प्रथमा स्यात् । हे देव ! आमन्त्र्य इति किम् ? राजा

पचारः । मञ्चाः क्रोशन्तीत्यादौ स्थानात् मञ्चस्थेषु पुरुषेषूपचारः । तादर्थ्यादिन्द्रः स्थूणा इत्यादौ । वृत्त्याद्यमोऽयं राजेत्यादौ । मानात्प्रस्थो व्रीहिरित्यादौ । धरणात्तुला चन्दनमित्यादौ । सामीप्याद्गङ्गातटं गङ्गेत्यादौ । योगाद्रक्तः कम्बल इत्यादौ । साधनादन्नं प्राणा इत्यादौ । आधिपत्याद्ग्रामाधिपतिर्ग्राम इत्यादावुपचारो विज्ञेयः । एवमलिङ्गमलिङ्गसङ्ख्यं शक्तिप्रधानं द्योत्यं स्वरूपमात्रमपि नामार्थो भवति, यथा *त्वमुच्चैर्यतः प्रपचत्यध्यागच्छतीत्यादयः । नन्वर्थमात्रे प्रथमा उच्यते, मात्रपदञ्चाधिकव्यवच्छेदाय, तथा नीलोत्पलमित्यादौ सामानाधिकरण्यात्पदार्थमात्राद्विशेषणविशेष्यभावस्याधिकस्य* प्रतीतेः प्रथमा न स्यादिति चेन्न, विशेष्यविशेषणभावस्याकाङ्क्षादिवशेन प्रतीयमानतया *वाक्यार्थत्वान्न तु पदार्थत्वम्, अनपेक्षितविशेष्यविशेषणभावयोर्नीलोत्पलशब्दयोः* स्वार्थमात्रनिष्ठयोः प्रथमाविधानात् । तत आकाङ्क्षादिबलेन प्रतीयमानो विशेष्यविशेषणभावो बहिरङ्गत्वादन्तरङ्गभूतं प्रथमप्रवृत्तं पदसंस्कारं न शक्नोति बाधितुमिति । निरर्थकाद्वर्णाद्धातुवाक्याभ्यां च प्रथमा मा भूदिति नाम्न इत्युक्तम् । एकद्विबहाविति विशेषणानुपादाने एकत्वद्वित्वविशिष्टेऽप्यर्थे बहुवचनप्रयोगदर्शनाद्यथा गुरवस्तातपादाः पादाः मे सुकुमारतरा इत्यादि सर्व्वत्र साङ्कर्यं प्राप्नुयात्तच्च नेष्टमतस्तदुपादानं कृतम् । न चाव्ययेभ्यः प्रथमा न स्यात्तत्रैकत्वाद्यभावादिति वाच्यम्, अव्ययेभ्यो विभक्तीनां लुग्विधानेन प्रथमाया अपि प्राप्तेः ॥ **आमन्त्र्ये** ॥ पूर्वसूत्रं सम्पूर्णमनुवर्तते । तत्रामन्त्रणं प्रसिद्धतत्सम्बन्धस्य किमप्याख्यातुमभिमुखीकरणम् । तत्फलं प्रवृत्तिनिवृत्ती, तद्विषय आमन्त्र्यस्तत्र वर्तमाना-

भव ॥ **गौणात्समयानिकषाहाधिगन्तरान्तरेणातियेनतेनैर्द्वितीया ॥ ३३ ॥** समयादिभिर्युक्ताद्गौणान्नाम्न एकद्विबहौ यथासङ्ख्यममौशसिति द्वितीया स्यात् । समया ग्रामम् । निकषा गिरिं नदीं । हा ! मैत्रं व्याधिः । धिग् जाल्मम् । अन्तराऽन्तरेण च निषधं नीलं च विदेहाः । अन्तरेण धर्म्मं सुखं न स्यात् । अतिवृद्धं कुरून् महद्बलम् । येन पश्चिमां गतस्तेन पश्चिमां नीतः ॥ **द्वित्वेऽधोऽध्युपरिभिः ॥ ३४ ॥** द्विरुक्तैरेभिर्युक्तान्नाम्नो द्वितीया स्यात् ।

दित्यर्थः । तेनामन्त्रणशब्देन सह प्रसिद्धो वाच्यवाचकभावलक्षणः सम्बन्धो यस्य देवदत्तादेः सः प्रसिद्धतत्सम्बन्धः । स्वार्थादिपञ्चकलक्षणनामार्थात् कर्मत्वादितश्च भिन्नस्यामन्त्रणस्य शेषरूपस्य विवक्षणे षष्ठीप्राप्तौ तद्बाधनार्थमिदं सूत्रम् । एवञ्च सम्बोधनविभक्तिरनुवाद्यविषया सम्बोध्यतावच्छेदकरूपेणामन्त्र्यस्य सिद्धि विनाऽनुवाद्यत्वासम्भवात्, तेन राजा भवेत्यादौ न सम्बोधनविभक्तिः राजत्वादेरसिद्धत्वेनानुवाद्यत्वाभावात् ॥ **गौणात्, समया च निकषा** च हाच धिक् च अन्तरा च अन्तरेण च अति च येन च तेन च तैर्द्वितीया । नाम्नः एकद्विबहावित्यनुवर्तते । यस्य नाम्न आख्यातपदेन सामानाधिकरण्यं नास्ति तद्गौणम्, यस्य त्वस्ति तन्मुख्यम्, समया ग्राममिति, ग्रामसमीपवृत्तिनदीत्यर्थः । अत्र नद्यादि समीपपदार्थस्य विशेष्यं, ग्रामादि विशेषणं क्रियापदञ्चात्रास्तीति विज्ञेयम् । यत्र क्रिया न श्रूयते तत्रास्तिर्भवन्तीति परः प्रयुज्यत इति वचनात् । अन्तरान्तरेणशब्दौ समयादिभिः साहचर्यान्निपातौ ग्राह्यौ, अन्तरेणशब्दो विनार्थश्च । **अतिवृद्धमिति,** कुरूणामतिक्रमेण पाण्डवानां महद्बलं प्रवृद्धमित्यर्थः । येनतेनौ लक्ष्यलक्षणभावौ द्योतयतः । अत्र सर्वत्र सम्बन्धसामान्ये षष्ठीप्राप्तौ तदपवादायेदम् ॥ **द्वयोर्भावो द्वित्वं तस्मिन्,** अधश्च अधि च उपरि च तैः ॥ गौणान्नाम्न एकद्विबहौ

अधोऽधो ग्रामम् । अध्यधि ग्रामम् । उपर्युपरि ग्रामं ग्रामाः । द्वित्व इति किम् ? अधो गृहस्य ॥ **सर्वोभयाभिपरिणा तसा** ॥ ३५ ॥ सर्वादिभिस्तसन्तैर्युक्तान्नाम्नो द्वितीया स्यात् । सर्वतः उभयतः, अभितः, परितो वा ग्रामं वनानि ॥ **लक्षणवीप्स्येत्थम्भूतेष्वभिना** ॥ ३६ ॥ लक्षणं चिह्नम्, वीप्साकर्म्म वीप्स्यम्, इत्थम्भूतः किञ्चित्प्रकारमापन्नः, एषु वर्त्तमानादभिना युक्ताद्वितीया स्यात् । वृक्षमभि विद्युत्, वृक्षं वृक्षमभि सेकः, साधुर्मैत्रो मातर-

---

द्वितीयेत्यनुवर्तन्ते, एवमग्रिमसूत्रेष्वपि । अधः प्रभृतयः कृतद्विर्वचनाः समीपवचना एव, 'सामीप्येऽधोऽध्युपरी'ति तत्रैव द्वित्वविधानात् । सामीप्यञ्च देशकृतं कालकृतं वा । समीपाधस्तनभागवृत्तित्वसमीपोर्ध्वभागवृत्तित्वं क्रमेणार्थः । अधो गृहस्येत्यत्राधश्शब्दोऽधोदेशवाचि, न सामीप्यमत्र विवक्षितमिति न द्वित्वम् । षष्ठ्यपवादः । यस्य सामीप्यं तस्माद्ग्रामादेः सम्बन्धे षष्ठ्यां प्राप्तायामिदं विधानम् । बहुवचनमेकद्विबहाविति यथासङ्ख्यनिवृत्त्यर्थम् ॥ **सर्वश्चोभयश्चाभिश्च** परिश्च तेन, तसा तृतीया ॥ तसेति सर्वादिविशेषणत्वात्तदन्तविधिः, षष्ठ्यपवादः ॥ **लक्षणश्च वीप्स्यश्चेत्थम्भूतश्च** तेषु, अभिना तृतीया । लक्षणं चिह्नम् । अवयवशः समुदायस्य क्रियादिना साकल्येन प्राप्तीच्छा वीप्सा, तत्कर्म वीप्स्यम् । केनचिद्विवक्षितेन विशेषेण भाव इत्थं भावस्तद्विषय इत्थम्भूतः । वृक्षमभि विद्युदिति, विद्योतत इति शेषः । वृक्षो लक्षणं विद्योतमाना विद्युल्लक्ष्यं तयोर्लक्ष्यलक्षणभावरूपसम्बन्धोऽभिना द्योत्यते । वृक्षप्रकाशेन हि तत्समीपदेशावच्छिन्ना विद्युज्ज्ञाप्यते । **वृक्षं वृक्षमिति**, एकैकस्य वृक्षस्य सेक इत्यर्थः । अत्र वीप्साविषये व्याप्यत्वं द्विर्वचनद्योत्यं व्याप्यत्वविशिष्टवृक्षादीनां व्यापकत्वसम्बन्धेन सेचनेऽन्वयोऽभिना द्योत्यः । साधुर्मैत्रो मातरमभीति, मातृविषये साधुत्वप्रकारं प्राप्त इत्यर्थः । अत्र मैत्रस्य साधुभावं प्रति

मभि । लक्षणादिष्विति किम् ? यदत्र ममाभि स्यात्तद्दीयताम् ॥ **भागिनि च प्रतिपर्यनुभिः** ॥ ३७ ॥ स्वीकार्योऽशो भागः, तत्स्वामी भागी, तत्र लक्षणादिषु च वर्तमानात् प्रत्यादिभिर्युक्ताद् द्वितीया स्यात् । यदत्र मां प्रति, मां परि, मामनु स्यात्तद्दीयताम् वृक्षं प्रति परि अनु वा विद्युत् । वृक्षं वृक्षं प्रति पर्यनु वा सेकः । साधुर्मैत्रो मातरं प्रति पर्यनु वा । एतेष्विति किम् ? अनु वनस्याऽशनिर्गता ॥ **हेतुसहार्थेऽनुना** ॥ ३८ ॥ हेतुर्जनकः । सहार्थस्तुल्ययोगो विद्यमानता च, तद्विषयोऽप्युपचारात्, तयोर्वर्त्तमानादनुना युक्ताद्वितीया स्यात् । जिनजन्मोत्सवमन्वागच्छन्सुराः, गिरिमन्वासिता सेना ॥ **उत्कृष्टेऽनूपेन** ॥ ३९ ॥ उत्कृष्टार्थादनूपाभ्यां युक्ताद्वितीया स्यात् । अनुसिद्धसेनं कवयः । उपोमास्वातिं सङ्गच्छन्ते ।

मातुर्विषयता, योऽसौ मातुरित्थम्भावप्राप्त्या विषयविषयीभावलक्षणः सम्बन्धः सोऽभिना द्योत्यते । यदत्र ममाभि स्यात्तद्दीयतां योऽत्र मम भागः स्यादित्यर्थः, अत्राभिना भागसम्बन्धो द्योत्यते ॥ **भागो विद्यते यस्य तस्मिन्भागिनि, च**, प्रतिश्च परिश्चानुश्च तैः । लक्षणवीप्स्येत्थम्भूतेष्विति चेन समुच्चीयते । वृक्षं वृक्षं प्रति विद्योतते विद्युदित्यादौ लक्ष्यलक्षणभावः प्रत्यादिद्योत्यः ॥ **सहस्यार्थः सहार्थः**, हेतुश्च सहार्थश्च तस्मिन्ननुना तृतीया ॥ हेतुर्द्विविधो जनको ज्ञापकश्च, तत्र ज्ञापकस्य लक्षणत्वाद्भागिनीति सूत्रेणैव द्वितीयासिद्धे जनक एवेह गृह्यते । जिनजन्मोत्सवमन्वागच्छन् सुराः, अत्र जिनजन्मोत्सवो हेतुः, सुरागमनं हेतुमत्, तत्र जिनजन्मोत्सवस्य हेतुभावः सुरागमनापेक्षः सोऽनुना द्योत्यते, तेन हेतुनेत्यर्थः । 'हेतुकर्तृकरणे'त्यस्य बाधकोऽयम् । गिरिमन्वासिता सेना, गिरिणा सह सम्बद्धेत्यर्थः ॥ **उत्कृष्टे अनुश्चोपश्चानूपं तेन** ॥ उत्कृष्टशब्दो हीनापेक्षस्तेन हीनोत्कृष्टसम्बन्धेऽनुना द्योत्ये द्वितीयानेन विधीयते । सिद्धसेनकविनिर्दिष्टस्य हीनो-

तारः ॥ **कर्म्मणि** ॥ ४० ॥ नाम्नः कर्म्मणि द्वितीया स्यात् । कटं

त्कृष्टसम्बन्धस्यापेक्षणक्रियाजनकत्वमनुना द्योत्यते । उमां कीर्तिं अततीति 'पादाद्यात्यजिन्यामि' ति इः णित्, यद्वा उमा कीर्तिः स्वातिरिवोज्ज्वला यस्य, यद्वा उमा माता स्वातिः पिता तयोः पुत्रोऽप्युमास्वातिः । एवमनु मल्लवादिनं तार्किकाः, उप जिनभद्रक्षमाश्रमणं व्याख्यातार इत्यपि, तेभ्योऽन्ये हीना इत्यर्थः । उत्कृष्टार्थे वर्तमानादेव नाम्नो द्वितीयाविधानादपकृष्टे द्वितीया न भवति ॥ **कर्मणि** ॥ कटं करोति निर्वर्त्यं कर्म, तण्डुलानिति विकार्यं कर्म, रविमिति प्राप्यं कर्म । अजां नयति ग्राममित्यत्राजायाः क्रियापेक्षं गौणं कर्मत्वम् । गां दोग्धि पय इत्यपादानस्याविवक्षायां गोः कर्मत्वं मुख्यकर्मसिद्धये गवादेः क्रियाव्याप्यत्वात् । इयञ्च कर्मणि द्वितीया आख्यातकृत्तद्धितप्रत्ययसमासैरनभिहिते कर्मणि भवति, अभिहितेऽर्थे प्रयोजनाभावेन शब्दप्रयोगाभावात्, तेन क्रियते कटः, कृतः कटः, शत्यः पटः, आरूढवानरो वृक्ष इत्यादौ न द्वितीया, आख्यातादिभिः कर्मण उक्तत्वात् । ननु भीष्ममुदारं दर्शनीयं कटं करोतीत्यादौ भीष्मादिपदोत्तरं द्वितीया न स्यात्, भीष्मादिविशेषणविशिष्टकटनिष्ठस्य क्रियया ऽऽप्तुमिष्यमाणत्वेन कर्मत्वस्य विशेष्यात्कटादुत्पन्नया द्वितीयया गतार्थत्वेन विशेषणाद्भीष्मादिभ्यो द्वितीया न स्यात्, प्रधानगतकर्मत्वोक्तौ तदव्यतिरिक्तं विशिष्टगतमपि तदुक्तमेवेति चेन्मैवम्, कटत्वविशिष्टकटनिष्ठकर्मत्वस्योक्तावपि भीष्मत्वादिगुणविशिष्टकटनिष्ठकर्मत्वस्य प्रतिपिपादयिषितस्यानुक्तत्वेन भीष्मादिपदात्तस्या आवश्यकत्वात् । यथा हि सामान्याभिधायी शब्दः सतोऽपि तद्वतान्गुणान्नेष्टे प्रतिपादयितुमिति तत्प्रतिपादनाय पृथक् तद्वाचकाः शब्दाः प्रयुज्यन्ते तथैव कटनिष्ठद्वितीयया न तद्गुणगतं कर्मत्वमभिधातुं शक्यमिति तेभ्यो द्वितीयापि भविष्यति । विशिष्टस्य कर्मत्वे

करोति, तण्डुलान् पचति, रविं पश्यति, अजां नयति ग्रामम्, गां

हि विशेषणस्यापि द्वितीयोत्पादककर्मत्वशक्तिरूपसामर्थ्यवत्त्वमन्यथा विशिष्टं कर्मेति न स्यात्, तच्च कर्मत्वं न कटपदोत्तरद्वितीययाऽभिहितमिति ततोऽपि द्वितीया भवति । अत्रायं भावः, विशिष्टगतैककर्मत्वप्रतिपादनेच्छायामयं प्रयोगस्तत्प्रतिपादनञ्च नोभयत्र द्वितीयां विना । भीष्मपदात् कर्मत्वाद्यनाक्रान्तगुणमात्रोपस्थितिस्तत इतरस्य तद्वैशिष्ट्यप्रतीतौ पश्चाद्विशिष्टस्यैककर्मत्वशक्तिमत्तयोपस्थितिस्तथाविधोपस्थितौ च भीष्माद्युत्तरद्वितीयापि सहकारिणीति, अथवा कटोऽपि कर्म, भीष्मादयोऽपि कर्मेत्याश्रीयते, यद्यद्धि करोति क्रियया यद्विशेषेणाप्तुमिष्यते तत्सर्वं कर्म द्रव्यं वा गुणो वा । न ह्यसौ कटमात्रेण सन्तुष्यति, तत्र सर्वेषां पृथक्कर्मत्वे प्रत्येकं द्वितीया भवति, पश्चात्त्वेकवाक्यतया विशेष्यविशेषणभावः, यद्वा द्रव्यस्यैव क्रियान्तरेषु साक्षादुपयोक्ष्यमाणत्वेन कटस्यैव कर्मसंज्ञा न तु गुणस्य, तथा च भीष्मादीनां स्वयमकर्मत्वेऽपि तदेकयोगक्षेमत्वात्केवलानां प्रकृतीनां प्रयोगानर्हत्वाच्च विशेषणसम्बन्धिन्यैव विभक्त्या भाव्यम्, यथेश्वरसुहृदः स्वयं निर्धना अपि तदीयेन धनेन तत्फलभाजो भवन्ति । कृतः कटो भीष्म उदारः शोभनो दर्शनीय इत्यादौ तु करोतेरुत्पद्यमानः क्तः स्वप्रकृतिसम्बद्धयावन्निष्ठं कर्मत्वमभिदधातीति न क्वापि द्वितीया । कृतं पश्य, कर्त्रा क्रियत इत्यादौ कृधातूत्तरक्तादिप्रत्ययेन कर्मादेरभिधानेऽपि दृशादिधातूत्तराख्यातेन तदनभिधानात्तत्क्रियाव्याप्यादेः कृतादेः कर्मत्वादि । एवं प्रधानक्रियाविषयशक्तेः प्रत्ययैरभिधानेऽप्रधानक्रियाविषयशक्तेरप्यभिहितवत्प्रकाशमानत्वेनौदनः पक्त्वा भुज्यते देवदत्तेनेति क्त्वाप्रत्ययेन भावाभिधायिनाऽप्रधानपचिक्रियाविषयककर्मशक्तेरनभिधानेऽपि प्रधानभुजिक्रियाविषयात्मनेपदेनाभिहितत्वात्तद्वत्प्रकाशमाना सा न द्वितीयोत्पत्तौ निमित्तं

दोग्धि पयः ॥ **क्रियाविशेषणात्** ॥ ४१ ॥ क्रियाया यद्विशेषणं तद्वाचिनो द्वितीया स्यात् । स्तोकं पचति, सुखं स्थाता ॥ **कालाध्वनोर्व्याप्तौ** ॥ ४२ ॥ व्याप्तिरत्यन्तसंयोगः । व्याप्तौ द्योत्यायां कालाध्ववाचिभ्यां द्वितीया स्यात् । मासं गुडधानाः, कल्याणी, अधीते वा । क्रोशं गिरिः, कुटिला नदी, क्रोशमधीते वा । व्याप्ताविति किम् ? मासस्य मासे वा द्व्यहं गुडधानाः । क्रोशस्य क्रोशे वैकदेशे

भवति ॥ विशिष्यतेऽनेनेति विशेषणं क्रियाया विशेषणं तस्मात् ॥ ननु रूपादिवत्क्रिया द्रव्यस्योपाधिः, उपाधेश्च नोपाध्यन्तरं सम्भवतीति कथं क्रियाया विशेषणसम्भवः, मैवम्, शुक्लः शुक्लतरः शुक्लतम इत्यादावुपाध्यन्तरायोगेऽपि सजातीयस्य द्रव्योपाधेरपेक्षया उत्कर्षो दृश्यते तथा क्रियाणामपि परस्परापेक्षया विशेषणसम्भवेन शोभनं पचतीत्येवं विशेषणत्वं स्यात् । द्वितीयार्थश्चेदं वचनं न तु कर्मसंज्ञार्थं तेन कृद्योगे कर्मनिमित्ता षष्ठी न भवति यथा सुखं स्थाता ॥ **कालश्चाध्वा च तयोर्व्याप्तिः व्याप्तिस्तस्याम्** ॥ स्वसम्बन्धिना द्रव्यगुणक्रियारूपेणात्यन्तसंयोगो व्याप्तिः । मासं गुडधानाः कालस्य द्रव्येण व्याप्तावुदाहरणम्, मासं कल्याणीति गुणेन व्याप्तौ, मासमधीत इति क्रियया व्याप्तौ । मासमधीते, क्रोशमधीत इत्यकर्मकत्वे उदाहरणम् । 'कालाध्वभावदेशमि'त्यनेन कर्मसंज्ञाभावपक्षे षष्ठ्याः सप्तम्या वा प्राप्तावनेन द्वितीया भवति । क्रोशं गिरिरित्यध्वनो द्रव्येण व्याप्तौ क्रोशं कुटिला नदीति गुणेन व्याप्तौ क्रोशमधीत इति क्रियया व्याप्तावुदाहरणानि । षष्ठ्याः सप्तम्या वायमपवादः । मासस्य मासे वा द्व्यहं गुडधाना इति, द्वयोरह्नोः समाहार इति द्व्यहम्, अत्र मासस्य गुडधानेन सह निरन्तरसम्बन्धाभावात्षष्ठी वा सप्तमी वा । द्व्यहमित्यस्य त्वनेन द्वितीया भवति, एकदेश इत्यस्य त्वध्ववा-

कुटिला नदी ॥ **सिद्धौ तृतीया ॥ ४३ ॥** सिद्धौ फलनिष्पत्तौ द्योत्यायां कालाध्ववाचिभ्यां टाभ्यांभिस्लक्षणा तृतीया यथासङ्ख्यमेकद्विबहौ स्यात् । मासेन मासाभ्यां मासैर्वाऽऽवश्यकमधीतम् । क्रोशेन क्रोशाभ्यां क्रोशैर्वा प्राभृतमधीतम् । सिद्धाविति किम् ? मासमधीतः आचारो नानेन गृहीतः ॥ **हेतुकर्तृकरणेत्थम्भूतलक्षणे ॥४४॥** फलसाधनयोग्यो हेतुः । कञ्चित्प्रकारमापन्नस्य चिह्नमित्थम्भूतलक्षणम् ।

चित्वाभावेन न द्वितीया ॥ **सिद्धौ, तृतीया ॥** पूर्वसूत्रमनुवर्तनीयम । नानेन गृहीत इति, व्याप्तिमात्रमत्र गम्यते न फलप्राप्तिः, अत्र सिद्धिः क्रियाया एव न तु द्रव्यगुणयोस्तयोः सिद्धरूपत्वात्, 'कालाध्वनोर्व्याप्तावि' त्यस्यापवादः ॥ **हेतुश्च कर्ता च करणश्चेत्थम्भूतलक्षणश्च तस्मिन्** ॥ गौणान्नाम्नस्तृतीयेति च वर्तते । हेतुरिह लौकिको ग्राह्यो न तु कर्तृप्रयोजकरूपस्तस्य कर्तृसंज्ञाया अपि सत्त्वेन कर्तृतृतीयैव सिद्धेः,कारणञ्च फलसाधनयोग्यमेव । एवञ्च फलसाधनयोग्यो हेतुः, ननु लौकिकहेतोरपि करणत्वादेव तृतीयासिद्धौ किमनेनेति चेन्न, द्रव्यगुणक्रियानिरूपितं निर्व्यापारसव्यापारवृत्ति च हेतुत्वम् , क्रियामात्रनिरूपितं व्यापारवद्वृत्ति च करणत्वमिति तयोर्लक्षणभेदात् । ननु हेतुत्वस्य करणत्वनियतत्वाभावेन हेतौ तृतीयाविधानस्यावश्यकत्वेऽपि करणत्वस्य हेतुत्वनियतत्वात्, हेतुतृतीययैव करणस्यापि तृतीयासिद्धौ किं करणग्रहणेनेति चेन्न, हेतुतृतीयावाच्यहेतुत्वशक्तेः करणतृतीयावाच्यकरणत्वशक्तेश्च घटत्वपृथिवीत्वयोरिव परस्परं भिन्नतया तत्तच्छक्तिप्रकारकबोधार्थमुभयोरावश्यकत्वात्, **धनेन** कुलमित्यादौ धनादीनां कुलमकुर्वतामपि योग्यतामात्रेण हेतुत्वात्तृतीया । इदं निर्व्यापारवृत्तिहेतोरुदाहरणम् । क्वचित्फलस्यापि हेतुत्वादन्नेन वसतीत्यादौ वसनक्रियाफलस्यान्नादेर्योग्यत्वाद्धेतुत्वप्रयुक्ता तृतीया । कर्तरि तृतीयाया उदाहरणं चैत्रेण कृतम्, करणे यथा दात्रेण लुनाति, इत्थं-

हेत्वादिवृत्तेर्नाम्नस्तृतीया स्यात् । धनेन कुलम्, चैत्रेण कृतम्, दात्रेण लुनाति, अपि त्वं कमण्डलुना छात्रमद्राक्षीः ? ॥ **सहार्थे** ॥ ४५ ॥ सहार्थे तुल्ययोगे विद्यमानतायाञ्च गम्यमाने नाम्नस्तृतीया स्यात् ।

भूतलक्षणे तु अपि त्वमित्यादि । इत्थंशब्दः प्रकारमात्रपरः, भूङः प्राप्त्यर्थात् कर्तरि क्तः, कर्मविभक्त्यन्तेत्थंशब्देन भूतशब्दस्य समासः, लक्षणशब्दः लक्ष्यतेऽनेनेति करणसाधनस्तस्य कर्मषष्ठ्यन्तेनेत्थंभूतशब्देन समासः, अत एवोक्तं कञ्चित्प्रकारमित्यादि । छात्रत्वादिरूपेत्थंभावमापन्नस्य मनुष्यस्य कमण्डल्वादिकं लक्षणं ततस्तृतीया । न च लक्षणस्यापि हेतुत्वात्तत्प्रयुक्ता तृतीयात्र भवतीति वाच्यम्, हेतुतृतीयया प्रकृत्यर्थतावच्छेदकावच्छिन्ने समभिव्याहृतपदार्थतावच्छेदकावच्छिन्ननिरूपितलक्षणत्वस्य बोधनात् । इत्थंभूतलक्षणतृतीयया तु लक्ष्यतावच्छेदके कादाचित्कलक्षणज्ञानजन्यज्ञानविषयत्वस्य बोधनात्, तथा च लक्ष्यलक्षणभावमात्रविवक्षायां तृतीयार्थमित्थम्भूतलक्षणग्रहणम्, कमण्डलुत्वावच्छिन्ने समभिव्याहृतपदार्थतावच्छेदकछात्रत्वावच्छिन्ननिरूपितस्य लक्षणत्वस्याभावान्न हेतुत्वप्रयुक्ता तृतीया, कमण्डलुज्ञानस्य कादाचित्कत्वात्, गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिका भवति, तेन धान्येनार्थः, मासेन पूर्वः, असिना कलह इत्यादौ हेतौ, अलं श्रमेणेत्यादौ च गम्यमानक्रियापेक्षया तृतीया ॥ **सहस्यार्थः सहार्थस्तस्मिन्** ॥ तृतीया वर्तते । सहार्थो द्विविधः, तुल्ययोगो विद्यमानता च । अप्रधानस्य प्रधानेन क्रियागुणद्रव्यजात्या यः साधारणसम्बन्धः सः तुल्ययोगः । सत्त्वञ्च विद्यमानत्वं गम्यमानत्वञ्च शब्दादर्थाद्वा । पुत्रेण सहागत इत्यत्रागमनक्रियया पितापुत्रयोस्तुल्ययोगः, पुत्रेण सह स्थूल इत्यत्र स्थौल्यगुणेन, पुत्रेण सह गोमानित्यत्र गोरूपद्रव्येण, शिष्येण सह ब्राह्मण इत्यत्र ब्राह्मण-

पुत्रेण सहागतः स्थूलो गोमान्ब्राह्मणो वा । एकेनापि सुपुत्रेण सिंही स्वपिति निर्भयम् । सहैव दशभिः पुत्रैर्भारं वहति गर्दभी ॥

त्वजात्या । इदमत्र हृदयम्, पुत्रो ह्यप्रधानः, अप्रधानत्वञ्च शाब्द-क्रियाद्यन्वयित्वाभावः, इतरसमभिव्याहारं विना च शब्देन प्रतीयमानत्वं शाब्दत्वम्, पुत्रेण सहागत इत्यत्रागतशब्देनैकस्या आगमनक्रियाया उपस्थितिः, तत्पदसमभिव्याहारबलात्सहशब्देनापरस्या आगमनक्रियाया आर्थिकी प्रतीतिः, शब्दोपस्थितागमनक्रियान्वयित्वाच्च पित्रादेः प्रधानता, आर्थिकतादृशक्रियान्वयित्वाच्च पुत्रादेः शाब्दक्रियान्वयित्वाभावलक्षणमप्रधानत्वं शाब्दत्वरूपविशेषणाभावप्रयुक्तं तस्मात्ततस्तृतीया भवति । सहैव दशभिः पुत्रैर्भारं वहति गर्दभीत्यादौ विद्यमानतावाचिसहशब्दयोगे दशानां पुत्राणां विद्यमानत्वेऽपीत्यर्थकेऽन्यसमभिव्याहारं विना सहशब्देन प्रतीयमानविद्यमानतारूपपदार्थान्वयित्वेऽपि पुत्राणां तदन्वयिगर्दभ्याद्यन्वितवहनादिक्रियान्वयित्वाभावाद्विशेष्याभावप्रयुक्तः शाब्दक्रियाद्यन्वयित्वाभाव इत्यप्रधानत्वात्तत्रापि तृतीया भवति । सहार्थश्च समभिव्याहृतपदोपस्थाप्यक्रियासमानकालीनक्रियान्वयित्वम् । तृतीयार्थश्च क्रियासमभिव्याहारे सहार्थबलात्प्रतीयमानतत्तत्क्रियाकर्तृत्वादिकमेव, तेन पुत्रेण सहागत इत्यादौ पुत्रकर्तृकागमनसमानकालिकागमनवान् पितेति बोधः । द्रव्यगुणसमभिव्याहारे सहार्थबलात्प्रतीयमानस्तत्तत्पदार्थसम्बन्ध एव तृतीयार्थः, एवञ्च पुत्रेण सह पितुर्गौः, पुत्रेण सह स्थूल इत्यादौ पुत्रस्वामिकत्वसमानकालिकपितृस्वामिकत्ववती गौः, पुत्रवृत्तिस्थौल्यसमानकालिकस्थौल्यवानित्यादि क्रमेण बोधः । क्वचित्समानदेशत्वरूपं साहित्यम् । सहार्थो यथा माषवापोत्तरं तत्रैव क्षेत्रे तिलवापे तिलैः सह माषान्वपतीति सहार्थकयोगेऽपि पुत्रेण साकं पुत्रेण सममित्यादौ तृतीया । सहार्थस्यार्थाद्गम्यमाने पुत्रेणागतः वृद्धो यूनेत्यादावपि तृतीया भवति ॥

यद्भेदैस्तद्वदाख्या ॥ ४६ ॥ यस्य भेदिनो भेदैः प्रकारैस्तद्वतोऽर्थस्याख्या निर्देशः स्यात्तद्वाचिनस्तृतीया स्यात् । अक्ष्णा काणः, पादेन खञ्जः, प्रकृत्या दर्शनीयः । तद्वद्ग्रहणं किम् ? अक्षिकाणं पश्य । आख्येति प्रसिद्धिपरिग्रहार्थम्, तेनाक्ष्णा दीर्घ इति न स्यात् ॥ **कृतादयैः** ॥ ४७ ॥ कृताऽऽद्यैर्निषेधार्थैर्युक्तात्तृतीया स्यात् । कृतं तेन, किं गतेन ॥ **काले भान्नवाऽऽधारे** ॥ ४८ ॥ कालवृत्तेर्नक्षत्रार्थादाधारे तृतीया वा स्यात् । पुष्येण पुष्ये वा पायसमश्नीयात् । काल

यस्य भेदास्तैः, सोऽस्यास्तीति तद्वान्, तद्वत आख्या तद्वदाख्या ॥ अक्ष्णा काण इत्यत्र यस्य चक्षुरादेः काणत्वादिभेदैस्तद्वतश्चक्षुरादिमतः पुरुषादेराख्या निर्देशो भवति काण इति, तद्वाचिनोऽक्ष्यादेस्तृतीया भवति । अक्षि काणञ्चाकाणञ्च भवतीति काणत्वभेदेन तद्वांश्चैत्रादिर्निर्दिश्यते । एवं पादेन खञ्ज इत्यत्रापि । प्रकृत्या दर्शनीय इत्यत्र प्रकृतिः स्वभावः, तस्य दर्शनीयत्वमदर्शनीयत्वञ्च, तद्भेदेन दर्शनीयत्वेन तद्वान्पुरुषो दर्शनीय इत्याख्यायते, अतः प्रकृतिशब्दात्तृतीया । अक्षिकाणं पश्येत्यादौ काणशब्देनाक्षिभेदेनाक्षि आख्यायते, न तद्वांश्चैत्रादिः ॥ **कृत आद्यो येषान्ते कृताद्यास्तैः** ॥ तृतीयेति वर्तते । कृतादीनां निषेधार्थे वर्त्तनमनेकार्थत्वात् । कृतमलं किमेवंप्रकाराः कृतादयः ॥ **काले, भात्, नवाऽऽधारे** ॥ पुष्येण चन्द्रयुक्तेन युक्तः कालः पुष्यः । 'चन्द्रयुक्तात्काले लुप्त्वप्रयुक्ते' इत्यण्, तल्लुप्च । 'स्वार्थिकप्रत्यया नातिवर्तन्ते प्रकृतिलिङ्गवचनानी'ति कालेऽपि वर्तमानो नक्षत्रशब्दो नक्षत्रलिङ्गसङ्ख्य एव । अनेन वा तृतीया, पक्षे सप्तमी । पयसि संस्कृतं भक्ष्यं पायसम् । तिलपुष्पेषु यत्क्षीरमिति, अत्र तिलपुष्पशब्दो यस्मिन्काले तिलाः पुष्प्यन्ति तस्मिन्काले वर्तते न तु नक्षत्रे । तत्र तृतीया मा भूदिति भादित्युक्तम् । पुष्यं विद्धीत्यत्र पुष्यशब्दः काले वर्तमानोऽपि विद्धातोः

इति किम् ? पुष्येऽर्कः । भादिति किम् ? तिलपुष्पेषु यत्क्षीरम् । आधार इति किम् ? अद्य पुष्यं विद्धि ॥ **प्रसितोत्सुकाववद्धैः** ॥ ४९ ॥ एतैर्युक्तादाधारवृत्तेस्तृतीया वा स्यात् । केशैः, केशेषु वा प्रसितः । गृहेण, गृहे वा उत्सुकः । केशैः, केशेषु वाऽवबद्धः ॥ **व्याप्ये द्विद्रोणादिभ्यो वीप्सायाम्** ॥ ५० ॥ व्याप्यवृत्तिभ्यो द्विद्रोणादिभ्यो वीप्सायां तृतीया वा स्यात् । द्विद्रोणेन द्विद्रोणं, द्विद्रोणं वा धान्यं क्रीणाति । पञ्चकेन, पञ्चकं पञ्चकं वा पशून् क्रीणाति ॥ **समो ज्ञोऽस्मृतौ वा** ॥ ५१ ॥ अस्मृत्यर्थस्य सञ्जानातेर्यद्व्याप्यं तद्वृत्तेस्तृ-

---

कर्म न त्वाधारः ॥ प्रसितश्चोत्सुकश्चावबद्धश्च तैः ॥ आधार इति वर्तते । केशैः केशेषु वा प्रसित इति । केशसंस्कारे बद्ध इव नित्यमासक्त इत्यर्थः । प्रसितशब्दो मुख्यस्य बन्धनस्याभावेन सादृश्याद्गौणार्थस्वीकारात् । उत्सुकशब्दसाहचर्यान्नित्यप्रसक्त इति यावत्, न तु प्रकृष्टसितः शुक्ल इत्यर्थे वर्तमानः प्रसितशब्दो ग्राह्यः । षष्ठीबाधनार्थमिदम्, बहुवचनमेकद्विबद्वविति यथासङ्ख्यनिवृत्त्यर्थम् ॥ व्याप्ये, द्विद्रोण आदिर्येषान्तेभ्यः, व्याप्तुमिच्छति वीप्सति वीप्सनं वीप्सा तस्याम् । द्वौ द्रोणौ मानमस्य धान्यस्येति द्विद्रोणम्, द्विद्रोणेन धान्यं क्रीणाति, अत्र द्विद्रोणशब्दो मेयधान्यवृत्तिर्द्रोणद्वयसङ्ख्यातं धान्यं क्रीणातीत्यर्थः । अतोऽस्य व्याप्ये वर्तमानता । अत्र वीप्सायां तृतीया विहितेति तृतीयान्तस्य पदस्य द्विर्वचनं न भवति । द्विद्रोणं द्विद्रोणं धान्यं क्रीणातीत्यत्र द्वितीया तु कर्मणि विहिता न वीप्सायामतस्तदन्तस्य द्विर्वचनं भवति । आदिशब्दः प्रकारार्थः । येभ्यो वीप्सायां प्रयोगे तृतीया दृश्यते ते द्विद्रोणादयः प्रयोगगम्या न तु कश्चिद्गणः ॥ समः पञ्चमी, ज्ञः षष्ठी, न स्मृतिरस्मृतिस्तस्याम्, वा । व्याप्य इत्यनुवर्तते, नवाशब्दस्यानुवृत्तावपि वाग्रहणमुत्तरत्र तदनुवृत्तिविरामार्थम् । मात्रा मातरं वा सञ्जानीत इत्यत्र 'सम्प्रतेरस्मृताविति' त्यात्मनेपदम् ॥

तीया वा स्यात् । मात्रा मातरं वा सञ्जानीते । अस्मृताविति किम् ? मातरं सञ्जानाति ॥ **दामः सम्प्रदानेऽधर्म्ये आत्मने च** ॥ ५२ ॥ सम्पूर्वस्य दामः सम्प्रदानेऽधर्म्ये वर्त्तमानात्तृतीया स्यात् । तत्सन्नियोगे च दाम आत्मनेपदम् । दास्या सम्प्रयच्छते कामुकः । अधर्म्य इति किम् ? पत्न्यै सम्प्रयच्छति ॥ **चतुर्थी** ॥ ५३ ॥ सम्प्रदाने वर्त्तमानादेकद्विबहौ यथासङ्ख्यं ङेभ्यांभ्यस्लक्षणा चतुर्थी स्यात् । द्विजाय गां दत्ते, पत्ये शेते ॥ **तादर्थ्ये** ॥ ५४ ॥ तस्मा इदं तदर्थम्, तद्भावे सम्बन्धविशेषे द्योत्ये चतुर्थी स्यात् । यूपाय दारु,

---

दामः षष्ठी, सम्प्रदीयते स्मेति सम्प्रदानं तस्मिन्, धर्मादनपेतं धर्म्यं न धर्म्यमधर्म्यं तस्मिन्, आत्मने, च ॥ सम इति पदमनुवर्तते, तच्चात्र षष्ठ्यन्तं विज्ञेयमन्यथा पञ्चम्या निर्दिष्टे इति सूत्रेणाव्यवधानेन परत्वस्योपस्थित्या प्रशब्देन व्यवधाने तृतीयाप्राप्तिर्न स्यात्, यथा दास्या सम्प्रयच्छते कामुकः, कामुकः सन् द्रव्यं दास्यै ददातीत्यर्थः । सम्पूर्वस्य दामः प्रशब्दव्यवधानमन्तरेण प्रयोगाभावात्सम इति षष्ठ्यन्तमेव कर्तव्यम् ॥ **चतुर्थी** ॥ सम्प्रदाने, नाम्नः, एकद्विबहावित्यनुवर्तन्ते । कारकचतुर्थ्या सम्प्रदानत्वशक्तिमानर्थः । द्विजाय गां दत्ते, द्विजाभिन्नसम्प्रदाननिष्ठोद्देश्यतानिरूपकं दानमिति बोधः । व्याप्येन गवा द्विजमभिप्रेयत इति द्विजस्य सम्प्रदानता । पत्ये शेते, शयनक्रिययां करणभूतया पत्नी पतिमभिप्रैतीति पतिः सम्प्रदानम्, शेत इत्यकर्मको धातुरिति तद्विषये कर्मणोऽभावात्तेनाभिप्रेयमाणस्य सम्प्रदानता न सिद्ध्यतीति सम्प्रदानसंज्ञाविधायकसूत्रे क्रिययेत्यपि पृथगुपात्तम् ॥ **तस्मै इदं तदर्थं तस्य भावस्तस्मिन्** ॥ तच्छब्देन कार्यं निर्दिश्यते, तस्मै इदमिति समासेन विशिष्टकार्यप्रयोजनं कारणमभिधीयते, भावप्रत्ययेन च सम्बन्ध उच्यते समासकृत्तद्धितेषु भावप्रत्ययेन सम्बन्धाभिधानमिति वचनात् ।

रन्धनाय स्थाली ॥ **रुचिकृप्यर्थधारिभिः प्रेयविकारोत्तमर्णेषु** ॥ ५५ ॥ रुच्यर्थैः कृप्यर्थैर्धारिणा च योगे यथासङ्ख्यं प्रेयविकारोत्तमर्णवृत्तेश्चतुर्थी स्यात् । मैत्राय रोचते धर्म्मः, मूत्राय कल्पते

तथा च कार्यकारणभावलक्षणः सम्बन्धो बोध्यते । यूपाय दारु, अत्र दार्वादिकं यूपादेः कारणमिति तयोः कार्यकारणभावस्सम्बन्धः, स च यद्यप्युभयनिष्ठस्तथापि गुणभूताद्विशेषणादेव भवति, एवं रन्धनाय स्थालीत्यत्रापि । ननु तस्मै इदमित्यत्र कथं चतुर्थी, न चानेनैव इतरेतराश्रयप्रसङ्गान्निर्देशोत्तरकालं चतुर्थी चतुर्थ्या च निर्देश इति, मैवम्, अर्थशब्दयोगे चतुर्थीसम्भवात्तस्मै अर्थस्तदर्थ इति । चतुर्थ्यन्तस्यैवार्थशब्देन समास इति न नियमः षष्ठ्यन्तस्याप्यर्थशब्देन समासाद्यथा गुरोरिदं गुर्वर्थमिति । अत्र तादर्थ्यस्यापि सम्बन्धत्वेन विवक्षितत्वात्षष्ठी । अत एवोक्तं सम्बन्धविशेष इति ॥ **रुचिश्च कृपिश्च, रुचिकृप्योरर्थो येषान्ते, रुचिकृप्यर्थाश्च धारिश्च तैः, प्रेयश्च विकारश्चोत्तमर्णश्च तेषु** ॥ रुच्यर्थोऽभिप्रीतिः, कृप्यर्थ उत्पत्तिः सात्र विकाररूपा । मैत्राय रोचते धर्म इत्यत्र मैत्रनिष्ठप्रीतेर्धर्मः कर्ता, धर्मो मैत्रस्याभिलाषमुत्पादयतीत्यर्थः, प्रेयसम्बन्धादभिलाषार्थस्य रुचेर्ग्रहणं तेनेह न भवति, ममैतद्रोचते प्रतिभातीत्यर्थः । अभिलष्यतेर्यत्कर्म तत्कर्तृकोऽभिलाषो रुचेरर्थः । अभिलष्यतेः कर्म धर्मः, स एव चात्र रुचेः कर्ता, विषयतासम्बन्धावच्छिन्नप्रीत्यनुकूलः प्रीतिसमानाधिकरणो यो व्यापारः स रुचेरर्थस्तत्फलभूतप्रीतेराश्रयो मैत्रः । विषयतासम्बन्धावच्छिन्नप्रीत्यनुकूलः प्रीतिव्यधिकरणो यो व्यापारः सोऽभिलषेरर्थः । अतोऽभिलषतेर्न रुच्यर्थत्वं देवदत्तो भक्तिमभिलष्यतीति प्रत्ययात् । समवायसम्बन्धावच्छिन्नप्रीत्यनुकूलो व्यापारः प्रीधातोरर्थः, अत एव हरिं प्रीणयतीत्यादिसिद्धिः । मूत्राय कल्पते यवागूरिति, यवागूर्मूत्रं सम्पद्यते, यवागूः कर्त्री, कल्पते सम्पद्यते,

यवागूः, चैत्राय शतं धारयति ॥ **प्रत्याङः श्रुवार्थिनि** ॥ ५६ ॥ प्रत्याङ्भ्यां परेण श्रुवा युक्तादर्थिन्यभिलाषुके वर्त्तमानाच्चतुर्थी स्यात् । द्विजाय गां प्रतिशृणोति, आशृणोति वा ॥ **प्रत्यनोर्गृणाऽऽख्यातरि** ॥ ५७ ॥ प्रत्यनुभ्यां परेण गृणायोगे आख्यातवृत्तेश्चतुर्थी स्यात् । गुरवे प्रतिगृणाति, अनुगृणाति ॥ **यद्वीक्ष्ये राधीक्षी** ॥ ५८ ॥ वीक्ष्यं विमतिपूर्वकं निरूप्यं तद्विषया क्रियापि । यस्य वीक्ष्ये राधीक्षी वर्त्तते, तद्वृत्तेश्चतुर्थी स्यात् । मैत्राय राध्यति ईक्षते

किं सम्पद्यते ? मूत्ररूपमित्यर्थः । अत्र यवागूः प्रकृतिर्मूत्रं विकारः, विरुद्धविभक्तिराहित्याद्वयोस्सामानाधिकरण्यम्, तत्र यद्विकारमापद्यते ततः प्रथमाप्राप्तौ तदपवादभूता चतुर्थ्यनेन भवति । चैत्राय शतं धारयति, धृङत् अवस्थाने इत्यस्मात्प्रयोक्तृणिगि धारिस्तद्योगे उत्तमर्णे धनिके चतुर्थी, स्वरूपेण ध्रियमाणमवतिष्ठमानं शतं प्रयुङ्क्ते कश्चित् । अधमर्णो ग्राहकः उत्तमर्णो दायकः । अत्रोत्तमर्णश्चैत्रो दानक्रियया धारणस्य निमित्तं, यतोऽसौ तद्दणं ददाति, ददातिश्च न श्रूयते इत्यश्रूयमाणक्रियात्वाच्छेषे षष्ठी प्राप्ता, तद्धारणायेदम् ॥ **प्रतिश्राङ् च तस्मात्, श्रुवा तृतीया, अर्थ्यते इत्यर्थी तस्मिन्** ॥ द्विजाय गां प्रतिशृणाति, याचितोऽयाचितो वा प्रतिजानीतेऽधमत्वाद्याचमाने, महत्त्वादयाचमानेऽपि केनाप्याकारादिना स्वाभिलाषं समर्पयति द्विजादावोमिति तस्य प्रतिजानीतेऽभ्युपगच्छतीत्यर्थः । अत्र द्विजो गां प्रतिज्ञानात्प्रयुङ्क्ते इति हेतुतृतीयाप्राप्तावनेन चतुर्थी ॥ **प्रतिश्रानुभ्र तस्मादृणा तृतीयाऽऽख्यातरि सप्तमी** ॥ गुरवे प्रतिगृणाति गुरूक्तमनुवदति प्रशंसन्तं वा प्रोत्साहयतीत्यर्थः, शंसनविषयहर्षानुकूलव्यापारलक्षणं प्रोत्साहनं धात्वर्थः । हेतुकर्मसंज्ञाप्रसङ्गेऽनेन चतुर्थी ॥ **यस्य वीक्ष्यं यद्वीक्ष्यं तस्मिन्**, राधिश्च ईक्षिश्च प्रथमा ॥ वीक्ष्यं सन्देहपूर्वकं निरूपणीयं तच्चादृष्टमिष्टानिष्टं फलं पुण्यपापरूपम-

वा. ईक्षितव्यं परस्त्रीभ्यः । वीक्ष्य इति किम् ? मैत्रमीक्षते ॥ **उत्पातेन ज्ञाप्ये** ॥ ५९ ॥ उत्पात आकस्मिकं निमित्तम् । तेन ज्ञाप्ये वर्तमानाच्चतुर्थी स्यात् । वाताय कपिला विद्युत्, आतपायातिलोहिनी । पीता वर्षाय विज्ञेया, दुर्भिक्षाय सिता भवेत् ॥१॥ उत्पातेनेति किम् ? राज्ञ इदं छत्रमायान्तं विद्धि राजानम् ॥ **श्लाघह्नुस्थाशपां प्रयोज्ये** ॥ ६० ॥ श्लाघादिभिर्द्धातुभिर्युक्ताद् ज्ञाप्ये प्रयोज्ये वर्तमानाच्चतुर्थी स्यात् । मैत्राय श्लाघते, ह्नुते, तिष्ठते, शपते । प्रयोज्य

प्रत्यक्षं पराभिप्रायादिकं वा । मैत्राय राध्यति, तस्य दैवं पर्यालोचयतीत्यर्थः, प्रश्नविषयशुभाशुभपर्यालोचनं धातोरर्थः, तदर्थप्रश्नविषयसम्बन्धी मैत्रः, मैत्रसम्बन्धिप्रश्नविषयकशुभाशुभपर्यालोचनमिति बोधः । पर्यालोचनं हि मैत्रं प्रयुङ्क्ते कश्चिदिति हेतुसंज्ञायां प्राप्तायामनेन चतुर्थी । प्रश्नविषयस्य कर्मणो धात्वर्थेनोपसङ्ग्रहादकर्मकावेतौ । ईक्षितव्यं परस्त्रीभ्य इति भट्टिकाव्यप्रयोगे परस्त्रीणामभिप्राये यत्सन्देहादीक्षितव्यं निरूपयितव्यं किमेवं करोषि नवेति, तद्रक्षसां कुलधर्मो न दोष इति । मैत्रमीक्षते, राधीक्ष्यर्थविषयाद्विप्रष्टव्यादन्यो धातुरयम् ॥ **उत्क्रम्य प्रसिद्धं निमित्तं पततीत्युत्पातस्तेन, ज्ञाप्यत** इति ज्ञाप्यं तस्मिन् ॥ वाताय कपिला विद्युदिति, वातादयः स्वकारणेभ्य उत्पद्यन्ते, विद्युता तु ज्ञाप्यन्ते इति तादर्थ्यं नास्ति, प्राणिनां शुभाशुभसूचको भूतविकार उत्पातः, ज्ञाप्यज्ञापकभावश्चतुर्थ्यर्थः, वातरूपज्ञाप्यज्ञापिका कपिला विद्युदिति बोधः । ज्ञाप्यज्ञापकसम्बन्धविवक्षायां षष्ठ्यां प्राप्तायां चतुर्थी । राज्ञ इदं छत्रमित्यादि, नात्र छत्रमुत्पातः ॥ **श्लाघश्च ह्नुश्च स्थाश्च शप् च तेन, प्रयोज्ये** ॥ ज्ञाप्य इत्यनुवर्तते । मैत्राय श्लाघते, श्लाघां कुर्वन्नात्मानं परं वा ज्ञाप्यं जानन् तं मैत्रं प्रयोजयतीत्यर्थः । अत्र श्लाघते बोधविषया स्तुतिरित्यर्थः, बोधस्य सम्बन्धो वृत्तिता, स्तुतिश्च गुणवत्त्वप्रतिपादकशब्दप्रयोगः, बोधाश्रयस्यानेन चतुर्थी, बोधाश्रयोऽत्र ज्ञाप्यः स एव प्रयोज्यश्च

इति किम्? मैत्रायात्मानं श्लाघते, आत्मनो मा भूत् ॥ **तुमोऽर्थे भाववचनात् ॥ ६१ ॥** क्रियायां क्रियार्थायामुपपदे तुम् वक्ष्यते, तस्यार्थे ये भाववाचिनो घञादयस्तदन्तात्स्वार्थे चतुर्थी स्यात् । पाकाय इज्यायै वा व्रजति । तुमोऽर्थ इति किम्? पाकस्य । भाववचनादिति

ज्ञापेः कर्मत्वात्, स्तुतिश्चात्मनः परस्य वेति तु प्रकरणादिगम्यम्, तथा च मैत्रवृत्तिबोधविषया स्तुतिरिति बोधः । अथवा गुणोत्कर्षेण मैत्रः शंस्यमानो गुणवत्तया तत्समर्थाचरणाद्ध्यारोपितप्रेरणत्वाद्धेतुरिति हेतौ तृतीया प्राप्ता तदपवादायेयं चतुर्थी । मैत्राय ह्वते इत्यत्र ह्वौतेर्बोधविषयमितरादर्शनयोग्यदेशस्थापनमर्थः, मैत्रवृत्तिबोधविषयेतरादर्शनयोग्यदेशावस्थानानुकूला क्रियेति बोधः । तिष्ठतेः स्वाभिप्रायबोधानुकूलस्थितिरर्थः । शपेः स्वाभिप्रायबोधानुकूलशपथकरणमर्थः, मैत्रसम्प्रदानकबोधानुकूला स्थितिः, मैत्रसम्प्रदानकबोधानुकूलं शपथकरणमिति बोधः । अथवा श्लाघ्यादेः स्तुत्यादिपूर्वकं बोधनमर्थः, स्तुत्या मैत्रं स्वानुरागं बोधयति, ह्वुत्या स्थित्या शपथेन वेत्यर्थः । आत्मनो मा भूदित्यत्रात्मा ज्ञाप्यो न प्रयोज्यः, तिष्ठते इति 'ज्ञीप्सास्थेय' इत्यात्मनेपदम्, शपत इति 'शप उपलम्भन' इत्यात्मनेपदम् ॥ तुमः षष्ठी, अर्थे, भावं वक्तीति भाववचनं तस्मात् ॥ पाकायेति, पक्तुं यष्टुं वा व्रजतीत्यर्थः, 'भाववचना' इति घञादयः । अत्र तादर्थ्यं भाववचनेनैवोक्तमतः शेषषष्ठ्यां प्राप्तायां हेतुहेतुमद्भावविवक्षायां वा हेतुतृतीयायाः प्राप्तेर्वचनम् । भाववचनेनैव तुमा इव तादर्थ्यस्य द्योतितया नाममात्रे प्रथमायां प्राप्तायां वचनमिति केचित्, पाकस्येति नात्र क्रियायां क्रियार्थायामुपपदे प्रत्ययः किन्तु भावमात्रे 'भावाकर्त्रोरि'ति घञ्प्रत्ययः । पक्ष्यतीति, भविष्यत्पाकफलकं व्रजनमिति बोधः । यद्यप्यत्र भविष्यत्पचनक्रिया

किम् ? पक्ष्यतीति पाचकस्य व्रज्या ॥ **गम्यस्याऽऽप्ये** ॥ ६२ ॥ यस्यार्थो गम्यते न चासौ प्रयुज्यते स गम्यः । गम्यस्य तुमो व्याप्ये वर्त्तमानाच्चतुर्थी स्यात् । एधेभ्यः फलेभ्यो वा व्रजति । गम्यस्येति किम् ? एधानाहर्तुं याति ॥ **गतेर्नवाऽनाप्ते** ॥ ६३ ॥ गतिः पादविहरणम्, तस्या आप्येऽनाप्ते वर्तमानाच्चतुर्थी वा स्यात् । ग्रामं ग्रामाय वा याति, विप्रनष्टः पन्थानं पथे वा याति । गतेरिति किम् ? स्त्रियं गच्छति, मनसा मेरुं गच्छति । अनाप्त इति किम् ? संप्राप्ते मा भूत्, पन्थानं याति ॥ **मन्यस्याऽनावादिभ्योऽतिकुत्सने** ॥ ६४ ॥ अतीव कुत्स्यते येन तदतिकुत्सनं तस्मिन्, मन्यतेर्व्याप्ये वर्तमाना-

---

गमनक्रियाया उपपदं भवति, तथापि पाचकशब्दस्य कर्तरि णकप्रत्ययेन सिद्धत्वाद्भाववचनाभावान्न चतुर्थी ॥ **गम्यत इति गम्यं तस्य, आप्यत इत्याप्यं तस्मिन्** ॥ तुम इति वर्तते । शब्दोऽर्थवानपि प्रयुज्यमानोऽप्रयुज्यमानश्च भवति । अप्रयुज्यमानश्चार्थप्रकरणशब्दान्तरसन्निधानैः प्रतीयमानार्थः स च गम्य इत्युच्यते । एधेभ्यो फलेभ्यो वा व्रजति, एधान्फलानि वाहर्तुं व्रजतीत्यर्थः, एधकर्मकाहरणफलकं व्रजनं फलकर्मकाहरणफलकं व्रजनमिति वा बोधः । न ह्यत्रैधार्था फलार्था वा गमनक्रिया, किन्त्वाहरणार्था, अतो न 'तादर्थ्य' इति सूत्रेण चतुर्थी सिद्धा, द्वितीयापवादोऽयम् ॥ **गतेः, नवा नाप्तमनाप्तं तस्मिन्** ॥ आप्ये इति वर्तते, एवमग्रिमसूत्रेऽपि । स्त्रियं गच्छतीति भजनार्थोऽत्र गमिः । मनसा मेरुं गच्छतीत्यत्र ज्ञानार्थो गमिः । गतिशब्दस्य ज्ञानाद्यर्थत्वेऽप्यनाप्त इति वचनात्पादविहरणरूपैव गतिरिह गृह्यते, ज्ञानादिव्याप्यस्यानाप्तत्वासम्भवाद्, अत एवोक्तं गतिः पादविहरणमिति ॥ **मन्यस्य, नौ आदिर्येषान्ते, न नावादिरनावादिस्तेभ्यः,** अतीव कुत्स्यतेऽनेनेति तस्मिन्नत्यन्तकुत्सायामित्यर्थः । यद्वाचिनश्चतुर्थी विधीयते, तस्माद्यदि अतिशयेन तिरस्कारः प्रतिपाद्यते तदैव

नावादिवर्जाच्चतुर्थी वा स्यात् । न त्वा तृणाय तृणं वा मन्ये । मन्यस्येति किम् ? न त्वा तृणं मन्वे । अनावादिभ्य इति किम् ? न त्वा नावं अन्नं शुकं शृगालं काकं वा मन्ये । कुत्सन इति किम् ? न त्वा रत्नं मन्ये । करणाश्रयणं किम् ? न त्वा तृणाय मन्ये । युष्मदो मा भूत् । अतीति किम् ? त्वां तृणं मन्ये ॥ **हितसुखाभ्याम्** ॥६५॥ आभ्यां युक्ताच्चतुर्थी वा स्यात् । आमयाविने आमयाविनो वा हितम् । चैत्राय चैत्रस्य वा सुखम् ॥ **तद्भद्रायुष्यक्षेमाऽर्थाऽर्थेनाशिषि** ॥ ६६ ॥ तदिति हितसुखयोः परामर्शः । हिताद्यर्थैर्युक्तादाशिषि गम्यायां चतुर्थी वा स्यात् । हितं पथ्यं वा जीवेभ्यो जीवानां वा भूयात् । सुखं शं शर्म्म वा प्रजाभ्यः प्रजानां वा भूयात् । भद्रमस्तु श्रीजिनशासनाय श्रीजिनशासनस्य वा । आयुष्यमस्तु चैत्राय चैत्रस्य वा । क्षेमं भूयात् कुशलं निरामयं वा श्रीसङ्घाय श्रीसङ्घस्य वा । अर्थः

चतुर्थी विधीयते न तु साम्यविवक्षायाम्, तादृशी च कुत्साप्रतीतिर्नञ्यः प्रयोगे झटित्येव भवतीति न त्वा तृणं मन्ये इति नञ्घटितमुदाहृतम्, तृणाद्यपि न मन्ये, तृणादेरपि निकृष्टं तुच्छं वा मन्ये इत्यर्थः । अतिकुत्सन इति मन्यतेराप्ये विशेषणादतिकुत्साद्योतकं यदाप्यं तत्र चतुर्थी तेन युष्मच्छब्दान्न भवति । मन्य इति इयेन निर्देशान्न त्वा तृणं मन्ये इत्यादौ न भवति । नावादिगणश्च—नौकाकान्नशुकशृगालरूपः । न त्वा रत्नं मन्ये इति, रत्नतोऽप्यधिकं त्वां मन्ये इति प्रशंसात्र गम्यते ॥ **हितश्च सुखश्च ताभ्याम्** ॥ इष्टसाधनं हितपदार्थः, आमयाविने आमयाविनो वा हितमिति, आमयोऽस्यास्तीत्यामयावी, 'आमयाद्दीर्घश्चे'ति विन् दीर्घश्च । पक्षे सम्बन्धलक्षणा षष्ठी ॥ **ते च भद्रश्चायुष्यश्च क्षेमश्चार्थश्च** तद्भद्रायुष्यक्षेमार्थानामर्थो यस्य स तेन, आशिषि ॥ अर्थशब्दः प्रत्येकमभिसम्बध्यते । आयुरेवायुष्यम्, क्षेममापदोऽभावः, भद्रं सम्पदुत्कर्ष इति भेदः । हित-

कार्यं प्रयोजनं वा भूयान्मैत्राय मैत्रस्य वा ॥ **परिक्रयणे** ॥ ६७ ॥ परिक्रीयते नियतकालं स्वीक्रियते येन तस्मिन्वर्त्तमानाच्चतुर्थी वा स्यात् । शताय शतेन वा परिक्रीतः ॥ **शक्तार्थवषड्नमःस्वस्ति-स्वाहास्वधाभिः** ॥ ६८ ॥ शक्तार्थैर्वषडादिभिश्च युक्ताच्चतुर्थी नित्यं स्यात् । शक्तः प्रभुर्वा मल्लो मल्लाय, वषडग्नये, नमोऽर्हद्भ्यः, स्वस्ति प्रजाभ्यः, स्वाहेन्द्राय, स्वधा पितृभ्यः ॥ **पञ्चम्यपादाने** ॥ ६९ ॥ अपादाने एकद्विबहौ यथासङ्ख्यं ङसिभ्यांभ्यस्लक्षणा पञ्चमी स्यात् । ग्रामाद् गोदोहाभ्यां वनेभ्यो वा आगच्छति ॥

सुखाभ्यां पूर्वेण विकल्पः सिद्ध एव, तदर्थार्थमत्र तद्ग्रहणम् ॥ **परिक्रयणे** ॥ क्रयो धनाद्यर्पणेनात्यन्तिकस्वीकरणं तस्य समीपं परिशब्दो आचष्टे । अनियतकालात्क्रयणात्परिक्रयणस्य न्यूनकालत्वा-दित्याशयेनाह—नियतेति । शताय शतेन वा परिक्रीतः, अत्र करण-स्यैव पक्षे चतुर्थीत्वेन भानम् ॥ **शक्तोऽर्थो येषान्ते शक्तार्थाः**, वषट् च नमश्च स्वस्तिश्च स्वाहाश्च स्वधाश्च ताभिः, पृथग्योगान्नवेति निवृत्तम् । स्वस्तिशब्दः क्षेमार्थः, तद्योगे आशिष्यपि परत्वान्नित्यमेव । स्वधाभिरिति तृतीययोक्तशब्दानां योगे एव चतुर्थ्यभिधानादिह न भवति, नमो जिनानामायतनेभ्यः, नात्र जिनानां नमसा योगः, नम-स्यति जिनानित्यत्रापि नमस्यधातुना योगो, न नमसा । अर्थवतो नमःशब्दस्य ग्रहणादत्रानर्थकत्वाद्वा न भवति, **उपपदविभक्त्य-पेक्षया कारकविभक्तेर्द्वितीयाया बलवत्त्वाद्वा न चतुर्थी** । स्वयम्भुवे नमस्कृत्येत्यादौ तु नमस्कृतिलक्षणया क्रियायाऽभिप्रेयमाणत्वेन सम्प्र-दानत्वाच्चतुर्थी । स्वयम्भुवं नमस्कृत्येत्यत्र तु क्रियाभिप्रेयत्वाविव-क्षायां द्वितीयैव ॥ **पञ्चमी, अपादाने** ॥ **पञ्चम्याः** अपादानत्वशक्ति-मानित्यर्थः । सा च शक्तिः प्रकृतधात्वर्थविभागाश्रयत्वसमानाधि-

आङाऽवधौ ॥ ७० ॥ अवधिर्मर्यादा, अभिविधिश्च । तद्वृत्तेराङा युक्तात्पञ्चमी स्यात् । आ पाटलिपुत्राद्वृष्टो मेघः ॥ **पर्यपाभ्यां वर्ज्ये** ॥ ७१ ॥ वर्ज्ये वर्जनीयेऽर्थे वर्त्तमानात्पर्यपाभ्यां युक्तात्पञ्चमी स्यात् । परि अप वा पाटलिपुत्राद्वृष्टो मेघः । वर्ज्य इति किम् ? अपशब्दो मैत्रस्य ॥ **यतः प्रतिनिधिप्रतिदाने प्रतिना** ॥७२॥ प्रतिनिधिर्मुख्यसदृशोऽर्थः, प्रतिदानं गृहीतस्य विशोधनम्, ते यतः स्यातां तद्वाचिनः प्रतिना योगे पञ्चमी स्यात् । प्रद्युम्नो वासुदेवात् प्रति, तिलेभ्यः

करणप्रकृतधातूपात्तविभागजनकव्यापारानाश्रयत्वरूपा ॥ **आङा तृतीयाऽवधानमवधिस्तस्मिन्** ॥ प्रवृत्तस्य यत्र निरोधः सा मर्यादा, मर्यादाभूतमेव वस्तु यदा क्रियया व्याप्यते तदाभिविधिः, विना तेनेति मर्यादा, सह तेनेत्यभिविधिः । आ पाटलिपुत्रादिति, पाटलिपुत्रं व्याप्य मर्यादीकृत्य, अव्याप्य वा वृष्टो मेघः ॥ **परिश्रापञ्च ताभ्यां वर्ज्ये** ॥ वर्ज्यवर्जकभावसम्बन्धः पर्यपाभ्यां द्योत्यत इति सम्बन्धषष्ठ्यां प्राप्तायामनेन पञ्चमीविधानम् । परि पाटलिपुत्रादिति, पाटलिपुत्रं वर्जयित्वेत्यर्थः । अपशब्द इति, अपगतः शब्दादित्यपशब्दः शब्दलक्षणमतिक्रान्त इत्यर्थः, अशुद्धशब्द इति यावत्, अत्रापेति पदमभावद्योतकं न तु वर्जनीयवस्तुद्योतकम् ॥ **यतः पञ्चमी, प्रतिनिधिश्च प्रतिदानञ्च** तस्मिन्, प्रतिना तृतीया । मुख्येति, मुख्यस्याभावे सति यस्तत्सदृश उपादीयते स प्रतिनिधिः । दत्तस्य प्रत्यर्पणं प्रतिदानम् । प्रद्युम्न, इति प्रद्युम्नस्य वासुदेवप्रतिनिधित्वाद्वासुदेवात्पञ्चमी । तिलेभ्य इति, तिलग्रहणमपेक्ष्य माषाणां प्रतिदानमिति तिलशब्दात्पञ्चमी । अत्र सर्वत्र प्रतिनिधिप्रतिदानयोर्निरूपकादेव पञ्चमी भवति, यथा वासुदेवः प्रतिनिधेः, तिलाश्च प्रतिदानस्य निरूपकास्तस्मात्पञ्चमी यत इत्युक्तत्वात् । वासुदेवप्रद्युम्नयोस्तिलमाषयोश्च परस्परसम्बन्धप्रज्ञापनाय प्रतिशब्दस्य प्रयोगः ।

प्रति माषानस्मै प्रयच्छति ॥ **आख्यातर्युपयोगे** ॥७३॥ आख्याता प्रतिपादयिता तद्वाचिनः पञ्चमी स्यात्, उपयोगे नियमपूर्वकविद्याग्रहणविषये । उपाध्यायादधीते आगमयति वा । उपयोग इति किम् ? नटस्य शृणोति ॥ **गम्ययपः कर्माधारे** ॥ ७४ ॥ गम्यस्याप्रयुज्यमानस्य यबन्तस्य कर्माऽऽधारवाचिनः पञ्चमी स्यात् । प्रासादादासनाद्वा प्रेक्षते । गम्यग्रहणं किम् ? प्रासादमारुह्य शेते । आसने उपविश्य भुङ्क्ते ॥ **प्रभृत्यन्यार्थदिक्शब्दबहिरारादितरैः**

यत इत्यस्यानुपादाने तु प्रद्युम्नादितोऽपि स्यात् । इयमुपपदविभक्तिः सम्बन्धषष्ठीबाधिकाऽन्यथा वासुदेवस्य प्रतिनिधिः प्रद्युम्न इत्यादिवत् षष्ठी स्यात् ॥ **आख्यातरि सप्तमी, उपयोगे** ॥ **विद्याग्रहणार्थं** गुरुशुश्रूषादिशिष्यवृत्तनियम उच्यते, तत्पूर्वकविद्याग्रहणे उपयोगशब्दो वर्तते, न तूपयुज्यते व्याप्रियत इति व्यापारमात्रवाच्युपयोगशब्दोऽन्यथा नटस्य गाथां शृणोतीत्यादौ वक्तृश्रोत्रोः कथनश्रवणलक्षणव्यापारस्य सत्त्वान्नटादपि पञ्चम्यापत्तिः स्यात् । उपाध्यायादधीते, उच्चारणोत्तरकालिको नियमपूर्वको ग्रन्थस्वीकारानुकूलो व्यापारो धात्वर्थः, उच्चारणाश्रयोऽत्रापादानम्, उपाध्यायान्निस्सरन्तं ग्रन्थमधीते इत्यर्थः, अत्रापादनत्वेनैव सिद्धे उपयोगे एव यथा स्यादित्येवमर्थं वचनम् । अत्रोपाध्यायमुखोदीरिताऽशब्दास्सन्तानेन वर्तमानाश्शिष्यमनुप्रविशन्तीत्युपाध्यायादवधिस्थानीयात्तेषामपक्रमोऽवसीयत इत्युपाध्यायस्योपक्रमावधित्वादपादानत्वमिति पञ्चमी प्राप्ता । नटस्य शृणोतीत्यत्र त्वपायो न विवक्ष्यते, न हि नटादयमादत्ते, अपि तु नटसम्बन्धिगाथाकर्मकं श्रवणमात्रमित्यर्थः ॥ **गम्यश्चासौ यप् च तस्य, कर्म चाधारश्च तस्मिन्** । द्वितीयासप्तम्योरपवादः । प्रासादादिति, प्रासादमारुह्यासने उपविश्य प्रेक्षत इत्यर्थः, अत्र प्रासादः कर्म, आसनमधिकरणं यबन्तार्थोऽत्र गम्यः । वृत्तौ यबन्तपदेन यबन्तार्थो ग्राह्य-

॥ ७५ ॥ प्रभृत्यर्थैरन्यार्थैर्दिक्शब्दैर्बहिरादिभिश्च युक्तात्पञ्चमी स्यात् । ततः प्रभृति, ग्रीष्मादारभ्य, अन्यो भिन्नो वा मैत्रात्, ग्रामात्पूर्वस्यां दिशि वसति, उत्तरो विन्ध्यात् पारियात्रः, पश्चिमो रामाद्युधिष्ठिरः, बहिः आरात् इतरो वा ग्रामात् ॥ **ऋणाद्धेतोः** ॥ ७६ ॥ हेतुभूतऋणवाचिनः पञ्चमी स्यात् । शताद् बद्धः । हेतोरिति किम् ? शतेन बद्धः ॥ **गुणादस्त्रियां नवा** ॥ ७७ ॥ अस्त्रीवृत्तेर्हेतुभूतगुण-

---

स्तेन क्त्वाप्रत्ययान्तस्य शब्दस्यापि गम्यत्वे पञ्चमी भवति, यथाऽऽसने स्थित्वा प्रेक्षते इत्यर्थे आसनात्प्रेक्षते इति ॥ **प्रभृतिश्चान्यश्च तयोरर्थो येषान्ते प्रभृत्यन्यार्थाः**, दिशि दृष्टाश्शब्दा दिक्शब्दाः, मयूरव्यंसकादित्वाद् दृष्टस्य लोपः, प्रभृत्यन्यार्थाश्च दिक्शब्दाश्च बहिश्चाराच्चेतरश्च तैः ॥ अर्थशब्दः प्रभृतिशब्देनान्यशब्देन च सह सम्बध्यते । ततः प्रभृतीति तदवधिमादाय, मैत्रादन्य इत्यादौ स्वप्रतियोगिकभेदसम्बन्धः पञ्चम्यर्थस्तेन प्रकृत्यर्थस्यान्यस्यान्वयः । मैत्रविलक्षण इति वाऽर्थः । दिशि दिग्विशेषे ये रूढ्या वाचकत्वेन दृष्टास्ते इह दिक्शब्दा विज्ञायन्ते, न तु दिशि वर्त्तमाना एवेति देशकालादिवृत्तिनापि भवति, न त्वैन्द्रीकेवलदिक्कुबादितो भवति । अवयववाचित्वेऽपि न भवति, यथाऽयं कायस्य पूर्वो भागः । देशे यथोत्तरो विन्ध्यात्पारियात्रः । द्रव्ये यथा पश्चिमो रामाद्युधिष्ठिरः । आरादित्यव्ययं दूरसमीपयोर्वाचकं तेन तद्योगे वक्ष्यमाणस्यारादर्थैरिति विकल्पस्यापवादोऽयम्, इतरशब्दो द्वयोरुपलक्षितयोरन्यतरवचनस्तेनान्यार्थाद्विधते ॥ **ऋणात्, हेतोः पञ्चमी** ॥ **शताद्बद्धः**, अत्रोत्तमर्णायाधमर्णेन धार्यमाणं शतं बन्धनस्यानाविष्टव्यापारतया निमित्तभूतम्, लौकिको हेतुस्ततस्तृतीया बाधिकानेन पञ्चमी विधीयते । हेतुहेतुमद्भावः पञ्चम्यर्थः, शतहेतुकबन्धनकर्मेति बोधः । शतेन बद्ध इति, शतं ऋणं बन्धकत्वेन विवक्षितमिति कर्तरि तृतीया ॥ **गुणात्, न स्त्री अस्त्री** तस्यां नवा ॥ हेतो-

वाचिनः पञ्चमी वा स्यात् । जाड्यात् जाड्येन वा बद्धः, ज्ञानात् ज्ञानेन वा मुक्तः । अस्त्रियामिति किम् ? बुद्ध्या मुक्तः ॥ **आरादर्थैः** ॥७८॥ आराद्दूरमन्तिकं च तदर्थैर्युक्तात्पञ्चमी वा स्यात् । दूरं विप्रकृष्टं वा ग्रामाद् ग्रामस्य वा । अन्तिकमभ्यासं वा ग्रामाद् ग्रामस्य वा ॥ **स्तोकाल्पकृच्छ्रकतिपयादसत्त्वे करणे** ॥ ७९ ॥ यतो द्रव्ये शब्दप्रवृत्तिः स गुणोऽसत्त्वं, तेनैव वा रूपेणाभिधीयमानं द्रव्यादि, तस्मिन् करणे वर्त्तमानेभ्यः स्तोकादिभ्यः पञ्चमी वा स्यात् । स्तोकात् स्तोकेन वा, अल्पादल्पेन वा, कृच्छ्रात् कृच्छ्रेण वा, कतिपयात्कति-

---

रिति वर्तते । अस्त्यत्राग्निर्धूमादित्यादौ नाग्न्यादेर्धूमादिर्हेतुः, किन्त्वग्निज्ञानस्य । पञ्चमी तु 'गम्ययपः कर्माधार' इति भविष्यति, धूमादिकमुपलभ्याग्निः प्रतिपत्तव्य इति तस्यार्थः । ज्ञानहेतुत्वविवक्षायान्तु हेतुत्वलक्षणा तृतीया भवति धूमेनाग्निरिति, ज्ञाननिष्ठजन्यजनकभावस्य विषये आरोपाद्वा पञ्चमीति केचित् ॥ **आरादर्थो येषान्ते तैः** ॥ **आरादित्यव्ययं** दूरान्तिकयोस्साधारण्येन वर्तते, तयोरेवात्र तन्त्रेण ग्रहणम्, एकप्रयत्नेनानेकार्थसाधकं शास्त्रं तन्त्रम्, दूरान्तिकार्थवाचिशब्दयोगे एव विकल्पेन पञ्चमीविधानं न त्वारान्छब्दयोगे, तत्र प्रभृत्यादिसूत्रेण नित्यं पञ्चमीविधानाद्दूरदेशवृत्तित्वं दूरशब्दार्थः, षष्ठ्यर्थः सम्बन्धः, ग्रामसम्बन्धिदूरदेशवृत्तिरित्यर्थः, एवं ग्रामसम्बन्धिसमीपदेशवृत्तीत्यपि बोध्यम् ॥ **स्तोकश्चाल्पश्च कृच्छ्रश्च कतिपयश्च तस्मात्**, सतो भावस्सत्त्वं न सत्त्वमसत्त्वं तस्मिन्करणे ॥ अनन्तपर्यायात्मके हि द्रव्ये प्रवर्तमानः शब्दः कञ्चिदेव स्वभावमादाय प्रवर्तते, तत्र यो द्रव्ये स्तोकादिशब्दप्रवृत्तिनिमित्तभूतः पर्यायः स द्रव्ये विशेषणतया प्रतीयमानत्वाद्गुणः क्रिया वाऽसत्त्वमुच्यते, तद्रूपेणाभिधीयमानं द्रव्यादि तस्मिन्करणे वर्तमानेभ्यः स्तोकादिभ्यः पञ्चमी वा स्यात् । एते स्तोकादयश्शुक्लादिशब्द-

पयेन वा मुक्तः । असत्त्व इति किम् ? स्तोकेन विषेण हतः ॥ **अज्ञाने ज्ञः षष्ठी** ॥ ८० ॥ अज्ञानार्थस्य ज्ञो यत्करणं तद्वाचिन एकद्विबहौ यथासङ्ख्यं ङसोसाम्लक्षणा षष्ठी नित्यं स्यात् । सर्पिषः सर्पिषोः सर्पिषां वा जानीते । अज्ञान इति किम् ? स्वरेण पुत्रं जानाति । करण इत्येव ? तैलं सर्पिषो जानाति ॥ **शेषे** ॥ ८१ ॥

वत्केवलधर्मपरा अपि, एवञ्चासत्त्ववचनता । सत्त्वञ्च सर्वनाम-परामर्शयोग्यत्वं लिङ्गादिनिरूपितविशेष्यत्वं वा । स्तोकान्मुक्त इति, पक्षे हेतुकर्तृकरणेति करणे तृतीया । अत्र स्तोकलक्षणो धर्मः सन्नसन् वा मुक्तिक्रियायामतिशयेनोपकारक इति करणं भवति । स्तोकेन विषेण हत इति, अत्र धर्मिवचनः स्तोकशब्दस्तेन स्तोकेन विषेणेति सामानाधिकरण्यमतो नासत्त्ववृत्तिः ॥ **अज्ञाने, ज्ञः षष्ठी, षष्ठी** ॥ **करण इति** गौणान्नाम्न एकद्विबहाविति च सम्बध्यते । नवेति निवृत्तं भिन्नविभक्तिविधानात् । सर्पिषो जानीते, सर्पिषा करणभूतेन प्रवर्तत इत्यर्थः, अनेकार्थत्वाद्धातूनामत्र जानातिः प्रवृत्तौ वर्तते । तत्र सर्पिरादिः साधकतमो भोजनादिवस्तुप्रवृत्तेर्विषयस्तेनाकर्मकत्वात् 'ज्ञ' इत्यात्मनेपदम्, अथवा ज्ञानसामान्यवाचिज्ञाधातुरस्तु, ज्ञानञ्च सम्यग्ज्ञानं मिथ्याज्ञानञ्चेति द्विविधं तत्र मिथ्याज्ञानमज्ञानमेव, तथा च सर्पिषो जानीत इत्यत्र सर्पिषि रक्तो विरक्तो वा चित्तभ्रान्त्या सर्वमेवोदकादि सर्पीरूपेण प्रतिपद्यत इत्यर्थः । तैलं सर्पिषो जानातीति, तैलं सर्पीरूपतया प्रतिपद्यते, अत्र तैलात्कर्मणः षष्ठी न स्यात्, सर्पिषस्तु करणाद्भवत्येवेति तृतीयापवादो योगः ॥ शेषे ॥ कर्म्मादिविशेषलक्षणेभ्यः षड्भ्यः कारकेभ्योऽन्यः सम्बन्धः शेषः । स्वस्वामिभावसम्बन्धस्य कर्मादिविशेषलक्षणेभ्योऽन्यत्वाच्छेषत्वम् । क्रियाकारकपूर्वकत्वाच्च कारकत्वम् । तथाहि—राज्ञः पुरुषः, वृक्षस्य

कर्म्मादिभ्योऽन्यस्तदविवक्षारूपः स्वस्वामिभावादिसम्बन्धो विशेषः शेष-

---

शाखा, पशोः पादः, पितुः पुत्र इत्यादावश्रूयमाणक्रियाविषये स्व-स्वामिभावावयवावयविभावजन्यजनकभावादौ सम्बन्धे पूर्वभाविका-रकत्वमुत्तरावस्थायामप्यनुगतमिति भवत्येव स शेषः । कारके राजा पुरुषाय ददातीति राजपुरुषौ कर्तृसम्प्रदानरूपावभूताम् । राज्ञः पुरुष इत्यत्र तु तन्मूलकस्वस्वामिभावप्रतीतौ कर्त्रादिविशेषरूपताऽनवगमा-च्छेषता, अत एव सामान्यकारकत्वमवतिष्ठते । एवञ्च तत्र क्रियाकार-कसम्बन्धः कारणभूतः, शेषसम्बन्धस्तु फलभूतः । क्रियाकारक-सम्बन्धो हि वृत्तः स्वाश्रये शेषसम्बन्धफलं निविश्योपरमते । अत्राश्रूयमाणा दानादिक्रिया सम्बन्धलक्षणकार्याऽनुपपत्त्यानुमीयमाना सन्निहिता इति तन्मुखेन समन्वयः, सिद्धस्वभावानां द्रव्याणां क्रियामन्तरेण परस्परं सम्बन्धाभावात् । क्रिया हि निःश्रयणीव सम्ब-न्धं करोति, एवञ्च सम्बन्धिनोरप्यनुमीयमानक्रियानिमित्तत्वरूपं कारकत्वमस्तीत्यश्रूयमाणक्रियः क्रियाकारकपूर्वकः शेषलक्षणस्सम्बन्ध उक्तः । एवं ग्रामस्य समीपादागच्छति वृक्षस्य पर्णं पततीत्यादावा-गमनादिक्रियां प्रति ग्रामादेरप्यस्त्येव समीपभावादौ सम्बन्धे क्रिया-कारकपूर्वकत्वम् । समीपस्य हि ग्राम आश्रयः, एवं पर्णस्य वृक्षः, आगमनादिक्रियां प्रति तु ग्रामादेरकारकत्वमुच्यते । एवं मातुःस्मर-तीत्यत्रापि मातुः स्मरणकर्मत्वे सति कर्मत्वाविवक्षायां तन्मूलको मातृस्मरणयोर्विषयविषयीभावो निमित्तनिमित्तीभावो वा सम्बन्ध इति स एव सम्बन्धः शेष इति श्रूयमाणक्रियः कर्मत्वाद्यविवक्षा-लक्षणः क्रियाकारकपूर्वकस्सम्बन्धविशेषः शेष उक्तः । न च सम्ब-न्धस्य द्विष्ठत्वाद्वाभ्यामपि सम्बन्धिभ्यां षष्ठी स्यादिति वाच्यम्, गौणस्यैव भावात्, राजा हि गुणभूतः, पुरुषस्तु प्रधानं तस्य प्राधा-न्यञ्चाख्यातपदसामानाधिकरण्यात् । न च पुरुषपदात्प्रधानादपि

स्तत्र षष्ठी स्यात् । राज्ञः पुरुषः, उपगोरपत्यम्, माषाणामश्नीयात् ॥

प्रथमा न स्यात्, नामार्थमात्रे हि प्रथमा विधीयते, पुरुषपदाच्च सम्बन्धस्याधिकस्य भावादिति वाच्यम्, तत्राधिकस्य वाक्यार्थत्वाद्राज्ञ इत्यादिपदान्तरसन्निधाने एव तस्य प्रतीयमानत्वात्, पुरुषपदन्तु स्वार्थमात्र एव वर्तत इति नामार्थे प्रथमा भवत्येव । न च राजनि यदाधिक्यं भासते सोऽपि वाक्यार्थः कुतो न स्यात्, पुरुषशब्दसन्निधाने एव राज्ञ आधिक्यस्य प्रतिभासनादिति वाच्यम्, पुरुषपदासमभिव्याहारेऽपि केवलाद्राज्ञ इत्यस्मादनियतविशेष्यनिरूपितत्वेन सम्बन्धित्वं गम्यते एव, राजा हि परोपकारित्वेन विवक्षितो न स्वार्थनिरूपितविशेष्यतया, पुरुषे तु राजशब्दप्रयोगं विना नाधिक्यं प्रतीयत इति पुरुषनिष्ठमाधिक्यं वाक्यार्थ एव, राजशब्दाद्धि षष्ठ्या उच्चारणं न तु पुरुषशब्दात् । न च राज्ञ इत्युच्चारणमात्रादेव राजनि आधिक्यमस्तीति वक्तुं युक्तमर्थस्यैव शब्दोच्चारणप्रयोजकत्वात्, न त्वर्थस्य शब्दकृतत्वमिति वाच्यम्, अन्तरेणापि पुरुषशब्दस्य प्रयोगं राजनि तदर्थस्य गम्यमानत्वात्, सोऽर्थो हि विशेषणत्वं स्वामित्वलक्षणो वाऽन्यो वा कश्चित्सम्बन्धः, स च सम्बन्धो यद्यपि द्विष्ठस्तथापि तस्य विशेषणतानियामकतया भेदे सति विशेषणतया विवक्षितस्य सम्बन्धं विना विशेषणत्वासम्भवेन तदाऽऽकाङ्क्षितत्वात्तत्र सम्बन्ध उद्भूतत्वेन प्रतीयत इति तत्र षष्ठी, विशेष्ये तु पदान्तरासमभिव्याहारे स्वार्थनिरूपितविशेष्यत्वेन भासमानत्वरूपस्वनिष्ठत्वादेव न विशेष्यतानियामकसम्बन्धाकाङ्क्षा, तत्र विशेषणे शब्देन षष्ठ्यादिनांऽशेन प्रतीयमानस्सम्बन्धः प्रधाने पुरुषेऽप्युपयुज्यते, तस्य द्विष्ठत्वस्वभावत्वात्। राज्ञ इत्यादेस्तु पदान्तरसमभिव्याहारं विनाप्यध्याहृतसम्बन्धिसामान्यनिरूपितविशेषणत्वप्रतीतिरिति विशेषः। राज्ञ इति हि स्वामित्वमवगम्यमानमन्यथाऽनुपपत्त्यैव पुरुषे स्वत्वमवगमयति,

अतः सम्बन्धस्य बहिरङ्गत्वात्पुरुषादन्तरङ्गा प्रथमैव। यद्यपि स्वामित्ववद्वाचकं पदं नोपादीयते तथापि तत्सामान्यतः स्वमात्रनिरूपितं पुरुषशब्दसन्निधौ तु स्वविशेषप्रतिपत्तिः। ननु स्वामित्वप्रतिपिपादयिषायां राजा स्वामीति प्रयुज्यतां किमिति षष्ठीप्रयोगः? प्रयोगाप्रयोगयोर्विषयविभागश्च कः? सामान्यनिरूपितं स्वत्वञ्च कथम्? इति चेदुच्यते, यथा नामार्थानां क्रियासामान्यनिरूपिता विशेषा विवक्ष्यन्ते तत्कृताश्च कर्म करणमपादानं सम्प्रदानमधिकरणमित्याख्याः शक्तयः प्रादुर्भवन्ति, ताश्च पुनर्विभक्तीनामुत्पत्तौ निमित्तं भवन्ति। यदा च नामार्थस्य क्रियादेशविवक्षायां शक्तिलक्षणोऽर्थातिरेको भवति, तदा शक्तयो नामार्थतां न प्रतिपद्यन्त इति विभक्तय उत्पद्यन्ते। यदा च स्वार्थनिरूपितविशेष्यतया नामार्थो विवक्षितस्तदा ताश्शक्तयः कर्म्मेत्यादिसंज्ञामेव प्राप्ताः, न तु विभक्त्युत्पत्तिं प्रयोजयन्ति, तथैव स्वापेक्षया राज्ञ इति स्वनिष्ठत्वाश्रयेण च राजा स्वामीति भवति, न च राजनि यथा स्वकृतस्वामित्वस्य सत्त्वात्षष्ठी भवति, तथा पुरुषेऽपि स्वामिकृतस्य स्वत्वस्य सत्त्वेन षष्ठी स्यादिति वाच्यम्, सम्बन्धस्य द्विष्ठत्वेन राजशब्दादुत्पद्यमानषष्ठ्याभिहितत्वेन पुरुषशब्दात्तदप्राप्तेः। यदा तु पुरुषस्य गुणभावेन विवक्ष्यते, राज्ञस्तु विशेष्यतया तदा पुरुषस्य राजेति भवति। राज्ञः पुरुषस्य कम्बल इत्यादावपि राजापेक्षया पुरुषस्य प्राधान्येऽपि कम्बलापेक्षया गौणत्वात्षष्ठी। सम्बन्धश्चानेकविधः, यथा राज्ञः पुरुष इत्यादौ स्वस्वामिभावसम्बन्धः, उपगोरपत्यमित्यादौ जन्यजनकभावः, पशोः पाद इत्यादाववयवावयविभावः, वृक्षस्य शाखेत्यादावाधाराधेयभावः, क्षीरस्य विकार इत्यादौ प्रकृतिविकृतिभावः, गवां समूह इत्यादौ समूहसमूहिभावः, कुम्भस्य समीपमित्यादौ समीपसमीपिभावः, पृथिव्याः स्वामीत्यादौ पाल्यपालकभावः, माषाणामश्नीयादित्यादौ भोज्यभोजकभावः, सुभाषितस्य

रिरिष्टात्स्तादस्तादसतसाता ॥ ८२ ॥ एतत्प्रत्ययान्तैर्युक्तात् षष्ठी स्यात् । उपरि ग्रामस्य, उपरिष्टात्, परस्तात्, पुरस्तात्, पुरः, दक्षिणतः, उत्तराद्वा ग्रामस्य ॥ **कर्म्मणि कृतः ॥ ८३ ॥** कृदन्तस्य कर्म्मणि षष्ठी स्यात् । अपां स्रष्टा, गवां दोहः । कर्म्मणीति

शिक्षित इत्यादौ शिक्षकशिक्षणीयभावः, न ते सुखस्य जानत इति ज्ञानज्ञेयभावः, न तस्य सायमश्नीयादित्यादौ भोज्यभोजकभावः, अन्नस्य नो देहीति दानदेयभावः, अक्षाणां दीव्यतीति देवनद्यूतभावः, घृतः पृष्ठं ददातीत्यादौ प्रहार्यप्रहरणभावः, नटस्य शृणोतीत्यादौ श्रवणश्रवणावधिभावः, वृक्षस्य पर्णं पततीत्यादौ पतनपतनावधिभावसम्बन्धः, महतां विभाषत इत्यादौ विभाष्यविभाषणभावसम्बन्ध इत्येवं सम्बन्धाः स्वयं विज्ञेयाः । प्रथमापवादोऽयं योगः ॥ **रिश्च रिष्टाच्च स्ताच्चास्ताच्चाम् चातस् चाच्च तेन ॥** ऊर्ध्वे देशे वसतीत्युपर्युपरिष्टात्, 'ऊर्ध्वादि'ति रिरिष्टात्प्रत्ययौ । पूर्वस्मिन्देशे पूर्वस्यां दिशि वा पुरस्तात्पुरः, पूर्वावराधरेभ्य इत्यस्तादस्प्रत्ययौ । दक्षिणत इति, दक्षिणोत्तराच्चेत्यतस्प्रत्ययः । उत्तरादिति, अधरापराच्चेत्यात्प्रत्ययः । प्रभृत्यन्यार्थेति सूत्रेण प्राप्तायाः पञ्चम्या अपवादोऽयम् ॥ **कर्मणि, कृतः षष्ठी ॥ नेयं शेषषष्ठी, सूत्रस्यास्य** वैयर्थ्यापत्तेः, किन्तु कर्मणि षष्ठी, अतो द्वितीयापवादोऽयम् । अपां स्रष्टा, अत्र कर्मणः षष्ठी । गवां दोहः, गौणकर्मणः षष्ठी । स्तोकं पक्ता क्रियाविशेषणस्यापि कर्मत्वाभावान्न भवति । नन्विह कर्मणा क्रियाऽऽक्षिप्यते, तया विना तदभावात्, क्रियावाचि तु धातुरेव, तस्माच्च कृत्प्रत्ययास्तिव्प्रत्यया वा भवन्ति, तत्र तिवन्तधातुप्रयोगे घटं करोतीत्यादिप्रयोगदर्शनाद्द्वितीयाविधानसार्थक्याच्च तत्र षष्ठ्यप्राप्तौ पारिशेष्यात्कृद्योगे एव कर्मणि षष्ठी भविष्यति, तस्मात्किं कृद्ग्रहणेनेत्याशयेनाशङ्कते-कृत इति किमिति । भुक्तपूर्व्वीति, भुक्तं पूर्वमनेनेति भुक्तपूर्वी पूर्वं भुक्तवानित्यर्थः, 'पूर्व-

किम् ? शस्त्रेण भेत्ता, स्तोकं पक्ता । कृत इति किम् ? भुक्तपूर्वी ओदनम् ॥ **द्विषो वातृशः** ॥ ८४ ॥ अतृशन्तस्य द्विषः कर्म्मणि षष्ठी वा स्यात् । चौरस्य चौरं वा द्विषन् ॥ **वैकत्र द्वयोः** ॥ ८५ ॥ द्विकर्म्मकेषु धातुषु कृत्प्रत्ययान्तेषु द्वयोः कर्म्मणोरेकतरस्मिन्षष्ठी वा स्यात् । अजाया नेता स्रुघ्नं स्रुघ्नस्य वा । अथवा अजामजाया वा नेता स्रुघ्नस्य ॥ **कर्तरि** ॥ ८६ ॥ कृदन्तस्य धातोः कर्त्तरि षष्ठी स्यात् । भवत आसिका । कर्त्तरीति किम् ? गृहे शायिका ॥

मनेन सादेश्चेनि'ति कर्तर्यर्थे इन्प्रत्ययः । अत्राविवक्षितकर्मतया भावे क्तप्रत्यये कृते भुजधातुवाच्यक्रियापेक्षमनभिहितमोदनस्य कर्मत्वमस्तीति षष्ठीवारणाय कृद्ग्रहणम् । न च भुक्तशब्दस्यौदनसापेक्षतया तद्धितविग्रहो न स्यादिति वाच्यम्, भुक्तपूर्वीत्यस्य पूर्वं भुक्तवानित्यनेन समानार्थत्वाद्भुणभूतक्रिययापि कारकत्वस्य कटं कृतवानित्यादौ दर्शनादत्रापि भुजिक्रियापेक्षं कर्मत्वमोदनस्यास्त्येव, तच्च कर्मत्वं न केनाप्यभिहितं भावे क्तस्य कर्तरि इन्प्रत्ययस्य विधानात्, तस्मात्कृद्ग्रहणाभावेऽत्रापि षष्ठी स्यादतस्तद्ग्रहणम् । भुजधात्वर्थनिष्ठविशेष्यतानिरूपितकर्मत्वसम्बन्धावच्छिन्नौदनादिनिष्ठप्रकारताकबोधं प्रति ओदनादिपदसमभिव्याहृतभुक्तपूर्वीति तद्धितान्तस्यैव कारणत्वादोदनादीनां कृदन्तपर्यायशक्तिग्रहप्रयोज्यबोधविषयक्रियानिरूपितं न कर्मत्वमिति ततः षष्ठी न भवतीति द्वितीयापवादः ॥ **द्विषः षष्ठी, वाऽतृशः षष्ठी** । तृन्नादिसूत्रेण प्रतिषेधे प्राप्ते विकल्पोऽयम् ॥ **वा, एकत्र, द्वयोः** ॥ **एकतरस्मिन्निति,** अन्यस्मिन्कर्मणि तु पूर्वेण नित्यमेव । एकत्रेति सामान्यनिर्देशात्प्रधानाप्रधानकर्मणोरविशेषेण ग्रहणमित्युभयत्रैवोदाहरति । कर्मणि कृत इत्यनेन द्वयोः कर्मणोः षष्ठी प्राप्ता, पक्षेऽनेन निषिध्यते ॥ **कर्तरि** ॥ **आसितुं** पर्याय आसिका, 'पर्यायार्हणोत्पत्तौ च णक' इति णकप्रत्ययः, तृतीयापवादः ॥

द्विहेतोरस्त्यणकस्य वा ॥ ८७ ॥ स्त्यधिकारविहिताभ्यामणकाभ्यामन्यस्य द्वयोः कर्तृकर्मषष्ठ्योर्हेतोः कृतः कर्त्तरि षष्ठी वा स्यात् । विचित्रा सूत्राणां कृतिराचार्यस्याचार्येण वा । द्विहेतोरित्येकवचनं किम् ? आश्चर्यमोदनस्य पाकोऽतिथीनाञ्च प्रादुर्भावः । अस्त्यणकस्येति किम् ? चिकीर्षा मैत्रस्य काव्यानाम्, भेदिका चैत्रस्य काष्ठानाम् ॥ **कृत्यस्य वा ॥ ८८ ॥** कृत्यस्य कर्त्तरि षष्ठी वा स्यात् । त्वया तव वा कृत्यः कटः ॥ **नोभयोर्हेतोः ॥ ८९ ॥** उभयोः कर्तृकर्म्मणोः षष्ठीहेतोः

द्वयोर्हेतुस्तस्य द्विहेतोः, अश्च णकश्चाणकं स्त्रियामणकं स्त्यणकं न स्त्यणकमस्त्यणकं तस्य, वा ॥ कर्तरीति वर्तते । कर्तरीत्यनेन नित्यं षष्ठीप्राप्ते विभाषेयम् । विचित्रा सूत्राणां कृतिरित्यत्र कृतिशब्दो भावक्तिप्रत्ययान्तः, अस्याः कृतेः सूत्रं कर्म, कर्ताऽऽचार्यः, उभयत्र च कर्मणि कृत इति कर्तरीति च षष्ठीप्राप्तेर्द्विहेतुकोऽयं क्तिप्रत्ययः । अत्र प्रत्युदाहरणे पाक इति कर्तुः कर्मणश्च षष्ठ्या निमित्तभूतस्य कृतोऽन्यान्यत्वादुभयप्राप्तिहेतोरेकस्य कृतोऽभावः । चिकीर्षेति, अत्र स्त्यधिकारविहितोऽप्रत्ययान्त एव शब्दः । भेदिकेति, स्त्यधिकारविहितो णकान्तशब्दः ॥ **कृत्यस्य, वा ॥** कर्तरीति वर्तते । त्वया तव वा कृत्यः कट इति, क्रियते इति कृत्यः, कर्मणि क्यप्प्रत्ययः । कर्तरीति षष्ठीप्राप्तावत्र विकल्पः ॥ **न, उभयोः षष्ठी, हेतोः षष्ठी ॥** कृत्यस्येत्यभिसम्बध्यते । नेतव्या ग्राममजा मैत्रेणेति, ननु द्विकर्मकेषु धातुष्वेवोभयप्राप्तिसम्भवेन तत्रैवायं प्रतिषेधो वक्तव्यः, तत्र प्रधानकर्मणः कृत्यप्रत्ययेनैवाभिहितत्वेन कर्मणि षष्ठ्यप्राप्तेः कर्तरि षष्ठ्या एव प्रतिषेध उचित इत्युभयग्रहणं किमर्थमिति चेन्न, कृत्प्रयोगे हि द्वितीयाबाधिका षष्ठी विधीयते, द्वितीया चाप्रधानादपि भवति, अतः प्रकृतोदाहरणे ग्राममित्यप्रधानकर्मणः षष्ठीप्राप्तौ तन्निषेधस्याप्यावश्यकत्वात्षष्ठ्यपि भविष्यतीति तत्सार्थ-

कृत्यस्योभयोरेव षष्ठी न स्यात् । नेतव्या ग्राममजा मैत्रेण ॥ **तृन्नुदन्ताव्ययकसुश्वानातृशतुङ्णिकच्खलर्थस्य** ॥ ९० ॥ तृन्नादीनां कृतां कर्मकर्त्रोः षष्ठी न स्यात् । तृन्–वदिता जनापवादान् । उदन्तः–कन्यामलङ्करिष्णुः, श्रद्धालुस्तत्त्वम् । अव्ययं–कटं कृत्वा, ओदनं भोक्तुं व्रजति । कसुः–ओदनं पेचिवान् । आनः–कटं चक्राणः मलयं पवमानः, ओदनं पचमानः, चैत्रेण पच्यमानः । अतृश्–अधीयँस्तत्त्वार्थम् । शतृ–कटं कुर्वन् । ङि–परीषहान् सासहिः । णकच्–कटं कारको व्रजति । खलर्थः–ईषत्करः कटो भवता, सुज्ञानं तत्त्वं त्वया ॥ **क्तयोरसदाधारे** ॥ ९१ ॥ सतो वर्त्तमानादाधाराच्चान्यत्रार्थे यौ क्तक्तवतू तयोः कर्मकर्त्रोः षष्ठी न स्यात् । कटः कृतो मैत्रेण, ग्रामं गतवान् । असदाधार इति किम् ? राज्ञां पूजितः, इदं सक्तूनां पीतम् ॥ **वा क्लीबे** ॥ ९२ ॥ क्लीबे विहितस्य क्तस्य कर्त्तरि षष्ठी

क्यम् ॥ उदन्ते येषां ते उदन्ताः, खलोऽर्थो येषान्ते खलर्थाः, तृन्च उदन्ताश्चाव्ययञ्च कसुश्चानश्चातृश्च शतृ च ङिश्च णकच्च खलर्थाश्च तस्य ॥ नोभयोरित्यनुवर्तते । कर्मणि कृतः कर्तरीति च प्राप्तायाः षष्ठ्या अपवादः । वदिता जनापवादानिति वदधातोः 'तृन् शीलधर्मसाधुष्विति सूत्रेण शीलाद्यर्थे तुनि कृते वदिता, तत्कर्मणोऽपवादस्य कर्मणि कृत इति प्राप्तायाः षष्ठ्या अनेन निषेधः । आन इत्यनुबन्धमुत्सृज्य निर्देशात्सामान्यग्रहणं तेन कानशानानशां ग्रहणमत एव क्रमेणोदाहरणत्रयं बोध्यम् ॥ **क्तावयवयोगात् क्तवतुरपि क्तः, क्तश्च क्तश्च क्तौ, स्यादावसङ्ख्येय इत्येकशेषस्तयोः षष्ठी, संश्चाधारश्च सदाधारः, न सदाधारस्तस्मिन्** ॥ नोभयोरित्यनुवर्तते । कृत इत्यादौ भूते क्तः, प्रत्युदाहरणे राज्ञां पूजित इत्यादौ वर्तमाने क्तः, पीतमित्यत्राधारे क्तः ॥ वा, क्लीबे ॥ क्तयोरिति कर्तरीति चैकदेशो नेति चानुवर्तते, तेन क्तवतुप्रत्ययस्य कर्मणश्च न ग्रहणम् । क्लीबे क्त इत्यनेन

वा स्यात् । मयूरस्य मयूरेण वा नृत्तम् ॥ **अकमेरुकस्य** ॥ ९३ ॥ कमेरन्यस्योकप्रत्ययान्तस्य कर्म्मणि षष्ठी न स्यात् । भोगानभिलाषुकः । अकमेरिति किम् ? दास्याः कामुकः ॥ **एष्यदृणेनः** ॥ ९४ ॥ एष्यत्यर्थे ऋणे च विहितस्येनः कर्म्मणि षष्ठी न स्यात् । ग्रामं गमी आगामी वा, शतं दायी । एष्यदृणेति किम् ? साधुदायी वित्तस्य ॥ **सप्तम्यधिकरणे** ॥ ९५ ॥ अधिकरणे एकद्विबहौ यथासङ्ख्यं ङ्योस्सुब्रूपा सप्तमी स्यात् । कटे आस्ते, दिवि देवाः, तिलेषु तैलम् ॥

भावे नपुंसके क्तस्यैव विधानात् । नृत्तमिति भावे क्तः, अत्र कर्तरीति षष्ठी प्राप्ता तस्याः 'क्तयोरसदाधार' इति नित्यनिषेधे प्राप्ते विकल्पोऽयम् ॥ **न कमिरकमिस्तस्य**, उकस्य ॥ न कर्मणीति च वर्तते, एवमग्रेऽपि, उकस्येत्यकमेर्विशेषणम्, विशेषणमन्त इति तदन्तविधिः । अभिलाषुक इति 'लषपतपद' इति ताच्छीलिक उकण्प्रत्ययः ॥ **एष्यच्चर्णश्च एष्यदृणे**, एष्यदृणयोः इन् तस्य ॥ इन इति इन्णिनोर्ग्रहणम् । निरनुबन्धस्येनो ग्रहणेऽपि निरनुबन्धग्रहणे न सानुबन्धस्य ग्रहणमिति न्यायोऽत्र न प्रवर्तते, निरनुबन्धस्येनः ऋणेऽविधानात् सूत्रे ऋणग्रहणेन णिनो ग्रहणस्यावश्यकत्वाच्च । ग्रामं गमीत्यत्र वर्त्स्यति गम्यादिरिति भविष्यति इन्, आगामीत्यत्र आङ्ध णिदित्यौणादिको णिन्, शतं दायीत्यत्र णिन् चावश्यकाधमर्ण्ये इति ऋणे णिन् । साधुददातीति साध्ये णिन् प्रत्ययः ॥ **सप्तमी, अधिक्रियतेऽनेनेत्यधिकरणं** तस्मिन् ॥ गौणान्नाम्नः, एकद्विबहाविति च वर्तते । कटे आस्ते, औपश्लेषिकमधिकरणं कटः, दिवि देवाः, वैषयिकमधिकरणं द्यौः, तिलेषु तैलमभिव्यापकमधिकरणं तिलानि । अधिकरणसप्तम्या अधिकरणत्वशक्तिमानर्थः, सा च शक्तिः कर्तृकर्मद्वारा क्रियाश्रयनिष्ठा । लोके द्रव्यगुणक्रियाविषयमधिकरणम्, अत्र तु क्रियाविषय-

नवा सुजर्थैः काले ॥ ९६ ॥ सुचोऽर्थो वारो येषां तत्प्रत्ययान्तैर्युक्तात्कालेऽधिकरणे वर्त्तमानात्सप्तमी वा स्यात् । द्विरह्नि अह्नो वा भुङ्क्ते, पञ्चकृत्वो मासे मासस्य वा भुङ्क्ते । काल इति किम् ? द्विः कांस्यपात्र्यां भुङ्क्ते ॥ **कुशलायुक्तेनाऽऽसेवायाम्** ॥ ९७ ॥ आभ्यां युक्तादाधारवाचिनः सप्तमी वा स्यात्, आसेवायां तात्पर्ये । कुशलो विद्यायां विद्याया वा, आयुक्तस्तपसि तपसो वा । आसेवायामिति किम् ? कुशलश्चित्रे, न तु करोति, आयुक्तो गौः शकटे, आकृष्य युक्त इत्यर्थः ॥ **स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैः** ॥ ९८ ॥ एभिर्युक्तात्सप्तमी वा स्यात् । गोषु गवां वा स्वामीश्वरोऽधि-

---

मेव तत् ॥ **नवा, सुचोऽर्थो येषान्तैः, काले** ॥ सप्तमी अधिकरणेइत्यनुवर्तते, एवमग्रेऽपि । द्विरिति, द्वित्रिचतुरः सुच् प्रत्ययः ॥ पञ्चकृत्व इति पञ्चवाराऽस्य, 'वारे कृत्वस्' । पक्षे शेषे षष्ठी । द्विःकांस्यपात्र्यामिति, कंसायेदं कंसीयं तस्य विकारः कांस्यम्, अत्र पात्रमधिकरणं न कालः । आधारत्वस्याविवक्षायां षष्ठीसिद्धौ नियमार्थमिदम् । सुजर्थैर्योगे काले एव वा सप्तमी भवतीति नियमात्प्रत्युदाहरणेष्वाधारसप्तम्येव, न तु षष्ठी ॥ **कुशलश्चायुक्तश्च तेन, आसमन्तात्सेवनमासेवा तस्याम्** ॥ कुशलो निपुणः, आयुक्तो व्यापृतः । पक्षेऽधिकरणत्वाविवक्षायां शैषिकी षष्ठी । आसेवाशब्दस्तात्पर्येऽर्थे रूढः, तात्पर्यञ्च तदेकव्यापारता । प्रत्युदाहरणेऽधिकरणे इत्येव नित्यं सप्तमी, पक्षे, आधारत्वस्याविवक्षायां विकल्पे सिद्धेऽनासेवायामाधारत्वाविवक्षानिवृत्यर्थं वचनम् ॥ **स्वामी च ईश्वरश्चाधिपतिश्च दायादश्च साक्षी च प्रतिभूश्च प्रसूतश्च तैः** ॥ पक्षे शैषिकी षष्ठी, अधिकं पतिरधिपतिः, अधिकश्चासौ पतिश्चेति वा । ददातीति दायः, दायमादत्ते इति दायादः । स्वामीश्वराधिपतीति पर्यायोपादानात् पर्यायान्तर-

पतिर्दायादः साक्षी प्रतिभूः प्रसूतो वा ॥ **व्याप्ये क्तेनः** ॥ ९९ ॥ क्ताद्य इन् तदन्तस्य व्याप्ये सप्तमी नित्यं स्यात् । अधीतमनेन, अधीती व्याकरणे, इष्टी यज्ञे । क्तेन इति किम् ? कृतपूर्वी कटम् ॥ **तद्युक्ते हेतौ** ॥ १०० ॥ तेन व्याप्येन युक्ते हेतौ वर्तमानात्सप्तमी स्यात् । चर्म्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् । केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः ॥ १ ॥ तद्युक्त इति किम् ? वेतनेन धान्यं लुनाति ॥ **अप्रत्यादावसाधुना** ॥ १०१ ॥ प्रत्यादेर-

---

योगे न भवति, यथा ग्रामस्य राजा, ग्रामस्य पतिरित्यादि ॥ **व्याप्ये, क्ताद् इन् क्तेन् तस्य** ॥ नवेति निवृत्तं व्याप्योपादानात्, तेन हि अधिकारभेदः, पृथग्योगादिति वा । क्तप्रत्ययान्ताद्य इन् तदन्तस्येत्यर्थः । इष्टादेरिति सूत्रेणेष्टादिभ्य क्तान्तेभ्य इष्टमनेनेत्याद्यर्थे विहितो यस्तद्धित इन् तदन्तस्य व्याप्ये सप्तमी भवति । अधीती व्याकरणे, अत्र भावे क्तप्रत्यये, तत इष्टादेरिति कर्तरि इन्कृते, पश्चाद्गौणभूतक्रियया सम्बध्यमानं व्याकरणमनभिहितं कर्मेति कृतपूर्वी कटमितिवद्वितीयात्र प्राप्ता, तदपवादोऽयम् । इष्टो यज्ञोऽनेनेति इष्टी यज्ञे ॥ तेन **व्याप्येन युक्तस्तद्युक्तस्तस्मिन्**, हेतौ । हेतुशब्दो निमित्तपर्यायोऽपि विशिष्टं निमित्तमत्र बोधयति । निमित्तमात्रार्थत्वे तु दात्रेण धान्यं लुनातीत्यादौ दात्रादपि सप्तमी स्यात् । न चोपपदविभक्तेः कारकविभक्तिर्बलीयसीति **न्यायेन** न दात्रादेः सप्तमीति वाच्यम्, तद्युक्ते हेतावित्यस्यापि कारकश्रुत्या कारकविभक्तित्वात्, यत्र कारकगन्धोऽपि नास्ति, यथा शक्तार्थवषडादिभिर्योगे चतुर्थीत्यादौ सैवोपपदविभक्तिः, तस्माद्यदर्थः क्रियारम्भस्तदेवात्र विशिष्टं निमित्तं हेतुशब्दाभिधेयमभिप्रेतं फलमिति यावत् । हेतौ तृतीयायां प्राप्तायां सप्तमी विधीयते । वेतनेन धान्यं लुनाति, नात्र धान्यवेतनयोस्संयोगोऽवयवावयविभावो वा ॥ **प्रतिरादिर्यस्य स प्रत्यादिः**, न

प्रयोगेऽसाधुशब्देन युक्तात्सप्तमी स्यात् । असाधुर्मैत्रो मातरि । अप्रत्यादाविति किम् ? असाधुर्मैत्रो मातरं प्रति परि अनु अभि वा ॥ **साधुना** ॥ १०२ ॥ अप्रत्यादौ साधुशब्देन युक्तात्सप्तमी स्यात् । साधुर्मैत्रो मातरि । अप्रत्यादाविति किम् ? साधुर्मातरं प्रति परि अनु अभि वा ॥ **निपुणेन चार्चायाम्** ॥ १०३ ॥ निपुणसाधुशब्दाभ्यां युक्तादप्रत्यादौ सप्तमी स्यादर्चायाम् । मातरि निपुणः साधुर्वा । अर्चायामिति किम् ? निपुणो मैत्रो मातुः, मातैवैनं निपुणं मन्यत इत्यर्थः । अप्रत्यादाविति किम् ? निपुणो मैत्रो मातरं प्रति परि अनु अभि वा । **स्वेशोऽधिना** ॥ १०४ ॥ स्वे ईशितव्ये ईशे च वर्त्तमानादधिना युक्तात्सप्तमी स्यात् । अधि मगधेषु श्रेणिकः, अधि श्रेणिके मगधाः ॥

प्रत्यादिरप्रत्यादिस्तस्मिन्, असाधुना । प्रति परि अनु अभि इत्येते एव प्रत्यादयः । असाधुर्मैत्रो मातरीति, नात्र मातृविषयस्य साधुत्वस्य निषेधस्तथा च सति प्रथमं मात्रा साधोरन्वये उत्तरसूत्रेणैव सप्तमी सिद्धा भवेत्, किन्त्वन्तरङ्गत्वात्प्रथमं साधुशब्देन नञ्समासे कृते ततो मातृसम्बन्धः, एवञ्चोत्तरसूत्रेण सप्तमी न सिद्ध्यतीति वचनम् । नन्वभियोगे लक्षणवीप्स्येत्यनेन प्रत्यादियोगे च भागिनीत्यनेन द्वितीयाया अभिधानात्सप्तमी न भविष्यतीति, अप्रत्यादाविति व्यर्थमिति चेन्न, असाधुशब्दाभावेऽपि द्वितीयायाश्चरितार्थत्वेन प्रत्यादियोगेऽसाधुपदसमभिव्याहारे सप्तमीप्रसङ्गादतस्तद्व्युदासाय तद्ग्रहणम् ॥ **साधुना** । अप्रत्यादावित्यनुवर्तते । उत्तरसूत्रेऽर्चायां सप्तमीविधानात्तत्त्वाख्यानेऽयं विधिः ॥ **निपुणेन, च, अर्चायाम्** । चशब्देन साधुनेत्यस्य समुच्चयः । अप्रत्यादावित्यभिसम्बध्यते । षष्ठ्यपवादः । मातरि निपुण इति, मातरि सुष्ठु वर्त्तते इत्यर्थः, मात्रादेः प्रशंसा गम्यत इति तद्योगे मातृशब्दात्सप्तमी ॥ स्वश्च ईशश्च स्वेशस्तस्मिन्, अधिना । अधिमगधेषु श्रेणिक इति, अत्र ईशितव्येऽधिः । अधि-

उपेनाधिकिनि ॥ १०५ ॥ उपेन युक्तादधिकिनि वाचिनः सप्तमी स्यात् । उपखार्यां द्रोणः ॥ **यद्भावो भावलक्षणम्** ॥ १०६ ॥ भावः क्रिया, यस्य भावेनान्यो भावो लक्ष्यते तद्वाचिनः सप्तमी स्यात् । गोषु दुह्यमानासु गतः ॥ **गते गम्येऽध्वनोऽन्तेनैकार्थ्यं वा** ॥ १०७ ॥ कुतश्चिदवधेर्विवक्षितस्याध्वनोऽवसानमन्तः, यद्भावो भावलक्षणं तस्याध्वनोऽध्वन एवान्तेनान्तवाचिना सहैकार्थ्यं सामानाधिकरण्यं वा स्यात्, तद्विभक्तिस्तस्मात्स्यादित्यर्थः, गते गम्येऽप्रयुज्यमाने । गवीधुमतः सांकाश्यं चत्वारि योजनानि चतुर्षु वा योजनेषु । गत इति किम् ? दग्धेषु लुप्तेष्विति वा प्रतीतौ मा भूत् । गम्य इति

श्रेणिके मगधा इति, ईशेऽत्राधिः । षष्ठीबाधनार्थो योगः ॥ **उपेन, अधिकमस्मात्तस्मिन्** । उप खार्यां द्रोणः, खार्यपेक्षया द्रोणोऽधिक इत्यर्थः । अत्रोपेत्यनेन द्रोणखार्योरधिकाधिकीभावसम्बन्धो द्योत्यते । *यस्मादधिकं ततः सप्तमीति भावः* ॥ **यस्य भावो यद्भावः, लक्ष्यतेऽनेनेति** *लक्षणं भावस्य लक्षणं भावलक्षणम्* । *गोषु दुह्यमानासु* गतः, गोर्दोहनक्रिया गमनक्रियाया लक्षणं भवति, निर्ज्ञातकाला हि क्रियाऽनिर्ज्ञातकालायाः क्रियायाः कालपरिच्छेदकत्वाल्लक्षणं भवति । वर्तमानकालावच्छिन्नव्यापारजन्यदोहनाश्रयगोनिष्ठज्ञापकतानिरूपितज्ञाप्यतानिरूपितो दोहनाधिकरणकालसम्बन्धविशिष्टव्यापारजन्यगमनाश्रयश्चैत्र इति बोधः । सप्तम्यर्थो ज्ञाप्यज्ञापकभावो दोहनादिक्रियाधिकरणकालसम्बन्धश्च, इत्थम्भूतलक्षणेऽर्थे तृतीयापवादोऽयम् ॥ **गते, गम्येऽध्वनः षष्ठी, अन्तेन,** एकोऽर्थो यस्य स एकार्थस्तस्य भाव ऐकार्थ्यम्, वा । पूर्वसूत्रमनुवर्तते । गवीधुमत इत्यादि, गवीधुमन्निति नगरविशेषः । कुतश्चिदवधेर्गवीधुमत इत्यादिलक्षणाद्विवक्षितस्य इयत्तापरिच्छेदायोपात्तस्याध्वनोऽवसानमन्तः । यस्याध्वनश्चतुर्योजनरूपस्य भावेन गमनरूपेणापरो भावः साङ्काश्य-

किम् ? गतप्रयोगे मा भूत् । अध्वन इति किम् ? कार्तिक्या आग्रहायणी मासे । अन्तेनेति किम् ? अद्य नश्चतुर्षु गव्यूतेषु भोजनम् ॥ **षष्ठी वानादरे ॥ १०८ ॥** यद्भावो भावलक्षणं तद्वृत्तेरनादरे षष्ठी वा स्यात् । रुदतो लोकस्य, रुदति लोके वा प्राव्राजीत् ॥ **सप्तमी चाविभागे निर्द्धारणे ॥ १०९ ॥** जातिगुणक्रियादिभिः समुदायादेकदेशस्य बुद्ध्या पृथक्करणं निर्द्धारणम्, तस्मिन् गम्ये षष्ठी सप्तम्यौ स्याताम्, अविभागे निर्द्धार्यमाणैकदेशस्य समुदायेन सह कथञ्चिदैक्ये शब्दाद्गम्यमाने । क्षत्रियो नृणां नृषु वा शूरः, कृष्णा गवां गोषु वा

भवनरूपो लक्ष्यते तस्याध्वनोऽन्तवाचिना सह सामानाधिकरण्यं समानविभक्तिकत्वरूपं वा भवति । पक्षे पूर्वेण सप्तमी, गतेष्विति गम्यम् । अद्य न इति, भोजनं हि भोक्तुर्धर्मः, नाध्वनोऽन्त इति पूर्ववत्सप्तम्येव ॥ **षष्ठी, वा, नादरोऽनादरस्तस्मिन्** । यद्भावो भावलक्षणमित्यनुवर्त्तते । अनादरे गम्यमाने सति यस्य क्रियया क्रियान्तरं लक्ष्यते ततः सप्तमी षष्ठी चेति भावः । रुदतो लोकस्य प्राव्राजीदित्यत्र ज्ञाप्यज्ञापकभावः षष्ठीसप्तम्योरर्थः । धातोश्चानादरविशिष्टं प्रव्रजनमर्थः । अनादरश्च लोकविषयक एव, विशिष्टता च सामानाधिकरण्यस्वोत्तरकालिकत्वाभ्याम् । एवञ्च रोदनकर्तृकलोकज्ञाप्यमनादरविशिष्टं प्रव्रजनमिति बोधः ॥ **सप्तमी, च, न विभागोऽविभागस्तस्मिन्, निर्द्धारणे** । चकारः षष्ठीसमुच्चयार्थः । यतः स्वेतरेभ्यः स्वघटितसमुदायघटकेभ्यो व्यावृत्तेन धर्मेण समुदायादेकदेशस्य जातिगुणक्रियादिविशिष्टस्य पृथक्करणरूपं निर्द्धारणं ततः षष्ठीसप्तम्यौ स्त इति भावः । पृथक्करणञ्च व्यावृत्तधर्मप्रकारकज्ञानविषयीकरणम् । अस्ति च क्षत्रियो नृणां शूर इत्यादौ क्षत्रियत्वादिविशिष्टस्य क्षत्रियघटितनरसमुदायघटकक्षत्रियेतरव्यावृत्तशूरत्वादिवत्तया

बहुक्षीरा, धावन्तो यातां यात्सु वा शीघ्रतमाः, युधिष्ठिरः श्रेष्ठतमः कुरूणां कुरुषु वा । अविभाग इति किम् ? मैत्रश्चैत्रात्पटुः ॥ **क्रियामध्येऽध्वकाले पञ्चमी च** ॥ ११० ॥ क्रिययोर्मध्ये यावध्वकालौ तद्वाचिभ्यां पञ्चमीसप्तम्यौ स्याताम् । इहस्थोऽयमिष्वासः क्रोशात्क्रोशे वा लक्ष्यं विध्यति, अद्य भुक्त्वा मुनिर्द्व्यहात् द्व्यहे वा भोक्ता ॥ **अधिकेन भूयसस्ते** ॥ १११ ॥ अधिकेनाल्पीयोवाचिना योगे भूयोवाचिनस्ते सप्तमीपञ्चम्यौ स्याताम् । अधिको द्रोणः खार्यां खार्या

प्रतीतिः । त्रादिपदञ्च सामान्यरूपेण क्षत्रियतदितरनरादिघटितसमुदायोपस्थापकम् । उदाहरणचतुष्टयं क्रमेण जातिगुणक्रियासंज्ञाभिप्रायेण विज्ञेयम् । निर्द्धारणस्य विभागरूपत्वाद्यस्य हि यतो विभागस्तस्य तदपेक्षयावधिरूपत्वेनापादानत्वात्पञ्चम्यां प्राप्तायां यत्राविभागोऽपि तत्र तदपवादो योगः ॥ **क्रिययोर्मध्यं तस्मिन्, अध्वा च कालश्च** तस्मिन्, **पञ्चमी च** ॥ चकारात्सप्तमी ग्राह्या । इहस्थोऽयमित्यादि, इह धानुष्कावस्थानमिषुमोक्षो वा एका क्रियाऽपरा च लक्ष्यव्यधस्तन्मध्ये क्रोशोऽध्वा, तस्मात्सप्तमी पञ्चमी च । स्वानन्तरदेशवृत्तित्वं विभक्त्यर्थः, एतद्देशाधिकरणकस्थित्याश्रयधानुष्ककर्तृकमेतद्देशानन्तरक्रोशानन्तरस्थितलक्ष्यकर्मकव्यधनमिति बोधः । एवमद्य भुक्त्वेत्यत्र स्वानन्तरकालवृत्तित्वं विभक्त्यर्थः, एतद्दिवसाधिकरणकभोजनोत्तरकालिक एतद्दिवसानन्तरद्व्यहानन्तरकालवृत्तिभोजनाश्रयो मुनिरित्यर्थः ॥ **अधिकेन, भूयसः पञ्चमी, ते** प्रथमाद्विवचनम् । अधिरूढेऽर्थेऽधिकशब्दस्य निपातः । ते इति सप्तमीपञ्चम्यौ । अधिरूढ इति कर्मणि कर्तरि वा क्तो भवति, तत्र यदा कर्तरि तदाधिक इत्यनेनाल्पीयानित्युच्यते, यदा तु कर्मणि तदा भूयान् । तत्र सामर्थ्यादल्पीयोवाचिनाधिकशब्देन युक्ताद्भूयसो भूयोवाचिनो गौणा-

वा ॥ **तृतीयाल्पीयसः** ॥ ११२ ॥ अधिकेन भूयोवाचिना योगेऽल्पीयोवाचिनस्तृतीया स्यात् । अधिका खारी द्रोणेन ॥ **पृथग्नाना पञ्चमी च** ॥ ११३ ॥ आभ्यां युक्तात्पञ्चमी तृतीया च स्यात् । पृथग्मैत्रात् मैत्रेण वा । नाना चैत्रात्चैत्रेण वा ॥ **ऋते द्वितीया च** ॥ ११४ ॥ ऋतेशब्देन युक्ताद्वितीया पञ्चमी च स्यात् । ऋते धर्म्मं धर्म्मात्कृतः सुखम् ॥ **विना ते तृतीया च** ॥ ११५ ॥ विनाशब्देन युक्तात् ते द्वितीयापञ्चम्यौ तृतीया च स्यात् । विना वातं वाताद्वातेन वा ॥ **तुल्यार्थैस्तृतीयाषष्ठ्यौ** ॥ ११६ ॥ तुल्यार्थैर्युक्तात्तृतीयाषष्ठ्यौ स्याताम् । मात्रा मातुर्वा तुल्यस्समो वा ॥ **द्वितीयाषष्ठ्यावेनेनानञ्चेः** ॥ ११७ ॥ एनप्रत्ययान्तेन युक्ता-

---

न्नाम्नः सप्तमीपञ्चम्यौ स्याताम् ॥ **तृतीया, द्वयोर्मध्ये प्रकृष्टमल्पमल्पीयस्तस्मात्** । अधिकेनेति वर्तते । अधिका खारी द्रोणेनेति, भूयोवाच्यधिकशब्देन युक्तादल्पीयोवाचकाद्द्रोणान्नाम्नो द्रोणशब्दात्तृतीया बोध्या ॥ **पृथक् च नाना च** पृथग्नाना ताभ्यां पञ्चमी, च । चकारात्तृतीयायाः परामर्शः । यदा पृथग्नानाशब्दावन्यार्थौ तदा प्रभृत्यादिसूत्रेण पञ्चमी सिद्धैव, केवलं तृतीयैवानेन विधीयते, यदा त्वसहायार्थौ तदा पञ्चमीविधानार्थमपीदम् । अन्ये तु द्वितीयामपीच्छन्ति ॥ **ऋते, द्वितीया, च** । ऋते इत्येतदव्ययं वर्जनार्थे, चकारेण पञ्चमीत्यस्यापकर्षः, द्वितीयां नेच्छन्त्येके ॥ **विना, ते प्रथमाद्विवचनम्**, तृतीया, च । ते इत्यनेन द्वितीयापञ्चम्योर्ग्रहणम् । द्वितीयां नेच्छन्त्यन्ये ॥ **तुल्योऽर्थो येषान्ते तैः**, तृतीया च षष्ठी च तृतीयाषष्ठ्यौ । अर्थग्रहणं पर्यायार्थम् । पूर्वसूत्रात्तृतीयामनुवर्त्यात्र तुल्यार्थैर्वा इत्येव सूत्रणे कृते, पक्षे शेषषष्ठ्या इष्टसिद्धौ तृतीयाषष्ठ्योर्विधानं सप्तमीबाधनार्थम् । तेन गवां तुल्यो गोभिर्वा स्वामी, इह स्वामीश्वरेत्यादिना सप्तमी न भवति ॥ **द्वितीया च षष्ठी च द्वितीयाषष्ठ्यौ**,

द्वितीयाषष्ठ्यौ स्याताम्, न चेत्सोऽञ्चेः परः स्यात् । पूर्वेण ग्रामं ग्रामस्य वा । अनञ्चेरिति किम् ? प्राग् ग्रामात् ॥ **हेत्वर्थैस्तृतीयाद्याः** ॥ ११८ ॥ हेतुर्निमित्तं तद्वाचिभिर्युक्तात्तृतीयाद्याः स्युः । धनेन हेतुना, धनाय हेतवे, धनाद्धेतोः, धनस्य हेतोः, धने हेतौ वा वसति । एवं निमित्तादिभिरपि ॥ **सर्वादेः सर्वाः** ॥ ११९ ॥ हेत्वर्थैर्युक्तात्सर्वादेः सर्वा विभक्तयः स्युः । को हेतुः, कं हेतुम्, केन हेतुना, कस्मै हेतवे, कस्माद्धेतोः, कस्य हेतोः, कस्मिन् हेतौ वा याति ॥ **असत्त्वारादर्थात् टाङसिङ्यम्** ॥ १२० ॥ असत्त्ववाचिनो दूरार्थादन्तिकार्थाच्च टाङसिङ्यमः स्युः । गौणादिति निवृत्तम् । दूरेण दूराद्दूरे दूरं वा ग्रामस्य ग्रामाद्वा वसति । एवं विप्रकृष्टेनेत्यादि । अन्ति-

---

एनेन तृतीया, नाञ्चिरनञ्चिस्तस्मात् । प्राग् ग्रामादिति, अञ्चू गतौ च, प्राञ्चतीति क्विप्, 'अञ्चोऽनर्चायां' नलोपः, 'अचः' ङीप्रत्ययः, 'अञ्च् प्राग्दीर्घश्च,' प्राच्यामदूरवर्तिन्यां दिशि वसति, 'अदूरे एनः' लुबञ्चेरित्यनेनैनलोपः, एनस्य ङ्याद्यौणस्याक्विप इति ङीनिवृत्तिः, 'अव्ययस्य' ॥ हेतोरर्थो येषान्ते तैः, तृतीया आद्या यासां तास्तृतीयाद्याः । आद्यशब्देन चतुर्थीपञ्चमीषष्ठीसप्तमीनां ग्रहणम् । हेत्वर्थशब्देन गौणस्य नाम्नस्सामानाधिकरण्यमपेक्षितम्, असामानाधिकरण्येन हेत्वर्थशब्दसम्बन्धे त्वन्नस्य हेतुरित्यादौ षष्ठ्येव । अग्रिमसूत्रेण हेत्वर्थैर्युक्तात्सर्वादेः सर्वविभक्तिविधानादत्रासर्वादेस्तृतीयाद्या विभक्तयो बोध्याः । अन्ये तु हेत्वर्थशब्दयोगे नेच्छन्ति, हेतुशब्दयोगे तु षष्ठीमेवेच्छन्ति ॥ सर्व आदिर्यस्यासौ तस्य, सर्वाः प्रथमा । हेत्वर्थैरित्यनुवर्तते । प्रथमां नेच्छन्त्येके, द्वितीयामपरे ॥ न सत्त्वमसत्त्वम्, आरादर्थो यस्य तदारादर्थम्, असत्त्वे आरादर्थं तस्मात्, टाश्च ङसिश्च ङिश्च अम् च टाङसिङ्यम् ॥ टाङसिङ्य-

केन अन्तिकादन्तिकेऽन्तिकं वा ग्रामस्य ग्रामाद्वा वसति, एवमभ्यासेनेत्यादि। असत्त्व इति किम्? दूरोऽन्तिको वा पन्थाः॥ **जात्याख्यायां नवैकोऽसङ्ख्यो बहुवत्॥ १२१॥** जातेराख्याऽभिधा तस्यामेकोऽर्थोऽसङ्ख्यः सङ्ख्यावाचिविशेषणरहितो बहुवद्वा स्यात्। सम्पन्ना यवाः, सम्पन्नो यवः। जातीति किम्? चैत्रः। आख्यायामिति किम्? काश्यपप्रतिकृतिः काश्यपः। असङ्ख्य इति किम्? एको व्रीहिः सम्पन्नः

मित्युक्त्वा विभक्तेर्निवृत्तिस्तन्निवृत्तौ गौणादिति निवृत्तं तत्सम्बद्धत्वात्तस्य। दूरेणेति, इदं तदिति सर्वनामप्रत्यवमर्षयोग्यार्थाभिधायकत्वेऽप्येतेषां धर्ममात्रेण प्रयोगादसत्त्वरूपार्थाभिधायकत्वं न विरुध्यते तथात्र ग्रामशब्दादारादर्थैरिति वा पञ्चम्यां पक्षे शैषिकी षष्ठी॥ **जातेराख्या तस्याम्, नवा, एकः, न विद्यते सङ्ख्या यस्य, बहुरिव बहुवत्॥** जातिरेकोऽर्थस्तदभिधाने एकवचनमेव प्राप्तमत इदमारभ्यते। जातेः प्राधान्येनाऽऽख्यायामित्यर्थः। भावप्रत्ययं विना प्राधान्येन जातिबोधे यवादिशब्दानां साधुत्वे इदमेव सूत्रं प्रमाणम्। बहुवदित्यतिदेशेन जातिरूपार्थस्यैकस्यापि बहुवद्भाव उक्तः, तथा च नाम्नः प्रथमैकद्विबहाविति बहुवचनं भवति, एकत्वञ्च बहुवचनार्थः। जात्यर्थस्य बहुवद्भावे सति सम्पन्नादीनि तद्विशेषणान्यपि सामानाधिकरण्याद्यवादिशब्दोपात्ते जात्यर्थे वर्तन्त इति तेभ्योऽपि बहुत्वाश्रयं बहुवचनम्। जातिशब्दस्य बहुवद्भावे तु यवशब्दादेव बहुवचनं स्यान्न तु सम्पन्नशब्दात्। चैत्र इति नायं शब्दो जातिवचनः, अपि तु संज्ञावचनः। कश्यं मद्यं पिबतीति कश्यपस्तस्यापत्यं काश्यपः, यदा काश्यपप्रतिकृतिः काश्यपशब्देनोच्यते, तदा काश्यपशब्दस्य जातिशब्दत्वेऽपि सम्प्रति प्रतिकृतिवाचकत्वेन जातिवाचकत्वाभावान्न तदा बहुवद्भावः। एको व्रीहिरित्यत्र व्रीहेर्जातिवाचित्वेऽपि सङ्ख्यावाचि-

सुभिक्षं करोति ॥ **अविशेषणे द्वौ चास्मदः** ॥ १२२ ॥ अस्मदो द्वावेकश्चार्थो बहुवद्वा स्यात्, अविशेषणे न चेत्तस्य विशेषणं स्यात् । आवां ब्रूवः, वयं ब्रूमः । अहं ब्रवीमि, वयं ब्रूमः । अविशेषण इति किम् ? आवां गार्ग्यौ ब्रूवः । अहं चैत्रो ब्रवीमि ॥ **फल्गुनीप्रोष्ठपदस्य भे** ॥ १२३ ॥ फल्गुनीप्रोष्ठपदयोर्भे नक्षत्रे वर्त्तमानयोर्द्वावर्थौ बहुवद्वा स्याताम् । कदा पूर्वे फल्गुन्यौ, कदा पूर्वाः फल्गुन्यः । कदा पूर्वे प्रोष्ठपदे, कदा पूर्वाः प्रोष्ठपदाः । भ इति किम् ? फल्गुनीषु

विशेषणसहितत्वान्न बहुवद्भावः ॥ विशिष्यतेऽनेकप्रकारान्तरेभ्योऽनेनेत्यनट्प्रत्यये विशेषणम्, न विशेषणमविशेषणं तस्मिन्, द्वौ, च, अस्मदः षष्ठी । चकारादेक इत्यस्यानुकर्षः । नन्वेकसङ्ख्याकप्रत्यात्मवचनत्वादस्मदः कथं द्वावर्थौ स्यातामिति चेन्न, आत्मत्वं हि यदा परत्रोपचर्यते तदा परस्याप्यस्मदर्थोपपत्तेरस्मदर्थस्य द्वित्वमुपपन्नम्, उपचर्यते हि 'अयं मे द्वितीय आत्माऽहमेवायमि'ति, त्वञ्चाहञ्चावामित्येकशेषो वा । आवां ब्रूव इति, द्वयोर्मध्ये एकस्य वक्तृत्वेऽपि द्वयोरप्यभेदोपचाराद्वक्तृत्वं भाव्यम् । नाट्ये वयं दक्षा इत्यादौ तु दक्षा इति पदं न विशेषणवाचकं येनैकार्थस्यास्मदो बहुवद्भावो न भवेत्किन्तु विधेयपरम्, उद्देश्यतावच्छेदकस्यैव विशेषणत्वात् । वस्तुमात्रस्यैकानेकस्वभावत्वादात्मा एकत्वेन यथानुभूयते तथा द्रष्टा श्रोता वक्तेत्येवं द्रष्टृत्वादिभिर्धर्मैर्नानात्वेनानुभूयते, तत्र यथैकत्वेन द्वित्वेन वा विवक्षिते एकवचनं द्विवचनं वा भवति तथा बहुत्वविवक्षायां बहुवचनमपि भवतीति बहुवचनं सिद्धमेव, तथापि सविशेषणे बहुवचननिषेधार्थो वचनारम्भः ॥ **फल्गुनी च प्रोष्ठपदा च तस्य, भे** सप्तमी । द्वौ बहुवद्वेत्यनुवर्तते । एकस्यां तारायां तु फल्गुनीप्रोष्ठपदशब्दयोर्न प्रयोगः, समुदाये एव तयो रूढत्वात् । फल्गुनी पूर्वा

जाते फाल्गुन्यौ कन्ये ॥ **गुरावेकश्च** ॥ १२४ ॥ गुरौ गौरवार्हे वर्त्तमानस्य द्वावेकश्चार्थो बहुवद्वा स्यात् । युवां गुरू, यूयं गुरवः । एष मे पिता, एते मे पितरः ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ द्वितीयस्याध्यायस्य कारकविषयो द्वितीयपादः समाप्तः ॥ २ । २ ॥ १२४ ॥

उत्तरा च, प्रोष्ठपदा पूर्वभाद्रपदा, उत्तरभाद्रपदा च ॥ गुरौ सप्तमी, एकः, च । पूर्ववदभिसम्बन्धः, गौरवार्हे वचनम् ॥

इति द्वितीयाध्यायस्य द्वितीयपादे कारकप्रकरणात्मकः अवचूरिपरिष्कारः समाप्तः ॥



॥ अथ द्वितीयाध्याये तृतीयः पादः ॥

नमस्पुरसो गतेः कखपफि रः सः ॥ १ ॥ गतिसंज्ञयोर्नमस्पुरसोः कखपफि रः सः स्यात् । नमस्कृत्य, पुरस्कृत्य । गतेरिति किम्? नमः कृत्वा, तिस्रः पुरः करोति ॥ **तिरसो वा ॥ २ ॥** गतेस्तिरसो रस्य कखपफि स् वा स्यात् । तिरस्कृत्य, तिरःकृत्य । गतेरित्येव? तिरः कृत्वा काष्ठं गतः ॥ **पुंसः ॥ ३ ॥** पुंसः

नमश्च पुरश्च तस्य, गतेः षष्ठी, कश्च खश्च पश्च फश्च तस्मिन्, रः षष्ठी, सः प्रथमा ॥ अनमो नमः करणं पूर्वं प्राक्काले क्त्वा, अनञः यप्, साक्षादादिरिति गतिसंज्ञायां गतिकन्येति समासः, सो रुः, अनेन सः, रः कखपफयोरित्यस्यापवादः । पुरस्कृत्य, 'पुरोऽस्तमव्ययमिति गतिसंज्ञा । गतिसंज्ञाभावे प्रत्युदाहरणम् नमः कृत्वा, गतिसंज्ञाया वैकल्पिकत्वात् । तिस्रः पुरः करोति, अत्र पुर इति नाव्ययस्य पुरसो रूपं किन्तु नगरीवाचिनः पुरशब्दस्य । नमस्पुरसः कखपफीति समानवचननिर्देशेऽपि यथासङ्ख्यमनुदेशः समानामिति न प्रवर्तते । सङ्ख्या वचनेन च समानतायास्तत्र विवक्षितत्वात् ॥ **तिरसः षष्ठी, वा ।** गतेः कखपफि रः स इति पदानि सम्बध्यन्ते । तिरस्करणं पूर्वं तिरस्कृत्य, कृगो नवेति गतिसंज्ञा, अनेन रस्य सत्वं वा, गतिसंज्ञारहितस्यापि तिरसो वा सत्वम् । पराभवेऽर्थे तिरस्कार इत्यादावपि सत्वदर्शनादिति पाणिनीयाः ॥ **पुंसः षष्ठी ।** कखपफि रः स इत्यनुवर्तते । पुमांश्चासौ कोकिलश्चात्र पुम्स् स्, कोकिल स् इति वाक्ये विभक्तिलोपे पदस्येति पुम्सः सकारलोपे पुम् कोकिल इति जाते, पुमोऽशिट्यघोष इति सूत्रेण मस्य रेफे पूर्वस्यानुस्वारानुना-

सम्बन्धिनो रस्य कखपफि स् स्यात् । पुंस्कोकिलः, पुंस्खातः, पुंस्पाकः, पुंस्फलम् ॥ **शिरोऽधसः पदे समासैक्ये** ॥ ४ ॥ अनयो रेफस्य पदशब्दे परे स् स्यात्, समासैक्ये । शिरस्पदम् । अधस्पदम् । समासेति किम् ? शिरः पदम् । ऐक्य इति किम् ? परमशिरः पदम् ॥ **अतः कृकमिकंसकुम्भकुशाकर्णीपात्रेऽनव्ययस्य** ॥ ५ ॥ आत्परस्याऽनव्ययस्य रस्य क्रादिस्थे कखपफि स् स्यात्, समासैक्ये । अयस्कृत्, यशस्कामः, पयस्कंसः, अयस्कु-

---

सिकयोश्च कृतयोर्व्युत्पत्तिपक्षेऽकारपयोः प्राप्तौ, अव्युत्पत्तिपक्षे च समासेऽसमस्तस्येति षत्वप्राप्तावनेन कखपफि रस्य सः पुँस्कोकिलः पुंस्कोकिलः, एवमग्रेऽपि । न च पुंसोऽशिष्यघोष इत्यत्रैव रत्वमपहाय सत्वं विधीयतां किमनेन सूत्रेणेति वाच्यम्, एतत्सूत्राभावे पुंश्चर इत्यादिरूपासिद्धिप्रसङ्गात्, सत्वविधानसामर्थ्यात् सो रुरित्यादेरप्रवृत्तेः ॥ शिरश्चाधश्च शिरोऽधस्तस्य, पदे, एकस्य भाव ऐक्यं समासस्यैक्यं समासैक्यं तस्मिन् । रः स इति वर्तते । शिरसि पदं शिरस्पदं सप्तमी शौण्डाद्यैरिति समासः । अधः पदमधस्पदम्, अव्ययं प्रवृद्धादिभिरिति समासः, सो रुरनेन सः । परमश्च तच्छिरश्च परमशिरः परमशिरसः पदं परमशिरःपदं अत्रानेन न सः, समासे सत्यप्येकसमासाभावात् शिरोऽधःपदे उत्तरपदे न स्याताम्, अत्र तु शिरः पदस्योत्तरपदत्वान्न सत्वमिति तात्पर्यं, अत्र कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्यय इति न्यायो न प्रवर्तते कादाचित्कत्वात्, अत एव प्रकृतसूत्रे कृत्रिमं विभक्त्यन्तं पदं व्युदस्याकृत्रिमं पदं पदशब्दस्वरूपमेव गृहीतम्, एवं समासे इत्युक्त्यैवैकवचनस्य विवक्षया समासैक्ये लब्धे ऐक्यग्रहणं उक्तार्थानामप्रयोग इति न्यायस्यानित्यतां सूचयति ॥ अतः पञ्चमी, का च कमिश्च कंसश्च कुम्भश्च कुशा च कर्णी च पात्रश्च तत्तस्मिन्, नाव्ययमनव्ययं तस्य । कखपफि रः सः समासैक्ये

म्भः, अयस्कुशा, अयस्कर्णी, अयस्पात्रम् । अत इति किम् ? वाःपात्रम् । अनव्ययस्येति किम् ? स्वःकारः । समासैक्य इत्येव ? उपपयःकारः ॥ **प्रत्यये** ॥ ६ ॥ अनव्ययस्य रस्य प्रत्ययविषये कखपफिस् स्यात् । पयस्पाशं पयस्कल्पं पयस्कम् । अनव्ययस्येत्येव ?

इत्यनुवर्तन्ते । अयः करोतीत्ययस्कृत् किप्, ङस्युक्तं कृतेति समासः, अनेन रस्य सः, यशः कामयते यशस्कामः, 'शीलिकामिभिक्षे'ति णः प्रत्ययः । पयसः कंसः पयस्कंसः, एवमग्रेऽपि । अत्र सूत्रे कृकम्योः प्रत्ययान्तयोर्ग्रहणात्कमिधातोः सप्रत्ययान्तेन निष्पन्नस्य कंसशब्दस्यापि कमिग्रहणेनैव प्राप्तेः कंसग्रहणं व्यर्थं सज्ज्ञापयति उणादयोऽव्युत्पन्नानि नामानीति, तथा चाव्युत्पन्न एवायं कंसशब्दो न तु कमिना व्युत्पन्नः । वाः पात्रं जलपात्रमित्यर्थः । स्वः करोतीति स्वःकारः, कर्मणोऽण् । पयसः समीपमुपपयः करोतीत्युपपयःकारः, अत्राकारात्परोऽनव्ययसम्बन्धिरकारो नास्ति उपपय इत्यव्ययीभावसमासत्वेनाव्ययत्वात्, अतः परमयशःकाम इति प्रत्युदाहरणं बोध्यम्, अत एव बृहद्वृत्तावुपपयःकारः परमयशःकाम इति प्रत्युदाहरणद्वयं प्रदर्शितम् । नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति न्यायेनायस्कुम्भी अयस्पात्रीत्यपि रूपे स्तः । अयः कुश इति रस्य सो न भवति, कुशेति लिङ्गविशिष्टस्यैव सूत्रे उपादानात् । अस्याः परिभाषाया अर्थस्तु स्वान्तत्वं स्वविशिष्टादित्वमुभयसम्बन्धेन स्त्रीप्रत्ययविशिष्टे स्वविशिष्टवर्तिनो नाममात्रवृत्तिविषयताप्रयोजकपदप्रतिपाद्यतावच्छेदकधर्मस्यानयाऽतिदेशः, उभयत्र वैशिष्ट्यं स्वाव्यवहितपूर्वत्वस्वनिष्ठविधेयतानिरूपितोद्देश्यताश्रयघटकत्वोभयसम्बन्धेन ॥ प्रत्यये । अनव्ययस्य कखपफि रः स इत्यनुवर्तते । निन्द्यं पयः पयस्पाशम्, निन्द्ये पाशप्, सो रुरनेन रस्य सः । ईषदपरिसमाप्तं पयः पयस्कल्पं अतमबादेरीषदसमाप्तेरिति कल्पप् प्रत्ययः । कुत्सितमल्पमज्ञातं वा पयः पयस्कम्,

स्वःपाशम् ॥ **रोः काम्ये ॥ ७ ॥** अनव्ययस्य रस्य रोरेव काम्ये प्रत्यये स् स्यात् । पयस्काम्यति । रोरिति किम् ? अहःकाम्यति ॥ **नामिनस्तयोः षः ॥ ८ ॥** तयोः, प्रत्ययस्थे कखपफि, रोरेव काम्ये नामिनः परस्य रस्य ष् स्यात् । सर्पिष्पाशम्, धनुष्कल्पम्, धानुष्कः, सर्पिष्काम्यति । नामिन इति किम् ? अयस्कल्पम् । रोः काम्य इत्येव ? गीरकाम्यति ॥ **निर्दुर्बहिराविष्प्रादुश्चतुराम् ॥ ९ ॥** निरादीनां रस्य कखपफि ष् स्यात् । निष्कृतं दुष्कृतं बहिष्पीतमाविष्कृतं प्रादुष्कृतं चतुष्पात्रम् ॥ **सुचो वा ॥ १० ॥**

निन्द्यं स्वः स्वःपाशम्, अत्राव्ययीभावातिरिक्ताव्ययस्यैव वर्जनं तेनोपपयस्काम्यतीत्यादौ सत्वसिद्धिः । अत्र प्रत्ययपदेन पाशकल्पककाम्याः ग्राह्याः, अन्यस्य च प्रत्ययस्याभावात् ॥ **रोः षष्ठी, काम्ये ।** अनव्ययस्य रः सः प्रत्यये इत्यनुवर्तन्ते । पूर्वसूत्रेणैव सिद्धे उक्तनियमार्थमिदं सूत्रम् । यदि रेफस्य रोः सत्वं स्यात्तर्हि काम्यप्रत्यये परे एवेति, विपरीतनियमस्तु न भवति वर्चस्केति निर्देशात्, तत्र हि कप्रत्यये परेऽपि रोः सत्वं कृतम्, प्रत्यये रोः काम्ये चेत्येकयोगाकरणाद्वा । पय इच्छति, अहरिच्छति ॥ **नामिनः पञ्चमी, तयोः सप्तमी,** षः प्रथमा । पूर्वसूत्रद्वयनिर्दिष्टप्रत्ययास्तत्पदेन परामृश्यन्ते । अनव्ययस्येति वर्तते । निन्द्यं सर्पिः सर्पिष्पाशम्, ईषदपरिसमाप्तं धनुर्धनुष्कल्पम्, धनुः प्रहरणमस्य धानुष्कः, प्रहरणमितीकण्, ऋवर्णोवर्णेतीकारलोपः । प्रत्यये इति सूत्रे पाशकल्पका इत्युपलक्षणं तेन इकणोऽपि ग्रहणम् । इकारे लुप्ते वाऽयमपि क एवेति पूर्वसूत्रविषयत्वात्पत्वम् । काम्ये रोरेवेति नियमाद्गीरकाम्यतीत्यत्र न रेफस्य षः ॥ **निश्च दुश्च बहिश्चाविश्च** प्रादुश्च चतुर्णं तेषाम् । कखपफि रः स इत्यनुसम्बध्यते । बहुवचननिर्देशो निस्दुसोर्निर्दुरोश्च परिग्रहार्थम् । निष्क्रियते स्म निष्कृतमेवमग्रे । चतुर्णां पात्राणां समाहारश्चतुष्पात्रम् ॥ **सुचः षष्ठी, वा ॥** पूर्ववदनुवृत्तिः । नाम्नो विशेषणं सुच् इति, तदन्तविधिश्च ।

सुजन्तस्थस्य रस्य कखपफि ष् वा स्यात् । द्विष्करोति द्वि×करोति, द्विःकरोति । चतुष्फलति, चतु×फलति, चतुःफलति । कखपफीति किम् ? द्विश्चरति ॥ **वेसुसोऽपेक्षायाम्** ॥ ११ ॥ इसुस्प्रत्य-

---

न तु रेफस्य विशेषणम्, तेन चतुष्पचतीत्यत्राऽप्यनेन विकल्पः, न ह्यत्र सुचः स्थाने रेफः 'रात्स' इति सुचो लोपात् । तल्लोपेऽपि स्थानिवद्भावेन सुजन्त एवाऽयं चतुःशब्दः । द्वौ वारौ करोति द्विष्करोति, 'द्वित्रिचतुरः सुच्' । चत्वारो वाराः फलति, चतुष्फलति, पक्षे जिह्वामूलीयोपध्मानीयविसर्गाः भवन्ति ॥ **वा, इश्च उश्च तस्य, अपेक्षायाम्** ॥ रः कखपफि ष इत्यनुवर्तते । इस् प्रत्ययः उणादिकस्तत्साहचर्यात् उसोऽप्यौणादिकस्य ग्रहणम्, न तु त्यादेरुसः । इसुसौ 'प्रत्ययाऽप्रत्ययोरि'ति, 'लक्षणप्रतिपदोक्तयोरि'ति 'अर्थवद्ग्रहणे नाऽनर्थकस्ये'ति वा न्यायेन, प्रत्ययौ ग्राह्यौ । तेन मुनिः करोतीत्यादौ न षत्वम् । इसुसौ प्रकृतेर्विशेषणं तेन तदन्तविधिः, इसुस्प्रत्ययान्तप्रकृत्यवयवरेफस्येत्यर्थः । परमसर्पि×कुण्डम्, अत्र नाऽपेक्षा, समासे समर्थपदानामेकप्रयत्नोच्चार्यत्वेनाऽपेक्षानिवृत्तेः, भिन्नयोरेव हि अपेक्षा, करोतीत्युक्ते किं करोति? सर्पिः करोतीत्यादि, परमसर्पि×कुण्डमित्यत्र त्वेकार्थीभावः, अतो नाऽपेक्षा । सामर्थ्यं हि द्विविधं, एकार्थीभावः व्यपेक्षा च । तत्र व्यपेक्षा पृथक्पदानामाकाङ्क्षादिसहकारेण विशिष्टार्थप्रतिपत्तिः, एवञ्च यत्किञ्चित्पदविशिष्टत्वं व्यपेक्षात्वं, वैशिष्ट्यञ्च स्वघटितत्वम्, स्वप्रयोज्यविषयतानिरूपितविषयताप्रयोजकपदघटितत्वम्, *स्वप्रयोज्यविषयतानिरूपितत्वाभाववद्विषयताप्रयोजक*-पदाघटित्वम्, स्वनिष्ठशक्तिग्रहप्रयोज्यशक्तिग्रहविषयीभूतशक्तिपर्याप्त्यनधिकरणत्वम्, एतच्चतुष्टयसम्बन्धेन । यथा राज्ञः पुरुष इति वाक्यं राजपदघटितमस्ति, तथा राजपदप्रयोज्यविषयता राजनि,

यान्तस्य रस्य कखपफि ष् वा स्यात्, स्थानिनिमित्तयोरपेक्षा चेत् । सर्पिष्करोति, सर्पि×करोति । धनुष्खादति, धनु×खादति । अपेक्षायामिति किम्? परमसर्पि×कुण्डम् ॥ **नैकार्थेऽक्रिये** ॥ १२ ॥ न विद्यते क्रियाप्रवृत्तिनिमित्तं यस्य तस्मिन्नेकार्थे तुल्याधिकरणे पदे

तन्निरूपितविषयता पुरुषे, तत्प्रयोजकपदं **पुरुषपदं** तद्घटितमस्ति, तथा राजपदप्रयोज्यविषयता राजनि, तन्निरूपितत्वाभाववद्विषयता उदासीनघटादौ, तत्प्रयोजकं पदं घटादि तद्घटितमप्यस्ति, तथा राजपदनिष्ठशक्तेर्यो ग्रहस्तत्प्रयोज्यशक्तौ राजपुरुष इति समस्तपद-सम्बन्धिनी तद्ग्रहविषयशक्तिः सैव तत्पर्याप्त्यधिकरणं राजपुरुष इति समस्तपदं तत्पर्याप्त्यनधिकरणञ्च राजपुरुष इति वाक्यमिति लक्षण-समन्वयः । तिष्ठतु सर्पिः, पिब त्वमुदकमिति व्यपेक्षाविरहिवाक्ये सर्पिपदप्रयोज्यविषयतानिरूपितत्वाभाववद्विषयताप्रयोजकपदं पिबा-दिकम्, तद्घटितत्वमेवास्तीति न तत्र व्यपेक्षा । परमसर्पिःकुण्ड-मिति समासे तु सर्पिःपदनिष्ठशक्तिग्रहप्रयोज्यसमासशक्तिग्रहविषयी-भूतशक्तिपर्याप्त्यधिकरणत्वमेवास्तीति न तत्र व्यपेक्षा । इयञ्च वाक्य एव सम्भवति सैव चात्र सूत्रेऽपेक्षापदेन विवक्षिता । एकार्थी-भावश्च समुदायशक्त्या परस्परं निरूप्यनिरूपकभावाऽऽपन्नविषयता-प्रयोजकत्वे सत्येकार्थोपस्थितिजनकत्वम् । ईदृशमेकार्थीभावमाश्रित्य प्रत्युदाहरणम् ॥ **न, एकोऽर्थो यस्य स एकार्थस्तस्मिन्, न विद्यते क्रिया यस्य तस्मिन्** ॥ कखपफि इसुसो रः ष इति वर्तन्ते । वेसु-सोऽपेक्षायामित्यस्याऽयं प्रतिषेधो नाऽन्यस्य । सर्पिस् कालमेव काल-कम्, 'कालात्' कः प्रत्ययः, यजुस् पीतेन रक्तम्, पीतकम्, 'नीलपीतादकमि'ति कः प्रत्ययः । कालकं पीतकमिति गुणवचनम्, अक्रियावाचि । सर्पिः कालकपदयोर्भिन्नार्थत्वे सति समानविभक्ति-त्वात् तुल्याधिकरणमेकार्थम्, अतः षत्वप्रतिषेधः । पाणिनीये तु

यत्कखपफं तस्मिन्परे इसुस्प्रत्ययान्तस्य रस्य ष् न स्यात् । सर्पि४कालकम्, यजु४पीतकम् । एकार्थ इति किम् ? सर्पिष्कुम्भे, सर्पि४कुम्भे । अक्रिय इति किम् ? सर्प्पिष्क्रियते, सर्पि४क्रियते ॥ **समासेऽसमस्तस्य** ॥ १३ ॥ पूर्वेणाऽसमस्तस्येसुस्प्रत्ययान्तस्य रस्य कखपफि ष् स्यात्, निमित्तनिमित्तिनौ चेदेकत्र समासे स्तः । सर्पिष्कुम्भः, धनुष्फलम् । समास इति किम् ? तिष्ठतु सर्पिः पिब त्वमुदकम् । असमस्तस्येति किम् ? परमसर्पिःकुण्डम् ॥ **भ्रातुष्पुत्रकस्कादयः** ॥ १४ ॥ भ्रातुष्पुत्रादयः कस्कादयश्च कखपफि रस्य यथासङ्ख्यं कृतषत्वसत्वाः साधवः स्युः । भ्रातुष्पुत्रः, परमयजुष्पात्रम्, कस्कः, कौत-

---

सर्पिः कालकमित्यादौ न षत्वम्, 'अधात्वभिहितं समानाधिकरणमसमर्थवत्' धातुप्रकृतिकप्रत्ययप्रयोज्यत्वाभाववति या विशेष्यता तन्निरूपिता या सम्बन्धानवच्छिन्ना प्रकारता, तत्प्रयोजकं तन्निरूपितविशेष्यताप्रयोजकं वा व्यपेक्षारूपसामर्थ्याभाववदित्युक्तेः । धातुप्रकृतिकप्रत्ययप्रयोज्यत्वाभावत्त्वस्य विशेष्यतायां विशेषणात् सर्पिष्पीयत इत्यादौ नासामर्थ्यम्, तेपदप्रयोज्यविशेष्यतानिरूपिताभेदसम्बन्धावच्छिन्नप्रकारताप्रयोजकत्वस्य सर्पिः पदे सत्त्वेऽपि तेपदार्थकर्मनिष्ठविशेष्यतायां धातुप्रकृतिकतिङ्प्रत्ययप्रयोज्यत्वाभावस्याभावादिति वदन्ति॥ **समासे, समस्यते स्मेति समस्तं, न** समस्तमसमस्तं तस्य ॥ अनुवृत्तिः पूर्ववत् । सर्पिषः कुम्भः, धनुषः फलम् । परमसर्पिः कुण्डमित्यत्र इसन्तस्य शब्दस्य परमशब्देन समस्तत्वान्नानेन षः, नवा पूर्वेण, समासे सति अपेक्षाया असत्त्वात् ॥ **भ्रातुष्पुत्रश्च कस्कश्च, तौ आदिर्येषान्ते** ॥ भ्रातुष्पुत्र इति षष्ठीसमासे 'ऋतां विद्यायोनिसम्बन्धे' इति षष्ठ्या अलुप् । परमं च तद् यजुश्च, परमयजुषः पात्रम् । कस्मादिति कुतः, वीप्सायां कुतस् द्विर्वचनं, कुतः कुत आगत इति कौतस्कुतः । 'तत आगते' इत्यण्, वृद्धिश्च ॥

स्कुतः ॥ **नाम्यन्तस्थाकवर्गात्पदान्तः कृतस्य सः शिड्नान्तरेऽपि** ॥ १५ ॥ एभ्यः परस्य पदस्यान्तर्मध्ये कृतस्य कृतस्थस्य वा सस्य ष् स्यात्, शिटा नकारेण चान्तरेऽपि । आशिषा, नदीषु, वायुषु, वधूषु, पितृषु, एषा, गोषु, नौषु, सिषेच, गीर्षु, हल्षु । शक्ष्यति, क्रुङ्षु । शिड्नान्तरेऽपि, सर्ष्पिःषु, यजूंषि । पदान्त इति किम्? दधिसेक् । कृतस्येति किम्? बिसम् ॥ **समासेऽग्नेः स्तुतः**

नामी च अन्तस्था च कवर्गश्च तस्मात्, पदान्तः, कृतस्य, सः षष्ठी, शिट् च नश्च शिड्नौ, ताभ्यामन्तरं तस्मिन्, अपि ॥ ष इति वर्तते । कृतस्य कृतस्थस्य वेति सूत्रस्थकृतशब्दस्यैवाऽर्थः, केनचित्सूत्रेण कृतस्य, कृतसम्बन्धिनो वेति तदर्थः । आङ् उपसर्गात् शास्धातोः किपि, 'इसासः शासोऽङ्व्यञ्जने'ति शस्, टायाम् अनेन षः, कृतसम्बन्धिन उदाहरणमिदम् । सिषेचपर्यन्तं नामिनः परस्योदाहरणम् । नदीषु इत्यादिकं कृतसम्बन्धिन एषेति कृतस्य । गीर्षु हल्षु इत्यन्तस्थायाः परस्य । शक्ष्यति, क्रुङ्षु, इति कवर्गात् परस्य । सर्ष्पिःषु, अत्र सस्य रत्वे विसर्गे च तस्य शिट्त्वात् तद्व्यवधानेऽपि षत्वम् । यजूंषीत्यत्र च 'शिड्हेऽनुस्वार' इति नित्यत्वादन्तरङ्गत्वाच्च कृते षत्वम् । यद्यपि नकारस्याऽवश्यमनुस्वारस्य भावात् अनुस्वारस्य च शिट्त्वेन शिड्ग्रहणेनैव सिद्धे मस्थानिकाऽनुस्वारव्यावर्त्तनाय नकारोपादानम्, तेन पुंसीत्यादौ न षत्वम् । दधिसेक्, अत्र वृत्तेरन्ते वर्त्तमानस्य षभिन्नकार्यविधान एव 'वृत्तयन्तोऽसषे' इति पदत्वनिषेधात् सेक्, इत्यस्य पदत्वेन सकारो न पदमध्यगतः, किन्तु पदादिस्थ एव । बिसमिति 'उणादयोऽव्युत्पन्नानि नामानी'ति वचनादव्युत्पन्नो ग्राह्यस्तेन सकारो न केनचित्कृतः । अधिकारश्चायमाऽऽषत्वविधेः ॥ समासे, अग्नेः पञ्चमी, स्तुतः षष्ठी ॥ सः ष इत्यनुवर्तते, एवमग्रिमसूत्रेष्वपि । अग्निं स्तौतीति,

॥ १६ ॥ अग्नेः परस्य स्तुतः सस्य समासे ष् स्यात् । अग्निष्टुत् ॥ **ज्योतिरायुर्भ्याञ्च स्तोमस्य** ॥ १७ ॥ आभ्यामग्नेश्च परस्य स्तोमस्य सस्य समासे ष् स्यात् । ज्योतिष्टोमः, आयुष्टोमः, अग्निष्टोमः । समास इत्येव ? ज्योतिः स्तोमं याति ॥ **मातृपितुः स्वसुः** ॥ १८ ॥ आभ्यां परस्य स्वसुः सस्य समासे ष् स्यात् । मातृष्वसा, पितृष्वसा ॥ **अलुपि वा** ॥ १९ ॥ मातृपितुः परस्य स्वसुः सस्यालुपि समासे वा ष् स्यात् । मातुःष्वसा, मातुःस्वसा । पितुःष्वसा, पितुःस्वसा ॥ **निनद्याः स्नातेः कौशले** ॥ २० ॥ आभ्यां परस्य स्नातेः सस्य समासे ष् स्यात्, कौशले गम्यमाने । निष्णो निष्णातो वा पाके, नदीष्णो नदीष्णातो वा प्रतरणे । कौशल इति किम् ? निस्नातः, नदीस्नः । यः श्रोतसा ह्रियते ॥ **प्रतेः स्नातस्य सूत्रे** ॥ २१ ॥ प्रतेः परस्य स्नातस्य सः समासे

अग्निष्टुत्, अत्र 'षः सोष्टयै०' इति सूत्रेण सकारः कृतः । षत्वे कर्त्तव्ये उत्तरस्य पदत्वात् पूर्वसूत्रेणाऽप्राप्तौ सत्यां वचनम् ॥ **ज्योतिश्च आयुश्च ताभ्याम्**, च, स्तोमस्य ॥ समासे इति च वर्त्तते । एवमग्रेऽपि । चशब्देनाग्निशब्दस्य समुच्चयः । ज्योतिषां स्तोमः ज्योतिष्टोमः, एवमग्रे ॥ ज्योतिः स्तोमं याति, प्रदीपः समूहं प्रापयतीत्यर्थः । अकृतत्वात् पदादित्वाच्चाप्राप्ते विधीयते ॥ **माता च पिता च तस्मात्**, स्वसुः षष्ठी ॥ मातुः स्वसा मातृष्वसा । 'स्वसृपत्योर्वे'त्यनेन षष्ठ्या वा लुप् ॥ **न विद्यते लुप् यत्र तस्मिन्** अलुपि, वा ॥ पूर्वसूत्रं वर्तते । पूर्वेण नित्ये प्राप्ते विकल्पः ॥ **निश्च नदी च निनदी** तस्याः, स्नातेः षष्ठी, कुशले भवं **कौशलम् भवेऽण्**, यद्वा कुशलस्य भावः कर्म वा युवादेरण्, कौशले । निष्णातीति निष्णः, निष्णाति स्मेति निष्णातः, एवं नद्यां स्नाति स्म नदीष्णातः ॥ **प्रतेः पञ्चमी, स्नातस्य, सूत्रे** ॥ प्रतिष्णातं सूत्रम्, विशेषानुपादानात् सूत्रपदेन ऊर्ण्णादेः

ष् स्यात्, सूत्रे वाच्ये । प्रतिष्णातं सूत्रम् । प्रत्ययान्तोपादानं किम् ? प्रतिस्नातृ सूत्रम् ॥ **स्नानस्य नाम्नि** ॥ २२ ॥ प्रतेः परस्य स्नानस्य सः समासे ष् स्यात्, सूत्रविषये नाम्नि । प्रतिष्णानं सूत्रमित्यर्थः ॥ **वेः स्त्रः** ॥ २३ ॥ वेः परस्य स्तृसस्य समासे ष् स्यात्, नाम्नि । विष्टरो वृक्षः, विष्टरं पीठम् ॥ **अभिनिःष्टानः** ॥ २४ ॥ अभिनिर्भ्यां स्तानः समासे कृतषत्वो निपात्यते, नाम्नि । अभिनिःष्टानो वर्णः ॥ **गवियुधेः स्थिरस्य** ॥ २५ ॥ आभ्यां परस्य स्थिरस्य सः समासे ष् स्यात्, नाम्नि । गविष्ठिरः, युधिष्ठिरः ॥ **एत्यकः** ॥ २६ ॥ कवर्जान्नाम्यादेः परस्य स एति परे समासे ष् स्यात्, नाम्नि । हरिषेणः, श्रीषेणः । अक इति किम् ? विष्वक्सेनः ॥ **भादितो वा** ॥ २७ ॥ नक्षत्रवाचिन इदन्तात्परस्य स एति परे

व्याकरणादेश्च सूत्रं गृह्यते, ऊर्णादिसूत्रं क्षालनेन शुद्धम्, व्याकरणादिसूत्रन्तु अतिव्याप्त्यादिदोषाभावेन शुद्धमित्यर्थः । अन्यप्रत्ययनिवृत्त्यर्थं प्रत्ययान्तोपादानम्, तेन प्रतिस्नातृ सूत्रमित्यादौ न षः ॥ **स्नानस्य, नाम्नि** ॥ प्रतेः सूत्रे इत्यपि वर्तते । प्रतिस्नातीति प्रतिष्णानं 'नद्यादिभ्योऽनः' ॥ **वेः पञ्चमी, स्त्रः षष्ठी** ॥ नाम्नीति वर्तते । विस्तीर्यते इति विष्टरः । 'युवर्णवृदृवशरणे'ति अल्प्रत्ययः । विस्तृणाति उपविष्टुः सुखमिति विष्टरम् ॥ **अभिनिःष्टानः** ॥ नाम्नीति वर्तते । अभिनिष्टानो वर्णः, एषा विसर्गस्य संज्ञा, वर्णमात्रस्येत्यन्ये ॥ **गविश्च युधिश्च तस्मात्, स्थिरस्य** ॥ नाम्नीति वर्तते । गविष्ठिरः, सूत्रनिर्देशादलुप् समासः । 'अद्व्यञ्जना'दित्यलुप् समासः ॥ **एति सप्तमी, न कू अक् तस्मात्** ॥ नाम्नीति वर्तते । हरिः हरयो वा सेनायां यस्य स हरिषेणः, विष्वग्व्यापिनी सेना यस्य स विष्वक्सेनः ॥ **भात् पञ्चमी, इतः पञ्चमी, वा** ॥ नाम्नीति वर्तते । रोहिणी सेनायां यस्य स रोहिणिषेणः 'ङ्याप् बहुलं

समासे ष् वा स्यात्, नाम्नि । रोहिणिषेणः, रोहिणिसेनः । इत इति किम् ? पुनर्वसुषेणः ॥ **विकुशमिपरेः स्थलस्य** ॥ २८ ॥ एभ्यः परस्य स्थलस्य सः समासे ष् स्यात् । विष्ठलं कुष्ठलं शमिष्ठलं परिष्ठलम् ॥ **कपेर्गोत्रे** ॥२९॥ कपेः परस्य स्थलस्य सः समासे ष् स्यात्, गोत्रे वाच्ये । कपिष्ठल ऋषिः ॥ **गोऽम्बाऽऽम्बसव्यापद्विित्रिभूम्यग्निशेकुशङ्कुकङ्कुमञ्जिपुञ्जिबर्हिःपरमेदिवेः स्थस्य** ॥ ३० ॥ एभ्यः परस्य स्थस्य सः समासे ष् स्यात् । गोष्ठम्, अम्बष्ठः, आम्बष्ठः, सव्यष्ठः, अपष्ठः, द्विष्ठः, त्रिष्ठः, भूमिष्ठः, अग्निष्ठः, शेकुष्ठः, शङ्कुष्ठः, कुष्ठः, अङ्कुष्ठः, मञ्जिष्ठः, पुञ्जिष्ठः, बर्हिष्ठः, परमेष्ठः,

---

नाम्नी'ति ह्रस्वः । पुनर्वसुषेणेति पूर्वसूत्रेण षत्वम् ॥ विश्च कुश्च शमिश्च परिश्च तस्मात्, स्थलस्य ॥ नाम्नीति निवृत्तं विष्ठलादिशब्दात् संज्ञाया अप्रतीतेः, उत्तरत्र गोत्रग्रहणाद्वा । वीनां पक्षिणां स्थलमिति विष्ठलम् । कौ पृथिव्यां स्थलम्, कुत्सितं वा स्थलं कुष्ठलम् । शमीनां स्थलम् 'ङ्यापो बहुलमि'ति ह्रस्वः । सूत्रे ह्रस्वस्य शमिशब्दस्योच्चारणात् दीर्घान्न भवति शमीस्थलम्, बाहुलकत्वान्न ह्रस्वः ॥ **कपेः पञ्चमी, गोत्रे** ॥ कपिभिराऽऽवृतं स्थलमस्येति सः कपिष्ठलः । तन्नाम्ना गोत्रप्रवर्त्तयिता कश्चित्, गोत्रमिह लौकिकं गृह्यते, न तु स्वापत्यसन्तानस्येत्यादिलक्षणं शास्त्रीयम् । लोके चाऽऽद्यपुरुषा येऽपत्यसन्ततेः प्रवर्त्तयितारो यन्नाम्नोऽपत्यसन्ततिर्व्यपदिश्यते, तेऽभिधीयन्ते ॥ **गोश्च अम्बश्च आम्बश्च सव्यश्च अपश्च द्विश्च त्रिश्च भूमिश्च अग्निश्च शेकुश्च शङ्कुश्च कुश्च अङ्कुश्च मञ्जिश्च पुञ्जिश्च बर्हिश्च परमे च दिविश्च तस्मात्, स्थस्य** ॥ स्थ इति कप्रत्ययान्तस्यानुकरणं तेन भूमिस्थितं गोस्थानमित्यादौ न षत्वम् । गावस्तिष्ठन्त्यस्मिन्निति गोष्ठम्, 'स्थादिभ्यः कः' इति कप्रत्ययः । अम्बायां तिष्ठति अम्बष्ठः । अम्बायां भवः आम्बः, आम्बे तिष्ठतीति

दिविष्ठः ॥ **निर्दुस्सोः सेधसन्धिसाम्नाम् ॥ ३१ ॥** एभ्यः परेषां सेधादीनां सः समासे ष् स्यात् । निःषेधः, दुःषेधः, सुषेधः । निःषन्धिः, दुःषन्धिः, सुषन्धिः । निःषाम, दुःषाम, सुषाम ॥ **प्रष्ठोऽग्रगे ॥ ३२ ॥** प्रात्स्थस्य सः ष् स्यात्, अग्रगामिन्यर्थे । प्रष्ठोऽग्रगः ॥ **भीरुष्ठानादयः ॥ ३३ ॥** एते समासे कृतषत्वाः साधवः स्युः । भीरुष्ठानम्, अङ्गुलिषङ्गः ॥ **ह्रस्वान्नाम्नस्ति ॥ ३४ ॥** नाम्नो विहिते तादौ प्रत्यये ह्रस्वान्नामिनः परस्य सः ष् स्यात् । सर्पिष्टा, वपुष्टमम् । नामिन इत्येव ? तेजस्ता ॥ **निसस्तपेऽनासेवायाम् ॥ ३५ ॥** निसः सस्तादौ तपतौ परे ष् स्यात्, पुनः पुनः करणाभावे । निष्टपति स्वर्णं सकृदग्निं स्पर्शयतीत्यर्थः । तीत्येव ? निरत-

---

आम्बष्ठः । श्लिष्टनिर्देशादुभाभ्यामपि भवति । सप्त्ये तिष्ठति, अपतिष्ठति, द्वयोस्तिष्ठति, त्रिषु तिष्ठति, एवमग्रे, सर्वत्र 'स्थापास्नात्रः क' इति कप्रत्ययः ॥ निश्च दुश्च सुश्च तस्मात्, सेधश्च सन्धिश्च साम च तेषाम् ॥ वचनभेदाद् यथासङ्ख्याभावः । निश्चितः सेधः निषेधः, दुष्टः सेधः, शोभनः सेधः । सन्धानं सन्धिः, निश्चिता सन्धिः निःषन्धिः, दुष्टा सन्धिः, शोभना सन्धिः । एवं निश्चितं साम इत्यादि ॥ प्रष्ठः प्रथमा, अग्रे गच्छतीति अग्रगस्तस्मिन् ॥ प्रतिष्ठति इति प्रष्ठः, 'उपसर्गादातो ङ' ॥ भीरुष्ठानं आदिर्येषान्ते भीरुष्ठानादयः ॥ भीरूणां स्थानं भीरुष्ठानं, अङ्गुलीनां सङ्गोऽङ्गुलिषङ्गः ॥ ह्रस्वात्, नाम्नः पञ्चमी, ति सप्तमी ॥ तिपदेन तलूत्वतस्त्यतयतरप्तमपां ग्रहणम् । सर्पिषो भावः सर्पिष्टा, बहूनां मध्ये प्रकृष्टं वपुः वपुष्टमम् । तेजसो भावः तेजस्ता ॥ निसः षष्ठी, तपे सप्तमी, न आसेवा अनासेवा, तस्याम् ॥ तीति वर्तते । पुनः पुनः करणमासेवा ॥ तप इति शवा निर्देशस्तेन यङ्लुबि षत्वं न भवति, शवा निर्दिष्टत्वात् निरतपत्, अत्र तकारादितपतिपरत्वं नास्ति, अटा

पत् ॥ **घस्वसः** ॥ ३६ ॥ नाम्यादेः परस्य घस्वसोः सः ष् स्यात् । जक्षुः, उषितः ॥ **णिस्तोरेवाऽस्वदस्विदसहः षणि** ॥ ३७ ॥ स्वदादिवर्जानां ण्यन्तानां स्तोरेव च सो नाम्यादेः परस्य षत्वभूते सनि ष् स्यात् । सिषेवयिषति, तुष्टूषति । स्वदादिवर्जनं किम् ? सिस्वादयिषति, सिस्वेदयिषति, सिसाहयिषति । एवेति किम् ? सुसूषति । षणीति

व्यवहितत्वात्, पूर्वं कृतमपि षत्वं परस्मिन्नडागमे कर्त्तव्ये णषमसदित्यनेनासिद्धं भवति ॥ **घस् च वश्च तस्य** ॥ निमित्तविशेषस्यानुक्तत्वात् षत्वस्य सामान्यं निमित्तमनुवृत्तिलब्धं नाम्यादि विवक्षितम् । घस्लृं अदने, वसिक् आच्छादने, अदादिः, अत्र 'अदाद्यनदाद्योः अनदादेरेव ग्रहणमि'ति न्यायेन भ्वादेरेव वसोर्ग्रहणम् । घस् 'परोक्षा' उस्, 'द्विर्धातुरि'ति द्वित्वम्, 'व्यञ्जनस्या' 'गहोर्जः' गस्य जः, 'गमहने' त्यलोपः, 'अघोषे' घस्य कः, अनेन षः, जक्षुः । पाणिनीये घस्धातोः भ्वादेः परोक्षायां रूपं न भवति । अत्र तु घसिः भ्वादेर्ग्राह्यो न त्वदादेः, तस्याऽऽदेशरूपत्वेन 'नाम्यन्तस्थे'त्यनेनैव षत्वसिद्धेः ॥ **णिश्च स्तुश्च तस्य**, एव, स्वदश्च स्विदश्च सह् च, न स्वदस्विदसह् तस्य, षणि सप्तमी । सीव्यन्तं प्रयुङ्क्ते सेवयति, सेवयितुमिच्छति सिषेवयिषति, सनि इटि द्वित्वे पूर्वस्य ह्रस्वे सनः 'नाम्यन्तस्थे'ति षत्वे, सिसेवयिषति, अनेन धातोः सस्य षः । स्तोतुमिच्छति तुष्टूषति, स्तुधातोः षनि द्वित्वे 'अघोषे शिटः' आद्यसलोपे, 'स्वरहने'ति दीर्घे सनः 'नाम्यन्तस्थे'ति षत्वे, अनेनाद्यसकारस्य च षः, ष्टुत्वम् । अत्र स्तौतिसाहचर्यात् स्वदादिपर्युदासेन सदृशग्रहणाच्च ण्यन्तानामपि धातुपाठेषकारादीनां धातूनां ग्रहणम् । तथा च 'नाम्यन्तस्थे'ति कृतसकारस्य षत्वे प्राप्ते नियमार्थमिदं सूत्रम् । नियमश्च निस्तोरेव षणि षत्वं नान्यस्येति विवक्षितो यद्यप्येवकाराभावेऽपि लभ्यते, तथापि णिस्तोः षण्येव

किम् ? सिषेव । षत्वं किम् ? सुषुप्सति ॥ **सञ्जेर्वा** ॥ ३८ ॥ ण्यन्तस्य सञ्जेर्नाम्यादेः परस्य सः षणि ष् वा स्यात् । सिषञ्जयिषति, सिसञ्जयिषति ॥ **उपसर्गात्सुग्सुवसोस्तुस्तुभोऽव्यप्यद्वित्वे** ॥ ३९ ॥ द्व्युक्ताभावे सुनोत्यादेः स उपसर्गस्थान्नाम्यादेः परस्य ष् स्यात्, अड्व्यवधानेऽपि । सुग्, अभिषुणोति, निःषुणोति, पर्यषुणोत् । सुव, अभिषुवति, पर्यषुवत् । सो, अभिष्यति, पर्यष्यत् । स्तु, अभि-

---

षत्वमित्यनिष्टनियमनिवारणाय तद्ग्रहणम् । सुसूषतीति, षुंगूट् अभिषवे सोतुमिच्छति, सुसूषति 'स्वरहने'ति दीर्घः, षणि यदि षत्वं तर्हि णिस्तोरेवेति नियमादत्र 'नाम्यन्तस्थे' त्यनेनापि न षत्वम् । एवकाराभावे एवंविधनियमाभावा'न्नाम्यन्तस्थे'ति षत्वं प्रसज्येत ॥ **सञ्जेः** षष्ठी, वा । णेरनुवृत्तिः । सञ्जेरितीकारान्तनिर्देशात् ण्यन्तस्य षञ्जेर्ग्रहणम् । षञ्जं सङ्गे, षञ्जन्तं प्रयुङ्क्ते, सञ्जयितुमिच्छति, 'तुमर्हा' सन्, द्वित्वम्, इट्, 'नाम्यन्तस्थे'ति सनः षत्वम्, अनेन च धातोः सस्य वा षः ॥ **उपसर्गात्**, सुक् च सुवश्च सोश्च स्तुश्च, स्तुभ् च तस्य, अटि सप्तमी, अप्यव्ययम्, न द्वित्वमद्वित्वं तस्मिन् ॥ 'शिड्नान्तरेऽपी' त्यधिकारात् निःषुणोतीत्यत्र विसर्गव्यवधानेऽपि षः । अभिषुवति षूत् प्रेरणे, 'तुदादेः शः' । अभिष्यति, षोंच् अन्तकर्मणि । ष्टुंगूक् स्तुतौ, अभिष्टौति । स्तम्भूस्तुम्भू सौत्रौ धातू, अभिष्टोभते । सुगिति गकारेण निर्देशात् षुंक प्रसवे, सुं प्रसवैश्वर्ययोरित्यनयोर्न ग्रहणं किन्तु षुंगूट् अभिषव इत्यस्य । सुवेति शनिर्देशात् षूङौक् षूङौच् इत्यनयोश्च न ग्रहणम् । शवाऽनुबन्धेन निर्देशाच्च यङ्लुबिनानेन षत्वम् । पूजायां सोः पूजातिक्रमयोश्चातेरुपसर्गत्वाभावात् सुस्तुतं अतिस्तुतमित्यादौ नानेन षत्वम् । पर्यषुणोत्, अत्राड्व्यवधानेऽपि षत्वं भवति । नन्वट्ग्रहणं किमर्थं 'आगमा यद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते' इति न्यायात् सुग् ग्रहणेनाऽऽगमयुक्तस्यापि सुगो ग्रहणसम्भवेनाटा व्यवधानाभावादिति चेन्न, अनेनैवाड्ग्रहणेनोक्त-

ष्टौति, दुःष्टवम्, पर्यष्टौत् । स्तुभ्, अभिष्टोभते, पर्यष्टोभत । अद्वित्व इति किम्? अभिसुसूषति॥ **स्थासेनिसेधसिचसञ्जां द्वित्वेऽपि** ॥४०॥ उपसर्गस्थान्नाम्यादेः परेषां स्थादीनां सः ष् स्यात्, द्वित्वेऽप्यट्यपि । अधिष्ठास्यति, अधितष्ठौ, अध्यष्ठात् । अभिषेणयति, अभिषिषेणयिषति, अभ्यषेणयत् । प्रतिषेधति, प्रतिषिषेधिषति, प्रत्यषेधत् । अभिषिञ्चति, अभिषिषिक्षति, अभ्यषिञ्चत् । अभिषजति, अभिषषञ्ज, अभ्यषजत्॥ **अङ्प्रतिस्तब्धनिस्तब्धे स्तम्भः** ॥४१॥ उपसर्गान्नाम्यादेः परस्य स्तम्भस्सो द्वित्वेऽप्यट्यपि ष् स्यात्, न चेत् स्तम्भिर्ङेप्रतिस्तब्धनिस्तब्धयोश्च स्यात् । विष्टम्नाति, वितष्टम्भ, प्रत्यष्टम्नात् । ङादि-

---

न्यायस्य व्यभिचारित्वज्ञापनात् । ततश्च व्यवधायित्वसम्भावनयाऽटो ग्रहणम् । एवं पर्यषुणोदित्यादौ 'कृतेऽन्यस्मिन् धातुप्रत्ययकार्ये पश्चाद्वृद्धिस्तद्बाध्योऽट्चे'ति न्यायोऽपि न प्रवर्तते, अट्यपीत्युक्तेः । अन्यथा षत्वस्य प्रथममेव भवनात् पश्चादटि रूपसिद्धेरट्यपीति व्यर्थं स्यात् । अड्व्यवधाने एव षत्वमिति भ्रमनिवारणार्थमपिशब्दोपादानम् ॥ **स्था च सेनिश्च सेधश्च** सिचश्च सञ्ज् च तेषाम्, द्वित्वे, अपि ॥ अट्यपि उपसर्गादिति च वर्तते । सेनेः अषोपदेशार्थम्, स्थासञ्जोरवर्णान्तव्यवधानेऽपि विध्यर्थम्, सिच् सञ्ज् सेधां षणि नियमबाधनार्थम्, सर्वेषामड्व्यवधाने पदादौ च षत्वार्थं वचनम् । अधिष्ठास्यतीति, निमित्तनिमित्तिनोरव्यवधाने । अधितष्ठाविति, द्वित्वव्यवधाने । अध्यष्ठादिति, अड्व्यवधाने उदाहरणम् । एवमग्रेऽपि । अत्र द्वित्वेऽपीति वचनं 'स्वाङ्गमव्यवधायी'ति न्यायस्य व्यभिचारित्वं सूचयति, अन्यथा द्वित्वे कृते सति तस्य स्वाङ्गत्वेनाव्यवधायकत्वाद् द्वित्वेऽपीति वचनं निरर्थकं स्यात् ॥ ङश्च प्रतिस्तब्धश्च निस्तब्धश्च, न ङप्रतिस्तब्धनिस्तब्धस्तस्मिन्, स्तम्भः षष्ठी ॥

वर्जनं किम्? व्यतस्तम्भत्, प्रतिस्तब्धः, निस्तब्धः॥ **अवाच्चाऽऽश्रयोर्जाऽविदूरे** ॥ ४२ ॥ अवादुपसर्गात्परस्य स्तम्भः स आश्रयादिषु गम्यमानेषु द्वित्वेऽप्यट्यपि ष् स्यात्, ङविषयश्चेत्तस्मिन्नं स्यात्। आश्रय आलम्बनम् । दुर्गमवष्टम्भ्नाति, अवतष्टम्भ, अवाष्टम्भ्नाद्वा । ऊर्ज और्जित्यम् । अहो ! वृषभस्यावष्टम्भः । अविदूरमासन्नमदूरासन्नं च । अवष्टब्धा शरदवष्टब्धा सेना । चोऽनुक्तसमुच्चये, तेन उपष्टम्भः । अङ इत्येव ? अवातस्तम्भत् ॥ **व्यवात्स्वनोऽशने** ॥ ४३ ॥ वेरवाच्चोपसर्गात्परस्य स्वनः सोऽशने भोजने द्वित्वेऽप्यट्यपि ष् स्यात् । विष्वणति, अवष्वणति । विषष्वाण, अवषष्वाण । व्यष्वणत्, अवाष्वणत् । व्यषिष्वणत्, अवाषिष्वणत् । अशन इति किम् ? विस्वनति मृदङ्गः ॥ **सदोऽप्रतेः परोक्षायां त्वादेः** ॥ ४४ ॥ प्रतिवर्जोपसर्गस्थान्नाम्यादेः परस्य सदः सो द्वित्वेऽप्यट्यपि ष् स्यात्, परोक्षायां तु द्वयुक्तौ सत्यामादेः पूर्वस्यैव । निषीदति, विषाषद्यते, व्यषीदत् । परोक्षायां त्वादेरेव ? निषसाद । अप्रतेरिति किम् ? प्रतिसीदति ॥

उपसर्गात्, द्वित्वे, अट्यपीत्यनुवर्त्तन्ते । स्तम्भ्, तिव्, श्नाप्रत्ययः 'नो व्यञ्जनस्यानुदित' इत्युपान्त्यनलोपः, अनेन षः, इति विष्टभ्नाति। विष्टम्भन्तं प्रायुङ्क्ते इति व्यतस्तम्भत्, णिगि, दिवि, ङेरूपम्। ङविषयत्वादत्र न षः ॥ **अवात् पञ्चमी, च,** आश्रयश्च ऊर्जा चाविदूरञ्च तस्मिन् ॥ चकारो ङ इत्यस्यानुवृत्त्यर्थः, अनुक्तसमुच्चयार्थश्च, तेनोपष्टम्भ इत्यादावुपादपि भवति । द्वित्वेऽट्यपीत्यनुवर्तते ॥ **विश्च अवश्च तस्मात्,** स्वनः षष्ठी, अशने ॥ द्वित्वेऽपि, अट्यपीति सम्बध्येते, न त्वङ इति, तत्र चकारेणाऽनुकृष्टत्वात्। विष्वणति सशब्दं भुङ्क्ते, भुञ्जानः कञ्चिच्छब्दं करोतीति वाऽर्थः । विस्वनतीति, विविधं शब्दं करोतीत्यर्थः ॥ **सदः षष्ठी, न प्रतिरप्रतिस्तस्मात्,** परोक्षायां, तु, आदेः षष्ठी ॥ द्वित्वेऽपि, अट्यपि, इति पदद्वयं वर्त्तते । षद्लृ विशरणे

स्वञ्जश्च ॥४५॥ उपसर्गस्थान्नाम्यादेः परस्य स्वञ्जः सो द्वित्वेऽप्यत्यपि ष् स्यात्, परोक्षायां त्वादेरेव । अभिष्वजते अभिषिष्वङ्क्ते, प्रत्यष्वजत, परिषस्वजे ॥ **परिनिवेः सेवः** ॥४६॥ पर्याद्युपसर्गस्थान्नाम्यादेः परस्य सेवतेः सो द्वित्वेऽप्यत्यपि ष् स्यात् । परिषेवते, परिषिषेवे, परिषिषेविषते, पर्यषेवत, निषेवते, विषिषेवे ॥ **सयसितस्य** ॥ ४७ ॥ परिनिवेः परस्य सयसितयोः सः ष् स्यात् । परिषयः, निषयः, विषयः । परिषितः, निषितः, विषितः ॥ **असोऽसिवूसहस्सटाम्** ॥४८॥ परिनिविभ्यः परस्य सिवूसहोः स्सटश्च सः ष् स्यात्, न चेत् सिवूसहौ सोऽविषयौ स्याताम् । परिषीव्यति, निषीव्यति, विषीव्यति । परिषहते, निषहते, विषहते । परिष्करोति, विष्किरः । असोऽिति किम् ?

इत्यस्य, षद्लृत् अवसादने इत्यस्य चात्र ग्रहणम्, गर्हितं विषीदतीति विषाषद्यते ॥ **स्वञ्जः षष्ठी, च** ॥ द्वित्वेऽपि, अत्यपीति वर्तते । चकारेण परोक्षायां त्वादेरित्यस्यानुकर्षः । इदमेव चग्रहणं 'चानुकृष्टं नानुवर्तते' इति न्यायं सूचयति । चकारेण समुच्चितन्तु यथेच्छमनुवर्तत एव । योगविभागादप्रतेरिति नाऽनुवर्तते ॥ **परिश्च निश्च विश्च तस्मात्, सेवः षष्ठी** ॥ द्वित्वेऽपि, अत्यपीत्युपयुज्येते ॥ **सयश्च सितश्च तस्य** ॥ परिनिवेरित्यनुवर्तते । पृथग्योगाद् द्वित्वेऽपि, अत्यपीति निवृत्तम् । सय इति सिनोतेः, अलन्तस्याजन्तस्य घान्तस्य वा रूपम् । सित इति क्तान्तस्य स्यतेर्वा नियमार्थम्, परिनिविपरस्यैव क्तान्तस्य स्यतेर्यथा स्यादिति । परिसमन्तात्सयः, नितरां सयः, विशेषेण वा सयः, परिसिनोति स्म ॥ **सोश्च ऽश्च सोऽौ, न** विद्येते सोऽौ ययोस्तावसोऽौ, सिवूश्च सहश्च सिवूसहौ, असोऽौ च तौ सिवूसहौ च, असोऽसिवूसहौ च स्सट् च तेषाम् ॥ परिनिवेरित्यभिसम्बध्यते । परिष्करोति, विष्किर इत्यत्र 'सम्परेः कृगः स्सडि'ति स्सट्, अनेन षः । परिसोढ इति सहस्य सो विषयत्वान्न षः । मा परि-

परिसोढः । मा परिसीषिवत् । मा परिसीषहत् ॥ **स्तुस्वञ्जश्चाटि नवा** ॥ ४९ ॥ परिनिवेः परस्य स्तुस्वञ्जोरसोऽसिवूसहस्सटां च सोऽटि सति ष् वा स्यात् । पर्यष्टौत्, पर्यस्तौत् । न्यष्टौत्, न्यस्तौत् । व्यष्टौत्, व्यस्तौत् । पर्यष्वजत्, पर्यस्वजत् । न्यष्वजत्, न्यस्वजत् । व्यष्वजत्, व्यस्वजत् । पर्यषीव्यत्, पर्यसीव्यत् । न्यषीव्यत्, न्यसीव्यत् । व्यषीव्यत्, व्यसीव्यत् । पर्यषहत, पर्यसहत । न्यषहत, न्यसहत । व्यषहत, व्यसहत । पर्यष्करोत्, पर्यस्करोत् । असोऽसिवूसहेत्येव ? पर्यसोढयत् । पर्यसीषीवत्, पर्यसीषहत् ॥ **निरभ्यनोश्च स्यन्दस्याप्राणिनि** ॥५०॥ एभ्यः परिनिवेश्च परस्याप्राणिकर्तृकार्थवृत्तेः स्यन्दः सः ष् वा स्यात् । निःष्यन्दते, निःस्यन्दते । अभिष्यन्दते, अभिस्यन्दते । अनुष्यन्दते, अनुस्यन्दते । परिष्यन्दते, परिस्यन्दते । निष्यन्दते, निस्यन्दते । विष्यन्दते, विस्यन्दते तैलम् । अप्राणिनीति किम् ? परिस्यन्दते मत्स्यः ॥ **वेः स्कन्दोऽक्तयोः** ॥ ५१ ॥ विपूर्वस्य स्कन्दः सः ष् वा स्यात्, न चेत् क्तक्तवतू स्याताम् । विष्कन्ता, विस्कन्ता । अक्तयोरिति

सीषिवदिति ङविषयः । सिवोऽनुबन्धनिर्देशाद्यङ्लुपि न षः । बहुवचनं परिनिविभिस्सह यथासङ्ख्यनिवृत्त्यर्थम् ॥ स्तुश्च स्वञ्ज् च तस्य, च, अटि सप्तमी, नवा ॥ परिनिवेः, असोङ, सिवूसहस्सटामित्यनुवर्तन्ते । स्तुस्वञ्जो 'रुपसर्गात्सुगिति,' 'स्वञ्जेश्चे'ति नित्ये प्राप्ते सिवूसहस्सटाङ्गाऽप्राप्ते विकल्प्यते ॥ निश्च अभिश्च अनुश्च तस्मात्, च, स्यन्दस्य, न प्राणी अप्राणी तस्मिन् ॥ चात्परिनिवेरित्यायाति । स्यन्दौङ् प्रस्रवणे । अप्राणिनीति पर्युदासस्तेन प्राणी अप्राणी च कर्त्ता यत्र भवति तत्राप्राण्याश्रयो विकल्पो भवति, न तु प्रतिषेधः प्राण्याश्रयः, यथाऽनुष्यन्देते मत्स्योदके ॥ वेः पञ्चमी, स्कन्दः षष्ठी, क्तश्च क्तवांश्च क्तौ, 'समानामर्थेनैकः शेष' इति क्तवल्लोपः, न क्तावक्तौ तयोः ॥ स्कन्दृं गतिशोषणयोः । विष्कन्ता 'णकतृचौ' अक्तयोरिति

किम् ? विस्कन्नः, विस्कन्नवान् ॥ **परेः** ॥ ५२ ॥ परेः स्कन्दः सः ष् वा स्यात् । परिष्कन्ता, परिस्कन्ता । परिष्कन्नः, परिस्कन्नः ॥ **निर्नेः स्फुरस्फुलोः** ॥ ५३ ॥ आभ्यां परयोः स्फुरस्फुलोः सः ष् वा स्यात् । निःष्फुरति, निःस्फुरति, निष्फुरति, निस्फुरति । निःष्फुलति, निःस्फुलति, निष्फुलति, निस्फुलति ॥ **वेः** ॥ ५४ ॥ वेः परयोः स्फुरस्फुलोः सः ष् वा स्यात् । विष्फुरति, विस्फुरति । विष्फुलति, विस्फुलति ॥ **स्कभ्नः** ॥ ५५ ॥ वेः स्कभ्नः सः ष् नित्यं स्यात् । विष्कभ्नाति ॥ **निर्दुःसुवेः समसूतेः** ॥ ५६ ॥ एभ्यः परयोः समसूत्योः सः ष् स्यात् । निःषमः, दुःषमः सुषमः, विषमः । निःष्टूतिः,

---

द्विवचनात् अर्थवद्ग्रहणन्यायमुपेक्ष्य द्वयोर्ग्रहः ॥ **परेः पञ्चमी** ॥ स्कन्द इत्यनुवर्तते । पृथक् सूत्रकरणात्, अक्तयोरिति नाऽनुवर्तते । परिष्कन्तेति तृजन्तम्, परिष्कन्न इति तु क्तान्तं रूपम् ॥ **निश्च निश्च निर्निस्तस्मात्, स्फुरश्च स्फुल् च तयोः** ॥ निःष्फुरति, अत्र निस्स्सकारस्य रुत्वम्, 'शषसे शषसं वे'ति सत्वम्, अनेन धातुसकारस्य षत्वम्, 'सस्य शषावि'ति षत्वम्, निष्फुरति । सत्वाभावपक्षे कदाचिद्विसर्गः, कदाचित् 'व्यत्यये लुग्वे'ति लोपः, मूर्द्धन्याभावपक्षे कदाचित् सकारद्वयश्रवणं कदाचिद्विसर्गलोपौ । वचनभेदो यथासङ्ख्यनिवृत्त्यर्थः ॥ **वेः पञ्चमी** ॥ स्फुरस्फुलोरित्यन्वायाति । योगविभाग उत्तरत्र वेरेव सम्बन्धार्थः ॥ **स्कभ्नः षष्ठी** । वेरित्यायाति । पृथक् सूत्रविरचनान्नवेति निवृत्तम् । अन्यथा वेः स्कभ्नश्चेति क्रियेत । स्कभ्न इति भ्वादिर्देशः श्नुनिषेधपरः, व्याख्यानतो विशेषप्रतिपत्तिरिति न्यायात् । स्कम्भू सौत्रो धातुः, अषोपदेशः । विष्कभ्नाति, क्षुभ्नादित्वान्न णत्वम् ॥ **निश्च दुश्च सुश्च विश्च तस्मात्, समश्च सूतिश्च तस्य** ॥ समसूतीति नाम्नो ग्रहणम्, न तु धातोः । निश्चितः समः निःषमः । दुष्टः शोभनो वा समः । विगतः समो विषमः । नाम-

दुःषूतिः, सुषूतिः, विषूतिः ॥ **अवः स्वपः** ॥५७॥ निर्दुःसुविपूर्वस्य वहीनस्य स्वपेः सः ष् स्यात् । निःषुषुपतुः, दुःषुषुपतुः, सुषुषुपतुः, विषुषुपतुः । अव इति किम् ? दुःस्वप्नः ॥ **प्रादुरुपसर्गाद्यस्वरेऽस्तेः** ॥५८॥ प्रादुरुपसर्गस्थाच्च नाम्यादेः परस्यास्तेः सो यादौ स्वरादौ च परे ष् स्यात् । प्रादुःष्यात्, विष्यात्, निष्यात् । प्रादुःषन्ति, विषन्ति, निषन्ति । यस्वर इति किम् ? प्रादुःस्तः ॥ **न स्सः** ॥५९॥ कृतद्वित्वस्य सस्य ष् न स्यात् । सुपिस्स्यते ॥ **सिचो यङि** ॥ ६० ॥ सिचः सो यङि ष् न स्यात् । सेसिच्यते ॥ **गतौ सेधः** ॥ ६१ ॥ गत्यर्थस्य सेधः सः ष् न स्यात् । अभिसेधति गाः । गताविति किम् ? निषेधति पापात् ॥ **सुगः स्यसनि** ॥ ६२ ॥ सुनोतेः सः स्ये सनि च ष्

ग्रहणाल्लिङ्गविशिष्टस्यापि षत्वम्, सुषमा इत्यादि भवति । निश्चिता सूतिरित्यादि ॥ **न विद्यते व् यस्य तस्य अवः, स्वपः षष्ठी** ॥ **निर्दुः-सुवेरित्यभिसम्बध्यते** । ञिष्वपंक् शये, परोक्षा अतुस्, स्वपेर्यङि च वस्य यङ्वृत्, पूर्वं धातुरुपसर्गेण युज्यते, अतो द्वित्वात्पूर्वं षत्वम्, ततो द्वित्वं निःषुषुपतुः ॥ **प्रादुश्च उपसर्गश्च तस्मात्, यश्च स्वरश्च तस्मिन्, अस्तेः षष्ठी** ॥ प्रादुःष्यात्, असक् भुवि, सप्तमी यात्, 'श्नास्त्यो-र्लुक्' अलोपः, अनेन षः ॥ **न अव्ययम्, स्नः षष्ठी** ॥ पिसृ गतौ, वर्तमाने ते, 'क्यः शिती'ति यः, 'अदीर्घाद्विरामे'ति सस्य द्वित्वम्, सुपिस्स्यते ॥ **सिचः** षष्ठी, **यङि** सप्तमी ॥ नेति वर्तते । षिंचीत् क्षरणे, भृशं पुनः पुनर्वा सिञ्चति, 'व्यञ्जनादेरेक०' यङ्, 'सन्य-ङश्चे'ति द्वित्वम् । 'व्यञ्जनस्या' 'आगुणावन्यादेः' ए, सेसिच्यते ॥ **गतौ, सेधः** षष्ठी ॥ नेति वर्तते । निषेधति निवारयतीत्यर्थः । शवा निर्देशाद्यङ्लुबि न निषेधः, तेनोपसर्गमाश्रित्य षत्वं भवत्येव ॥ **सुगः** षष्ठी, **स्यश्च सन् च तस्मिन्** । नेति वर्त्तते । सनि परे सुनोतेः सन्नन्तात् किपि प्रत्यये सुसूरिति रूपमुदाहृतं, सुसूषतीति तु नोदा-

न स्यात् । अभिसोष्यति । सुसूषतेः किप्, सुसूः ॥ **रषृवर्णान्नो ण एकपदेऽनन्त्यस्यालचटतवर्गशसान्तरे** ॥ ६३ ॥ एभ्यः परस्यैभिस्सहैकस्मिन्नेव पदे स्थितस्यानन्त्यस्य नो णः स्यात्, लचटतवर्गान्शसौ च मुक्त्वाऽन्यस्मिन्निमित्तकार्यिणोरन्तरेऽपि । तीर्णम्, पुष्णाति, नृणाम्, नॄणाम्; करणम्, बृंहणम्, अर्केण । एकपद इति किम् ? अग्निर्नयति, चर्म्मनासिकः । अनन्त्यस्येति किम् ? वृक्षान् । लादिवर्जनं किम् ? विरलेन, मूर्च्छनम्, दृढेन, तीर्थेन, रशना, रसना ॥

ह्रतम् । षणि 'णिस्तोरेवे'ति नियमादेव षत्वाभावात्, अभिसुसूषतीत्यपि नोदाहृियते, अद्वित्व इति व्यावृत्यैव निवर्तितत्वात् ॥ रश्च ष् च ऋवर्णश्च तस्मात्, नः षष्ठी, णः प्रथमा, एकञ्च तत्पदञ्च तस्मिन्, अन्ते भवोऽन्त्यः, न अन्त्यस्तस्य, चश्च टश्च तश्च चटतास्तेषां वर्गाः, शश्च सश्च शसौ, लश्च चटतवर्गाश्च शसौ च, न लचटतवर्गशसास्तैरन्तरं तस्मिन् ॥ तीर्यते स्मेति तीर्णम्, 'ऋल्वादेरि'ति तस्य नः, 'ऋतां क्ङितीर्' अनेन रेफाव्यवहितस्य नस्य णः । पुष्णाति, षकाराव्यवहितस्य ॠाया नस्य णः । नृणामिति ऋवर्णाव्यवहितस्य नामो नस्य णः । करणमिति रेफात्परस्याकारव्यवहितस्याप्यनो नस्य णः । बृंहणमिति ऋवर्णात्परस्यानुस्वारहकाराकारैर्व्यवहितस्याप्यनो नस्य णः । अर्केणेति रेफात्परस्य ककारैकारव्यवहितस्यापि नस्य णः । चर्मनासिक इत्यत्र समासापेक्षयैकपदत्वेऽपि 'प्रत्ययलोपेऽपि प्रत्ययलक्षणं कार्यं विज्ञायत' इति न्यायात् समासान्तर्वर्तिविभक्त्याश्रयेण भिन्नपदत्वान्न नस्य णत्वम्, अत एव पदे इत्यनुक्त्वा एकपदे इत्युक्तम् । तथा च यत् नित्यमेकमेव तादृशं पदमत्र विवक्षितं समस्तन्तु एकञ्चानेकञ्च भवति, तत्र न णत्वम् । एवञ्च निमित्तवत्पदभिन्नपदत्वाभाववद्वृत्तिनकारस्येत्यर्थस्तथा च मातृभोगाय हितो मातृभोगीण इत्यादावपि णत्वं भवत्येव, नकारस्य प्रत्ययवृत्तित्वेऽपि निमित्तवत्पदभिन्नपदवृत्तित्वा-

पूर्वपदस्थान्नाम्न्यगः ॥ ६४ ॥ गन्तवर्जपूर्वपदस्थाद्रषृवर्णात्परस्योत्तरपदस्थस्य नो ण् स्यात्, संज्ञायाम् । द्रुणसः, खरणाः, शूर्पणखा । नाम्नीति किम् ? मेषनासिकः । अग इति किम् ? ऋगयनम् ॥ **नसस्य** ॥ ६५ ॥ पूर्वपदस्थाद्रषृवर्णात्परस्य नसस्य नो ण् स्यात् । प्रणसः ॥ **निष्प्राड्ग्रेऽन्तःखदिरकार्ष्याऽऽम्रशरेक्षुप्लक्षपीयूक्षाभ्यो वनस्य** ॥ ६६ ॥ निरादिभ्यः परस्य वनस्य नो ण् स्यात् । निर्वणं प्रवणमग्रेवणमन्तर्वणं खदिरवणं कार्ष्यवणमाम्रवणं शर-

---

भावात् । ननु ऋवर्णग्रहणं किमर्थम्, नृणामित्यादौ ऋकारमध्यव्यवस्थितरकाराश्रयं णत्वं भवत्येवेति चेन्न, वर्णग्रहणेन वर्णैकदेशस्याग्रहणाद्वर्णबुद्धेस्तद्भिन्नत्वाद्वर्णैकदेशेन तदनुत्पादात्, अत एव ऋग्रहणेन 'वर्णैकदेशोऽपि वर्णग्रहणेन गृह्यत' इति न्यायोऽनित्यः । अधिकारश्चायमा णत्वविधेः । पदे एव णत्वविधानात्, खणं तक्षणमित्यादौ स्याद्युत्पत्तिपूर्वमपि 'भाविनो भूतवदुपचार' इति न्यायेन भाविनः पदत्वस्य भूतवदुपचाराण्णत्वम् । रशना कटिमेखला दवरक इत्यर्थः ॥ पूर्वपदे तिष्ठतीति पूर्वपदस्थस्तस्मात्, नाम्नि, न विद्यते ग् यस्य अग् तस्मात् ॥ द्रुणसः, द्रुरिव नासिकाऽस्य, 'अस्थूलाच्चे'ति नसः, अनेन णः, पूर्वपदस्थरकारात्परस्य नस्य णः । 'खरखुरान्नासिकाया नस्' खरवन्नासिका यस्यासौ खरणाः । शूर्पाऽऽकारा नखा यस्याः सा शूर्पणखा । ऋचां अयनं ऋगयनम्, गकारेण व्यवधानादयनस्य नस्य न णः । पूर्वसूत्रेणाप्राप्ते वचनम् ॥ **नसस्य** ॥ पूर्वपदस्थादित्यनुवर्तते, एवमग्रेऽपि । प्रगता प्रवृद्धा वा नासिका यस्य सः प्रणसः । अनाम्नि वचनमिदम् । उपसर्गादिति नासिकाया नसादेशः समासान्तः ॥ निश्च प्रश्च अग्रे च अन्तश्च खदिरश्च कार्ष्यश्च आम्रश्च शरश्च इक्षुश्च प्लक्षश्च पीयूक्षा च ताभ्यः, वनस्य ॥ वनान्निष्क्रान्तं निर्वणम्, प्रकृष्टं वनं प्रवणम्, वनस्याऽग्रेऽग्रेवणम्, 'पारे मध्येऽग्रेऽन्तः षष्ठ्यावे'त्येकारः । वनस्याऽन्तोऽन्तर्वणम्, खदिराणां वनम्, कार्ष्यशब्दो वृक्ष-

वणमिक्षुवणं प्लक्षवणं पीयूक्षावणम् ॥ **द्वित्रिस्वरौषधिवृक्षेभ्यो नवाऽनिरिकादिभ्यः** ॥ ६७ ॥ द्वित्रिस्वरेभ्यस्त्रिस्वरेभ्यश्चेरिकादिवर्जेभ्य ओषधिवृक्षवाचिभ्यः परस्य वनस्य नो ण् वा स्यात् । दूर्वावणं दूर्वावनम्, माषवणं माषवनम्, नीवारवणं नीवारवनम् । वृक्षः—शिग्रुवणं शिग्रुवनम्, शिरीषवणं शिरीषवनम् । इरिकादिवर्जनं किम् ? इरिकावनम् ॥ **गिरिनद्यादीनाम्** ॥ ६८ ॥ एषां नो ण् वा स्यात् । गिरिणदी, गिरिनदी । तुर्यमाणः, तुर्यमानः ॥ **पानस्य भावकरणे** ॥ ६९ ॥ पूर्वपदस्थाद्रादेः परस्य भावकरणार्थस्य पानस्य नो ण् वा स्यात् । क्षीरपाणं, क्षीरपानं स्यात् । कषायपाणः, कषायपानः कंसः ॥

विशेषवाची काश्र्याणां वनम्, कौमुद्यां तु कार्ष्यवणम् । आम्राणां वनम्, शराणामिक्षूणां प्लक्षानां पीयूक्षाणां वा वनम् । पीयूक्षाशब्दो द्राक्षाऽपरपर्यायः । पीयूक्षाभ्य इति बहुवचनं संज्ञायामसंज्ञायाञ्च णत्वार्थम् ॥ **द्वौ च त्रयश्च**, द्वित्रयः स्वरा येषान्ते द्वित्रिस्वराः, ओषधयश्च वृक्षाश्च ओषधिवृक्षाः, द्वित्रिस्वराश्च ते ओषधिवृक्षाश्च तेभ्यः, नवा, इरिका आदिर्येषान्त इरिकादयः, न इरिकादयः अनिरिकादयस्तेभ्यः ॥ वनस्येत्यनुवर्तते । दूर्वाणां वनम्, एवं सर्वत्र षष्ठी समासः । दूर्वामाषनीवारशब्दा ओषधिवचनाः, शेषा वृक्षवचनाः ॥ 'ओषध्यः फलापाकान्ता लता गुल्माश्च वीरुधः । फली वनस्पतिर्ज्ञेयो वृक्षाः पुष्पं फलोपगाः ॥' इति भेदे सत्यपि वृक्षेभ्य इति बहुवचनाद्वनस्पतीनामपि ग्रहणम् । इदमपि संज्ञायामसंज्ञायाम् । इरिका ओषधिविशेषः । वृक्षशब्दाद्वृक्षविशेषा एव ग्राह्यास्तेन वृक्षवनं द्रुमवनमित्यादौ न णत्वम् ॥ **गिरिनदी** आदिर्येषां तेषाम् ॥ **पानस्य**, भावश्च करणं च तस्मिन्, प्रीतिः पानम्, भावे अनट् । क्षीरस्य पानं क्षीरपाणम्, स्यात्पदं भावे पानशब्द इति सूचयति, क्षीरपानं हिताय स्यादिति भावः । कषायः पीयतेऽनेनेति कषायपानः, करणेऽनट् । कंसः पात्र-

देशे ॥ ७० ॥ पूर्वपदस्थाद्रादेः परस्य देशविषयस्य पानस्य नो ण् नित्यं स्यात् । क्षीरपाणा उशीनराः । देश इति किम् ? क्षीरपाना गोदुहः ॥ **ग्रामाग्राभ्यां नियः** ॥ ७१ ॥ आभ्यां परस्य नियो ण् स्यात् । ग्रामणीः, अग्रणीः ॥ **वाह्याद्वाहनस्य** ॥ ७२ ॥ वाह्यवाचिनो रादिमतः पूर्वपदात्परस्य वाहनस्य नो ण् स्यात् । इक्षुवाहणम् । वाह्यादिति किम् ? सुरवाहनम् ॥ **अतोऽह्नस्य** ॥ ७३ ॥ रादिमतोऽदन्तात्पूर्वपदात्परस्याह्नस्य नो ण् स्यात् । पूर्वाह्णः । अत इति किम् ? दुरह्नः । अह्नस्येति किम् ? दीर्घाह्नी शरत् ॥ **चतुस्त्रेर्हायनस्य वयसि** ॥ ७४ ॥ आभ्यां पूर्वपदाभ्यां परस्य हायनस्य नो ण् स्यात्, वयसि गम्ये । चतुर्हायणो वत्सः, त्रिहायणी वडवा । वय-

---

विशेषः ॥ देशे ॥ पानस्येत्यनुवर्तते । भावकरण इति नाऽनुवर्तते; नवेति च निवृत्तं पृथग्योगात् । पीयत इति पानम्, क्षीरं पानं येषान्ते क्षीरपाणाः ॥ ग्रामश्च अग्रं च तस्मात्, नियः षष्ठी । ग्रामं अग्रं वा नयतीति । यद्यप्यत्र 'गतिकारके'ति न्यायाद्विभक्त्युत्पत्तेः प्रागेव समासे निमित्तनिमित्तिनोरेकपदत्वाद्रषृवर्णादिति णत्वं सिद्धं तथापि यदि नियो णत्वं स्यात्तर्हि ग्रामाग्रावेति नियमार्थं सूत्रम्, तेन खरनीः, मेषनीरित्यादौ पूर्वसूत्रेणापि णत्वं न भवति ॥ वाह्यात्, वाहनस्य ॥ ऊह्यतेऽनेनेति वहनम्, वहनमेव वाहनम्, प्रज्ञादित्वादण् प्रत्ययः । इक्षूणां वाहनं, इक्षुवाहणम् । सुराणां वाहनं, सम्बन्धमात्रमत्र विवक्षितम्, न तु वहनक्रियापूर्वके कर्मकरणसम्बन्धे ॥ अतः पञ्चमी, अह्नस्य । अह्नः पूर्वं पूर्वाह्णः, सर्वांशसङ्ख्याऽव्ययादिति अट्समासान्तः, अह्न इत्यादेशश्च । दुष्टमहो दुरह्नः । अह्न इत्यकारान्तनिर्देशात् दीर्घाह्नी शरदित्यत्र न णत्वम् ॥ चत्वारश्च त्रयश्च चतुस्रि तस्मात्, हायनस्य, वयसि ॥ जहाति कालान्तरमिति हायनः, चत्वारो हायना यस्य चतुर्हायणः । त्रयो हायना यस्याः सा त्रिहा-

सीति किम् ? चतुर्हायना शाला ॥ **वोत्तरपदान्तनस्यादेरयुवपकाहः** ॥ ७५ ॥ पूर्वपदस्थाद्रादेः परस्य उत्तरपदान्तभूतस्य नागमस्य स्यादेश्च नो ण् वा स्यात्, चेद् युवन्पकाहन्सम्बन्धी न स्यात् । व्रीहिवापिणौ, व्रीहिवापिनौ । माषवापाणि, माषवापानि । व्रीहिवापेण, व्रीहिवापेन । युवादिवर्जनं किम् ? आर्ययूना, प्रपक्वानि, दीर्घाह्नी

यणी, 'सङ्ख्यादेर्हायनाद्वयसि' ङीप्रत्ययः । प्राणिनां कालकृता शरीरावस्था बाल्ययौवनादिका वयः ॥ वा, उत्तरं च तत्पदं च उत्तरपदम्, उत्तरपदस्यान्तः, उत्तरपदान्तश्च नश्च स्यादिश्च तस्य, युवा च पक्वश्च अहा च, न युवपकाहन् तस्य ॥ व्रीहीन् वपत इत्येवंशीलौ व्रीहिवापिणौ, 'अजातेः शीले' णिन् प्रत्ययः उत्तरपदान्तस्थनस्योदाहरणम् । ननु व्रीहिवापिणावित्यादौ वापिन्नित्यस्य वृत्त्यन्तत्वेन 'वृत्त्यन्तोऽसषे' इत्यनेनान्तर्वर्त्तिविभक्त्यपेक्षया प्राप्तपदत्वस्य निषेधात्कथमुत्तरपदत्वं येन तदन्तस्य नस्य वा णत्वं स्यादिति चेन्न, यद्वृत्त्यारम्भकस्यादिनिमित्ता पदसंज्ञा चिकीर्षिता तद्घटकार्थवदव्यवहितपूर्वत्वाभाववत्त्वस्वघटकत्वैतदुभयसम्बन्धेन वृत्तिविशिष्टत्वरूपोत्तरपदत्वस्य विवक्षितत्वात् । व्रीहीन् वपत इत्येवंशीलौ एवंरूपा या वृत्तिस्तदारम्भकस्यादिनिमित्तिका पदसंज्ञा वापिन्नित्यस्य चिकीर्षिता, तादृशवृत्तिघटको योऽर्थवान् वापिन्शब्दः, तदव्यवहितपूर्वत्वं व्रीहिशब्दे, न तु वापिन्शब्दे, तद्वृत्तिघटकयत्किञ्चिदर्थवदपेक्षया पूर्वत्वाभावात्, एवञ्च तद्वृत्तिघटकार्थवदव्यवहितपूर्वत्वाभाववत्त्वं वापिन्शब्दे वर्तते, तथा तद्वृत्तिघटकत्वमप्यस्तीति वृत्तिविशिष्टत्वादुत्तरपदत्वं तस्य विज्ञेयम् । माषवापाणीति नागमस्य, व्रीहिवापेणेति स्यादेः । आर्यश्चासौ युवा च तेन आर्ययूनेति, अत्र उत्तरपदान्तस्थनकारस्य सत्त्वेऽपि युवादिवर्जनान्न भवति । प्रपक्वानीत्यत्र नागमनकारसत्त्वेऽपि युवादिवर्जनान्न भवति, दीर्घाह्नीत्यत्रोत्तरपदा-

शरत् ॥ **कवर्गैकस्वरवति** ॥ ७६ ॥ पूर्वपदस्थाद्रादेः परस्य कवर्गवत्येकस्वरवति चोत्तरपदे सति, उत्तरपदान्तस्य नागमस्य स्यादेश्च नो ण् स्यात्, न चेदसौ पक्वस्य । स्वर्गकामिणौ, वृषगामिणौ, ब्रह्महणौ, यूषपाणि । अपक्वस्येत्येव ? क्षीरपक्वेन ॥ **अदुरुपसर्गान्तरो णहिनुमीनाऽऽनेः** ॥ ७७ ॥ दुर्वर्जोपसर्गस्थादन्तःशब्दस्थाच्च रादेः परस्यैषां नो ण् स्यात् । णेति णोपदेशा धातवः—प्रणमति, परिणायकः,

---

न्तनकारस्य सद्भावेऽपि युवादिवर्जनान्न भवति ॥ एकश्चासौ स्वरश्च, कवर्गश्च, एकस्वरश्च, कवर्गैकस्वरमस्यास्तीति तस्मिन् ॥ वारहितं पूर्वसूत्रमनुवर्तते, तत्रापि युवन् अहन् शब्दौ वर्जयित्वा, कवर्गैकस्वरवत्त्वाभावात् । स्वर्गं कामयेते इत्येवंशीलौ, 'गतिकारके'ति न्यायेन समासः, वृषवत् गच्छत इत्येवंशीलौ, एकस्वरस्य तु ब्रह्माणं हतवन्तौ, यूषं मुद्गरसं पिबन्ति यानि कुलानि तानि यूषपाणि । नित्यार्थं वचनम्, 'गतिकारके'ति न्यायेन समासान्निमित्तनिमित्तिनोरेकपदस्थत्वेन 'रषवर्णादि'ति नित्ये प्राप्ते 'वोत्तरपदान्ते'ति तद्बाधित्वा विकल्पेन णत्वे प्राप्ते पुनरनेन विधानात् ॥ न दुर् अदुर्, अदुर् चासौ उपसर्गश्च, अदुरुपसर्गश्च अन्तर् च तस्मात्, णश्च हिनुश्च मीनाश्च, आनिश्च, तस्य ॥ हिनुमीनाऽऽनिग्रहणात् समासस्यासम्भवात् पूर्वपदस्थादित्यस्य निवृत्तिः; णेति णोपदेशा धातवो गृह्यन्ते, उपसर्गाण्णत्वविधानात् । प्रोपसर्गाण्णमं प्रह्वत्वे, तिव्, परिणयतीति परिणायकः, णींग् प्रापणे, णक् । हिंट् गतिवृद्ध्योः, वर्तमाने तस् 'स्वादेः श्नुः' अनेन णत्वम् । मींग्श् हिंसायाँ, वर्तमाने तस् 'क्रयादे' रिति श्ना, 'एषामीर्व्यञ्जनेऽदः' ईकारः, 'एकदेशविकृतस्यानन्यत्वाद् हिनुमीनयोरभावेऽप्यनेन णत्वम्, 'स्थानीवावर्णविधावि'त्यनेनापि न निर्वाहः, असद्विधौ स्वरस्य स्थानिवद्भावप्रतिषेधात् । आनीत्यर्थवत एव ग्रहणं 'अर्थवद्ग्रहणे-

अन्तर्णयति । हिनुः–प्रहिणुतः । मीना–प्रमीणीतः । आनि–प्रयाणि । अदुरिति किम् ? दुर्नयः ॥ **नशः शः** ॥ ७८ ॥ अदुरुपसर्गान्तःस्थाद्रादेः परस्य नशः शन्तस्य नो ण् स्यात् । प्रणश्यति, अन्तर्णश्यति । श इति किम् ? प्रनङ्क्ष्यति ॥ **नेङ्मादापतपदनदगदवपीवहीशमूचिग्यातिवातिद्रातिप्सातिस्यतिहन्तिदेग्धौ** ॥७९॥ अदुरुपसर्गान्तःस्थाद्रादेः परस्योपसर्गस्य नेर्नो माङादिषु

नानर्थकस्येति न्यायात्, तेन प्रवृद्धा वपा येषान्तानि प्रवपानि मांसानि, अत्र न णत्वम् । अत्र प्रशब्दो वृद्धं प्रत्येवोपसर्गः, 'येन धातुना युक्ताः प्रादयस्तमेव प्रत्युपसर्गसंज्ञा भवन्ती'ति न्यायात्, वपाशब्दं प्रति तु तस्य नोपसर्गत्वम्, 'यत्रोपसर्गत्वं न सम्भवति तत्रोपसर्गशब्देन प्रादयो लक्ष्यन्ते, न तु सम्भवत्युपसर्गत्वे' इति न्यायेन नाम्नः प्रति प्रादीनामुपसर्गत्वासम्भवादुपसर्गपदेन प्रादीनां ग्रहणम् । उपसर्गात् परसमुदायावयवानिशब्दस्य नकारस्य णत्वमित्यर्थाद्वा नात्र णत्वम् । यांक् प्रापणे, पञ्चमी आनि प्रत्ययः, प्रयाणि ॥ नशः षष्ठी, शः षष्ठी ॥ अदुरुपसर्गान्तर इति सम्बध्यते । श इति नशो विशेषणम्, तदन्तविधिः । नशौच् अदर्शने, 'दिवादेः श्यः' । प्रनङ्क्ष्यतीति, प्रपूर्वस्य नशो धुटि नोऽन्तः, भविष्यन्ती स्यति, 'यजसृजे'ति षः, 'षढोः कस्सि' 'ष्नां धुड्वर्गे' 'नाम्यन्तस्थे'ति षः । अत्र 'परेऽसदि'ति, अन्तरङ्गत्वात्पूर्वमनेन कृतमपि णत्वं षत्वादावसत्त्वात्षत्वे कृतेऽपि 'एकदेशविकृतस्याऽनन्यत्वात्' प्राप्तमपि साक्षात्षकारान्तत्वाभावान्निवर्त्यते । नशेरणोपदेशत्वात्पूर्वेणासिद्धे विध्यर्थमिदम् । पाणिनीये त्वयं धातुर्णोपदेशः ॥ **नेः षष्ठी**, ङकारेणोपलक्षितो माङ्मा, ङ्माश्च दाश्च पतश्च पदश्च नदश्च गदश्च वपीश्च वहीश्च शमूश्च चिग् च यातिश्च वातिश्च द्रातिश्च प्सातिश्च स्यतिश्च हन्तिश्च देग्धिश्च तस्मिन् ॥ ङ्मेति माङ्मेङोर्ग्रहणम् । प्रणिमिमीते, माङो रूपम्,

परेषु ण् स्यात् । प्रणिमिमीते, परिणिमयते, प्रणिददाति, परिणिदयते, प्रणिदधाति, प्रणिपतति, परिणिपद्यते, प्रणिनदति, प्रणिगदति, प्रणिवपति, प्रणिवहति, प्रणिशाम्यति, प्रणिचिनोति, प्रणियाति, प्रणिवाति, प्रणिद्राति, प्रणिप्साति, प्रणिष्यति, प्रणिहन्ति, प्रणिदेग्धि, अन्तर्णिमिमीते ॥ **अकखाद्यषान्ते पाठे वा** ॥ ८० ॥ धातुपाठे कखादिः षान्तश्च यो धातुपाठस्ताभ्यामन्यस्मिन्धातौ परेऽदुरुपसर्गान्तःस्थाद्रादेः परस्य नेर्नो ण् वा स्यात् । प्रणिपचति, प्रनिपचति । अकखादीति किम् ? प्रनिकरोति, प्रनिखनति । अषान्त इति किम् ? प्रनिद्वेष्टि ।

परिणिमयते, इति मेङ्ग रूपम् । दा इति संज्ञापरिग्रहाद् ददाति दयति, यच्छति, द्यति, दधाति, धयतीनां ग्रहणम् । वप्यादीनामनुबन्धेन तिवा च निर्देशाद् यङ्लुबि अनेनैषु परेषु न णत्वम् । पूर्वेषु तु धातुषु भवति । पाणिनीये पतादिचतुर्ष्वपि यङ्लुबि णत्वं न भवति, सूत्रे शपा निर्देशात् । ङ्मेति निर्देशो नानुबन्धार्थः, किन्तु मात्यादिनिवृत्त्यर्थः, तेन यङ्लुप्यपि णत्वम् । अत्र सूत्रे हंनादेशस्य वधेः पाठो न दृश्यते रूपञ्च प्रण्यवधीदिति भवति, सूत्रे च तदपाठात् 'भूतपूर्वकस्तद्वदुपचार' इति न्यायो ज्ञाप्यते, तेन वधेर्भूतपूर्वहन्रूपत्वोपचारादनेन णत्वं सिद्ध्यति । एवं प्रणिहतः प्रणिघ्नन्ति, इत्यादौ 'एकदेशविकृतमनन्यवदि'ति न्यायाद् हन्रूपत्वाण्णत्वम् । अडागमस्य 'आगमा यद्गुणीभूता' इति न्यायेन धात्ववयवत्वात् व्यवधायकत्वाभावेन प्रण्यमिमीतेत्यादावपि णत्वम् । एवमनुबन्धेन तिवा निर्देशेन च 'स्वाङ्गमव्यवधायी'ति न्यायो ज्ञाप्यते, अन्यथा हि प्रनिवावपीत्यादौ वाशब्देन व्यवधानादेव णत्वप्राप्तिर्न भवतीत्यनुबन्धादिना निर्देशो निरर्थकः स्यात् ॥ **कश्च खश्च कखौ**, कखावादिर्यस्यासौ, न कखादिरकखादिः, षोऽन्ते यस्यासौ षान्तः, न षान्तः अषान्तः, अकखादिश्चाषान्तश्च तस्मिन्, **पाठे, वा** ॥ अदुरुपसर्गान्तर इत्यनुवर्तते ।

पाठ इति किम् ? प्रनिचकार ॥ **द्वित्वेऽप्यन्तेऽप्यनितेः परेस्तु वा** ॥ ८१ ॥ अदुरुपसर्गान्तःस्थाद्रादेः परस्यानितेर्नो द्वित्वाद्वित्वयोरन्तानन्तयोश्च ण् स्यात्, परिपूर्वस्य वा स्यात् । प्राणिणिषति, पराणिति, हे प्राण् । पर्यणिणिषति, पर्यनिनिषति; पर्यणिति, पर्यनिति; हे पर्यण्, हे पर्यन् ॥ **हनः** ॥ ८२ ॥ अदुरुपसर्गान्तःस्थाद्रादेः परस्य हन्तेर्नो ण् स्यात् । प्राहण्यत, प्रहण्यते, अन्तर्हण्यते ॥ **वभि वा** ॥ ८३ ॥ अदुरुपसर्गान्तःस्थाद्रादेः परस्य हन्तेर्नो व्मोः परयोर्ण् वा स्यात् । प्रहण्वः, प्रहन्वः । प्रहण्मि, प्रहन्मि । अन्तर्हण्वः, अन्तर्हन्वः । अन्तर्हण्मः, अन्तर्हन्मः ॥ **निंसनिक्षनिन्दः कृति वा** ॥ ८४ ॥ अदुरुपसर्गान्तःस्थाद्रादेः परस्य निंसादिधातोर्नो ण् वा स्यात्, कृत्प्र-

---

प्रनिचकारेति, अत्र पाठे ककारादित्वात्सम्प्रति चकारादित्वेऽपि प्रतिषेधो भवति ॥ द्वित्वे, अपि, अन्ते, अपि, अनितेः षष्ठी, परेः पञ्चमी, तु, वा ॥ अदुरुपसर्गान्तर इति सम्बध्यते । द्वित्वेऽप्यन्तेऽपि, इत्यत्राऽपिनाऽद्वित्वस्यानन्तस्य च बोधः, प्राणिणिषतीत्यादौ द्वयोरपि नकारयोरनेनैव णत्वम्, द्वित्व इति वचनात् । अत्र परे द्वित्वे कर्त्तव्ये णषशास्त्रमसद् द्रष्टव्यमिति न्यायाद् द्वित्वे कृते णत्वम् । प्राणितीति प्राण् मन्वन् कनिप् विच् प्रत्ययः, 'अप्रयोगीदि'ति विच् लोपः । अन्ते 'नाऽऽमन्त्ये' इति नलोपस्य निषेधान्नान्तत्वं सम्भवतीत्यामन्त्ये उदाहरणं दर्शितम् ॥ हनः षष्ठी । अदुरुपसर्गान्तर इति वर्तते ॥ वश्च म् च तस्मिन्, वा । अदुरुपसर्गान्तरः, हन इति च वर्तते । पूर्वेण नित्यं प्राप्ते विकल्पार्थं वचनम् ॥ निंसश्च निक्षश्च निन्द् च तस्य, कृति सप्तमी, वा ॥ अदुरुपसर्गान्तर इत्यायाति । णिसुकि चुम्बने, णिक्ष चुम्बने, णिदु कुत्सायाम् । 'उदितः स्वराञ्नोऽन्तः' प्रणिंस्यत इति प्रणिंसनं, अनट् प्रत्ययः । प्रणिंस्त इति वर्त्तमाने

त्यये । प्रणिंसनं प्रनिंसनम् । प्रणिक्षणं, प्रनिक्षणम् । प्रणिन्दनं, प्रनिन्दनम् । कृतीति किम् ? प्रणिंस्ते ॥ **स्वरात्** ॥ ८५ ॥ अदुरुपसर्गान्तःस्थाद्रादेः परस्य स्वरादुत्तरस्य कृतो नो ण् स्यात् । प्रहाणः, प्रहीणः ॥ **नाम्यादेरेव ने** ॥ ८६ ॥ अदुरुपसर्गान्तःस्थाद्रादेः परस्य नागमे सति नाम्यादेरेव धातोः परस्य स्वरादुत्तरस्य कृतस्य नो ण् स्यात् । प्रेङ्खणं प्रेङ्गणं प्रेङ्गणीयम् । नाम्यादेरिति किम् ? प्रमङ्गनम् ॥ **व्यञ्जनादेर्नाम्युपान्त्याद्वा** ॥ ८७ ॥ अदुरुपसर्गान्तःस्थाद्रादेः

रूपम् । 'गतिकारकङस्युक्तानामि'ति न्यायात् अविभक्त्यन्तैः कृदन्तैः सह प्रादीनां समासे सति निमित्तनिमित्तिनोरेकपदस्थत्वाद् 'रषृवर्णादि'त्यनेन नित्यं णत्वे प्राप्ते विकल्पार्थमिदम् ॥ स्वरात् ॥ अदुरुपसर्गान्तरः कृतीति वर्तते, कृतीति च विषयसप्तमी । ओहांङ्क् हा, प्रहायते स्म क्तप्रत्ययः, 'सूयत्याद्योदितः' तो नः । ओहांक् त्यागे, प्रहीयते स्म, 'ईर्व्यञ्जने' ईकारः । गतिकारकेति न्यायात् 'रषृवर्णादि' त्यनेनोक्तप्रयोगेषु णत्वं सिद्धमेव, किन्तु प्रयायिणौ परियायिणावित्यत्र 'वोत्तरपदे'ति विकल्पतः प्राप्तस्य णत्वस्य निवृत्त्यर्थमिदमारभ्यते । यथासम्भवं क्तक्तवतू अन आन इन् अनि अनीय इत्येते प्रत्ययाः प्रयोजयन्ति ॥ नामी आदिर्यस्य तस्मात्, एव, ने । अनुवृत्तिः पूर्ववत्स्वरादिति च वर्तते ॥ इखु इगु गतौ, उदितः स्वरान्नोन्तः, प्रेङ्खयत इति प्रेङ्खणम् । प्रेङ्गणीयमनीयप्रत्ययः । प्रमङ्गनमिति, मगु गतौ । स्वरादित्यनेनैव सिद्धे नियमार्थमिदम् । एवकारो नैव सति नाम्यादेरिति नियमव्यावृत्त्यर्थम्, तेन प्रेहणमित्यादौ णत्वं भवति । नग्रहणं नागमादेशोपलक्षणार्थम्, नकारस्य व्यवधाने हि णत्वस्य प्राप्तिरेव नास्ति यथा प्रेन्वनमित्यादौ । नाम्यादिव्यञ्जनान्तादेवायं नियमः । ण्यन्तात्तु 'णेर्वे'ति परत्वाद्विकल्प एव ॥ व्यञ्जनं आदिर्यस्य तस्मात्, नामी उपान्त्ये यस्य तस्मात्, वा ॥ अनु-

परो यो व्यञ्जनादिर्नाम्युपान्त्यो धातुस्ततः परस्य कृतः स्वरात्परस्य नो ण् वा स्यात् । प्रमेहणं, प्रमेहनम् । व्यञ्जनादेरिति किम् ? प्रोहणम् । नाम्युपान्त्यादिति किम् ? प्रवपणं प्रवहणम् । स्वरादित्येव ? प्रभुग्नः । अदुरित्येव ? दुर्मोहनः । लचटादिवर्जनं किम् ? प्रभेदनं प्रभोजनम् । स्वरादित्यनेन नित्यं प्राप्ते विभाषेयम् ॥ **णेर्वा** ॥ ८८ ॥ अदुरुपसर्गान्तःस्थाद्रादेः परस्य ण्यन्तस्य धातोर्विहितस्य स्वरात्परस्य नो ण् वा स्यात् । प्रमङ्गणा, प्रमङ्गना । विहितविशेषणं किम् ? प्रयाप्यमाणः प्रयाप्यमान इति क्यान्तरेऽपि स्यात् ॥ **निर्विण्णः** ॥ ८९ ॥ निर्विदेः सत्तालाभविचारणार्थात्परस्य क्तस्य नो णत्वं स्यात् । निर्विण्णः ॥ **न ख्यापूग्भूभाकमगमप्यायवेपो णेश्च** ॥ ९० ॥ अदुरुपसर्गान्तःस्थाद्रादेः परेभ्यः ख्यादिभ्योऽण्यन्तण्यन्तेभ्यः परस्य कृतो नो ण् न स्यात् । प्रख्यानं प्रख्यापनम् । प्रपवनं प्रपावनम् । प्रभवनं

वृत्तिः पूर्ववत् । मिह सेचने प्रमेहनम् । ऊहि तर्के, प्रोह्यते प्रोहणम्, 'नाम्यादे'रिति णत्वम् । प्रवपणं 'स्वरादि'ति णत्वम् ॥ **णेः षष्ठी, वा** ॥ पूर्ववदनुवृत्तिः । प्रमङ्गणं प्रमङ्गणा 'णिवेत्त्यासे' त्यनप्रत्ययः । अनाम्न्यादिभ्यो नागमे सति 'नाम्यादेरेव ने' इति नियमेनाप्राप्ते नागमरहितेभ्यस्तु 'स्वरादि'त्यनेन नित्यं प्राप्ते, उभयत्र विभाषेयम् ॥ **निर्व्विण्णः प्रथमा** ॥ विदिंच् सत्तायां, विद्लृंती लाभे, विदिंप् विचारणे । निर्विद्यते स्म क्तः 'रदादमूर्च्छे'ति तस्य दस्य च नः, अनेन क्तसम्बन्धिनस्य णत्वं निपात्यते । धातुनकारस्य तु 'तवर्गस्य' 'रषृवर्णादि' त्यनेन वा णत्वम्, दकारेण व्यवधानात्, स्वरादुत्तरत्वाऽभावादप्राप्ते विधानम् ॥ **न, ख्या च पूग् च भूश्च भाश्च कमश्च गमश्च प्यायश्च वेप् च तस्मात्, णेः पञ्चमी, च** ॥ अदुरुपसर्गान्तरः, कृति, इत्यनयोः सम्बन्धः । ख्येति निरनुबन्धोपादानात् ख्याङ्क प्रकथने इत्यस्यादेशभूतस्या च ख्यारूपस्य

प्रभावनम् । प्रभायमानं प्रभायना । प्रकामिनौ, प्रकामना । अप्रगमनिः, प्रगमना । प्रप्यानः, प्रप्यायना । प्रवेपनीयं प्रवेपना ॥ **देशेऽन्तरोऽयनहनः** ॥ ९१ ॥ अन्तःशब्दात्परस्यायनस्य हन्तेश्च नो देशेऽर्थे ण् न स्यात् । अन्तरयनोऽन्तर्हननो वा देशः । देश इति किम् ? अन्तरयणमन्तर्हण्यते ॥ **षात्पदे** ॥ ९२ ॥ पदे परतो यः षस्ततः परस्य नो ण् न स्यात् । सर्पिष्पानम् । पद इति किम् ? सर्पिष्केण ॥ **पदेऽन्तरेऽनाङ्तद्धिते** ॥ ९३ ॥ आङन्तं तद्धितान्तं च मुक्ताऽन्यस्मिन्पदे निमित्तकार्यिणोरन्तरे नो ण् न स्यात् । प्रावनद्धम्, रोषभीममुखेन । अनाङीति किम् ? प्राणद्धम् । अतद्धित इति किम् ?

ग्रहणम् । पूगो गकारः पवतेर्निवृत्त्यर्थः । प्रख्यायत इति प्रख्यानमनट्प्रत्ययः । प्रख्याति कश्चित्, तं प्रख्यान्तमन्यः प्रयुङ्क्ते, णिग्, 'अर्त्तिरी' पोन्तः प्रख्याप्यत इति प्रख्यापनम् । एवमग्रेऽपि । अण्यन्तेभ्यः स्वरादिति नित्यम्, ण्यन्तेभ्यश्च 'णेर्वे'ति विकल्पे प्राप्ते निषेधः । वेपस्तु 'व्यञ्जनादेरि'त्यण्यन्तादपि विकल्पे प्राप्ते प्रतिषेधः ॥ देशे, अन्तरः पञ्चमी, अयनश्च हन् च तस्य ॥ अदुरुपसर्गान्तर इति निवृत्तम्, पृथगन्तःशब्दोपादानात् । नेति वर्त्तते, एवमग्रेऽपि । अंतरय्यतेऽस्मिन्नित्यन्तरयनो देशः । 'स्वरादि'नि 'हन' इति च क्रमेण णत्वे प्राप्ते निषेधः ॥ षात्, पदे ॥ सार्पिषः पानं सर्पिष्पानं, 'स्वरादि'ति प्राप्ते प्रतिषेधः । अत्र षकारोऽश्रितणत्वस्याभावेऽपि रेफाश्रितं णत्वं कथं न स्यादिति चेदुच्यते, यत्र णत्वस्य निमित्तद्वयं भवति तत्र प्रत्यासत्त्याऽनन्तरमेव गृह्यते, अतो न रेफाश्रितं णत्वम् ॥ पदे, अन्तरे, न आङ् अनाङ् तस्मिन्, न विद्यते तद्धितो यस्मात्तस्मिन् । अनाङि अतद्धित इत्याङन्ततद्धितान्तयोर्वर्जनम् । प्रावनद्धमित्यत्र रकारनकारयोर्मध्ये आङभिन्नस्यावस्य सत्त्वान्न णत्वम् । अत्र रोषेण भीमं रोषभीमम्, रोषभीमं मुखं यस्येति विग्रहे भीमपदस्य तृतीयासमासे

आर्द्रगोमयेण ॥ **हनो घि** ॥ ९४ ॥ हन्तेर्नो घिनिमित्तकार्यिणो-रन्तरे सति णू न स्यात् । शत्रुघ्नः ॥ **नृतेर्यङि** ॥ ९५ ॥ नृतेर्नो यङ्विषये णू न स्यात् । नरीनृत्यते, नरिनर्त्ति । यङीति किम् ? हरि-णर्त्ती नाम कश्चित् ॥ **क्षुभ्नादीनाम्** ॥ ९६ ॥ एषां नो णू न

उत्तरपदत्वेन 'वृत्त्यन्तोऽसषे' इति पदत्वप्रतिषेधाद्रोषभीममुखेनेत्यत्र निमित्तनिमित्तिनोरन्तरे व्यवधायकपदत्वाभावात्सूत्रमिदं न प्रवर्तेत, अतो भीमश्च तन्मुखश्च भीममुखम्, रोषेण भीममुखं यस्य स इति समासः कर्त्तव्यः, तथा च भीमपदस्य वृत्त्यन्तत्वाभावेन पदत्वप्रति-षेधकाभावादनेन णत्वप्रतिषेधः । अथवा पदपदं पदत्वयोग्यपरं भूत-पूर्वपदं वा, एवमुत्तरपदमपि समासचरमावयवपरं तेन यथाश्रुतमपि सङ्गच्छते । तेन रोषेण भीमं मुखं यस्येति विग्रहेऽप्यदोषः । प्रण-ह्यते स्मेति प्राणद्धम्, 'अदुरुपसर्गे'ति णत्वम् । गोः पुरीषं गोमयं 'गोः पुरीषे' इति मयट् । आर्द्रं च तद् गोमयं च, तेनात्र गोशब्दः पदम्, स एव व्यवधायकम्, ततः परं तद्धितस्य तद्धितप्रत्ययस्य सत्त्वात्, गोमयशब्दस्तु पदत्वेन न ग्राह्यः, 'वृत्त्यन्तोऽसषे' इति पदत्व-निषेधात्, तस्य गोर्व्यवधानान्न निषेधः, 'कवर्गैकस्वरवती'ति णत्वम् ॥ हनः षष्ठी, घि सप्तमी । शत्रून्हन्तीति शत्रुघ्नः । 'ब्रह्मादिभ्य' इति टकप्रत्ययः, 'गमहने' त्यलोपः, 'हनो ह्नो घ्नः' संज्ञायां 'पूर्वपद-स्थान्नाम्न्यग' इति, असंज्ञायां 'कवर्गैकस्वरवती'ति णत्वे प्राप्तेऽनेन निषेधः ॥ नृतेः षष्ठी, यङि ॥ नृतैच् नर्तने, भृशं पुनः पुनर्वा नृत्यति । 'रषृवर्णादि'ति प्राप्ते निषेधः । हरिरिव नृत्यतीत्येवंशीलो हरिणर्त्ती 'अजातेः शीले' णिन्, 'पूर्वपदस्थे'ति णत्वम् ॥ क्षुभ्न आदिर्येषां तेषाम् ॥ आचार्यस्य भार्या, 'मातुलाचार्ये'ति ङीः, आन्-चान्तः, आचार्यानी । क्षुभ्नेति लुप्तविभक्तिनिर्देशेन धातुग्रहणं न तु यङ्लुबन्निवृत्त्यर्थम्, अनुबन्धनिर्देशे हि क्षोभणमित्यादौ निषेधा-

स्यात् । क्षुभ्नाति, आचार्यानी ॥ **पाठे धात्वादेर्णो नः** ॥ ९७ ॥ पाठे धात्वादेर्णो नः स्यात् । नयति । पाठ इति किम् ? णकारीयति । आदेरिति किम् ? रणति ॥ **षः सोऽष्ठ्यैष्ठिवष्वष्कः** ॥ ९८ ॥ पाठे धात्वादेः षः सः स्यात्, न तु ष्ठ्यैष्ठिवष्वष्कां सम्बन्धी स्यात् । सहते । आदेरित्येव ? लषति । ष्ठ्यादिवर्जनं किम् ? ष्ठ्यायति, ष्ठीव्यति, ष्वष्कते ॥ **ऋरलृलं कृपोऽकृपीटादिषु** ॥ ९९ ॥ कृपेर्ऋत लृत्, रस्य च ल् स्यात्, न तु कृपीटादिविषयस्य । क्लृप्यते, क्लृप्तः, कल्पते, कल्पयति । अकृपीटादिष्विति किम् ? कृपीटः, कृपाणः ॥

प्रवृत्तेः णत्वं भवति ॥ पाठे, धातोरादिर्धात्वादिस्तस्य, णः षष्ठी, नः प्रथमा ॥ णकारमिच्छति, सर्वे च नकारादयो धातवो नोपदेशाः, नृतिः, नन्दि, नर्दि, नशि, नाटि, नक्कि, नाधृ, नाथृ, नृवर्जम् । नन्वादिग्रहणं किमर्थं तमन्तरेणापि भणित्यादौ णोपदेशबलात् नत्वं न भविष्यति, अन्यथा भनित्येव पठ्येत, मैवम्, णोपदेशस्य 'अदुरुपसर्गे'ति णत्वे फलमस्ति, तथाहि, उपसर्गपूर्वस्य प्रभणति, अन्यत्र तु भनतीति स्यात्, अत आदिग्रहणं कर्त्तव्यमेव ॥ षः षष्ठी, स प्रथमा, ष्ठ्यैश्च ष्ठिवश्च ष्वष्क् च ततो नञ्समासस्तस्य । पाठे धात्वादेरित्यनुवर्तते । षहि मर्षणे, अनेन सूत्रेण सह् । ष्ठ्यैं संघाते, ष्ठिवू निरसने, ष्वष्कि गतौ । स्वरदन्त्यपरसकारादयः स्मि स्विदि स्वदि स्वञ्जि स्वपयश्च षोपदेशाः । सृपि सृजि स्त्या स्तृ स्तृ सृ सेकृवर्जम् ॥ ऋश्च ॠ च ऋर् तस्य, लृश्च लश्च लृलम्, कृपः षष्ठी, कृपीट् आदिर्येषान्ते, न कृपीटादयस्तेषु ॥ कृपौङ् सामर्थ्ये, 'क्यः शिति' वर्तमाने ते, अनेन लृकारः, क्तप्रत्यये क्लृप्तः । कल्पते वर्तमाने ते, शव्, 'लघोरुपान्त्यस्ये'ति गुणः, अनेन रस्य लः । अथ 'वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते' इति न्यायादृकारलृकारयो रेफलकारग्रहणेनैव ग्रहणात्किं द्वयोरुपादानेन कृपे रोल इत्येव क्रियताम्, ऋका-

उपसर्गस्यायौ ॥ ११० ॥ उपसर्गस्थस्य रस्यायतौ परे ल् स्यात् । प्लायते, प्लुत्ययते ॥ **ग्रो यङि** ॥ १०१ ॥ यङि परे गिरते रो ल् स्यात् । निजेगिल्यते ॥ **नवा स्वरे** ॥ १०२ ॥ ग्रो रः स्वरादौ प्रत्यये परे विहितस्य ल् वा स्यात् । गिलति, गिरति, निगाल्यते, निगार्यते । विहितविशेषणं किम् ? गिरः ॥ **परेर्घाऽङ्क्योगे** ॥ १०३ ॥ परिस्थस्य रो घादौ परे ल् वा स्यात् । पलिघः, परिघः ।

रमध्ये हि अर्धमात्रो रेफोऽग्रे, पश्चाच्च तुरीयः स्वरभागोऽस्ति, एवं लृकारेऽर्धमात्रो लः, पश्चाच्च तुरीयः स्वरभाग इति वृद्धाः प्राहुः, इति चेन्मैवम्, क्वचिद् वर्णैकदेशानां वर्णग्रहणेनाग्रहणमिति ज्ञापनार्थत्वात्, अत एव 'रषृवर्णादि'त्यत्र रेफऋवर्णयोरुभयोर्ग्रहणम्, अन्यथा रेफग्रहणेनैव ऋवर्णस्यापि प्राप्तौ तदुपादानं व्यर्थं स्यात् ॥ उपसर्गस्य, अयौ सप्तमी ॥ ऋरलृलमित्यनुवर्तमानमपि रो लमित्येव सम्बध्यते, प्लायत इत्यत्र रस्य लः, प्लुत्ययते, अत्र प्रते रस्य लः । निरयते, दुरयत इत्यादौ तु निरुदुसोः रुत्वस्याऽसिद्धत्वान्न लत्वम्, अयीति इकारनिर्देशोऽपि गतावित्यस्य परिग्रहार्थः ॥ ग्रः षष्ठी, यङि ॥ पूर्ववदनुवृत्तिः । गॄ निगरणे, गर्हितं निगिरति निजेगिल्यते ॥ नवा, स्वरे ॥ ग्रः, ऋरलृलमित्यनुवर्तन्ते । 'सप्तम्या आदिः', स्वरादिप्रत्यये परतस्तन्निमित्तो यो रस्तस्यैव लकारो भवति । गॄत् निगरणे, वर्तमाने तिव्, 'तुदादेः शः' तस्य ङित्त्वात् तन्निमित्तः 'ऋतां क्ङितीर्' अनेन रकारस्य लः । निगाल्यते, अत्र निपूर्वात् गृधातोर्णौ वृद्धौ, अनेन लत्वस्य निलोपस्य च प्राप्तौ नित्यत्वात्पूर्वं निलोपः । न च 'प्रत्ययलोपे प्रत्ययलक्षणमि'ति न्यायेन लत्वमपि नित्यमिति वाच्यम्, वर्णाऽऽश्रये प्रत्ययलक्षणस्य निषेधात् । गिर इत्यत्र क्विब्निमित्त इर्, न तु स्वरादिप्रत्ययनिमित्त इति न लत्वम् ॥ परेः षष्ठी, घश्च अङ्कश्च योगश्च तस्मिन् ॥ ऋरलृलमिति वर्तते । परिहन्यतेऽनेनेति पलिघः ।

पल्यङ्कः, पर्यङ्कः । पलियोगः, परियोगः ॥ **ऋफिडादीनां डश्च लः** ॥ १०४ ॥ एषामृरलृलौ, डस्य च ल् वा स्यात् । ऋफिडः, लृफिलः । ऋतकः, लृतकः । कपरिका, कपलिका ॥ **जपादीनां पो वः** ॥१०५॥ एषां पो वो वा स्यात् । जवा, जपा । पारावतः, पारापतः ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञ-शब्दानुशासनलघुवृत्तौ द्वितीयस्याध्यायस्य षत्वणत्व-प्रकरणात्मकस्तृतीयः पादः समाप्तः ॥ २ ३ ॥

अङ्कमङ्केन वा परिगतः पल्यङ्कः । एवं पलियोगः ॥ ऋफिडः आदिर्येषान्तेषाम्, डः षष्ठी, च, लः प्रथमा ॥ चकारेण ऋरलृलमित्यस्याऽनुकर्षः ॥ जपा आदिर्येषां तेषाम्, पः षष्ठी, वः प्रथमा ॥

इति द्वितीयाध्यायस्य तृतीयपादे षत्वणत्वप्रकरणात्मकः अवचूरिपरिष्कारः समाप्तः ॥



॥ अथ द्वितीयाध्याये चतुर्थः पादः ॥

स्त्रियां नृतोऽस्वस्रादेर्ङीः ॥ १ ॥ स्त्रीवृत्तेर्नान्ताद्दन्ताच्च स्वस्रादिवर्जाद् ङीः स्यात् । राज्ञी, अतिराज्ञी, कर्त्री । स्त्रियामिति

स्त्रियाम्, न् च ऋच्च नृत्तस्मात्, स्वसा आदिर्यस्यासौ, न स्वस्रादिरस्वस्रादिस्तस्मान्ङीः । नाम्न इति विशेष्यं सामर्थ्यात्प्राप्तम्, नृत इति विशेषणम्, तदन्तविधिश्च । राजन् ङीः, अनोऽस्येत्यलोपः, तवर्गस्येति न् ञ् जञोर्योगे ज्ञः । स्त्रीप्रत्ययप्रकरणे तदन्तविधेरिष्टत्वात्पूजितो राजाऽतिराजा, स्त्री चेदतिराज्ञी । पूजास्वतेरिति समासान्तनिषेधः । स्त्रीत्वे वर्तमानात्कर्तृशब्दान्ङीः प्रत्ययः कर्त्री । पञ्चेति नान्तस्य सङ्ख्यावाचिनो युष्मदस्मदोरिवालिङ्गत्वान्नकारलोपेऽपि आदित्वाबपि न भवति । स्वस्रादिश्च—स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा, याता मातेति सप्तैते स्वस्रादय उदाहृताः ॥ १ ॥ अत्र, स्तनकेशवती नारी लोमशः पुरुषः स्मृतः । उभयोरन्तरं यच्च, तदभावे नपुंसकम् ॥ २ ॥ इति लोके तत्तच्चिह्नं दृष्ट्वाऽयं पुमानियं स्त्री, इदं नपुंसकमिति व्यवहारः प्रवर्तते, स्तनकेशादिव्यञ्जिता सा स्त्रीत्वादि जातिर्नात्र ग्राह्या, अचेतने खट्वादौ तदभावात् । दारानित्यादौ नत्वाभावप्रसङ्गात् । तटस्तटी तटमित्यादौ लिङ्गत्रयप्रयुक्तकार्याभावप्रसङ्गाच्च । अतः पारिभाषिकमेव लिङ्गत्रयं ग्राह्यम्, सत्त्वरजस्तमसामुपचयः पुंस्त्वम्, तेषामपचयः स्त्रीत्वम्, तेषां स्थितिर्नपुंसकत्वमिति । सर्वे हि पदार्थाः परिणामिनः, अत आविर्भावतिरोभावधर्मकाः, मध्ये स्थितेरप्यवश्यम्भावात्स्थितिधर्मका अपीति, उपचया-

किम् ? पञ्च नद्यः । अस्वस्रादेरिति किम् ? स्वसा, दुहिता ॥ अधा-

---

पचयस्थितयो वस्तुमात्रधर्माः खट्वाद्यचेतनसाधारणा इति गुणोपचयादिरूपं लिङ्गम् । तच्चावस्थात्रयं केवलान्वयी पदार्थमात्रवृत्तित्वात्, इयं व्यक्तिरिदं वस्तु, अयं पदार्थ इति वस्तुमात्रे त्रिविधव्यवहारस्य दर्शनात् । तत्र कश्चिच्छब्द उपचयावस्थाविशिष्टस्य बोधक इति पुल्लिङ्गे शक्तः, कश्चिच्चापचयावस्थाविशिष्टस्येति स्त्रीलिङ्गे, कश्चित्तु स्थित्यवस्थाविशिष्टस्येति नपुंसकलिङ्गे, कश्चिच्चावस्थाद्वयविशिष्टस्येति द्विलिङ्गे, कश्चिच्चावस्थात्रयविशिष्टस्येति त्रिलिङ्गे, इत्येवं व्यवस्था लिङ्गानुशासनतो वृद्धव्यवहारतश्च निर्णीयते । नन्वेते ङ्याबादयः स्त्रीप्रत्ययाः स्त्रीत्वस्य द्योतकाः, न तु वाचकाः । तत्र यथा विद्युदादयः शब्दा विना स्त्रीप्रत्ययेन शब्दमहिम्नैव स्त्रीत्वं प्रतिपादयन्ति, तथैव खट्वादयोऽपि प्रतिपादयिष्यन्तीति स्त्रीप्रत्ययविधानं किमर्थमिति चेदुच्यते, विचित्रशक्तयो हि भावा भवन्ति, यथा घटादय आत्मानं प्रदीपापेक्षया प्रकाशयन्ति, प्रदीपस्तु प्रदीपान्तरनिरपेक्षयैव स्वात्मानं प्रकाशयति, घटादयोऽपि क्वचित्प्रदीपसापेक्षाः प्रकाशयन्ति, क्वचिच्च शरीरसंश्लिष्टास्तन्निरपेक्षा एव तथैव शब्दा अपि क्वचित्पदान्तरापेक्षया, क्वचित्तदनपेक्षया च स्त्रीत्वं प्रतिपादयन्ति । तत्रेयं गौरित्यादौ गोशब्द इयमिति पदान्तरापेक्ष एव स्त्रीत्वं प्रतिपाद्यते, पदान्तरापेक्षया क्वचिन्नाममात्रेण, क्वचिच्चादेशप्रत्ययाभ्यां यथा—स्वसादुहितेत्यादयो नाममात्रेण स्त्रीत्वप्रतिपत्तौ समर्थाः । आदेशोऽपि सप्रत्ययेन अप्रत्ययेन च, क्रोष्ट्री कारीषगन्ध्या इत्यादि सप्रत्ययेन । तिस्रश्चतस्र इत्यादिशब्दा अप्रत्ययेन । प्रत्ययोऽपि एकोऽनेको वा, राज्ञी खट्वा इत्येकेन प्रत्ययेन, अनेकेन प्रत्ययेन क्वचित्सान्तरेण क्वचिन्निरन्तरेण क्वचित्सान्तरनिरन्तरेण च । तत्र कालितरा हरिणीतरा इत्यादयः सान्तरेण, अर्याणि भवानीत्यादयो निरन्तरेण, अर्याणितरा भवानितरा इत्यादयः सान्तरनिरन्तरेण, इत्येवं विविधप्रकारायां लिङ्गप्रति-

तूदृदितः ॥ २ ॥ अधातुर्य उदिदृदिच्च तदन्तात्स्त्रीवृत्तेर्ङीः स्यात् । भवती, अतिमहती, पचन्ती । अधात्विति किम् ? सुकन् स्त्री ॥ **अञ्चः** ॥ ३ ॥ अञ्चन्तात्स्त्रियां ङीः स्यात् । प्राची, उदीची ॥ **णस्वराऽघोषाद्वनो रश्च** ॥ ४ ॥ एतदन्ताद्विहितो यो वन्, तदन्ता-

---

पत्तौ नैकः प्रकारः शक्यो नियन्तुं शब्दशक्तिस्वाभाव्यात् ॥ **उच्च ऋच्च उदृत्, उदृदिदनुबन्धो** यस्यासौ उदृदित्, न धातुरधातुः, अधातुश्चासौ उदृदिच्चाधातूदृदित्तस्मात् । नाम्नो विशेषणात्तदन्तविधिः । स्त्रियां ङीरित्यनुवर्तते, एवमग्रेऽपि । भवतीति, भांक् दीप्तौ, भातीति भवति, भातेर्डवतु प्रत्ययः, इदं उदिदन्तनाम्न उदाहरणम् । मह्यते या सा महती, दुहिवहीति कतृप्रत्ययः, ऋदिदन्तनामत्वान् ङीः महती, स्त्रीप्रत्ययप्रकरणे तदन्तविधेरिष्टत्वात्, महान्तमतिक्रान्तातिमहती । अथवा उदिदृदिच्च द्विविधं भवति, नाम प्रत्ययश्चेति, आद्ये उदन्ते अतिभवती अतिमहतीति रूपम्, सर्वादौ भवत्विति उदितः पाठात्, अत्र भवतु उदित्, तदन्तं नामातिभवत्तस्माद् ङीः । केवलभवच्छब्दात्तु व्यपदेशिवद्भावेन ङीर्विधेया । एवं महच्छब्दः शतृवद्भावभूतः ऋदित्तस्मादतिमहतीति ङीप्रत्ययेऽतिमहती, महतीत्यत्र तु व्यपदेशिवद्भावेन । व्युत्पत्तिपक्षाव्युत्पत्तिपक्षाश्रयेण कल्पद्वयं बोध्यम् । सुकन् स्त्रीति, कसुकि गतिशातनयोरिति धातोः सूपसर्गात्किबन्तान्निष्पन्नः, अत्र धातोरेव उदित्वान्नानेन ङीः ॥ **अञ्चः पञ्चमी** । प्राञ्चतीति क्विप्, अञ्चोऽनर्चायाम्, अच् प्राग्दीर्घश्चेत्यादिसूत्रैः सिद्ध्यति, प्राची, अनेन ङीः । अञ्च इति कृतनलोपाभावस्य धातुरूपस्याञ्चेर्निर्देशस्तेनार्चाविवक्षणे नलोपाभावे तदविवक्षणे लोपेऽपि ङीः सिद्ध्यति, प्राञ्ची प्रत्यञ्चीत्यादि । अच इति कृतनलोपस्य निर्देशे तु, अत्र नलोपाभावाद् ङीर्न स्यात् ॥ **णश्च स्वराश्चाघोषश्च तस्माद्वनः पञ्चमी,** रः प्रथमा, च ॥ वन इति वन् कनिप्

स्त्रियां ङीः स्यात्, तद्योगे वनोऽन्तस्य रश्च । अवावरी, धीवरी, मेरुदृश्वरी । णस्वराघोषादिति किम् ? सहयुध्वा स्त्री । विहितविशेषणं किम् ? शर्वरी ॥ **वा बहुव्रीहेः** ॥ ५ ॥ णस्वराघोषाद्विहितो यो वन्, तदन्ताद्बहुव्रीहेः स्त्रियां ङीर्वा स्यात्, रश्चान्तस्य । प्रियावावरी, प्रियावावा । बहुधीवरी, बहुधीवा । बहुमेरुदृश्वरी, बहुमेरुदृश्वा ॥ **वा पादः** ॥ ६ ॥ बहुव्रीहेस्तद्धेतुकपाच्छब्दान्तात्स्त्रियां ङीर्वा स्यात् ।

ङ्वनिपामविशेषेण ग्रहणम् । कचिन्निरनुबन्धग्रहणे सानुबन्धस्यापि ग्रहणमिति न्यायात् प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणमिति न्यायेन वन्प्रत्ययस्य ग्रहणे वनन्तस्य नाम्नस्तदन्तस्य च भवति। अत एव मेरुदृश्वरीत्युदाहृतम् । ओणृ अपनयने, ओणतीति अवावा, सा अवावरी वन्प्रत्ययः । वन्याङ्पञ्चमस्य णस्य आः, अवादेशोऽनेन ङीः, अवावन् ई इति जाते, वनो नस्यानेनैव सूत्रेण रकारेऽवावरी । दधाति या सा धीवरी, कनिपि ईर्ध्यङ्यणे इति ईत्वेऽनेन ङीः, नस्य च रः । मेरुं दृष्टवती मेरुदृश्वरी, अघोषान्ताद् दृशः धातोः कनिपि रूपम् । सह योधितवतीति सहयुध्वा, अत्र न ङीर्घोषत्वात् । शृशृ हिंसायाम्, शृणातीति शर्वरी, स्वराद्विहिते वन्प्रत्यये परे गुणे कृते घोषवतः शर्वन्शब्दात् यथा ङीः रश्च स्यातामतो विहितविशेषणम् । पाणिनीयेऽवावा इत्येव रूपम्, न त्ववावरीति । उक्तप्रयोगेषु नान्तत्वादेव ङीः स्त्रियां नृत इत्यनेन सिद्धा, तथापि णस्वराघोषादेव वनो ङीर्भवतीति नियमार्थं रविधानार्थञ्च वचनम्, तेन सहयुध्वेत्यादौ स्त्रियां नृत इत्यनेनापि ङीर्न भवति ॥ वा, **बहुव्रीहेः पञ्चमी** । पूर्वसूत्रमनुवर्तते । प्रियोऽवावा यस्याः सा प्रियावावरी, पक्षे ङीप्रत्ययाभावे प्रियावावा । बहवो धीवानो यस्याः सा बहुधीवरी, पक्षे बहुधीवा, राजन्शब्दवद्रूपम् । बहवो मेरुदृश्वानो यस्याः सा बहुमेरुदृश्वरी नगरी, नस्य रः ॥ वा, **पादः पञ्चमी** । बहुव्रीहेरित्यनुवर्तते । तच्च पदं पाच्छब्दस्य

द्विपदी, द्वीपात् । बहुव्रीहिनिमित्तो यः पाद् इति विशेषणादिह न स्यात् । पादमाचष्टे क्विपि पाद्, त्रयः पादोऽस्याः सा त्रिपात् ॥ ऊधनः ॥ ७ ॥ ऊधन्नन्ताद्बहुव्रीहेः स्त्रियां ङीः स्यात् । कुण्डोध्नी ॥ **अशिशोः** ॥ ८ ॥ अशिश्विति बहुव्रीहेः स्त्रियां ङीः स्यात् । अशिश्वी ॥ **सङ्ख्यादेर्हायनाद्वयसि** ॥ ९ ॥ सङ्ख्यादेर्हायनान्ताद्बहुव्रीहेः स्त्रियां ङीः स्यात्, वयसि गम्ये । त्रिहायणी, चतुर्हायणी वडवा । वयसीति किम् ? चतुर्हायना शाला ॥ **दाम्नः** ॥ १० ॥ सङ्ख्यादेर्दामन्नन्ताद्बहुव्रीहेः स्त्रियां ङीः स्यात् । द्विदाम्नी । सङ्ख्यादेरित्येव ?

विशेषणमत एवोक्तं तद्धेतुकपाच्छब्दान्तादिति, बहुव्रीहिनिमित्तो यः पाच्छब्दस्तदन्तादित्यर्थः । द्वौ पादौ यस्याः सा द्विपदी, सुसङ्ख्यादित्यनेन बहुव्रीहौ पादस्य पादादेशस्ततोऽनेन वा ङीः, यस्वरे पाद इति पाच्छब्दस्य पदादेशः, ङीप्रत्ययाभावे तु न पदादेशः, द्विपात् ॥ **ऊधनः पञ्चमी** । बहुव्रीहेरित्यनुवर्तते । नाम्नो विशेषणत्वात्तदन्तविधिः । ऊधन्निति कृतनकारादेशस्य ऊधसो ग्रहणम् । कुण्डवदूधो यस्याः सा कुण्डोध्नी, 'स्त्रियामूधसोन्' सस्य न्, अनोऽस्य, ङीः, कुण्डोध्नी । अनो वेति विकल्पे प्राप्ते वचनम् ॥ **अशिशोः पञ्चमी** । बहुव्रीहेरित्यनुवर्तते । अविद्यमानः शिशुरस्या इत्यशिश्वी, अनेन ङीः, इवर्णादेरस्वेस्वरे, पृथग्योगान्न तदन्तविधिः ॥ **सङ्ख्या आदिर्यस्यासौ तस्मात्, हायनात्, वयसि** । बहुव्रीहेरित्यनुवर्तते । त्रीणि हायनानि वर्षाणि यस्याः सा, चतुस्रेर्हायनस्य वयसीति णत्वम् । चतुर्हायना इति, कालकृता प्राणिनां शरीरावस्था वय इति ङीर्णत्वञ्च न भवतः ॥ **दाम्नः पञ्चमी** । बहुव्रीहेः सङ्ख्यादेरित्यनुवर्तते । अनो वेत्यस्यापवादः । द्वे दाम्नी यस्याः सा द्विदाम्नी । उदूर्ध्वमुद्गतं वा दाम यस्याः सा तामुद्दामानम् । अनो वेति विकल्पतो ङीः, पक्षे विक-

उद्दामानं पश्य ॥ **अनो वा** ॥ ११ ॥ अन्नन्ताद्बहुव्रीहेः स्त्रियां ङीर्वा स्यात् । बहुराज्ञ्यौ, बहुराजे, बहुराजानौ ॥ **नाम्नि** ॥ १२ ॥ अन्नन्ताद्बहुव्रीहेः स्त्रियां संज्ञायां नित्यं ङीः स्यात् । अधिराज्ञी, सुराज्ञी नाम ग्रामः ॥ **नोपान्त्यवतः** ॥ १३ ॥ यस्योपान्त्यलुग् नास्ति, तस्मादन्नन्ताद्बहुव्रीहेः स्त्रियां ङीर्न स्यात् । सुपर्वा, सुशर्मा । उपान्त्यवत इति किम् ? बहुराज्ञी ॥ **मनः** ॥ १४ ॥ मन्नन्तात्स्त्रियां

ल्पेन डाप्, तस्याप्यभावे उद्दामा, तस्य द्वितीयायामुद्दामानम् । डापि तु डित्यनो लोपादुद्दामाम्, ङ्यां तु, अनोऽस्येत्यलोपे उद्दाम्नीम् । रूपत्रयस्य स्पष्टप्रतिपत्तये द्वितीयान्तं प्रत्युदाहृतम् ॥ **अनः पञ्चमी, वा** । अनिनस्मन्ग्रहणान्यर्थवताऽनर्थकेन च तदन्तविधिं प्रयोजयन्तीति **न्यायेन** तदन्तविधिप्रवृत्तिः । उत्तरत्र सूत्रे उपान्त्यवतः प्रतिषेधादुपान्त्यलोपिन एवायं विधिः । बह्वो राजानो ययोस्ते बहुराज्ञौ, अनेन ङीः, अनोऽस्य, अलोपः, पक्षे डापि अन्लोपे औरीः बहुराजे, पक्षे बहुराजानौ ॥ **नाम्नि** ॥ बहुव्रीहेरित्यनुवर्तते । अनो वेत्येव सिद्धौ पृथक् सूत्रकरणं नित्यत्वसूचनार्थम् । अधिको राजा यस्यां साधिकराज्ञी, ग्रामविशेषस्य संज्ञा । अयमप्युपान्त्यलोपिन एव भवति । शोभनो राजा यस्यां सा सुराज्ञी ॥ **न, अन्तस्य** समीपमुपान्तं उपान्ते भव उपान्त्यः, सोऽस्यास्तीति तस्मात् । बहुव्रीहेरन इत्यनुवर्तते । सुपर्वा इत्यादौ न वमन्तसंयोगादित्युपान्त्यलोपनिषेधः, ततश्चानो वेति स्त्रियां नृत इति वा सूत्रेण न ङीः, उभयोरनेन प्रतिषेधात् । बहुराज्ञी, पूर्ववत् ॥ **मनः पञ्चमी** । नेति वर्तते । योगविभागादत्र बहुव्रीहेरिति न सम्बध्यते । अतिमहिमा इत्यादावपि अनिनस्मन्ग्रहणानीति **न्यायात्** ङीप्रतिषेधः । सीमा इत्यत्र मन् सार्थकः, अतिमहिमेत्यत्र मन्नर्थकः, इमन्प्रत्ययत्वात् । आपोऽपि निषेध

ङीर्न स्यात् । सीमानौ । **ताभ्यां वाप् ङित् ॥ १५ ॥** मन्नन्ताद्बहुव्रीहेश्चान्नन्तास्त्रियामाब्वा स्यात्, स च ङित् । सीमे, सुपर्वे । पक्षे, सीमानौ, सुपर्वाणौ ॥ **अजादेः ॥ १६ ॥** अजादेस्तस्यैव स्त्रियामाप्

इति ज्ञापयितुं सीमानावित्युक्तम् ॥ **तच्च तच्च ताभ्याम्, वा, आप्, ङित्** । तच्छब्देन मनोऽनश्च परामर्शः, तदन्तविधिः । अत्र बहुव्रीहेरित्यन्नन्तेनैव सम्बध्यते, न तु मन्नन्तेन, अनो वा मन इति सूत्रद्वयानुसारात् । सीमे इत्यापि ङित्वात् ङित्यन्त्यस्वरादेरित्यन्लोपे सीमा औ इत्यत्र औतेत्यनेन सिद्धिः, सुपर्वे इति त्वन्नन्तबहुव्रीहेः प्रथमाद्विवचने रूपम् । पक्षे पूर्वसूत्राभ्यां प्रतिषेधात् ङीर्न भवति, सीमानाविति । उपान्त्यलोपिनस्तु बहुव्रीहेर्ङीरपि भवति यथा बहुराजे बहुराजानौ बहुराज्ञौ इति । ङित्करणमन्त्यस्वरादिलोपार्थम् । डाबित्यनुक्त्वाऽऽपो ङिद्विधानमुत्तरसूत्रेष्वापोऽनुवृत्त्यर्थम् ॥ **अज आदिर्यस्यासौ तस्मात्** । आबित्यनुवर्तते । **अजादेरित्यावृत्त्या** षष्ठ्यन्तत्वेन विपरिणामादुक्तम् । अजादेस्तस्यैवेति, अजादिमात्रवाच्यस्त्रीत्वे वर्तमानादित्यर्थः । अजा जातिलक्षणे ङीप्रत्यये प्राप्ते तदपवाद आप् । बाला वयोलक्षणस्य ङीप्रत्ययस्यापवाद आप् । ज्येष्ठा धवयोगलक्षणस्य ङीप्रत्ययस्यापवादः । क्रुञ्चा व्यञ्जनान्तत्वेनाऽप्राप्तेरजादिगणे पाठः । अजादेरित्यस्याऽऽवर्तनादजादिसम्बन्धिन्येव स्त्रीत्वेऽभिधेये सति आप् यथा स्यात्, तेन पञ्चानामजानां समाहारः पञ्चाजीत्यत्र समासार्थसमाहारनिष्ठसमुदायवाचिस्त्रीत्वेऽजाशब्दमात्रवाच्यत्वाभावेन नाप् । न च नामग्रहणेन तदन्तविधिरिति न्यायादजाद्यन्तात्पञ्चाजीशब्दादापोऽप्राप्त्याऽजादेरित्यस्यावर्तनं निरर्थकमिति वाच्यम्, अत एव हि ज्ञापकात्स्त्रीप्रकरणे तदन्तादपि विधेर्भावात् । तेन महांश्चासावजश्चेति सामान्येन विग्रहे स्त्रीविवक्षायां महाजा परमाजेति सिध्यति ॥

स्यात्। अजा, बाला, ज्येष्ठा, कुञ्चा ॥ **ऋचि पादः पात्पदे** ॥ १७ ॥ कृतपाद्भावपादस्य ऋच्यर्थे पात्पदेति निपात्यते। त्रिपदा, त्रिपाद्गायत्री। ऋचीति किम्? द्विपात्, द्विपदी ॥ **आत्** ॥ १८ ॥ अकारान्तात्स्त्रियामाप् स्यात्। खट्वा, या, सा ॥ **गौरादिभ्यो मुख्याद् ङीः** ॥ १९ ॥ गौरादिगणान्मुख्यात्स्त्रियां ङीः स्यात्। गौरी, शबली। मुख्यादिति किम्? बहुनदा भूमिः ॥ **अणञ्येयेकण्नञ्स्नञ्टिताम्** ॥ २० ॥ अणादीनां योऽत्, तदन्तात्तेषा-

---

ऋचि सप्तमी, **पादः** षष्ठी, पाच्च पदा च पात्पदे। पाद इति कृतपाद्भावः पादशब्दो गृह्यते। त्रयः पादा यस्याः सा त्रिपात् त्रिपदा वा गायत्री, ऋच् वेदवाक्यमित्यर्थः। सुसङ्ख्यादिति समासान्तः पाद्, अनेन स्त्रीप्रत्ययविशिष्टस्य पात्पदा वा निपात्यते। प्रत्युदाहरणे वा पाद इति वा ङीः ॥ **आत्**। **आबित्यनुवर्तते**। खट् कांक्षे, खट्यते आकाङ्क्ष्यते शयालुभिरिति खट्वा। 'लटि खटि खलि' वप्रत्ययः, अनेनाऽऽप्। अतिखट्वः प्रियखट्व इत्यादिप्रयोगदर्शनात्खट्वाशब्दस्याकारान्तत्वम्, अन्यथा गोश्वान्त इति ह्रस्वो न स्यादाबन्तत्वाभावात् ॥ **गौर आदिर्येषान्ते** गौरादयस्तेभ्यो मुख्यात्, ङीः। गौरशब्दात्स्त्रीत्वेऽनेन ङीः गौरी, बहवो नदा यस्यां सा बहुनदा भूमिः, अन्यपदार्थप्रधानत्वादत्र नदीशब्दो न मुख्यवृत्तिः ॥ **ट् इदनुबन्धो यस्य स टित्, अण् चाञ् च एयश्चेकण्च नञ् च स्नञ् च टिच्च तेषाम्**। आदिति मुख्यादिति च वर्तते, अत एव तेषामेवेत्युक्तम्, तस्य विशेषणमणादयः। आच्च नाम्नो विशेषणम्। उपगतो गौर्येन स उपगुः, उपगोरपत्यं स्त्री औपगवी, ङसोऽपत्ये इत्यण् प्रत्ययः। अस्वयम्भुवोऽव्, अनेन ङीरौपगवी। बिदस्यापत्यं पौत्री बैदी अञ्, आदिवृद्धिः। सुपर्ण्या अपत्यं स्त्री सौपर्णेयी, ङ्याप्प्रातिपदिकात्प्लुङ इत्येयण्प्रत्ययः, अनेन ङीः। एय इति निरनुबन्धग्रहणादेयणेयच् एयञां ग्रहणम्, तेन शिलेयी शैलेयी-

मेव स्त्रियां ङीः स्यात् । औपगवी, वैदी, सौपर्णेयी, आक्षिकी, स्त्रैणी, पौंस्नी, जानुदघ्नी ॥ **वयस्यनन्त्ये ॥ २१ ॥** कालकृता शरीरावस्था वयस्तस्मिन्नचरमे वर्त्तमानादकारान्तात्स्त्रियां ङीः स्यात् । कुमारी, किशोरी, वधूटी । अनन्त्य इति किम् ? वृद्धा ॥ **द्विगोः समाहारात् ॥ २२ ॥** समाहारद्विगोरदन्तात्स्त्रियां ङीः स्यात् । पञ्चपूली,

---

त्यादिसिद्धिः । अक्षैर्दीव्यति आक्षिकी, "तेन जितजयदि"तीकण्प्रत्ययः । स्त्रिया अपत्यं स्त्री स्त्रैणी, पुंसोऽपत्यं स्त्री पौंस्नी । प्राग्वतः स्त्रीपुंसाद् नञ् स्नञ् इति क्रमेण नञ्स्नञ्प्रत्ययौ । जानु प्रमाणमस्याः सा जानुदघ्नी, वोर्ध्वं दघ्नट् द्वयसडिति दघ्नट् प्रत्ययः । तेषामेव स्त्रियामित्युक्तेर्गौतमेन प्रोक्ता नीतिर्गौतमी, तामधीते इत्यणू, तस्य "प्रोक्तादि"ति लोपे, ङ्यादेरित्यादिना ङीलोपे पुनर्ङीर्न भवति, गौतमा कन्या इत्येव रूपम् । इह प्रोक्तार्थे श्रूयमाणो योऽणस्ति तद्वाच्यं न स्त्रीप्रत्ययायोग्यम्, तस्य प्रोक्तार्थमात्रवृत्तेः, यच्च स्त्रीप्रत्ययायोग्यं कन्यार्थवाचि, न तस्याऽकारोऽस्ति, तस्य प्रोक्तादिति लोपात् । ईदृशोऽर्थो व्याख्यानादेवावगम्यः, व्याख्यानतो विशेषार्थप्रतिपत्तिरिति न्यायात् ॥ वयसि, नान्त्यमनन्त्यं तस्मिन् । आदिति सम्बध्यते । कुत्सितो मारः कामो यस्यां सा कुमारी, कुमारीकिशोरीशब्दौ प्रथमे वयसि वर्तमानौ, वधूटीशब्दस्तु यौवनवाची । वयश्चतुर्धा, अर्थप्रकरणादिकमनपेक्ष्य श्रवणमात्रेण यो वयः प्रतिपादयति सोऽत्र वयोवाचा ग्राह्यः, तेनोत्तानशयेत्यादौ प्रकरणादिना वयः प्रतीतावपि न ङीः, व्याध्यादिवशादुत्ताना या शेते तस्या अपि तेन प्रतीतेः, एवं द्विवर्षा त्रिवर्षेत्यादिरपि न वयोवाची शीलादावपि प्रयोगात् । वृद्धकुमारीति तु गौणप्रयोगः । बाला वत्सेत्यादयोऽजादौ पठितत्वादजादेरित्याप्, अन्यथा तत्र पाठवैयर्थ्यापत्तेः ॥ द्वौ गावौ वाणीविशेषौ यत्रासौ

दशराजी ॥ **परिमाणात्तद्धितलुक्यबिस्ताऽऽचितकम्बल्यात्** ॥ २३ ॥ परितः सर्वतो मानं परिमाणं । रूढेः प्रस्थादि, बिस्तादिवर्जपरिमाणान्ताद् द्विगोरदन्तात्तद्धितलुकि स्त्रियां ङीः स्यात् । द्वाभ्यां कुडवाभ्यां क्रीता द्विकुडवी । परिमाणादिति किम् ? पञ्चभिरश्वैः क्रीता पञ्चाश्वा । तद्धितलुकीति किम् ? द्विपण्या ।

द्विगुस्तस्मात्, सम्यगाहरणमेकीभाव इति समाहारस्तस्मात्, द्विगोर्विशेषणमिदं तेन समाहारद्विगुसंज्ञकनाम्नो ग्रहणम् । आदिति वर्तते । पञ्चानां पूलानां समाहारः पञ्चपूली, दशानां राज्ञां समाहारो दशराजी, राजन्सखेरित्यट्प्रत्ययः । नोऽपदस्य तद्धिते इत्यन्लोपः, अस्य ङ्यां लुक् ॥ **परिमाणात्, तद्धितस्य लुक् तस्मिन्**, बिस्तश्चाचितश्च कम्बल्यञ्च, न बिस्ताचितकम्बल्यं तस्मात् । आद्विगोरिति वर्तते । एवमग्रेऽपि । अत्र परिमाणशब्देनाऽऽरोहतः परिणाहतश्च येन काष्ठादिनिर्मितेन धान्यादि मीयते तत्प्रस्थादि गृह्यते । यदाहुः, 'ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः । आयामस्तु प्रमाणं स्यात्, सङ्ख्या बाह्या तु सर्वतः ॥' द्वाभ्यां कुडवाभ्यां क्रीतेत्यत्र मूल्यैः क्रीते इतीकणि, अनाम्न्यद्विः प्लुबिति तल्लुपि, अनेन च ङ्यां तत्सिद्धिः । पञ्चाश्वा, अत्र इकणू तल्लोपश्च, अपरिमाणत्वान्नानेन ङीः, अणञेयेकणित्यनेनापि न ङीः, तेषामेवाणादीनां वाच्यायां स्त्रियां वर्तमानात् ङीर्भवतीति तत्रोक्तेः । द्वाभ्यां पणाभ्यां क्रीता द्विपण्या, पणपाद इति यप्रत्यये तस्य च विधानसामर्थ्यादलुपि सिद्धिः, आदित्यापू च । द्वाभ्यां बिस्ताभ्यां क्रीता द्विबिस्ता, इकण्, द्वित्रिबहोर्निष्कबिस्तादितीकण् लोपः । ननु बिस्तादय उन्मानवचनाः, बिस्तशब्देन हि षष्टिः पलशतान्युच्यन्ते, आचितशब्देन दशभारात्मकं तौलकम् । कम्बल्यशब्देनापि ऊर्णापलशतमुच्यतेऽशीतिशतमित्यन्ये, षट्षष्टिशतमित्यपरे । तत्रापरिमाणत्वाद् ङीप्रसङ्गाभावार्त्ति

बिस्तादिवर्जनं किम् ? द्विबिस्ता, द्व्याचिता, द्विकम्बल्या ॥ **काण्डात्प्रमाणादक्षेत्रे** ॥ २४ ॥ प्रमाणवाचिकाण्डान्तादक्षेत्रविषयाद्, द्विगोस्तद्धितलुकि स्त्रियां ङीः स्यात्। आयामः प्रमाणम्, द्वे काण्डे प्रमाणमस्या द्विकाण्डी रज्जुः । प्रमाणादिति किम् ? द्विकाण्डा शाटी। अक्षेत्र इति किम् ? द्विकाण्डा क्षेत्रभक्तिः ॥ **पुरुषाद्वा** ॥ २५ ॥ प्रमाणवाचिपुरुषान्ताद्विगोस्तद्धितलुकि स्त्रियां ङीर्वा स्यात् । द्विपुरुषी, द्विपुरुषा परिखा । तद्धितलुकीत्येव ? पञ्चपुरुषाः समाहृताः, पञ्चपुरुषी । **रेवतीरोहिणाद्भे** ॥ २६ ॥ आभ्यां नक्षत्रवृत्तिभ्यां स्त्रियां ङीः स्यात्। रेवती, रोहिणी, रेवत्यां जाता रेवती । भ इति किम् ? रेवता ॥

निषेधेनेति चेन्न, देशविशेषे तेषामपि परिमाणार्थत्वात् । बिस्तादिग्रहणात्प्रकृतसूत्रे परिमाणग्रहणेनोन्मानस्यापि ग्रहणात्, उन्मानस्य यदि ङीर्न भवति तर्हि **बिस्तादेरेवेति** नियमार्थत्वाच्च, तेन द्विनिष्कीत्यादि सिद्ध्यति ॥ **काण्डात्, प्रमाणात्,** क्षियन्ति निवन्त्युप्तानि बीजानि वृद्धिं वा गच्छन्त्यस्मिन्निति क्षेत्रम्, न क्षेत्रमक्षेत्रं तस्मिन् । तद्धितलुकीति वर्तते । 'विशेषणमन्तः' षोडशहस्तप्रमाणं दण्डादि काण्डम्, आयाममात्रपरिच्छेदकत्वाच्च प्रमाणम् । द्वाभ्यां काण्डाभ्यां क्रीता द्विकाण्डा शाटी, द्वे काण्डे प्रमाणमस्याः सा द्विकाण्डा क्षेत्रभक्तिः, क्षेत्रविभाग इत्यर्थः । प्रमाणान्मात्रट् प्रत्ययः, द्विगोः संशये चेति मात्रट्लोपः । भक्तिग्रहणं तद्धितार्थस्य स्त्रीत्वार्थम् ॥ **पुरुषात्,** वा । तद्धितलुकि प्रमाणादिति वर्तते । तदन्तविधिः । द्वौ पुरुषौ प्रमाणमस्याः सा, हस्तिपुरुषाद्वेत्यणो द्विगोः संशये चेति लुप् । अनेन वा ङीः । पञ्चपुरुषी, अत्र द्विगोः समाहारादिति नित्यमेव ङीः, तद्धितप्रत्ययस्य कस्याऽप्यभावाल्लुगपि नास्ति ॥ **रेवतश्च रोहिणश्च तस्मात्,** भं नक्षत्रं तस्मिन् । रेवत्यां रेवतीनक्षत्रयुक्ते काले जाता रेवती, अत्र जातार्थे जातस्याणश्चित्रारेवतीति सूत्रेण लुकि ङीप्रत्ययस्यापि लुकि

नीलात्प्राण्यौषध्योः ॥ २७ ॥ प्राणिन्यौषधौ च, नीलात्स्त्रियां ङीः स्यात्। नीली गौः, नीली औषधिः। नीलाऽन्या ॥ **क्ताच्च नाम्नि वा ॥२८॥** नीलात् क्तान्ताच्च स्त्रियां संज्ञायां ङीर्वा स्यात्। नीली प्रवृद्धविलूनी। नीला, प्रवृद्धविलूना ॥ **केवलमामकभागधेयपापापरसमानाऽऽर्यकृतसुमङ्गलभेषजात् ॥ २९ ॥** एभ्यो नाम्नि स्त्रियां ङीः स्यात्। केवली ज्योतिः, मामकी, भागधेयी, पापी, अपरी, समानी, आर्यकृती, सुमङ्गली, भेषजी। नाम्नीत्येव ? केवला ॥

पुनरनेन सूत्रेण ङीः। ननु गौरादिभ्य इत्यस्मान्मुख्याधिकारस्य सत्त्वाद्रेवत्यां जाता रेवतीति विग्रहे कन्यावाचित्वेन नक्षत्रे रेवतीशब्दस्य गौणत्वात्कथमत्रानेन ङीः, उच्यते, अर्थवृत्त्याऽत्र प्राधान्यात्, प्राधान्यञ्च क्वचिच्छब्दवृत्त्या क्वचित्त्वर्थवृत्त्या भवति, अत्र च नक्षत्ररूपोऽर्थो यदि रेवतीशब्दस्य वाच्यो न भवेत्तदा तद्विशिष्टः कालोऽपि वाच्यो न स्यादित्यर्थवृत्त्या प्राधान्यम्। रेवता, आदित्याप्प्रत्ययः ॥ **नीलात्**, प्राणी चौषधिश्च तयोः। नीलीत्यत्र जातिशब्दादपि जातौ नित्यस्त्रीत्वाज्जातेरित्यप्राप्तेऽनेनैव ङीः ॥ **क्तात्, च, नाम्नि वा**। नीलादित्यनुवर्तते। प्रवृद्धा चासौ विलूना चेति प्रवृद्धविलूनी, ओषधिविशेषोऽखण्डः संज्ञाशब्दः, व्युत्पत्तिमात्रमिदं कृतम्, प्रवृद्धा चासौ विलूना चेत्यर्थकथनमात्रं न तु विग्रहः, स तु प्रवृद्धश्चासौ विलूनश्च, स्त्री चेत्प्रवृद्धविलूनीति कार्यः, अन्यथा गौणत्वाभावेन गोश्चान्त इत्यप्रवृत्ततयाऽदन्तत्वविरहेण ङीर्न स्यात् ॥ **केवलश्च मामकश्च भागधेयश्च पापश्चापरश्च समानश्चार्यकृतश्च सुमङ्गलश्च भेषजश्च तस्मात्**। नाम्नीति वर्तते। सर्वत्रानेन ङीः, संज्ञायाम्। मामकशब्दादन्तत्वेनैवाणञेयेकणित्यनेन ङीसिद्धौ नाम्नि नियम्यते, तेनासंज्ञायां मामिका बुद्धिरिति भवति, अत्राञ्लक्षणोऽपि ङीर्न भवति। मामकशब्दस्यैव नाम्नि ङीरिति विपरीतनियमस्तु न भवति संज्ञायां केव-

भाजगोणनागस्थलकुण्डकालकुशकामुककटकवरात् पक्काऽऽवपनस्थूलाऽकृत्रिमामत्रकृष्णाऽऽयसीरिरंसुश्रोणिकेशपाशे ॥ ३० ॥ एभ्यो यथासङ्ख्यं पक्कादिष्वर्थेषु स्त्रियां नाम्नि ङीः स्यात् । भाजी पक्का चेत्, भाजाऽन्या । गोणी आवपनम्, गोणाऽन्या । नागी स्थूला, नागाऽन्या । स्थली अकृत्रिमा, स्थलाऽन्या । कुण्डी अमत्रम्, कुण्डाऽन्या । काली कृष्णा, कालाऽन्या । कुशी आयसी, कुशाऽन्या । कामुकी रिरंसुः, कामुकाऽन्या । कटी श्रोणिः, कटाऽन्या । कबरी केशपाशः, कबराऽन्या ॥ **नवा शोणादेः ॥ ३१ ॥** शोणादेः स्त्रियां ङीर्वा स्यात् । शोणी, शोणा । चण्डी, चण्डा ॥ **इतोऽत्त्यर्थात् ॥ ३२ ॥** त्त्यर्थप्रत्ययान्तवर्जादिदन्ता-

---

लादीनामणिङी प्रत्ययाभावप्रसङ्गात् । केवलान्तात्संज्ञाया अप्रतीतेरिष्टोऽपि तदन्तविधिर्नात्र प्रवर्तते, तेन शोभनो मामकोऽस्या इति विग्रहे सुमामकेत्येव भवति । मामकी मातुलीत्यर्थः, भागधेयी बलिरित्यर्थः, पापी अपरी ओषधिविशेषौ । समानी छन्दः, आर्यकृती क्रियाविशेषः, सुमङ्गली छन्द ओषधिर्वा, भेषजी ओषधिः ॥ भाजश्च गोणश्च नागश्च स्थलश्च कुण्डश्च कालश्च कुशश्च कामुकश्च कटश्च कबरश्च तस्मात्, पक्कश्चाऽऽवपनञ्च स्थूलश्चाकृत्रिमश्चामत्रञ्च कृष्णश्चाऽऽयसी च रिरंसुश्च श्रोणिश्च केशपाशश्च तस्मिन् । नाम्नीति सम्बध्यते । अमत्रं भाजनमित्यर्थः । जानपदी वृत्तिश्चेत्, जानपदान्या इति कौमुद्याम्, तत्र कटशब्दश्च न दृश्यते ॥ नवा, शोणा आदिर्यस्यासौ तस्मात् । शोणो निर्दोषो रक्तवर्णः, शोणीनामा काचित्, एवं चण्डी चण्डा, गुणवचनत्वे तूत्तरेणैव भविष्यति ॥ इतः पञ्चमी, क्तेरर्थः त्त्यर्थः, न त्त्यर्थोऽत्त्यर्थस्तस्मात् । भवति सर्वमस्यामिति भूमिः, धूयते वायुनेति धूलिः, करणं कृतिः, स्त्रियां क्तिः, न करणमकरणिः, 'नञोऽनिः शापे' 'नाम्निनो' अर्, हीनं हानिः, एते त्त्य-

त्स्त्रियां ङीर्वा स्यात् । भूमी, भूमिः । धूली, धूलिः । अक्त्यर्थादिति किम् ? कृतिः, अकरणिः, हानिः ॥ **पद्धतेः** ॥ ३३ ॥ अस्मात्स्त्रियां ङीर्वा स्यात् । पद्धती, पद्धतिः ॥ **शक्तेः शस्त्रे** ॥ ३४ ॥ अस्माच्छस्त्रे स्त्रियां ङीर्वा स्यात् । शक्ती, शक्तिः । शस्त्र इति किम् ? शक्तिः सामर्थ्यम् ॥ **स्वरादुतो गुणादखरोः** ॥ ३५ ॥ स्वरात्परो य उत्तदन्ताद्गुणवचनात्खरुवर्जात्स्त्रियां ङीर्वा स्यात् । पट्वी, पटुः । विभ्वी,

---

र्थप्रत्ययाः, अतो नानेन ङीः ॥ **पद्धतेः पञ्चमी** । क्तिप्रत्ययान्तत्वादप्राप्ते वचनम् । पादाभ्यां हन्यते इति पद्धतिः । श्वादिभ्य इति क्तिः, हिमहतीति सूत्रेण पदादेशः ॥ **शक्तेः पञ्चमी, शस्त्रे** । शक्यते हिंस्यते परोऽनयेति शक्तिः, श्वादिभ्यः क्तिः, शक्तिः प्रहरणविशेषः ॥ **स्वरात्, उतः पञ्चमी, गुणात्, न खरुरखरुस्तस्मात्** । गुणादिति सामान्येनोक्तावपि केवलगुणवृत्तेः स्त्रीत्वायोगात्ततो द्रव्यवृत्तेः प्रत्ययः । अत्र गुणशब्देन कृदन्तसमस्ततद्धितान्तसर्वनामजातिसङ्ख्यासंज्ञाशब्दातिरिक्तः शब्दो गृह्यते, न तु गुणसंज्ञकः, उत इति विशेषणात् । नापि विशेषणम् , आखुर्द्रव्यमित्यादावतिप्रसङ्गात् । नापि नैयायिकाभिमतो गुणः, मृद्वी बुद्धिरित्यादेरसिद्ध्यापत्तेः । उक्तञ्च, सत्त्वे निविशतेऽपैति, पृथग्जातिषु दृश्यते । आधेयश्चाऽक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः ॥ इति **पातञ्जलमहाभाष्ये** । सत्त्वे द्रव्ये, निविशते सम्बध्यते, अपैति ततो निवर्तते, पृथग्भिन्नासु जातिषु जात्याधारेषु, अर्थाद्भिन्नजातीयेषु द्रव्येषु दृश्यते च यः स गुणो यथा शुक्लादिः, स हि घटादौ यस्मिन्सम्बध्यते तस्मादेव पाकादितो निवर्तते । भिन्नजातीयेषु पयःशङ्खादिषु च दृश्यते । एतेन जातेर्गुणत्वनिरासः, जातिर्हि घटत्वादिः, यत्र घटादौ सम्बध्यते, न तं कदाचिदपि जहाति, नवा पटादिषु भिन्नजातीयेषु दृश्यत इति । नन्वेवं क्रियाया अपि गुणत्वं स्यात्, घटादौ कदाचिदेव दर्शनात्, ततो निवृत्तेः पटादिषु दर्शनाच्च,

विभुः । स्वरादिति किम् ? पाण्डुर्भूमिः । गुणादिति किम् ? आखुः स्त्री । अखरोरिति किम् ? खरुरियम् ॥ **इयेतैतहरितभरितरोहिता-द्वर्णात्तो नश्च** ॥ ३६ ॥ एभ्यो वर्णवाचिभ्यः स्त्रियां ङीर्वा स्यात्,

---

अतो विशेषणान्तरमुक्तमाधेय इति, उत्पाद्य इत्यर्थः । अक्रियाजोऽनुत्पाद्य इत्यर्थः । तथा च नित्यानित्यवृत्तिपदार्थविभाजकोपाधिमत्त्वं तदर्थः । गुणत्वं हि अनित्ये पाकजरूपादौ नित्ये आकाशमहत्त्वादिषु च वर्तते, तद्वान्शुक्लादिरेव । क्रियात्वं तु न नित्यवृत्तिः, कर्मणोऽनित्यैकरूपत्वात् । एवमप्यवयविद्रव्येऽवयवेषु वर्तमानेऽवयवसंयोगनिवृत्तौ *निवर्तमाने हस्तपादादिषु भिन्नजातीयेषु दृश्यमाने नित्यानित्यवृत्तिनि* अतिव्याप्तिस्तद्व्युदासाय सत्त्वप्रकृतिरित्युक्तम्, अद्रव्यस्वभाव इत्यर्थः । द्रव्याधिकरणकोत्पादविनाशशालित्वे सति जातिभिन्नत्वे सति द्रव्यभिन्नत्वे सति नित्यानित्यवृत्तिधर्मवत्त्वमिति वा तदर्थः । यद्वा सत्त्वे निविशतेऽपैतीति संज्ञानिरासः । पृथग्जातिषु दृश्यत इत्यनेन सर्वनामनिरासः । आधेय इत्यनेन सङ्ख्याशब्दो जातिशब्दश्च निरस्तः । अक्रियाज इत्यनेन कृदन्तनिरासः । असत्त्वप्रकृतिरित्यनेन समस्ततद्धितान्तयोर्निरासः । अधिकं तत्रैव द्रष्टव्यम् । **पाण्डुरिति**, नात्र स्वरादेकव्यञ्जनव्यवहित उः, व्यञ्जनद्वयेन व्यवधानात् । उकारात्पूर्वं वर्णद्वयसंयोगेन न भवितव्यमिति भावः । खरुः, क्रूरा मूर्खा दर्पिष्ठा श्वेता वा स्त्री खरुः, खरुः पतिंवरा कन्येति वा । पाणिग्रहणोत्कण्ठाभिधायित्वाद्गुणवचनोऽयम् । अत्र स्वरादुत इति वचनं येन नाव्यवधानं तेन व्यवहितेऽपि स्यादिति **न्यायं** सूचयति । यत्र येन वर्णादिनावश्यं व्यवधानं स्यान्न त्वव्यवधानं तत्र तद्व्यवधानेऽपि तत्कार्यं स्यादेवेति तदर्थः । स्वराद्यव्यवधानेनोकारस्य गुणवचनशब्देषु कुत्राप्यदर्शनात्स्वरादुत इत्युक्तेर्व्यर्थतापरसङ्गेन अयं न्यायोऽवतरति ॥ **इयेतश्चैतश्च हरितश्च भरितश्च रोहितश्च तस्माद्वर्णात्, तः षष्ठी, नः प्रथमा, च** ॥ अत्र नवेति

तद्योगे तो न् च । श्येनी, श्येता । एनी, एता । हरिणी, हरिता । भरिणी, भरिता । रोहिणी, रोहिता । वर्णादिति किम् ? श्येता, एता ॥ **क्रः पलितासितात्** ॥ ३७ ॥ त इति चेति चानुवर्त्तते, आभ्यां स्त्रियां ङीर्वा स्यात्, तद्योगे तः क्नः । पलिक्नी, पलिता । असिक्नी, असिता ॥ **असहनञ्विद्यमानपूर्वपदात्स्वाङ्गादक्रोडादिभ्यः** ॥ ३८ ॥ सहादिवर्जपूर्वपदं यत्स्वाङ्गं तदन्तात्क्रोडादिवर्जाददन्तात्स्त्रियां ङीर्वा स्यात् । पीनस्तनी, पीनस्तना । अतिकेशी, अतिकेशा माला । सहादिवर्जनं किम् ? सहकेशा, अकेशा, विद्यमान-

---

विकल्पः प्रधानत्वात्प्रत्ययविधिनैव सम्बध्यते न त्वप्रधानेन नविधानेन । श्येनी शुभ्रा, एनी कर्बुरा शुभ्रा वा, हरिणी नीला, भरिणी पाटला धूसरा घृतवर्णा वा, रोहिणी रक्ता । चकारो ङीर्यदा भवति तदैव नकारोऽपीति सूचनाय ॥ **क्रः प्रथमा, पलितश्चासितश्च** तस्मात् । त इति चेति चानुवर्तते । पलितशब्दः केशरोगविषये वर्णे, असितशब्दः सितप्रतिपक्षे वर्णे, तदैव ङीप्रत्ययः क्नादेशश्च, क्वचिदन्यत्रापि, वृद्धा पलिक्नी । 'असिक्नी स्यादवृद्धा या प्रेष्यान्तःपुरचारिणी' त्यमरः ॥ **सहश्च नञ् च विद्यमानश्च**, न सहनञ्विद्यमानम्, असहनञ्विद्यमानं पूर्वपदं यस्य तत्तस्मात्, स्वञ्च तदङ्गञ्च तस्मात्, क्रोड आदिर्येषान्ते, न क्रोडादयोऽक्रोडादयस्तेभ्यः । पीनौ स्तनौ यस्याः सा पीनस्तनी, केशानतिक्रान्ताऽतिकेशी, सह केशैर्वर्तते सा सहकेशा, न विद्यन्ते केशा यस्याः साऽकेशा, विद्यमानाः केशा यस्याः सा विद्यमानकेशा । कल्याणी क्रोडा यस्याः सा, क्रोडशब्दः स्त्री क्लीबलिङ्गः । एवं सर्वत्र बहुव्रीहिः । स्वाङ्गादिति, स्वाङ्गं त्रिधा, "अविकारोऽद्रवं मूर्तं प्राणिस्थं स्वाङ्गमुच्यते, च्युतञ्च प्राणिनस्तत्तन्निभञ्च प्रतिमादिषु" । अविकारो वातादिजन्यशोफादिविकारभिन्नस्तेन बहुशोफा इत्यादौ न । अद्रवं स्वाङ्गं भवति, तेन बहुकफा इत्यादौ

केशा । क्रोडादिवर्जनं किम् ? कल्याणक्रोडा, बहुगुदा, दीर्घवाला । स्वाङ्गादिति किम् ? बहुशोफा, बहुज्ञाना, बहुयवा ॥ **नासिकोदरोष्ठजङ्घादन्तकर्णशृङ्गाङ्गगात्रकण्ठात् ॥ ३९ ॥** सहादिवर्जपूर्वपदेभ्य एभ्यः स्वाङ्गेभ्यः स्त्रियां ङीर्वा स्यात् । तुङ्गनासिकी, तुङ्गनासिका । कृशोदरी, कृशोदरा । बिम्बोष्ठी, बिम्बोष्ठा । दीर्घजङ्घी, दीर्घजङ्घा । समदन्ती, समदन्ता । चारुकर्णी, चारुकर्णा । तीक्ष्णशृङ्गी, तीक्ष्णशृङ्गा । मृद्वङ्गी, मृद्वङ्गा । सुगात्री, सुगात्रा । सुकण्ठी, सुकण्ठा । पूर्वेण सिद्धे नियमार्थमिदम् । तेन बहुस्वरसंयोगोपान्तेभ्योऽन्येभ्यो मा भूत्, सुल-

---

न । रूपादियोगो मूर्त्तिस्तद्योगान्मूर्तं पुद्गलद्रव्यं तदपि स्वाङ्गम्, तेन बहुज्ञाना इत्यादौ न ज्ञानस्यामूर्तत्वात् । प्राणिस्थं स्वाङ्गं तेन दीर्घमुखा शाला इत्यादौ न । च्युतञ्च प्राणिनस्तदिति लक्षणान्तरम् । अविकारादिलक्षणयुक्तं प्राणिनश्च्युतमपि स्वाङ्गं भवतीति तदर्थः, यथा बहुकेशी बहुकेशा रथ्या । तन्निभञ्च प्रतिमादिष्विति चापरं लक्षणम् । प्राणी यथा प्राण्यङ्गेन सम्बद्धो भवति तथाऽप्राणी प्राण्यङ्गसजातीयेन वस्तुना सम्बद्धश्चेत् अप्राणिनोऽप्यवयवः स्वाङ्गपदग्राह्यो भवति, तेन पृथुमुखी पृथुमुखा प्रतिमा इत्यादि भवति ॥ **नासिका च उदरञ्चोष्ठश्च जङ्घा च दन्तश्च कर्णश्च शृङ्गञ्चाङ्गञ्च गात्रञ्च कण्ठश्च तस्मात् ।** असहनञ्विद्यमानपूर्वात्स्वाङ्गादिति पदद्वयमनुवर्तते । पूर्वेण सिद्धे नियमार्थमिदम् । बहुस्वरेषु नासिकोदराभ्यामेव । संयोगोपान्त्येष्वोष्ठादिभ्य एव ङीर्वा नान्येभ्य इति । तुङ्गा नासिका यस्याः सा तुङ्गनासिकी, कृशमुदरं यस्याः सा कृशोदरी, बिम्ब इव ओष्ठौ यस्याः सा बिम्बोष्ठी, दीर्घा जङ्घा यस्याः सा दीर्घजङ्घी, समा दन्ता यस्याः सा समदन्ती, चारू कर्णौ यस्याः सा चारुकर्णी, तीक्ष्णे शृङ्गे यस्याः सा तीक्ष्णशृङ्गी, मृदु अङ्गं यस्याः सा मृद्वङ्गी,

लाटा, सुपार्श्वा ॥ **नखमुखादनाम्नि** ॥ ४० ॥ सहादिवर्जपूर्वपदाभ्यां स्वाङ्गाभ्यामाभ्यामसंज्ञायामेव स्त्रियां ङीर्वा स्यात्। शूर्पनखी, शूर्पनखा। चन्द्रमुखी, चन्द्रमुखा। अनाम्नीति किम्? शूर्पणखा, कालमुखा ॥ **पुच्छात्** ॥ ४१ ॥ सहादिवर्जपूर्वपदात्स्वाङ्गात्पुच्छात्स्त्रियां ङीर्वा स्यात्। दीर्घपुच्छी, दीर्घपुच्छा ॥ **कबरमणिविषशरादेः** ॥४२॥ एतत्पूर्वपदात्पुच्छात्स्त्रियां ङीर्नित्यं स्यात्। कबरपुच्छी, मणिपुच्छी, विषपुच्छी, शरपुच्छी ॥ **पक्षाच्चोपमानादेः** ॥ ४३ ॥ उपमानपूर्वात्पक्षात्पुच्छाच्च स्त्रियां ङीः स्यात्। उलूकपक्षी शाला, उलूकपुच्छी सेना ॥ **क्रीतात्करणादेः** ॥ ४४ ॥ करणादेः क्रीता-

---

एवमग्रे। शोभने पार्श्वे यस्याः सा सुपार्श्वा, सुललाटेति बहुस्वरवतां नासिकोदराभ्यामेव भावादत्र न। सुपार्श्वेति संयोगोपान्त्येभ्य ओष्ठादिभ्य एव भावादत्र न ॥ **नखश्च मुखश्च तस्मात्**, न नाम अनाम तस्मिन्। अनुवृत्तिः पूर्ववत्। शूर्पनखी, शूर्पाकारा नखा यस्याः सा, चन्द्रवन्मुखमस्याः सा चन्द्रमुखी। शूर्पणखा, संज्ञावाचित्वे तु न ङीः, पूर्वपदस्थान्नाम्न्यग इति णत्वम्, रावणस्य भगिनी। कालमुखा तु यमभगिनी ॥ **पुच्छात्**। पूर्ववदनुवर्तनम्। दीर्घं पुच्छं यस्याः सा दीर्घपुच्छी ॥ कबरश्च मणिश्च विषश्च शरश्च, ते आदयो यस्य तस्मात्। पुच्छादित्यनुवर्तते। पूर्वपदत्वेन कबरादीनामुपादानादसहनञित्यादि निवृत्तम्। पूर्वेण सिद्धे पुनर्विधानं नित्यार्थम्। कबरं चित्रं पुच्छं यस्याः सा कबरपुच्छी मयूरीत्यादि ॥ **पक्षात्, च, उपमीयतेऽनेनेत्युपमा**, उपमा एव उपमानं तदाऽऽदिर्यस्य तस्मात्, प्रसिद्धसाधर्म्यादप्रसिद्धविषये येन ज्ञानमुपजन्यत इत्युपमा। चशब्देन पुच्छशब्दस्य ग्रहणम्। उलूकस्य पक्षाविव पक्षौ यस्याः सा उलूकपक्षी शाला, एवमग्रे। पूर्वसूत्रेण सहास्यैकयोगाकरणात्स्वाङ्गादिति निवृत्तम् ॥ **क्रीतात्, करणमादिरवयवो यस्य स** करणादिस्तस्मात्। अश्वेन क्रीयते स्म

न्तादृदन्तात्स्त्रियां ङीः स्यात् । अश्वक्रीती, मनसाक्रीती । आदेरिति किम् ? अश्वेन क्रीता ॥ **क्तादल्पे ॥ ४५ ॥** क्तान्तात्करणादेरल्पेऽर्थे स्त्रियां ङीः स्यात् । अभ्रविलिप्ती द्यौः, अल्पाभ्रेत्यर्थः । अल्प इति किम् ? चन्दनानुलिप्ता स्त्री ॥ **स्वाङ्गादेरकृतमितजातप्रतिपन्नाद्बहुव्रीहेः ॥ ४६ ॥** स्वाङ्गादेः कृतादिवर्जात् क्तान्ताद्बहुव्रीहेः स्त्रियां ङीः स्यात् । शङ्खभिन्नी, ऊरुभिन्नी । कृतादिवर्जनं किम् ? दन्तकृता, दन्त-

---

अश्वक्रीती । विभक्त्युत्पत्तेः पूर्वमेव कृदन्तेन समासः । मनसाक्रीती, तृतीयाया अलुप् । अनेन सूत्रेणादन्तात्क्रीतात्करणादेर्ङीविधिरुक्तः, करणस्य चाऽऽद्यवयवत्वं समासं विना न स्यात्, विभक्त्यन्तेन च क्रीतेत्यनेन समासः क्रियते तदा क्रीतस्यादन्तत्वं न सम्भवति, अन्तरङ्गत्वाद्विभक्त्युत्पत्तेः प्रागेवाऽऽपः प्राप्तेः, एवञ्च सत्यदन्तादित्युक्तिर्व्यर्था स्यादतः सा ज्ञापयति, 'गतिकारकडस्युक्तानां विभक्त्यन्तानामेव कृदन्तैर्विभक्त्युत्पत्तेः प्रागेव समास इति न्यायघटकं कारकाणां कृदन्तैरविभक्त्यन्तैरेव समास इत्यंशं करणादिति वक्तव्ये आदिग्रहणान्नामरूपान्यपदार्थेऽवयववाच्यादिशब्देन बहुव्रीहिस्तेनाश्वेन क्रीतेति वाक्ये न भवति । न ह्यत्र करणं क्रीतान्तस्य नाम्न आदिरवयवो भवति, ऐकपद्याभावात् ॥ क्तात्, अल्पे । करणादेरित्यनुवर्तते । अल्पैरभ्रैर्लिप्यते स्मेति, पूर्ववत्समासः । चन्दनानुलिप्तेति. अनल्पेन चन्दनेन लिप्तेत्यर्थः । अल्पत्वं समुदायोपाधिः, यद्यपि पूर्वपदार्थस्याभ्राणामेवाल्पत्वं गम्यते, तथापि तदल्पत्वे सति तद्विलेपनस्याप्यल्पत्वमवश्यं भवतीति समुदायोपाधित्वमल्पत्वस्य सङ्गच्छते ॥ स्वस्याङ्गं स्वाङ्गम्, तदादिरवयवो यस्य तस्मात् । कृतश्च मितश्च जातश्च प्रतिपन्नश्च तत्, न कृतमितजातप्रतिपन्नं तस्मात्, बहुव्रीहेः पञ्चमी । क्तादिति वर्तते । भिद्यते स्म भिन्नः, शङ्खौ भिन्नौ यस्याः सा शङ्खभिन्नी, भिन्नौ ऊरू यस्याः सा ऊरुभिन्नी, जाति-

मिता, दन्तजाता, दन्तप्रतिपन्ना ॥ **अनाच्छादजात्यादेर्नवा** ॥ ४७ ॥ आच्छादवर्जा या जातिस्तदवयवात्कृतादिवर्जात् क्तान्ताद्बहुव्रीहेः स्त्रियां ङीर्वा स्यात् । शाङ्गरजग्धी, शाङ्गरजग्धा । आच्छादवर्जनं किम् ? वस्त्रछन्ना । जात्यादेरिति किम् ? मासयाता । अकृताद्यन्तादित्येव ? कुण्डकृता ॥ **पत्युर्नः** ॥ ४८ ॥ पत्यन्ताद्बहुव्रीहेः स्त्रियां ङीर्वा स्यात्, तद्योगेऽन्तस्य न् च । दृढपत्नी, दृढपतिः । मुख्यादित्येव ? बहुस्थूलपतिः पुरी ॥ **सादेः** ॥ ४९ ॥ सपूर्वपदात्पत्यन्तात्स्त्रियां ङीर्वा स्यात्, तद्योगेऽन्तस्य न् च । ग्रामस्य पतिः, ग्राम-

---

कालसुखादेरिति शङ्खोरुशब्दयोः पूर्वनिपातः । दन्ताः कृता यस्याः सा दन्तकृता, एवमग्रेऽपि । अत्र कृतादिवर्जनान्न ङीः ॥ **नाच्छादोऽनाच्छादः**, अनाच्छादश्चासौ जातिश्च, साऽऽदिरवयवो यस्य तस्मान्नवा । शाङ्गरो जग्धो यया सा शाङ्गरजग्धी । वस्त्रं छन्नं यया सा वस्त्रछन्ना । मासो यातो यस्याः सा मासयाता । कुण्डं कृतं यया सा कुण्डकृता ॥ **पत्युः पञ्चमी, नः** प्रथमा । बहुव्रीहेरित्यनुवर्तते, ततश्च तदन्तविधिस्तद्योगे ङीयोगे, ङीयोगे एवान्तस्य नकारो भवति । दृढः पतिर्यस्याः सा दृढपत्नी । स्थूलाः पतयो यासां ताः स्थूलपतयः, पत्युर्न इति नविकल्पनात् । नादेशाभावे बहवः स्थूलपतयो यस्यां सा बहुस्थूलपतिः पुरी, अत्र हि पत्यन्तो बहुव्रीहिर्मुख्यो न भवति, पुनर्बहुव्रीहिकरणात् । यस्तु मुख्यः स न पत्यन्तः किन्तु स्थूलपत्यन्तः । मुख्यादिति विशेषणं बहुव्रीहेर्न तु पत्युः, दृढपत्नीत्यादेरसिद्ध्यापत्तेः ॥ **आदिना सहितः सादिस्तस्मात्** । पत्युर्न इति वर्तते । यद्यत्रापि बहुव्रीहिसमासोऽभिप्रेतः स्यात्तर्हि पूर्वसूत्रेणैव सिद्ध्या पुनर्वचनं व्यर्थं स्यादतोऽत्र बहुव्रीहेरित्यस्य निवृत्तिः । सादेरिति किमिति, पत्युरिति नाम्नो विशेषणेन तदन्तलाभात् पत्यन्तादित्येवास्तु, किं सादेर्ग्रहणेनेति प्रश्नाशयः, पतिरियमिति, केवलपतिशब्दस्यापि व्यपदेशिवद्भा-

पत्नी, ग्रामपतिः । सादेरिति किम्? पतिरियम्, ग्रामस्य पतिरियम् ॥ **सपत्न्यादौ** ॥ ५० ॥ एषु पतिशब्दात्स्त्रियां ङीः स्यात्, अन्तस्य न् च । सपत्नी, एकपत्नी ॥ **ऊढायाम्** ॥ ५१ ॥ पत्युः परिणीतायां स्त्रियां ङीः स्यात्, न् चान्तस्य । पत्नी, वृषलस्य पत्नी ॥ **पाणिगृहीतीति** ॥ ५२ ॥ पाणिगृहीतीतिप्रकाराः शब्दा ऊढायां स्त्रियां ङ्यन्ता निपात्यन्ते । पाणिगृहीती, करगृहीती । ऊढायामित्येव? पाणिगृहीताऽन्या ॥ **पतिवत्न्यन्तर्वत्न्यौ भार्यागर्भिण्योः** ॥ ५३ ॥ भार्या अविधवा स्त्री, तस्यां गर्भिण्याञ्च यथासङ्ख्यमेतौ

वेन पत्यन्तत्वादतिप्रसङ्गः स्यात्तद्वारणाय सादेरित्युक्तम् । आदिशब्दः पूर्वावयवपर इत्याशयेन प्रत्युदाहरति, ग्रामस्य पतिरियमिति । नात्र ग्रामस्येति पदं पूर्वावयवभूतमैकपद्याभावात् । पातीति पतिरिति क्रियाशब्दस्य त्रिलिङ्गत्वादत्र स्त्रीत्वम् ॥ **सपत्न्यादिर्यस्यासौ** सपत्न्यादिस्तस्मिन् । समानः पतिर्यस्याः सा सपत्नी, एक एव पतिर्यस्याः सा एकपत्नी । समुदायनिपातनं समानस्य सभावार्थं पुंवद्भावनिषेधार्थञ्च । अत्र समानादिस्वामिकस्त्रीविशेषस्यैव रूढ्या बोधनार्थं ङीनकारविशिष्टोच्चारणम्, तथा च समानः पतिर्यस्या दास्या भूमेर्वेति विग्रहे सपतिरित्येव । तथैकस्यैव तत्तत्पत्नीविशिष्टतया भेदमारोप्य समानता विज्ञेया, तेन मुख्यसादृश्यवत्पतिकासु न तथा प्रयोग इष्यते । पुनर्विधानान्नवेति निवृत्तम् ॥ **ऊढायाम्** । पत्युर्न इति सूत्रं वर्तते । याऽग्निसाक्षिपूर्वकेण परिणीता सेह गृह्यते । नामग्रहणे तदन्तविधिश्च नाश्रीयते, अतो केवलात्पत्युः परिणीतायां स्त्रियां ङीरित्यर्थः । पत्युर्भार्या पत्नी ॥ **पाणिगृहीती, इति** । इति शब्दः प्रकारार्थः, ऊढायामित्यपि सम्बध्यते । पाणिर्गृहीतोऽस्याः सा इति निपातनम् । पाणिर्गृहीतोऽनया सा पाणिगृहीताऽपरिणीता इत्यर्थः ॥ **पतिवत्नी चान्तर्वत्नी च, भार्या च गर्भिणी च तयोः** । पतिरस्या अस्तीति पति-

निपात्येते । पतिवत्नी, अन्तर्वत्नी ॥ **जातेरयान्तनित्यस्त्रीशूद्रात्** ॥ ५४ ॥ जातिवाचिनोऽदन्तात्स्त्रियां ङीः स्यात्, न तु यान्तनित्यस्त्रीशूद्रात् । कुक्कुटी, वृषली, नाडायनी, कठी । जातेरिति किम् ? मुण्डा । यान्तवर्जनं किम् ? क्षत्रिया । नित्यस्त्रीवर्जनमिति किम् ?

वत्नी । पतिमच्छब्दस्य पतिवत्नादेशो ङीश्च । अन्तर्वत्नीति, अन्तोऽस्त्यस्या इति विग्रहेऽन्तः शब्दोऽधिकरणे शक्तः, अतो न अस्तिना समानाधिकरणः । तथा च तदस्यास्तीति अस्तिसमानाधिकरणाच्छब्दान्मतोर्विधायकस्य सूत्रस्याप्राप्तेरनेन निपातनादत्र मतुर्भवति । पतिवत्नी जीवद्भर्तृकेत्यर्थः, अन्तर्वत्नी च गुर्विणी । भार्यागर्भिण्योरन्यत्र तु पतिमती पृथ्वी, अन्तोऽस्यां शालायां घट इति ॥ **जायतेऽनुवृत्त्याभिधानप्रत्ययाविति** जातिस्तस्मात्, योऽन्ते यस्यासौ यान्तः, नित्यं स्त्री नित्यस्त्री, यान्तश्चासौ नित्यस्त्री च यान्तनित्यस्त्री, सा चासौ शूद्रश्च, न यान्तनित्यस्त्रीशूद्रस्तस्मात् । जातिशब्देन तद्वाचको लक्ष्यते जातिरूपेऽर्थे कार्यासम्भवात्, नापि जातिशब्दो ग्राह्योऽयान्तनित्यस्त्रीग्रहणवैयर्थ्यात् । तदेवाह—जातिवाचिन इति । सोऽयं जातिवाचकः शब्दो यान्तः स्त्रियां नियतश्च यदि न स्यात्तदा ङीर्न भवति । जातिश्च सामान्यं भिन्नेष्वभिन्नाभिधानप्रत्ययनिमित्तम् । यद्रूपपुरस्कारेणाभिधानस्यानेकधर्मिबोधकत्वं प्रत्ययस्य वाऽनेकावगाहित्वं तत्त्वमिति भावः । नित्यत्वे सत्यनेकसमवेतत्वं वोभयमिदं लक्षणं शुक्लादिगुणस्यैकत्वे नित्यत्वे च तत्रातिव्याप्तम्, जननेन प्राप्यते या सा जातिरित्यपि लक्षणं युवत्वादावव्याप्तम्, अतोऽत्र केचिदाहुः—'आकृतिग्रहणा जातिर्लिङ्गानाञ्च न सर्वभाक् । सकृदाख्यातनिर्ग्राह्या गोत्रञ्च चरणैः सह' इति । तदर्थश्च, आकृतिर्ग्रहणं यस्याः साकृतिग्रहणा जातिः, समानकालिकानेकव्यक्तिवृत्त्यनुगतसंस्थानव्यङ्ग्या काचिज्जातिरित्यर्थो यथा गोत्वादेः । एतल्लक्षणाभिप्रायेणोदाहृतं कुक्कुटीति । नन्विदं लक्षणं वृषलादावव्याप्तम्,

खट्वा । शूद्रवर्जनं किम् ? शूद्रा । आदित्येव ? आखुः ॥ **पाककर्ण-पर्णवालान्तात्** ॥ ५५ ॥ पाकाद्यन्ताया जातेः स्त्रियां ङीः स्यात् । ओदनपाकी, आखुकर्णी, मुद्गपर्णी, गोवाली । जातेरित्येव ? बहुपाका यवागूः ॥ **असत्काण्डप्रान्तशतैकाश्चः पुष्पात्** ॥ ५६ ॥ सदादिवर्जेभ्यः परो यः पुष्पशब्दस्तदन्ताज्जातेः स्त्रियां ङीः स्यात् ।

अवयवसंस्थानस्य ब्राह्मणादिसर्वसाधारणतयाकृतिव्यङ्ग्यत्वाभावात् । अतो लक्षणान्तरं लिङ्गानाञ्च न सर्वभाक् सकृदाख्यातनिर्ग्राह्येति । अत्राऽत्रिलिङ्गत्वे सति सकृदुपदेशव्यङ्ग्यत्वं तदर्थः । अत्रिलिङ्गत्वं देवदत्तादेरप्यस्ति, अतः सकृदित्यादि । सकृदुपदेशव्यङ्ग्यत्वं शुक्लादावस्ति, अतोऽत्रिलिङ्गत्वे सतीत्युक्तम्, तत्र ब्राह्मणत्वमेकत्र ब्राह्मणेऽयं ब्राह्मण इत्युपदिष्टे तत्तत्पित्रादिषु सुग्रहम् । वृषलत्वञ्चैकत्रोपदिष्टे तदपत्यतत्सहोदरादौ सुग्रहम् । एतल्लक्षणाभिप्रायेणोदाहृतं वृषलीति । नन्वेतदपि नाडायनी कठीत्यादावनुगतसंस्थानव्यङ्ग्यत्वाभावादत्रिलिङ्गत्वाभावाच्चाव्याप्तम्, अत उक्तं गोत्रञ्च चरणैः सहेति, गोत्रमत्र शास्त्रीयं ग्राह्यम्, अपत्याधिकारादन्यत्र लौकिकं गोत्रम्, चरणः शाखाऽध्येता, तथा चापत्यप्रत्ययान्तः शाखाध्येतृवाची च शब्दो जातिकार्यं लभत इत्यर्थः । मुण्डगुणयोगान्मुण्डा, यान्त इति स्वरसहितो यकारोऽन्ते ग्राह्यः, तस्याप्यन्तत्वं साक्षात् श्रवणात्, तेन वतण्डस्यापत्यं स्त्री वातण्डीत्यत्रापत्यं पौत्राद्यर्थे यञि तस्य लोपे स्थानिवद्भावेन यान्तलक्षणो ङीप्रतिषेधो न भवति ॥ **पाकश्च कर्णश्च पर्णश्च वालतदन्तस्तस्मात्** । जातेरिति वर्तते । ओदनस्येव पाको यस्याः सा, आखोः कर्ण इव यस्याः सा, मुद्गस्येव पर्णानि यस्याः सा । गौरिव वाला यस्याः सा । संज्ञा एता ओषधिजातीनाम् । नित्यस्त्रीविषयत्वात्पूर्वेणाप्राप्ते इदं सूत्रम् ॥ **सच्च काण्डश्च प्रान्तश्च शतञ्चैकश्चाश्च्च, न सत्काण्डप्रान्तशतैकाश्च् तस्मात्, पुष्पात्** । जातेरित्यपि सम्बध्यते । शङ्खवत्पुष्पाणि यस्याः

शङ्खपुष्पी । सदादिवर्जनं किम् ? सत्पुष्पा, काण्डपुष्पा, प्रान्तपुष्पा, शतपुष्पा, एकपुष्पा, प्राक्पुष्पा ॥ **असम्भस्त्राजिनैकशणपिण्डात्फलात् ॥ ५७ ॥** समादिवर्जेभ्यो यः फलशब्दस्तदन्ताज्जातेः स्त्रियां ङीः स्यात् । दासीफली । समादिप्रतिषेधः किम् ? सम्फला, भस्त्रफला, अजिनफला, एकफला, शणफला, पिण्डफला ओषधिः ॥ **अनञो मूलात् ॥ ५८ ॥** नञ्वर्जात्परो यो मूलशब्दस्तदन्ताज्जातेः स्त्रियां ङीः स्यात् । दर्भमूली, शीर्षमूली । अनञ इति किम् ? अमूला ॥ **धवाद्योगादपालकान्तात् ॥ ५९ ॥** धवो भर्त्ता, तद्वाचिनस्सम्बन्धात्स्त्रीवृत्तेः पालकान्तशब्दवर्जात् ङीः स्यात् । प्रष्ठी, गणकी ।

सा शङ्खपुष्पी, ओषधिविशेषः । सदादीति, सन्ति काण्डे प्रान्ते शतमेकं प्राक् च पुष्पं पुष्पाणि वा यस्या इति सर्वत्र विग्रहः, आदित्याप् ॥ **सम् च भस्त्रा** चाजिनञ्चैकश्च शणश्च पिण्डश्च, ततो नञ्समासस्तस्मात्, फलात् । जातेरिति वर्तते । दासीव फलं यस्याः सा दासीफली, ओषधिविशेषः । सङ्गतं भस्त्रेवाजिनमेव, एकश्च शणस्येव पिण्डाकाराणि वा फलानि यस्याः सा ॥ **न नञनञ् तस्मात्, मूलात्** । जातेरित्यनुवर्तते । दर्भस्येव शीर्षे वा मूलं यस्याः सा दर्भमूली, शीर्षमूली । न विद्यन्ते मूलानि यस्याः साऽमूला, एता औषधयः । **धवाद्योगात्पालकोऽन्ते** यस्यासौ पालकान्तः, न पालकान्तस्तस्मात् । प्रष्ठस्य भार्या प्रष्ठी, प्रष्ठोऽग्रेसरः । योगादिति हेतौ पञ्चमी । धववाचिशब्दस्तदा स्त्रियां वर्तमानो भवति यदा तच्छब्दप्रवृत्तिनिमित्तं तत्रारोप्यते, तथा च प्रष्ठरूपधवप्रतियोगिकस्वत्वरूपसम्बन्धप्रयोज्यो यः प्रष्ठत्वारोपस्तादृशारोपप्रकारीभूतप्रष्ठत्वपुरस्कारेण प्रष्ठस्त्रीबोधकात्प्रष्ठपदादनेन ङीर्भवति । न च गोपीत्यादौ ङीर्न स्यात्, तत्र गोपत्वलक्षणप्रवृत्तिनिमित्तस्य स्त्रियामपि स्वत एव सत्त्वेनाऽऽरोपासम्भवादिति वाच्यम्, अगोप्यामेव गोपस्त्रियामनेन ङीविधानात् । सोऽयमित्यभेदोपचारो

धवादिति किम् ? प्रसूता । योगादिति किम् ? देवदत्तो धवः, देवदत्ता स्त्री स्वतः । अपालकान्तादिति किम् ? गोपालकस्य स्त्री गोपालिका । आदित्येव ? सहिष्णोः स्त्री सहिष्णुः ॥ **पूतक्रतुवृषाकप्यग्निकुसितकुसिदादै च ॥ ६० ॥** एभ्यो धववाचिभ्यस्तद्योगात्स्त्रीवृत्तिभ्यो ङीः स्यात्, ङीयोगे चैषामैरन्तस्य । पूतक्रतायी, वृषाकपायी, अग्नायी, कुसितायी, कुसिदायी ॥ **मनोरौ च वा ॥ ६१ ॥** धववृत्तेर्मनोर्योगात्स्त्रीवृत्तेर्ङीर्वा स्यात्, ङीयोगे चास्य औरैश्चान्तस्य । मनावी, मनायी, मनुः ॥ **वरुणेन्द्ररुद्रभवशर्वमृडादान्चान्तः ॥६२॥**

भार्यायाम् । यश्च शब्दो धवयोगात्स्त्रियां वर्तते स लाक्षणिक उच्यते, प्रवृत्तिनिमित्तस्य तत्रारोपादभेदोपचाराद्वा, यदा तु मुख्यस्तदापि तस्येदमित्यणि, अणिञेयेकणिति सूत्रेण ङीप्रत्यये गौपी प्राष्ठीति भवति । योगः सम्बन्धः, स च दम्पतिभावो जन्यजनकभावो वा । प्रसूतेति, अयं हि जातप्रसवामाह, स च प्रसवः सम्बन्धनिमित्तस्तदन्तरेण प्रसवाभावात्, न च प्रसवशब्दो धववाचि नाम, ततो न ङीः । देवदत्ता स्वत इति, अयं हि संज्ञाशब्दो स्वभावात्स्त्रियमाह, न तु धवयोगात् ॥ पूतक्रतुश्च वृषाकपिश्चाग्निश्च कुसितश्च कुसिदश्च तस्मात्, ऐ, च ॥ धवाद्योगादिति वर्तते, तेन पूताः क्रतवो यया सेत्यर्थे पूतक्रतुर्नात्र ङीः । पूतक्रतोर्भार्या पूतक्रतायी, एवमग्रे । कुसिदशब्दो ह्रस्वमध्यो न तु दीर्घमध्यः । एयेऽग्नायीति निर्देशादैकारोऽन्तादेशो विज्ञेयो न तु प्रत्ययः । वृषो धर्मः, कपिर्वराहस्तादृप्यात्पृषोदरादित्वाद्दीर्घे वृषाकपिस्ततो धवयोगे वृषाकपायी, कुसितकुसिदौ ऋषी ॥ **मनोः पञ्चमी, औ, च, वा** । मनोर्भार्या मनावी मनायी, विकल्पद्वये त्रैरूप्यम्, वाशब्दोऽनुवृत्त्यागतेन ङीप्रत्ययेन सम्बध्यते, न तु श्रुतेनौकारेणाऽन्यथा ङीप्रत्ययस्य नित्यत्वापत्त्या मनावी मनायी मन्वीत्यनिष्टं त्रैरूप्यं स्यात् ॥ **वरुणश्चेन्द्रश्च रुद्रश्च भवश्च शर्वश्च मृडश्च**

एभ्यो धववाचिभ्यो योगात्स्त्रीवृत्तिभ्यो ङीः स्यात्, ङीयोगे आन्चान्तः। वरुणानी, इन्द्राणी, रुद्राणी, भवानी, शर्वाणी, मृडानी॥ **मातुलाचार्योपाध्यायाद्वा ॥ ६३ ॥** एभ्यो धववाचिभ्यो योगात्स्त्रीवृत्तिभ्यो ङीः स्यात्, ङीयोगे चानन्तो वा। मातुलानी, मातुली। आचार्यानी, आचार्यी। उपाध्यायानी, उपाध्यायी॥ **सूर्याद्देवतायां वा ॥ ६४ ॥** सूर्याद्धववाचिनो योगाद्देवतास्त्रीवृत्तेर्ङीर्वा स्यात्, ङीयोगे चानन्तः। सूर्याणी, सूर्या। देवतायामिति किम्? मानुषी सूरी॥ **यवयवनारण्यहिमाद्दोषलिप्युरुमहत्त्वे ॥ ६५ ॥** एभ्यो यथासङ्ख्यं दोषादौ गम्ये स्त्रियां ङीः स्यात्, ङीयोगे चानन्तः।

तस्मात्, आन्प्रथमा, च, अन्तः प्रथमा। धवाद्योगादित्यपि सम्बध्यते, अन्तशब्दः आगमपर्यायोऽन्यथाऽऽनपि भिन्नः प्रत्ययः स्यात्, आदेशत्वे वा, अनेकवर्णः सर्वस्येति सर्वस्य स्यात्। वरुणस्य भार्याऽनेन ङीरन्तस्याऽऽन्वरुणानी॥ **मातुलश्चाचार्यश्चोपाध्यायश्च** तस्मात्। धवाद्योगादित्यनुवर्तते, आन्चान्तश्च। आचार्यानीत्यत्र क्षुभ्नादित्वात् णत्वाभावः। पाणिनीये आचार्यीति न भवति, किन्तु धवयोगाभावे आचार्या, स्वयं व्याख्यात्री। धवयोगे केचित् मातुलाचार्या उपाध्याया इत्यपीच्छन्ति, तत्सिद्धये ङीरिति प्रत्ययः विकल्पनीयः॥ सूर्यात्, देवतायाम्, वा। धवाद्योगादान्चान्त इति पदान्यनुवर्तन्ते। सूर्यस्य भार्या सूर्याणी, पक्षे आबेव सूर्या। सूर्यस्याऽऽदित्यस्य मनुष्यस्य वा मानुषी भार्या सूरी, सूर्यागस्त्ययोरिति यलोपो धवाद्योगादिति ङीः॥ **यवश्च यवनश्चारण्यश्च हिमश्च** तस्मात्, दोषश्च लिपिश्चोरुश्च महत्त्वञ्च तस्मिन्। आन्चान्त इत्यनुवर्तते, धवाद्योगादिति निवृत्तं दोषाद्यर्थविशेषग्रहणात्। दुष्टो यवो यवानी जात्यन्तरमेवेदम्। अयमेव तस्य दोषो यद् यवत्वजातिविरहेऽपि तदाकारानुकरणम्। यवनानां लिपिर्यवनानी, तस्येदमित्यस्य बाधको ङीः। उरु अरण्यमरण्यानी,

यवानी, यवनानी लिपिः, अरण्यानी, हिमानी ॥ **अर्यक्षत्रियाद्वा** ॥ ६६ ॥ आभ्यां स्त्रियां ङीर्वा स्यात्, ङीयोगे चानन्तः । अर्याणी, अर्या । क्षत्रियाणी, क्षत्रिया ॥ **यञो डायन्च वा** ॥ ६७ ॥ यञन्तात्स्त्रियां ङीः स्यात्, ङीयोगे च डायनन्तो वा स्यात् । गार्गी, गार्ग्यायणी ॥ **लोहितादिशकलान्तात्** ॥ ६८ ॥ लोहितादेः शकलान्तात् यञन्तात्स्त्रियां ङीः स्यात्, तद्योगे च डायनन्तः । लौहित्यायनी, शाकल्यायनी ॥ **षावटाद्वा** ॥ ६९ ॥ षान्तादवटाच्च यञ-

---

महद्धिमं हिमानी ॥ **अर्यश्च क्षत्रियश्च तस्मात्, वा** । आन्चान्त इत्यनुवर्तते । स्वामिवैश्येऽर्य इत्यर्य इति रूपम्, स्त्रीत्वविवक्षायामर्याणी, अर्या स्वामिनी वैश्या वेत्यर्थः, अधवयोगेऽयं विधिः, एवं क्षत्रियाणी क्षत्रिया । धवयोगे तु विशेषविधानात्पूर्वेण नित्यं ङीरेव । अर्यस्य भार्याऽर्यी, क्षत्रियस्य भार्या क्षत्रियी । हैमकोशेऽपि, 'क्षत्रिय्यर्या च शूद्रयपि, तथा अर्यार्याण्यौ पुनः समे' इत्युक्त्वादर्येति सङ्गच्छते । अत्रामरस्य सङ्ग्रहः- अर्याणी स्वयमर्या स्यात्, क्षत्रिया क्षत्रियाण्यपि । उपाध्यायाप्युपाध्यायी, स्यादाचार्यापि च स्वतः ॥ आचार्याणी तु पुंयोगे, स्यादार्यी क्षत्रियी तथा । इति । क्वचिदार्यक्षत्रियाद्वेति पाठो दृश्यते ॥ **यञः पञ्चमी, डायन्, च, वा** । अन्त इति वर्तते । श्रुतस्य डायन एव वाशब्देन सम्बन्धः, नानुमितेन ङीप्रत्ययेन, श्रुतानुमितयोः श्रौतो विधिर्बलीयानिति न्यायात् । गर्गस्यापत्यं स्त्रीति विग्रहे गर्गादेर्यञिति यञ्, अनेन ङीर्डायन्चान्तः, आदिवृद्धिर्गार्ग्यायणी, डायनोऽभावे व्यञ्जनात्तद्धितस्येति यलोपो गार्गी ॥ **लोहित आदिर्यस्यासौ, शकलोऽन्तो यस्यासौ शकलान्तः, लोहितादिश्च शकलान्तश्च तस्मात्** । वारहितं पूर्वसूत्रमनुवर्तते । लोहितस्यापत्यं स्त्री, गर्गादेर्यञ्, "वृद्धिः स्वरे," अनेन ङीर्डायन् च, लौहित्यायनी, एवं शाकल्यायनी ॥ **षश्चावटश्च तस्मात्, वा** । अनुवृत्तिः पूर्ववत्, ञिडायनोरुभयोरनुवर्तनात्, प्राधान्याद् ङीप्रत्ययेनैव वाशब्दस्य सम्भवो न तु तत्संयोग-

न्तात्स्त्रियां ङीर्वा स्यात्, ङीयोगे च ङायनन्तः । पौतिमाष्यायणी, पौतिमाष्या । आवट्यायनी, आवट्या ॥ **कौरव्यमाण्डूकाऽऽसुरैः** ॥ ७० ॥ एभ्यः स्त्रियां ङीः स्यात् । ङीयोगे च ङायनन्तः । कौरव्यायणी, माण्डूकायनी, आसुरायणी ॥ **इञ इतः** ॥ ७१ ॥ इञन्तादिदन्तात्स्त्रियां ङीः स्यात् । सौतङ्गमी । इत इति किम् ? कारीषगन्ध्या ॥ **नुर्जातेः** ॥ ७२ ॥ मनुष्यजातिवाचिन इदन्तात्स्त्रियां ङीः

भाविना ङायना । पूङ् पवने, पूयते इति पूतिः, पूतयो मासा यस्यासौ पूतिमासस्तस्यापत्यं वृद्धं स्त्री पौतिमाष्यायणी, गर्गादेर्यञ्, आदिवृद्धिर्ङीः, ङायन् पक्षे आत्, एवमावट्यायनी ॥ **कौरव्यश्च माण्डूकश्चाऽऽसुरिश्च तस्मात्** । ङायनान्त इत्यनुवर्तते । राज्ञः कुरोरपत्यं स्त्रीत्यत्र दुनादिकुवित्कोशलेति ञ्यः प्रत्ययो वृद्धिः, यदा कुरोर्ब्राह्मणस्यापत्यं स्त्रीति विगृहस्तदा "कुर्वादेर्ण्यः," शिष्टं पूर्ववत् । अनयोर्विग्रहयोरयं विशेषः, बहुवचने दुनादित्यस्य द्रिसंज्ञकत्वाद्लुब् भवति । 'अस्वयम्भुवोऽव्' ङीर्ङायन्, कौरव्यायणी । मण्डूकस्यापत्यं स्त्री माण्डूकायनी, पीलासाल्वामण्डूकाद्वेत्यण् प्रत्ययः । असुरस्यापत्यं स्त्री आसुरायणी, बाह्वादिभ्यो गोत्रे इतीञ् प्रत्ययः ॥ **इञः पञ्चमी, इतः पञ्चमी** । सुतङ्गमेन निवृत्ता सौतङ्गमी, सुतङ्गमादेरिञ् । करीषस्येव गन्धो यस्य करीषगन्धिः, वोपमानादिति इः, तस्यापत्यं स्त्री अपत्यार्थेऽणि, अनार्षे वृद्धेऽणिञाविति ष्यप्रत्ययः, आप् कारीषगन्ध्या । अपत्ये ञन्तस्य मनुष्यजातिवचनत्वादुत्तरसूत्रेणैव सिद्धेऽजात्यर्थोऽयमारम्भः । अत्र इञ इति तद्धितसम्बन्धिन इञ एव ग्रहणं 'यञो ङायन्च वे'त्यनेन तद्धिताधिकारस्य प्रारब्धत्वेन प्राकरणिकत्वान्न तु 'प्रश्नाख्याने वेञ्' इति कृत्सूत्रोक्तो ग्राह्योऽप्राकरणिकत्वात्, प्राकरणिकाप्राकरिणकयोः प्राकरणिकस्यैवेति न्यायात् ॥ **नुः पञ्चमी, जातेः पञ्चमी** । इत इत्यनुवर्तते । कुन्तेरपत्यं स्त्री कुन्ती, दुनादिकुवित्को-

स्यात् । कुन्ती, दाक्षी । इत इत्येव ? दरत् । मुरिति किम् ? तित्तिरिः । जातेरिति किम् ? निष्कौशाम्बिः ॥ **उतोऽप्राणिनश्चाऽयुरज्वादिभ्यः ऊङ्** ॥ ७३ ॥ उदन्तान्नृजातेरप्राणिजातिवाचिनः स्त्रियामूङ् स्यात्, न तु यवन्ताद्रज्वादिभ्यश्च । कुरूः, ब्रह्मबन्धूः, अलाबूः, कर्कन्धूः । उत इति किम् ? वधूः । अप्राणिनश्चेति किम् ? आखुः । जातेरित्येव ? पटुः स्त्री । युरज्वादिवर्जनं किम् ? अध्वर्युः स्त्री, रज्जुः,

---

शले इति ञ्यप्रत्ययः, कुन्त्यवतेरिति लुबनेन ङीः, कुन्ती । एवं दक्षस्यापत्यं स्त्री दाक्षी । दरतो राज्ञोऽपत्यं स्त्री, पुरुमगधस्येति विहितस्याणः, द्रेरञ्यण इत्यनेन लोपः, दरत् । अस्य गोत्रञ्च चरणैस्सहेति जातित्वम् ॥ **उतः पञ्चमी, न प्राण्यप्राणी तस्मात्, च,** रज्जुरादिर्येषान्ते रज्वादयः, युश्च रज्वादयश्च युरज्वादयः, न युरज्वादयोऽयुरज्वादयस्तेभ्यः, ऊङ् । नुर्जातेरिति चशब्देनानुकृष्यते । कुरोरपत्यं स्त्री कुरूः, दुनादिति विहितस्य ञ्यस्य कुरोर्वा इति लुपि, गोत्रञ्च चरणैस्सहेति जातित्वादूङ् । ब्रह्मा बन्धुरस्याः सा, अत्र लिङ्गानाञ्च न सर्वभागिति जातित्वम् । अत्र ऊङः पूर्वं शेषाद्वेति कच्प्रत्ययः परोऽपि न भवति, तत्र समासप्रकरणे बहुलाधिकारात्, अथवा ऊश्चासौ ऊङ् चेति विगृह्य द्विर्विधानादन्यः प्रत्ययो न भवतीति कैयटमतम् । वृत्तस्वाध्यायहीनायां ब्राह्मणजातावयं वर्तते । नृजातेरुदाहरणद्वयम् । अप्राणिजातिवाचिन उदाहरणम्, अलाबूः कर्कन्धूरिति । नव्यो लातेर्नलुक् चेत्युणादिसूत्रेण ऊकारान्तोऽलाबूशब्दः । कृगः कादिरिति सूत्रेण ऊकारान्तः कर्कन्धूशब्दः । स्त्रीत्वविवक्षायाञ्चाऽलाबूः, कर्कन्धूः, अलाबूस्तुम्बरुः, कर्कन्धूर्बदरीत्यर्थः । उत इत्यप्राणिजातिवाचिना न सम्बध्यते, रज्वादिपर्युदासादुवर्णान्तेभ्य एव ऊङो भावादलाबूः कर्कन्धूः । अध्वर्युः स्त्री चरणत्वाज्जातिः, अत्र उङित्यकृत्वा ऊङ्विधानं 'सखी-

हनुः ॥ **बाह्वन्तकद्रुकमण्डलोर्नाम्नि** ॥ ७४ ॥ बाह्वन्तात्कद्रुकमण्डलुभ्याञ्च संज्ञायां स्त्रियामूङ् स्यात् । भद्रबाहूः, कद्रूः, कमण्डलूः । नाम्नीति किम् ? वृत्तबाहुः ॥ **उपमानसहितसंहितसहशफवामलक्ष्मणाद्ध्वोरूः** ॥ ७५ ॥ एतत्पूर्वपदादूरोः स्त्रियामूङ् स्यात् । करभोरूः, सहितोरूः, संहितोरूः, सहोरूः, शफोरूः,वामोरूः, लक्ष्मणोरूः । उपमानादेरिति किम् ? पीनोरुः ॥

नारीपङ्क्तूश्वश्रू' इत्यत्र श्वश्रूरिति दीर्घनिपातार्थम् ॥ **बाहुरन्ते यस्यासौ बाह्वन्तः**, कद्रुश्च कमण्डलुश्च तस्मात्, नाम्नि । ऊङिति सम्बध्यते । अन्तग्रहणं तदन्तविध्यर्थमन्यथा केवलाद्बाहुशब्दात्स्त्री संज्ञायां देवदत्तादिशब्दवदूङ् प्रसज्येत । भद्रौ बाहू यस्याः सा भद्रबाहूः, कद्रूः, कमण्डलूः एताः संज्ञाः । वृत्तौ बाहू अस्याः सा वृत्तबाहुः ॥ **उपमानश्च** सहितश्च संहितश्च सहश्च शफश्च वामश्च लक्ष्मणश्च तस्मात्, ऊरोः षष्ठी । उपमानपदेनोपमावाचिशब्दो ग्राह्यः । करभ इवोरू यस्याः सा करभोरूः । ननु सहशब्दग्रहणं व्यर्थं सर्वस्योरुमत्त्वेन सहशब्दप्रयोगस्य तत्समभिव्याहारे व्यर्थत्वेन सहोरूरिति प्रयोगस्यैवाभावादिति चेन्न, सहशब्दस्य सङ्क्लिष्यत्यर्थस्याव्युत्पन्नस्य दन्त्यादेरत्र ग्रहणात्, सहितोरूरिति तु हितेन सह सहितौ ऊरू यस्याः सा इति । शफौ एव ऊरूर्यस्याः सा, शफशब्दप्रवृत्तिनिमित्तस्य ऊरूपदार्थे आरोपात्, शफौ खुरौ ताविव संश्लिष्टत्वादूरू अपि शफौ उच्येते । एवञ्च समासस्योपमानोपमेयभावाबोधकत्वेन नोपमानपूर्वपदनिमित्तः समासः । आरोपे तूपमानोपमेयभावो निमित्तम् । यद्यप्यमरसिंहेन शफं क्लीबे खुरः पुमानिति शफशब्दस्य क्लीबत्वमुक्तं तथापि पुंस्त्वमपि प्रामाणिकमेव, शफः खुरे गवादीनां मूले विटपिनामपीति श्रीहेमचन्द्रकोशात् । लक्ष्मणोरूरिति पाणिनीये ॥

नारीसखीपङ्क्ष्वश्रू ॥७६॥ एते ङ्यन्ता ऊङन्ताश्च निपात्यन्ते ॥ **यूनस्तिः** ॥ ७७ ॥ यूनः स्त्रियां तिः स्यात् । युवतिः । मुख्यादित्येव ? निर्यूनी ॥ **अनार्षे वृद्धेऽणिञौ बहुस्वरगुरूपान्त्यस्यान्तस्य ष्यः** ॥ ७८ ॥ अनार्षे वृद्धे विहितौ यावणिञौ तदन्तस्य सतो बहुस्वरस्य गुरूपान्त्यस्य नाम्नोऽन्तस्य ष्यः स्यात् । कारीषगन्ध्या, बालाक्या । अनार्ष इति किम् ? वासिष्ठी । वृद्ध इति किम् ?

नारी च सखी च पङ्क्ष्श्च श्वश्रूश्चेति द्वन्द्वः, सौत्रत्वाज्जस्लोपः । नृशब्दात्स्त्रियां नृतोऽस्वस्रादेर्ङीरिति ङीजातेऽनेन सूत्रेण नारादेशो निपात्यते । नरशब्दाच्च जातिलक्षणे जातेरयान्तेति ङौ नारादेशोऽनेन निपात्यते । सखिशब्दात्सखशब्दाद्बहुव्रीहेर्ङीः सखी, सह खेन वर्तते या साऽपि सखी, निपातनसामर्थ्याद्धवयोगेऽपि भवति । पङ्क्ष्शब्दो न जातिवचनः, किन्तु गुणवचनः संयोगोपान्त्यश्च, अतोऽप्राप्ते ऊङ् विधीयते । श्वशुरशब्दाच्च जातिलक्षणे धवयोगलक्षणे च ङीप्रत्यये प्राप्ते ऊङ्, श्वशुरशब्दे च उकाराऽकारयोर्लोपश्च क्रियते ॥ **यूनः पञ्चमी, तिः प्रथमा** । नकारान्ताद्युवन्शब्दात्स्त्रियां नृत इति ङीप्राप्ते तदपवादस्तिप्रत्ययः, ततश्च तिप्रत्ययेन स्त्रीत्वस्याभिधानादितोऽक्त्यर्थादित्यपि न भवति । यूनां मध्यान्निर्गता निर्यूनी, स्त्रियां नृत इति ङीः, श्वन्युवन्निति वस्य उः ॥ **ऋषीणामिदं ऋषौ** भवं वाऽऽर्षम्, न आर्षमनार्षस्तस्मिन्, वृद्धे, अण् च इञ् चाणिञौ, बहवः स्वरा यत्र तद्बहुस्वरम्, गुरुरुपान्त्यो यत्र तद् गुरूपान्त्यम्, बहुस्वरञ्च तद् गुरूपान्त्यश्च तस्य, अन्तस्य ष्यः । गुरुग्रहणं दीर्घपरिग्रहणार्थं संयोगपरिग्रहणार्थञ्च, अन्यथा दीर्घोपान्त्यस्येत्युच्येत । एवञ्चानेकव्यञ्जनव्यवधानेऽप्यादेशो भवति । अणन्तमिञन्तञ्च बहुस्वरं नाम ष्यादेशे निर्दिष्टम्, तथा च निर्दिश्यमानस्यैवादेशाः स्युरिति न्यायेन सकलस्यादेशे प्राप्तेऽन्तग्रहणं कृतम् । करीषस्येव गन्धोऽस्येति करीष-

आहिच्छत्री । अणिञ इति किम् ? आर्त्तभागी । बहुस्वरेति किम् ? दाक्षी । गुरूपान्त्यस्येति किम् ? औपगवी । अणिञन्तस्य सतो बहुस्वरादिविशेषणं किम् ? दौवार्या, औडुलोम्या ॥ **कुलाख्यानाम्** ॥ ७९ ॥ कुलमाख्यायते यकाभिः तासामनार्षवृद्धाणि-

---

गन्धिस्तस्यापत्यं पौत्रादि स्त्री कारीषगन्ध्या, "ङसोऽपत्येऽणि" त्यणि अणन्तत्वादनेनान्तस्य ष्यादेशः, षकारः इत्, आदित्याप् । शब्दशक्तिस्वाभाव्यात्ष्यादेशः आबन्तसहित एव स्त्रीलिङ्गमभिव्यनक्ति । न चाणः ष्यादेशादणञेयेकणित्यणन्तलक्षणो ङीः स्यादिति वाच्यम्, तत्राऽणः स्वरूपस्यैव ग्रहणात्, व्याख्यानतो विशेषार्थप्रतिपत्तिरिति न्यायात्, तत्र सूत्रे तथैव व्याख्यानात्, इह चाऽणः ष्यरूपीभवनान्न स्वरूपस्थत्वमिति । बलाकाया अपत्यं स्त्रीति विग्रहे बाह्वादिभ्य इति इञि इञन्तत्वादनेन ष्यः, आदित्यापू । अनार्ष इति किमिति, वसिष्ठस्यापत्यं स्त्री ऋषिवृष्ण्यन्धकेत्यण्, अणेञेयेकणिति ङीः । वृद्ध इति किमिति, अहिच्छत्रे जाता, जातार्थेऽण्, ततो ङीः । अणिञ इति किमिति, ऋतः प्राप्तो भगः पुण्यं येन, अथवा ऋतेन सत्येन भज्यते वा ऋतभागः, ऋतभागस्यापत्यं बिदादेर्वृद्धे इत्यञ् प्रत्ययः, ङीः । बिदादिभ्य इति सूत्रेण विहितः प्रत्ययोऽनार्षः, ऋषिवृष्ण्यन्धके इति विहितः प्रत्यय आर्ष इतीह रूढः, अन्यथा ऋतभागस्य ऋषिवचनत्वेनाऽनार्षत्वाभावादणिञः प्रत्युदाहरणं न सङ्गच्छेत । बहुस्वरेति किमिति, दक्षस्यापत्यं "अत इञि"ति इञ्, नुर्जातेर्ङीः । गुरूपान्त्यस्येति किमिति, उपगोरपत्यं स्त्री औपगवी । दौवार्येति, द्वारस्यापत्यं पौत्रादि स्त्री, अत इञितीञ् प्रत्ययः, दौवार्या, एवमुडुलोम्नोऽपत्यं स्त्री औडुलोम्या, अत्र इञः पूर्वमबहुस्वरत्वेऽगुरूपान्त्यत्वे च सत्यपि इञि सति बहुस्वरत्वाद् गुरूपान्त्यत्वाच्च तदा ष्यादेशार्थमणिञन्तस्यैव बहुस्वरादिविशेषणं कृतम् ॥ **कुलमाख्यायते** याभिस्तास्तासाम् । अनार्षे

ञन्तानामन्तस्य स्त्रियां ष्यः स्यात् । पौणिक्या, गौत्स्या । अनार्ष इत्येव ? गौतमी ॥ **क्रौड्यादीनाम्** ॥ ८० ॥ क्रौडि इत्यादीनामणिञन्तानामन्तस्य स्त्रियां ष्यः स्यात् । क्रौड्या, लाड्या ॥ **भोजसूतयोः क्षत्रियायुवत्योः** ॥ ८१ ॥ अनयोरन्तस्य यथासङ्ख्यं क्षत्रियायुवत्योः स्त्रियां ष्यः स्यात् । भोज्या क्षत्रिया, सूत्या युवतिः । अन्या तु भोजा सूता ॥ **दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धेर्वा** ॥ ८२ ॥ एषामिञन्तानां स्त्रियामन्तस्य ष्यो वा स्यात् । दैवयज्ञ्या, दैवयज्ञी । शौचिवृक्ष्या, शौचिवृक्षी । सात्य-

---

वृद्धेऽणिञौ अन्तस्य ष्य इति पदान्यभिसम्बध्यन्ते । अबहुस्वरागुरूपान्त्यार्थं वचनम् । पुणिकस्यापत्यं पौत्रादि स्त्री पौणिक्या, शिवादेरणित्यण्, अनेनाण्स्थाने ष्यः । गुप्तस्यापत्यं अत इञितीञ्प्रत्ययः, अनेन ष्यः । गौतमस्यापत्यं स्त्री ऋषिवृष्ण्यन्धकेत्यण्, अणञेयेकणिति ङीः, गौतमी ऋषिपुत्रिका ॥ क्रोडिरादिर्येषान्तेषाम् । अणिञावन्तस्य ष्य इति वर्तते । अबहुस्वरागुरूपान्त्यार्थोऽनन्तरापत्यार्थश्चारम्भः । क्रोडस्यापत्यं स्त्री क्रोड्या, अत इञितीञ्, सूत्रेणानेन ष्यः, एवं लाड्या ॥ भोजश्च सूतश्च तयोः, क्षत्रिया च युवतिश्च तयोः, अन्तस्य ष्यः । भोज्या भोजवंशजा क्षत्रिया । सूत्या प्राप्तयौवना मानुषीत्यर्थः ॥ दैवयज्ञिश्च शौचिवृक्षिश्च सात्यमुग्रिश्च कान्ठेविद्धिश्च तस्य, वा । अन्तस्य ष्य इति वर्तते । इञन्तमात्रनिर्देशात्पौत्रादौ प्राप्ते प्रथमापत्ये त्वप्राप्ते विभाषा । देव एव यज्ञः पूजनीयो यस्य स देवयज्ञस्तस्यापत्यं स्त्री दैवयज्ञा, पक्षे दैवयज्ञी, नुर्जातेरिति ङीः । शुचिर्वृक्षोऽस्य तस्यापत्यं स्त्री शौचिवृक्ष्या । सत्यमुग्रं यस्य सत्यमुग्रः, सूत्रे सात्यमुग्रीत्युक्ते मकारागमः, तस्यापत्यं स्त्री । कण्ठे विद्धमस्य, कण्ठे वा विद्धः कण्ठेविद्धः, "तत्पुरुषे कृती"ति, "अमूर्धमस्तकादि"ति वाऽलुप्,

मुभ्रया, सात्यमुग्री। काण्ठेविद्धया, काण्ठेविद्धी ॥ **ष्या पुत्रपत्योः केवलयोरीच् तत्पुरुषे ॥ ८३ ॥** मुख्याऽऽभन्तस्य ष्यः पुत्रपत्योः केवलयोः परयोस्तत्पुरुषे समासे ईच् स्यात्। कारीषगन्धीपुत्रः, कारीषगन्धीपतिः। ष्येति किम् ? इभ्यापुत्रः। केवलयोरिति किम् ? कारी-

---

तस्यापत्यं स्त्री कण्ठेविद्धी ॥ **ष्या** प्रथमा, **पुत्रश्च** पतिश्च तयोः, केवलयोः, ईच् प्रथमा, तत्पुरुषे। कारीषगन्ध्यायाः पुत्रः पतिर्वा, अनेन सर्वस्याः ष्यायाः ईचादेशः। अत्र ष्या ईञ् भवतीत्यभेदनिर्देशः कृतः सर्वादेशार्थम्। सोऽयमभेदनिर्देशो नाऽनुबन्धकृतान्यसारूप्यानेकस्वरत्वानेकवर्णत्वानीति न्यायं ज्ञापयति। तदर्थश्चानुबन्धवशादसारूप्यमनेकस्वरत्वमनेकवर्णत्वञ्च न स्युरिति। अन्यथा ईचोऽनेकवर्णत्वात्ष्यायाः ईजिति भेदनिर्देशे कृतेऽपि 'अनेकवर्णः सर्वस्ये'ति परिभाषासूत्रेणेचः सर्वादेशत्वं भवत्येवेति तदर्थोऽभेदनिर्देशो व्यर्थः स्यात्। 'वेदूतोऽनव्ययग्वृदीच् ङीयुवः पदे' इत्यत्र ईचः प्रतिषेधान्न ह्रस्वः। इभ्यायाः पुत्र इभ्यापुत्रः। अत्रेभ्यशब्दो न ष्यान्तः, किन्तु इभमर्हतीति विग्रहे दण्डादिभ्यो य इति यः। पुत्रस्य कुलं पुत्रकुलम्, कारीषगन्ध्यायाः पुत्रकुलं कारीषगन्ध्यापुत्रकुलम्। केवलग्रहणाभावे सूत्रे पुत्रपत्योरित्यस्यौपश्लेषिकेऽधिकरणे सप्तमीविभक्तौ अत्रापि ष्याया ईच् प्रसङ्गः, केवलपुत्रशब्देन ष्यान्तस्य यथा सम्बन्धोऽस्ति, तथा पुत्रकुलेत्युत्तरपदादिभूतपुत्रशब्देनापि, अतः केवलग्रहणं कृतम्। न च तत्पुरुषग्रहणाद्यस्य तत्पुरुषस्य ष्यान्तोऽवयवस्तस्यैव यौ पुत्रपतीतिशब्दौ अवयवौ न तत्पुरुषान्तरस्य तयोः ष्यायाः ईज् भवतीति प्रत्यासत्त्याऽर्थकरणे प्रकृते प्रत्युदाहरणे पुत्रशब्दस्य ष्यान्तपदघटिततत्पुरुषस्यावयवत्वाभावेन केवलग्रहणाभावेऽपि नेचः प्रसङ्गः, पुत्रस्य कुलमिति तत्पुरुषान्तरस्यैव हि पुत्रशब्दोऽवयवः। ष्यान्तपदघटिततत्पुरुषस्य तु पुत्रकुलमिति पदमेवावयव इति वाच्यम्, तथा सति तत्पुरु-

षगन्ध्यापुत्रकुलम् ॥ **बन्धौ बहुव्रीहौ** ॥ ८४ ॥ मुख्याऽऽबन्तस्य ष्यो बन्धौ केवले परे बहुव्रीहावीच् स्यात् । कारीषगन्धीबन्धुः । केवल इत्येव ? कारीषगन्ध्याबन्धुकुलम् । मुख्य इत्येव ? अतिकारीषगन्ध्याबन्धुः ॥ **मातमातृमातृके वा** ॥ ८५ ॥ मुख्याऽऽबन्तस्य ष्यो मातादिषु केवलेषु परेषु बहुव्रीहावीज्वा स्यात् । कारीषगन्धीमातः, कारीषगन्ध्यामातः । कारीषगन्धीमाता, कारीषगन्ध्यामाता । कारीषगन्धीमातृकः, कारीषगन्ध्यामातृकः ॥ **अस्य ङ्यां लुक्** ॥ ८६ ॥ ङ्यां परेऽस्य लुक् स्यात् । मद्रचरी ॥ **मत्स्यस्य यः**

षेण सन्निधापिततस्योत्तरपदस्य पुत्रपतिशब्दाभ्यां विशेषणाद्विशेषणेन च तदन्तविधेर्भावात्पुत्रपतिशब्दान्तयोरुत्तरपदयोरीच् भवतीत्यर्थस्य प्रसङ्गेन केवलग्रहणाभावेऽत्र ईजादेशस्य दुर्वारत्वात् ॥ बन्धौ बहुव्रीहौ । ष्या केवलयोरीजिति वर्तन्ते । कारीषगन्ध्या बन्धुर्यस्य । मुख्य इत्येवेति, कारीषगन्ध्यामतिक्रान्ता, अतिकारीषगन्ध्या सा बन्धुर्यस्य । अत्र कारीषगन्ध्याशब्दस्यातिक्रान्तशब्दार्थं प्रति विशेषणत्वेन गौणत्वान्न ईच् ॥ मातश्च माता च मातृकश्च तस्मिन्, वा । ष्या केवलयोरीच् बहुव्रीहाविति पदान्यनुवर्तन्ते । उक्तसूत्रद्वये विशेष्यानुगुणं केवलशब्दस्य वचनविपरिणामेनाऽन्वयः कार्यः । अत्र मातेति निर्देशात्, मातुर्मातः पुत्रेऽर्हे सिनाऽऽमन्ड्ये इति सूत्रेण निर्दिष्टमर्थमन्तरेणापि पक्षे माता आदेशः, अन्यथा मातृशब्देनैव गतत्वान्मातशब्दोपादानमनर्थकं स्यात्, मातृमातृकशब्दयोश्च पृथगुपादानाद्दन्तलक्षणः कच्प्रत्ययोऽपि विकल्प्यते । शिष्टं स्पष्टम् ॥ अस्य, ङ्याम्, लुक् । मद्रेषु देशेषु चरतीति मद्रचरी । चरेष्ट इति टप्रत्ययः, अणेञेयेकणिति ङ्यामनेन सूत्रेणाऽकारलोपः ॥ मत्स्यस्य, यः षष्ठी । ङ्यां लुगिति सम्बध्यते । मत्स्यस्य स्त्री मत्सी । माद्यति जलेनेति मत्स्यः, धवाद्योगादिति ङीः, अस्य ङ्यामित्यकारस्य लुक्,

॥ ८७ ॥ मत्स्यस्य यो ङ्यां लुक् स्यात् । मत्सी ॥ **व्यञ्जनात्तद्धितस्य** ॥ ८८ ॥ व्यञ्जनात्परस्य तद्धितस्य यो ङ्यां लुक् स्यात् । मनुषी । व्यञ्जनादिति किम्? कारिकेयी । तद्धितस्येति किम्? वैश्यी॥ **सूर्यागस्त्ययोरीये च** ॥ ८९ ॥ अनयोर्यो ङ्यामीये च प्रत्यये,

---

ततश्चानेन सूत्रेण यलुक् । ननु पूर्वसूत्रादत्र ङ्यामित्यनुवर्तते । तच्च पदं सप्तम्यन्तं ततश्च सप्तम्या पूर्वस्येति परिभाषासूत्रस्य प्रवृत्तिः, एवमनन्तरस्यैव विधिर्निषेधो वेति न्यायसहकारेण ङीप्रत्ययाव्यवहितपूर्ववर्तिनो मत्स्यशब्दसम्बन्धियकारस्य लुग्भवतीत्यर्थः, तथा च मत्सीत्यत्र यकारस्य लुग् न स्यात्, स्वरस्य परे प्राग्विधौ स्वरस्यादेशः परनिमित्तकः पूर्वस्य विधौ कर्तव्ये स्थानीव भवतीत्यर्थकेन परिभाषासूत्रेण स्थानिवद्भावेन ङ्यव्यवहितपूर्वस्य यकारस्याभावादिति चेन्मैवम्, अनेनैव वचनेनैकवर्णव्यवधानेऽपि यकारलोपाश्रयणात् । न चैवं मत्स्यस्येयमिति विग्रहे तस्येदमित्यणि मत्स्याकारलोपे अणन्तत्वाद् ङ्यां 'अस्य ङ्यामि 'त्यलोपे आदिवृद्धावनेन सूत्रेण यलोपे मात्सीति रूपं न स्यात्, अण्निमित्ताकारङीनिमित्ताकारलोपयोः स्थानिवत्त्वेन यलोपप्रसक्त्यभावादिति वाच्यम् । "न सन्धिङीयङिद्विदीर्घासद्विधावस्फुकी"ति परिभाषासूत्रेण ङीविधौ स्थानिवद्भावप्रतिषेधात् ॥ व्यञ्जनात्, तद्धितस्य । ष्यः ङ्यां लुगिति पदान्यनुवर्तन्ते । मनोरपत्यं स्त्रीति विग्रहे "मनोर्याणौ षश्चान्त" इति मनुष्ये जाते ङीः, ततश्चाण्लोपेऽस्य ङ्यामिति लुकि अनेन यलुक् मनुषी । कारिकाया अपत्यं कारिकेयी, एयण्प्रत्ययो ङीश्च । अत्र यकारस्य पूर्वं व्यञ्जनं नास्ति, किन्त्वेकारः, नातो यलोपः वैश्यस्य भार्या वैश्यी, अत्र यकारो न तद्धितसम्बन्धी किन्त्वौणादिकः ॥ **सूर्यश्चागस्त्यश्च तयोः, ईये** सप्तमी, च । चकारेण ङेः समुच्चयः, यो व्यञ्जनाल्लुगित्यनुवर्तन्ते । सूर्यस्य भार्या मानुषी सूरी, धवाद्योगादिति ङीः, अस्य ङ्यां

लुक् स्यात् । सूरी, आगस्ती, सौरीयः, आगस्तीयः ॥ **तिष्यपुष्ययोर्भाणि** ॥ ९० ॥ भं नक्षत्रं तस्याणि परेऽनयोर्यो लुक् स्यात् । तैषी रात्रिः, पौषमहः । भाणीति किम् ? तैष्यश्चरुः ॥ **आपत्यस्य क्यच्च्व्योः** ॥९१॥ व्यञ्जनात्परस्यापत्यस्य यः क्ये च्वौ च परे लुक् स्यात् । गार्गीयति, गार्गीयते, गार्गीभूतः । आपत्यस्येति किम् ?

लुगिति लुगनेन यलुक् । सूर्यस्येयमित्यणि ङ्यां सौरीति वा । अगस्त्यस्येयमागस्ती, पूर्ववत् । सूर्यो देवताऽस्येति सौर्यः, सौर्यस्यायं सौरीयः, एवमागस्तीयः, सौरीयागस्तीयशब्दयोः प्रथमं देवतार्थेऽण्, पश्चादिदमर्थे ईयः, अवर्णेवर्णस्येत्यलोपः, अनेन यलोपः ॥ तिष्यश्च पुष्यश्च तयोः, भेऽण् भाण् तस्मिन् । यो व्यञ्जनाल्लुगिति वर्तन्ते । नक्षत्रसम्बन्धि अण् च चन्द्रयुक्तादिति सूत्रविहितः, "भर्तुसन्ध्यादेरणि "ति सूत्रविहितश्च । तिष्येण चन्द्रयुक्तेन युक्ता तैषी रात्रिः । तिष्ये भवस्तैषः शिशुः । एवं पुष्येण चन्द्रयुक्तेन युक्तः पौषमहः । तिष्यो देवताऽस्य तैष्यश्चरुः, अत्र देवतार्थेऽण् विहितः न तु नक्षत्रे ॥ अपत्ये भव आपत्यस्तस्य, क्यश्च च्विश्च क्यच्च्वी तयोः । व्यञ्जनात्, यः लुगित्यनुवर्तन्ते । गार्ग्यमिच्छति गार्गीयति, अमाव्ययात्क्यन्, वर्तमाने तिव्, क्यनीत्यवर्णान्तस्य ईः, ततः "येन नाव्यवधानं तेन व्यवहितेऽपि स्यादि"ति न्यायेन ईकारादिव्यवधानेऽपि अनेन सूत्रेण क्ये परे यलोपः । गार्ग्य इव आचरति गार्गीयते, क्यङिति क्यङ्, वर्तमाने ते, दीर्घश्चिवयङीति दीर्घः, अनेन यलोपः । अगार्ग्यो गार्ग्यो भूतो गार्गीभूतः, कृभ्वस्तिभ्यामिति च्विः, "ईश्चावर्णस्ये"त्यन्तस्य ईः, अनेन यलोपः । सङ्काशेन निर्वृत्तं साङ्काश्यं "सुपन्थ्यादेर्ण्य" इति ण्यः प्रत्ययः । साङ्काश्यमिच्छति साङ्काश्यीयति, अत्र यकारो नाऽपत्ये विहित इति न तल्लोपः । कारिकेयीमिच्छति कारिकेयीयति, अत्र एयण् सम्बन्धिनो यकारस्यापत्यत्वेऽपि नासौ यकारो

साङ्काश्यीयति । व्यञ्जनादित्येव ? कारिकेयीयति ॥ **तद्धितयस्वरेऽनाति** ॥ ९२ ॥ व्यञ्जनात्परस्यापत्यस्य यो यादावादिर्वर्जस्वरादौ च तद्धिते लुक् स्यात् । गार्ग्यः, गार्गकम् । आपत्यस्येत्येव ? काम्पील्यकः । तद्धितेति किम् ? वात्स्येन । अनातीति किम् ? गार्ग्यायणः ॥ **बिल्वकीयादेरीयस्य** ॥ ९३ ॥ नडादिस्था बिल्वादयस्तेषां कीयप्रत्ययान्तानामीयस्य तद्धितयस्वरे लुक् स्यात् । बैल्वकाः, वैणुकाः । बिल्वकीयादेरिति किम् ? नाडकीयः ॥ **न राजन्यमनुष्ययोरके** ॥ ९४ ॥ अनयोर्योऽके परे लुग्न स्यात् । राजन्यानां

व्यञ्जनात्परः ॥ यश्च स्वरश्च यस्वरम्, तद्धितस्य यस्वरं तस्मिन्, न आदनात्तस्मिन् । व्यञ्जनादापत्यस्य यो लुगिति वर्तन्ते । गार्ग्ये साधुर्गार्ग्यः तत्र साधाविति यप्रत्ययेऽनेन यलोपः । गर्गाणां समूहो गार्गकम्, गोत्रोऽक्षेति अकञ् प्रत्ययः । अत्र गर्गस्यापत्येऽर्थे यञि कृते, तस्य च "यञञोऽश्यापर्णान्तगोपवनादेरि"ति लुबि प्राप्ते "न प्राग्जितीये स्वरे" इत्यनेन निषेधः, ततश्च समूहार्थेऽकञ् परेऽनेन सूत्रेण यलोपः । कम्पीलेन निर्वृत्तं काम्पील्यं "सुपन्यादेर्ण्य" इति ण्यप्रत्ययः, काम्पील्ये भवः काम्पील्यकः, "प्रस्थपुरे"त्यकञ्, अत्र यकारो नाऽपत्यार्थे विहितः । वत्सस्यापत्यं वात्स्यस्तेन, अत्र यकारात्परस्तद्धितो नास्ति । गार्ग्यायणः, अत्र यकारात्परो आयनण् प्रत्ययः वर्तते, स च आकारादिः, नातो यलोपः ॥ **बिल्वकीय आदिर्यस्यासौ** तस्य, ईयस्य । लुक् तद्धितयस्वरे इत्यनुवर्तते, अनातीति तु नानुवर्तते, आतोऽसम्भवात् । बिल्वकीयादयो द्विधा, तत्र केचिन्नडादेः कीये सति, अपरे कुत्सिताद्यर्थकप्रत्ययान्तादीये सति, तत्र विवक्षितमाह—नडादिस्था इति । बिल्वाः सन्त्यस्यामिति बिल्वकीया नाम नदी, तस्यां भवा बैल्वकाः, भवेऽण् प्रत्ययस्तस्मिन्परे ईयस्य लुक् ॥ **न, राजन्यश्च मनुष्यश्च** तयोः षष्ठी, अके । लुगिति वर्तते ।

समूहो राजन्यकम्, एवं मानुष्यकम् ॥ **ङ्यादेर्गौणस्याक्किपस्तद्धितलुक्यगोणीसूच्योः** ॥ ९५ ॥ ङ्यादेः प्रत्ययस्य गौणस्याक्किबन्तस्य तद्धितलुकि लुक् स्यात्, न तु गोणीसूच्योः । सप्तकुमारः, पञ्चेन्द्रः, पञ्चयुवा, द्विपङ्गुः । गौणस्येति किम् ? अवन्ती । अक्किप इति किम् ? पञ्चकुमारी । अगोणीसूच्योरिति किम् ? पञ्चगोणिः, दशसूचिः ॥ **गोश्चान्ते ह्रस्वोऽनंशिसमासेयोबहुव्रीहौ** ॥ ९६ ॥ गौणस्याक्किपो गोऽर्थाद्यन्तस्य चान्ते वर्त्तमानस्य ह्रस्वः स्यात्, न चेदसावंशि-

---

राज्ञोऽपत्यमिति, जातौ राज्ञ इति ये, 'अनोऽस्येये' इत्यनो लुगभावे राजन्यानां समूह इति विग्रहे गोत्रोक्षेत्यकञि, तद्धितयस्वरेऽनातीति यलोपे प्राप्तेऽनेन निषेधः ॥ ङी आदिर्यस्य तस्य, गौणस्य, न विद्यते किप् यस्मिन् अक्किप् तस्य, तद्धितस्य लुक् तस्मिन्, गोणी च सूची च गोणीसूच्यौ, ततो नञ्समासः, तयोः षष्ठी । लुगिति सम्बध्यते । सप्त कुमार्यो देवताऽस्येति 'देवतेत्यनेनाणि' "द्विगोरनपत्ये" इति तल्लोपेऽनेन ङीलुक्, सप्तकुमारः । पञ्चेन्द्राण्यो देवताऽस्येति पञ्चेन्द्रः पूर्ववत्, ङीनिवृत्तौ च तत्सन्नियोगशिष्टयोरागमादेशयोरपि निवृत्तिः, सन्नियोगशिष्टानामेकापाये ऽन्यतरस्याप्यपाय इति न्यायात्, तेनाऽत्र ङीनिवृत्तौ वरुणेन्द्ररुद्रेति सूत्रेण ङीसन्नियोगशिष्टः आनपि निवृत्तः । एवं पञ्च युवतिभिः क्रीतः पञ्चयुवा । द्वाभ्यां पङ्गूभ्यां क्रीतो द्विपङ्गूरित्यादि बोध्यम् । अवन्तेरपत्यं स्त्री अवन्ती, अत्र तद्धितप्रत्ययस्य कुन्त्यवन्तीत्यनेन लुक् ततो ङीः, अत्र तद्धितलुकि कृते ङेर्जातत्वादगौणत्वम् । कुमारीमिच्छति कुमारीयति, कुमारीयतीति किप्, तस्य लोपे सति कुमारी, ततः पञ्च कुमार्यो देवताऽस्येति पञ्चकुमारी, देवतार्थे विहितस्य तद्धितस्य लुकि सत्यपि किपो लोपान्न ङीनिवृत्तिः । पञ्चभिर्गोणीभिः क्रीतः पञ्चगोणिः ॥ गोः षष्ठी, च, अन्ते, ह्रस्वः, अंशोऽस्यास्तीत्यंशी, अंशिना समासः, ईयसा बहुव्रीहिः, ईयोबहुव्रीहिः, अंशिसमासश्च

समासान्त ईयस्वन्तबहुव्रीह्यन्तो वा। चित्रगुः, निष्कौशाम्बिः, अतिखट्टः, अतिब्रह्मबन्धुः। गौणस्येत्येव ? सुगौः, राजकुमारी। अक्विप इत्येव ? प्रियगौः, प्रियकुमारी चैत्रः। गोश्चेति किम् ? अतितन्त्रीः। अन्त इति किम् ?गोकुलम्, कुमारीप्रियः, कन्यापुरम्। अंशिसमासादिवर्जनं किम् ? अर्द्धपिप्पली, बहुश्रेयसी ना ॥ क्लीबे ॥ ९७ ॥ नपुंसकवृत्तेः स्वरा-

---

ईयोबहुव्रीहिश्च, न अंशिसमासे यो बहुव्रीहिस्तस्मिन्। चकारेण ङ्यादेर्गौणस्याक्विप इति पूर्वसूत्रांशस्यानुकर्षः। प्रत्ययमात्रग्रहणे तदन्तग्रहणमिति सामर्थ्यलब्धन्यायेनोक्तं ङ्याद्यन्तस्येति। चित्रा गावो यस्य चित्रगुः। कौशाम्ब्या निर्गतो निष्कौशाम्बिः। खट्वामतिक्रान्तोऽतिखट्टः। ब्रह्मा बन्धुर्यस्याः सा ब्रह्मबन्धुः, उतोऽप्राणिनश्चेत्यूङ् तामतिक्रान्तोऽतिब्रह्मबन्धुः, इत्यादिषु गोपदं ङ्याद्यन्तञ्च पदं समासार्थेऽन्यपदार्थे विशेषणत्वेन गुणभूतमित्यनेन सूत्रेण ह्रस्वः। शोभना गौः सुगौः, राज्ञः कुमारी राजकुमारी, अत्र गोशब्दस्य कुमारीशब्दस्य च स्वघटितसमासार्थनिष्ठविशेष्यतानिरूपितप्रकारताश्रयपदार्थाबोधकत्वेन न गौणत्वम्। गामिच्छतीति गव्यति, गव्यतीति गौः क्विप्, प्रिया गौर्यस्य सः, एवं कुमारीमिच्छतीति कुमारीयति, ततः क्विपि कुमारी, प्रियश्चासौ कुमारी च। उभयत्र गोशब्दकुमारीशब्दार्थयोरन्यपदार्थे चैत्रे गुणीभूतत्वेऽपि गोशब्दकुमारीशब्दयोः क्विबन्तत्वान्न ह्रस्वः। अर्द्धं पिप्पल्याः अर्धपिप्पली, अयं तत्पुरुषविशेषोऽशिसमासस्ततोऽत्र न ह्रस्वः। यद्यप्यत्र ह्रस्वे कृतेऽपि, परलिङ्गो द्वन्द्वोऽशीति वचनात्पिप्पलीशब्दलिङ्गे "इतोऽत्यर्थादि"ति ङ्यामर्धपिप्पलीति रूपसिद्धौ नाऽस्य प्रत्युदाहरणत्वं सम्भवति, तथापीतोऽत्यर्थादित्यनेन ङेर्वैकल्पिकत्वादर्धपिप्पलिरित्यपि स्यात्, तद्व्यावृत्त्यर्थमंशिसमासवर्जनम्। बह्व्यः श्रेयस्यो यस्य सः बहुश्रेयसी, ईयसन्तबहुव्रीहित्वादत्र न ह्रस्वः ॥ क्लीबे ह्रस्व इति वर्तते। ह्रस्व-

न्तस्य नाम्नो ह्रस्वः स्यात् । कीलालपम्, अतिनु कुलम् ॥ **वेदूतोऽनव्ययय्वृदीचूङीयुवः पदे** ॥ ९८ ॥ ईदूतोरुत्तरपदे परे ह्रस्वो वा स्यात्, न चेत्तावव्ययौ य्वृतौ ईचौ ङ्यौ इयुव्स्थानौ च स्याताम् । लक्ष्मीपुत्रः, लक्ष्मिपुत्रः । खलपूपुत्रः, खलपुपुत्रः । अव्ययादिवर्जनं किम् ? काण्डीभूतम्, इन्द्रहूपुत्रः, कारीषगन्धीपुत्रः, गार्गीपुत्रः, श्रीकुलम्, भ्रूकुलम् ॥ **ङ्यापो बहुलं नाम्नि** ॥ ९९ ॥ ङ्यन्त-

---

त्वस्य स्वरधर्मत्वात् ह्रस्वविधानबलेन स्वरस्योपस्थितिः । स च नाम्नो विशेषणं तदन्तविधिश्च । कीलालं पिबति यत्कुलं तत्कीलालपं "मन्वन्कनिबि"ति विच् प्रत्ययः, ङीबेऽनेन ह्रस्वः । नावमतिक्रान्तं यत्कुलं तदतिनु, अत्रानेनौकारस्य उकारो ह्रस्वः ॥ **वा, ईंच ऊंच तस्य, अव्ययञ्च य्वृच्च ईंच ङीश्च इय् च उव् च ततो नञ्समासस्तस्य, पदे । ह्रस्व इत्यनुवर्तते ।** लक्ष्म्याः पुत्रो लक्ष्मीपुत्रः, लक्ष्मिपुत्रः, अनेन वा ह्रस्वः । लक्ष्मीत्यत्र ईकारो न ङीसम्बन्धी, औणादिकेन ईप्रत्ययेन निर्वृत्तत्वात्, नवा इय्स्थानी ईकारः, धातुसम्बन्धित्वाभावात् । खलप्वः पुत्रः खलपूपुत्रः खलपुपुत्रः, अत्र ऊकारस्य धातुसम्बन्धित्वेऽपि "क्विब्वृत्तेरसुधियस्ताविति"त्यनेन यकारवकारयोरेव भावान्न उव्स्थानित्वम् । काण्डीभूतम्, अभूततद्भावे च्विः, ऊर्याद्यनुकरणेति गतिसंज्ञा, गतित्वाच्च गतिरित्यव्ययत्वम् । इन्द्रं ह्वयतीति किपि, यजादिवचेरिति य्वृति, दीर्घमवोन्त्यमिति दीर्घे इन्द्रहूः, इन्द्रह्वः पुत्रः इन्द्रहूपुत्रः, अत्र य्वृत्सम्बन्धी ऊकारः । कारीषगन्धीपुत्र इत्यत्र ईचूसम्बन्धीकार उक्तः । गार्ग्याः पुत्रो गार्गीपुत्रः, अत्र ङीसम्बन्धीकारः । श्रियो भ्रुवो वा कुलम्, अत्र इयुव्स्थानिनावीकारोकारौ ॥ **ङीश्चाऽऽप् च तस्य, बहुलम्, नाम्नि ।** पदे ह्रस्व इत्यनुवर्तते । भरणिगुप्त इत्यादीनां संज्ञावाचिनामनेन

स्याऽऽबन्तस्य चोत्तरपदे संज्ञायां ह्रस्वः स्याद्, बहुलम्। भरणिगुप्तः, भरणीगुप्तः। रेवतिमित्रः, रेवतीमित्रः। शिलावहम्, शिलावहम्। गङ्गमहः, गङ्गामहः ॥ **त्वे** ॥ १०० ॥ ङ्याबन्तस्य त्वे परे बहुलं ह्रस्वः स्यात्। रोहिणित्वम्, रोहिणीत्वम्। अजत्वम्, अजात्वम् ॥ **भ्रुवोऽच्च कुंसकुटयोः** ॥ १०१ ॥ अनयोः परयोर्भ्रुवो ह्रस्वोऽच्च स्यात्। भ्रकुंसः, भ्रुकुंसः। भ्रकुटिः, भ्रुकुटिः ॥ **मालेषीकेष्टकस्यान्तेऽपि भारितूलचिते** ॥ १०२ ॥ एषां केवलानामन्तस्थानाञ्च

बहुलं ह्रस्वः। क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव। विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति ॥ त्वे सप्तमी। ङ्यापो बहुलं ह्रस्व इति पदान्यनुवर्तन्ते। पृथग्योगात् पदे इति निवृत्तम्। रोहिण्या भावो रोहिणित्वम्, अजाया भावोऽजत्वम् ॥ भ्रुवः षष्ठी, अत्, च, कुंसश्च कुटिश्च तयोः। चकारेण ह्रस्वस्य समुच्चयः। भ्रुवौ कुंसयति, कर्मणोऽण्, अनेन ह्रस्वः। पक्षे अच्च भ्रकुंसः। भ्रुवः कुटिर्भ्रुकुटिर्भ्रकुटिः। भ्रूकुंसभ्रूकुटिशब्दावपीच्छन्त्यन्ये, अपरे च भृकुंसभृकुटिशब्दावपि ॥ माला च इषीका च इष्टका च तस्य, अन्ते, अपि, भारी च तूलश्च चितश्च तस्मिन्। ह्रस्व इति सम्बध्यते। एवमग्रेऽपि। मालां बिभर्तीत्येवंशीलो मालभारी, "अजातेः शीले" णिन्। उत्पलानां माला, तां बिभर्तीत्येवंशीलः। अन्तेऽपीत्यपिशब्देन गृहीतानां केवलानामित्यस्योदाहरणमाद्यम्, अन्ते वर्तमानानामित्यस्य च द्वितीयम्। इषीकायास्तूलमिषीकतूलम्। इष्टकाभिश्चितमिष्टकचितम्। अत्र मालादेर्नाम्नो विशेषणत्वेन तदन्तलाभात्केवलस्य च व्यपदेशिवद्भावेन ह्रस्वसिद्धेरन्तग्रहणं व्यर्थं सत्, ग्रहणवता नाम्ना न तदन्तविधिः, साक्षान्नामग्रहणेन यस्य यत्कार्यं विधीयते तत्कार्यं तस्य नाम्नः समासादिना समुदायान्तस्य सतो न भवतीत्यर्थकं न्यायं सूचयति। एवञ्च मालेत्यस्य नामग्राहं विहितो

भार्यादिषु परेषु यथासङ्ख्यं ह्रस्वः स्यात् । मालभारी, उत्पलमालभारी, इषीकतूलम्, इष्टकचितम् ॥ **गोण्या मेये** ॥ १०३ ॥ गोण्या मानवृत्तेरुपचारान्मेयवृत्तेर्ह्रस्वः स्यात् । गोण्या मितो गोणिः ॥ **ङ्यादीदूतः के** ॥ १०४ ॥ ङ्यादीदूदन्तानाञ्च के प्रत्यये ह्रस्वः स्यात् । पट्टिका, सोमपिका, लक्ष्मिका, वधुका ॥ **न कचि** ॥ १०५ ॥ ङ्यादीदूतां कचि परे ह्रस्वो न स्यात् । बहुकुमारीकः, बहुकीलाल-

---

ह्रस्वः एतन्न्यायादुत्पलमालभारीत्यादौ न प्राप्नोति, अतोऽन्तेऽपीति करणं सफलम् ॥ **गोण्या तृतीया, मेये** । गोण्या मितो धान्यादिर्गोणिः । विनैव तद्धितेन गोणीशब्दो गोणीप्रमितेऽर्थे व्रीह्यादावुपचाराद्वर्तते, यथा प्रस्थप्रमिते प्रस्थ इति, तस्य चायं ह्रस्वः । कृतेऽपि वा तद्धिते तल्लुकि अगोणीसूच्योरिति ह्रस्वप्रतिषेधस्य समासे एव विज्ञानादत्र तदभावात्, ह्रस्वार्थमिदं सूत्रम् ॥ **ङीश्चाच ईच ऊच** तस्य, के । कुत्सिताऽल्पाऽज्ञाता वा पट्टी पट्टिका । "प्राग्नित्यात्कबि"ति कप्प्रत्ययः । अत्र ईतः पृथग् ङीग्रहणं पुंवद्भावबाधनार्थम्, अन्यथा पट्टिकेत्यादि न सिद्ध्येत् । सोमपिकेत्यादावस्य सूत्रस्य दारदिकेत्यादौ च पिति पुंवद्भावस्य सावकाशत्वादत्र चोभयप्राप्तौ स्पर्द्धे इति **परिभाषा**सूत्रेण पर एव पुंवद्भावः स्यात् । तथा के इति कप्प्रत्ययस्यैव ग्रहणम्, प्रत्ययाऽप्रत्ययोः प्रत्ययस्यैव ग्रहणमिति न्यायात्, तेन काकः पाक इत्यादौ न ह्रस्वः । सोमं पिबतीति सोमपा, कुत्सिदाद्यर्थे कप्रत्ययेऽनेन ह्रस्वे च कृते सोमपकः, ततः स्त्रीत्वविवक्षायामादित्यापि, अस्यायत्तदिति इकारः सोमपिका ॥ **न, कचि** सप्तमी । पूर्वसूत्रं सम्पूर्णमनुवर्तते । बह्वयः कुमार्यो यस्य सः, "ऋन्नित्यादित" इति कच्प्रत्ययः, पूर्वसूत्रेण ह्रस्वे प्राप्तेऽनेन प्रतिषेधः । बह्वः कीलालपा यस्य सः, बह्वी लक्ष्मीर्यस्य, पुमनड्डुन्नाविति कच्प्रत्ययः । बह्व्यो लक्ष्म्यो यस्य, इति विग्रहे तु "शेषाद्वे"ति कच् । न चात्र सर्वत्र ह्रस्वस्य

पाकः, बहुलक्ष्मीकः, बहुब्रह्मबन्धूकः ॥ **नवाऽऽपः** ॥ १०६ ॥ आपः कचि परे ह्रस्वो वा स्यात् । प्रियखट्वकः, प्रियखट्वाकः ॥ **इचापुंसोऽनित्क्याप्परे** ॥ १०७ ॥ आबेव परो यस्मान्न विभक्तिस्तस्मिन्ननितः प्रत्ययस्यावयवे के परेऽपुल्लिङ्गार्थाद्विहितस्यापस्थाने इह्रस्वौ वा स्याताम् । खट्विका, खट्वका, खट्वाका । अपुंस इति किम् ? सर्विका । अनिदिति किम् ? दुर्गका । आप्पर इति किम् ? प्रियखट्वाको

प्राप्तिरेव नास्ति, पूर्वसूत्रे च क इति, निरनुबन्धग्रहणे न सानुबन्धस्येति न्यायेन कचि परे तेन ह्रस्वाप्राप्तेः, तथा च कथं निषेध इति वाच्यम्, अनेन प्रतिषेधेनैव पूर्वसूत्रे तन्न्यायप्रवृत्त्यभावज्ञापनात् ॥ **नवा, आपः** । कचीत्यनुवर्तते । पूर्वेण प्रतिषेधे प्राप्ते पक्षे ह्रस्वार्थमिदम् । प्रिया खट्वा यस्य सः, शेषाद्वेति कच्प्रत्ययेऽनेन वा ह्रस्वः । कजभावे प्रियखट्वः ॥ **इत्, च, न पुमानपुमांस्तस्मात्**, न इदनुबन्धो यस्यासौ नित्, न निदनित्तस्य सम्बन्धि क् अनित्क् तस्मिन्, आबेव परो यस्मात्तस्मिन् । चकारो ह्रस्व इति समुच्चिनोति । अपुल्लिङ्गार्थादिति, ननु आबादेः स्त्रीवाचिशब्दादेव विधानात्, पुल्लिङ्गार्थादापोऽभावाद्विशेषणमिदं निरर्थकमिति चेन्न, तथाहि–शब्दस्य यत्प्रवृत्तिनिमित्तं तदेव पुंस्त्वस्य स्त्रीत्वस्य वाऽन्वयितावच्छेदकं भवति तादृशशब्दभिन्नश्शब्दोऽपुल्लिङ्गार्थ उच्यते । सर्वशब्दस्य च यत्प्रवृत्तिनिमित्तं पुंस्त्वस्यान्वयितावच्छेदकं तदेव च स्त्रीत्वस्यापीति नाऽपुल्लिङ्गार्थत्वमित्यदोषः । कुत्सिता खट्वा खट्विका खट्वका, खट्वाका, उभयविकल्पे त्रैरूप्यम् । न च खट्विकेत्यत्राकारेण व्यवधानात्, अप्परकाराभावेनेत्वानापत्तिर्दीर्घेऽपि "स्वरस्य विधे प्राग्विधावि"ति स्थानिवत्त्वाद्व्यवधानमेवेति वाच्यम्, येन नाऽव्यवधानं तेन व्यवहितेऽपि स्यादि"ति न्यायेनाकारव्यवधानेऽपि प्रवृत्तेः । सर्वा नाम काचित्ततः स्वार्थे "यावादिभ्यः" कः, ङ्यादौ त इति ह्रस्वः, अस्यायत्तदिती-

ना, अतिप्रियखट्वाका स्त्री । आप इत्येव ? मातृका ॥ **स्वज्ञाऽजभस्त्राऽधातुत्ययकात्** ॥ १०८ ॥ स्वज्ञाऽजभस्त्रेभ्यो धातुत्यवर्जस्य यौ यकौ ताभ्याञ्च परस्यापः स्थानेऽनित्क्याप्परे परत इकारो वा स्यात् । स्विका, स्वका । ज्ञिका, ज्ञका । अजिका, अजका । भस्त्रिका,

---

त्वम् । सर्व्वादेः सर्वशब्दस्य तु त्यादिसर्वादेरित्यनेनान्त्यस्वरात्प्रागकि सर्विका । प्रत्युदाहरणन्त्वाद्यमेव न तु द्वितीयं कात्पूर्वमापोऽभावेन द्व्यङ्गविकलत्वात् । दुर्गकेति, अनुकम्पिता दुर्गादेवी दुर्गका, ते लुग्वेति सूत्रेण देवीशब्दस्य लोपः । लुक्युत्तरपदस्य कप्न् प्रत्ययः, ङ्यादीदूत इति ह्रस्वः । प्रियखट्वाक इत्यत्र नाप्परः कः । प्रियखट्वाकमतिक्रान्ता अतिप्रियखट्वाका, अत्राऽप्याप्परो न कः, लुप्तद्वितीयाविभक्तिव्यवहितत्वात् । मातुस्तुल्या मातृका, "तस्य तुल्ये कः संज्ञाप्रतिकृत्योरि"ति कप्रत्ययः, जननीवचन एवात्र मातृशब्दः, न तु धान्यमाता मिमीत इति व्युत्पन्नो मातृशब्दः, तस्याऽपुंस इत्यनेनैव व्यावृत्तत्वात्, आबित्येवेत्यस्य प्रत्युदाहरणता न स्यात् ॥ **धातुश्च त्यश्च धातुत्यौ**, न धातुत्यौ अधातुत्यौ, यश्च कश्च यकम्, अधातुत्ययोर्यकम्, स्वश्च ज्ञश्चाऽजश्च भस्त्रश्चाऽधातुत्ययकञ्च तस्मात् । आपः, इत्, अनित्क्याप्परे इति पदानि सङ्गृह्यन्ते । आरम्भसामर्थ्यादपुंस इति नानुवर्तते । कुत्सिता स्वा ज्ञातिः स्विका स्वका, कप्रत्ययः, न त्वक्प्रत्ययः ज्ञातिधनाख्यायामसर्वादित्वात् । यद्यपि स्वशब्दः—स्वो ज्ञातावात्मनि क्लीबे त्रिष्वात्मीये धनेऽस्त्रियाम् । इति ज्ञातौ पुल्लिङ्गस्तथापि कुत्सिताद्यर्थविषये ज्ञातावपि, अत एव पाठात्स्त्रीलिङ्गः । अथवा ज्ञातिरत्र स्त्रीरूपा विवक्षिता तेन योनिमन्नामत्वात्स्वशब्दस्य स्त्रीत्वम्, न विद्यते स्वा यस्या इति विग्रहे कपि अस्विका अस्वका इति रूपे भवतः । कपि निमित्तभूते विकल्पपक्षे अस्यायत्तदिति न, विकल्पसामर्थ्यात्, कचि तु नवाप इति ह्रस्वे कृतेऽस्यायत्तदिति भव-

भस्त्रका । इभ्यिका, इभ्यका । चटकिका, चटकका । धातुत्यवर्जनं किम् ? सुनयिका, सुपाकिका, इहत्यिका । आप इत्येव ? काम्पील्यिका ॥ **द्व्येषसूतपुत्रवृन्दारकस्य ॥ १०९ ॥** एषामन्तस्यानित्क्याप्परे इर्वा स्यात् । द्विके, द्वके । एषिका, एषका । सूतिका, सूतका । पुत्रिका,

---

त्येव, न च सूत्रविकल्पः प्रवर्तते । सूत्रं विनाप्यस्त्रिका, अस्त्रकेति सिद्ध्यतीति, अस्त्रिकेति रूपमेकरूपेणैव गतार्थमिति । भस्त्राग्रहणं स्त्रीपुंससाधारणवृत्तेर्ग्रहणार्थम्, अविद्यमाना भस्त्रा यस्याः सा अभस्त्रा सैवाऽल्पाऽभस्त्रिकाऽभस्त्रका । अत्र हि गौणस्य ह्रस्वत्वे कृते समासात्स्त्रीपुंससाधारणादाप् इति पूर्वेण न सिद्ध्यति, यदा त्वपुंस्कादाञ्विधीयते तदा पूर्वेण त्रैरूप्यमेव, भस्त्रिका, भस्त्रका, भस्त्राका, न भस्त्राऽभस्त्रा, साऽल्पा चेदभस्त्रिकाऽभस्त्रकाऽभस्त्राकेति । यकारस्योदाहरणमिभ्यिका, इभ्यका । ककारस्योदाहरणं चटकिका, चटकका । शोभनो नयो यस्यां सुनया, सुनयिका । सुपाकिका इत्यत्र धातुसम्बन्धित्वान्न विकल्पः । इह भवा इहत्या, अल्पा चेदिहत्यिका, त्यविषयं प्रत्युदाहरणम् । कम्पीलेन निर्वृत्तं काम्पील्यम्, काम्पील्ये भवा काम्पील्यिका, "प्रस्थपुरे"ति योपान्त्यलक्षणोऽकञ्, उत्तरसूत्रेणेह नित्यमिकारः ॥ द्विश्च **एषश्च सूतश्च** पुत्रश्च वृन्दारकश्च तस्य । अनित्क्याप्परे इः, इत्यनुवर्तते । आप इति तु निवृत्तं पृथग्योगात् । द्विका, एषिका इत्यत्र त्यादिसर्वादेरित्यन्त्यस्वरात्पूर्वोऽक्, अनेन वा इः । केवलयोरेवानयोर्विकल्पेनेकारः, न तु सपूर्वयोः । न द्वे, न एषा, इत्यादिविग्रहेऽकि कृते, कृतेऽकृते वा नञ्तत्पुरुषे, "अन्तरङ्गानपि विधीन्बहिरङ्गाऽपि लुप् बाधते" इति न्यायेन समासार्थाया विभक्तेस्त्यदाद्यत्वात्प्राग् लुबि प्रत्ययलक्षणस्य चाभावात् ततोऽकि वा समुदायविभक्तिमाश्रित्य त्यदाद्यत्वे आपि च समासात्पूर्वोत्पन्नविभक्ति-

पुत्रका । वृन्दारिका, वृन्दारका ॥ **वौ वर्त्तिका** ॥ ११० ॥ शकुनावर्थे वर्त्तिकाया इत्वं वा स्यात् । वर्त्तिका, वर्त्तका । वाविति किम् ? वर्त्तिका भागुरी ॥ **अस्यायत्तक्षिपकादीनाम्** ॥१११॥ यदादिवर्जस्यातोऽनित्क्याप्परे इः स्यात् । पाचिका, मद्रिका । अनित्क्रीत्येव ? जीवका । आप्पर इत्येव ? बहुपरिव्राजका । यदादिवर्जनं किम् ? यंका, सका, क्षिपका, ध्रुवका ॥ **नरिकामामिका** ॥११२॥

पर एव आप्, तथा चाप्परत्वं नास्तीति नास्य सूत्रस्य प्रवृत्तिरिति अद्धकेऽनेषकेत्येव रूपम् । एषेति कृतषत्वनिर्देशादविकृतस्यैतच्छब्दस्य न भवति, यथा एता एव एतिकाः । सर्वादेरेवैतदो निर्देशो द्विसाहचर्यात्तेन इच्छतीत्येषिका इति इषेर्णकि निष्पन्ने नेत्वविकल्पः ॥ **वौ सप्तमी**, वर्तिका । वर्तते इति णके वर्तका, वर्तिका शकुनिः । भागुरी लोकायतस्य व्याख्या ॥ **अस्य, क्षिपकादिर्येषान्ते**, यश्च तच्च क्षिपकादयश्च ततो नञ्समासस्तेषाम् । अनित्क्याप्परे इः इत्यनुवर्तते । पृथग्योगाद्वेति निवृत्तम् । अन्यथाऽत्रापि विकल्पे स्विका स्वकेत्यादौ ङ्यादीदूत इति ह्रस्वे कृतेऽनेन विकल्पेनैवास्य सिद्धत्वात्स्वज्ञाजभस्त्रेत्यादीनां पृथगुपादानस्य वैयर्थ्यं स्यात् । जीवतादित्याशास्यमाना या सा जीवका "आशिष्यकनि" त्यकन्प्रत्ययः । बहवः परिव्राजका यस्यां नगर्यामिति विग्रहः । अत्र विभक्त्यन्तादाप्, अतो ककारात्परो नाऽऽप्, विभक्त्या व्यवहितत्वात् । क्षिपका प्रहरणविशेषः । ध्रुवकाऽऽवपनभाजनविशेषः ॥ **नरिका च मामिका** चेति विग्रहः । नरान्कायतीति नरिका आतो डोऽह्वावाम इति सूत्रेण डप्रत्ययः । अत्र ककारो न प्रत्ययावयव इति इत्वे प्राप्ते निपात्यते । ममेयं मामिका, युष्मदस्मदोरित्यञि ममकादेशे निपातनादित्वम् । अत्र मामिकशब्दो न संज्ञावाची तेन केवलमामकेत्यादिना न ङीः, किन्तु आदित्याप् ॥

नरिकामामिकयोरित्वं निपात्यते । नरिका, मामिका ॥ **तारकावर्णकाऽष्टका ज्योतिस्तान्तवपितृदेवत्ये** ॥ ११३ ॥ एतेष्वर्थेषु यथासङ्ख्यमेते इवर्जा निपात्यन्ते । तारका ज्योतिः, वर्णका प्रावरणविशेषः, अष्टका पितृदैवत्यं कर्म्म ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ द्वितीयस्याध्यायस्य समासविषयश्चतुर्थः पादः समाप्तः ॥ २ ४ ॥

तारका च वर्णका चाऽष्टका च ताः, ज्योतिश्च तान्तवश्च पितृदेवत्यश्च तस्मिन् । अन्यत्र तारिका, वर्णिका-भागुरी लोकायतस्य, अष्टिका खारी अष्टौ द्रोणाः परिमाणमस्या इत्यष्टिका । सर्वत्र इत्वे प्राप्ते तद्रहिता उक्तेष्वर्थेषु निपात्यन्ते ॥

इति द्वितीयाध्यायस्य चतुर्थपादे समासप्रकरणात्मकः अवचूरिपरिष्कारः समाप्तः ॥



अर्हम्

॥ अथ तृतीयाध्यायस्य प्रथमपादः ॥

धातोः पूजार्थस्वतिगतार्थाधिपर्यतिक्रमार्थाऽतिवर्जः प्रादिरुपसर्गः प्राक् च ॥१॥ धातोः सम्बन्धी तदर्थद्योती प्रादिरुप-

---

धातोः पञ्चमी, पूजा अर्थो ययोस्तौ पूजार्थौ, सुश्च अतिश्च स्वती, पूजार्थौ च स्वती च पूजार्थस्वती, गतो ज्ञातोऽर्थो ययोस्तौ गतार्थौ, अधिश्च परिश्च अधिपरी, गतार्थौ च तौ अधिपरी च, अतिक्रमोऽर्थो यस्य, अतिक्रमार्थः, अतिक्रमार्थश्चासावतिश्च, ततः सर्वेषां द्वन्द्वः, तान् वर्जयतीति पूजार्थस्वतिगतार्थाऽधिपर्यतिक्रमार्थोऽतिवर्जः, प्र आदिर्यस्यासौ प्रादिः, उपसर्गः, प्राक्, च ॥ धातोरिति पदमावर्त्तनीयम्, एकञ्च षष्ठ्यन्तत्वेन विपरिणम्य प्रादिना सम्बन्धनीयम्, धातुसम्बन्धित्वञ्च प्रादीनां तदर्थद्योतकतया । तदर्थद्योतीत्युक्तत्वादुपसर्गाणां द्योतकत्वं सम्मतमिति गम्यते । द्योतकत्वञ्च तात्पर्यग्राहकत्वमिति केचित्, यथा सुखमनुभवतीत्यादौ प्रतीयमानोऽनुभवादिर्न धात्वर्थः, भवतीत्यत्रापि तत्प्रतीत्याऽऽपत्तेः, नोपसर्गस्यार्थः, प्रत्ययानां प्रकृत्यर्थेनान्वितस्य स्वार्थस्य बोधकत्वादनुभवादेरुपसर्गार्थत्वेऽप्रकृत्यर्थत्वेन तत्र तिवाद्यर्थान्वयाभावप्रसङ्गात्, अनुगच्छतीत्यादावप्यनुभवादिप्रतीत्यापत्तेश्च । नवा धातूपसर्गविशिष्टस्यार्थे गौरवात् । तथा चानुभवादिरूपार्थे भ्वादिधातोरेव लक्षणा, उपसर्गस्तु तात्पर्यग्राहकः । अत एवोपास्यते गुरुरित्यादौ आस्धातोरुपासनारूपफलवाचकात्कर्मणि प्रत्ययः, अन्यथोपासनायाः उपसर्गार्थत्वे आस्धातोरकर्मकतया कर्मणि प्रत्ययानापत्तिः स्यादिति । अन्ये तु धातूनामनेकार्थत्वादनुभवाद्यर्थेऽपि

सर्गः स्यात्, स च धातोः प्राक्, न परो व्यवहितः। पूजार्थौ स्वती, गतार्थाविधिपरी, अतिक्रमार्थमतिञ्च वर्जयित्वा। प्रणयति, परिणयति।

भ्वादेः शक्तिः, उपसर्गसमभिव्याहारस्तु तादृशशक्त्युद्बोधकः शक्त्युद्बोधकत्वमेव च द्योतकत्वम्। पूज्यत्वद्योतकौ स्वती, गतार्थौ यत्किञ्चिद्विशेषद्योतकत्वाभाववन्तौ-अधिपरी, अतिक्रमणद्योतकश्चातिः, एते सर्वे नोपसर्गसंज्ञाभाजः। तत्रादिकर्म्मोदीरणभृशार्थैश्वर्यसम्भवनियोगशुद्धीच्छाप्रीतिशान्तिपूजादर्शनतत्परप्रशंसासङ्गदिग्योगावयवावियोगान्तर्भावहिंसाबहुत्वमहत्त्वस्थितिदाननानार्थदक्षिणानुवृत्त्यादिषु प्रः। वधघर्षणस्वर्गतिविक्रमाप्रत्यक्षाऽनभिमुख्यभृशार्थमोहप्रातिलोम्येषु परा। वर्जनवियोगालेखनचौर्यनिर्देशवैकृतविधिविपर्ययऋणग्रहणावयवपूजानिह्नवसव्यवृत्तिषु अपः। मूर्त्तिवचनैक्यप्रभवसमन्ताद्भावभूषणसमवायाभिमुख्ययौगपद्यश्लेषणभृशार्थदर्शनीयत्वसादृश्यानास्थितापिधानक्रोधमर्यादेर्ष्याचीवरग्रहणास्पृष्टप्रीतिस्वीकरणाल्पार्थाभ्यासप्राधान्यपुनःक्रियासु सम्। देशाधीष्टसामीप्यस्वाध्यायसाम्यार्थाभावायतिनिसर्गभृषार्थसादृश्यानुवृत्तिहितार्थलक्षणहीनार्थतृतीयार्थस्वाध्यायाधिक्यवीप्सासु-अनुः। विज्ञानाधोभावस्पर्धालम्बनसामीप्यशुद्धिस्वादुकारेषदर्थव्याप्तिभृशार्थनिश्चयपरिभवप्राप्तिगाम्भीर्यवृत्तान्तवियोगवर्चस्वदेशाख्याहितक्रियाश्रयस्पर्शेषु अवः। वियोगभृशार्थाभावात्ययप्रादुर्भावहेत्ववधारणदेशातिक्रमणाभिनिस्सरणेषु निर्। ईषदर्थकुत्सावैकृतव्यृद्धिकुच्छाप्रतिनन्दनानीप्सासु दुर्। नानार्थापायात्ययदूरभृशार्थकलहैश्वर्यवियोगमोहहर्षकुत्साप्रादुर्भावानभिमुख्यानवस्थानप्राधान्यभोजनविशेषविरुद्धसंज्ञादाक्ष्यव्ययकृत्स्नाप्तिषु विः। मर्यादाप्राप्तिस्पर्शलिप्साभयश्लेषकुच्छादिकर्मग्रहणनीहसमीपविक्रियार्हणावृत्त्याशीः स्वीकरणेषदर्थाभिविधिक्रियायोगान्तर्भावस्पर्द्धाभिमुख्योर्ध्वकर्मभृशार्थप्रादुर्भावसमवायस्मरणविस्मयप्रतिष्ठानिर्देशशक्त्यप्रसादविवृतानुबन्धपुनर्वचनेषु आङ्।

धातोरिति किम् ? वृक्षं वृक्षमभि सेकः । पूजार्थस्वत्यादिवर्जनं किम् ? सु सिक्तम्, अति सिक्तं भवता, अध्यागच्छति, आगच्छत्यधिः पर्या-

---

लेशराशिभृशार्थाधोभावप्रसादसन्यासार्थार्थगत्यादेशदानकर्मोपदर्शनकेतनोपरमणावृत्तिबन्धनदर्शनावसानकौशलासेवानियमसमीपान्तर्भावमोक्षतमस्तापसान्नाश्रयग्रहणवर्णावृक्षाभावातिशयेषु निः । पुनः क्रियादानसादृश्यहननर्नियातनतद्योगविनिमयाभिमुख्यवामदिग्योगव्याप्त्याध्यानमात्रार्थसम्भावनतत्त्वाख्याभागलक्षणवारणसम्बन्धवीप्साव्याधिस्थानेषु प्रतिः । ईषदर्थव्याप्त्युपर्यर्थाभ्याससान्त्वसमन्ताद्भावभूषणपूजासमवायवर्जनालिङ्गननिवसनशोकभोजनलङ्घनवीप्सावज्ञानतत्त्वाख्यास्पर्शलक्षणाभ्यावृत्तिनियमेषु परिः । वर्जनप्रतियत्नवैकृतवाक्याध्याहारलवनपरीक्षासम्पत्सर्पणगुह्यागःक्षयसामर्थ्याचार्यकरणसादृश्यस्वीकरणपीडामन्त्रक्रियाव्याप्तिदोषाख्यानयुक्तिसंज्ञापूर्वकर्मपूजादानसामीप्याधिकहीनवीप्सासु उपः । अधिकाराधिष्ठानपाठोपर्यर्थैश्वर्यबाधनाधिक्यस्मरणसहयोगस्ववशतासु अधिः । पदार्थानुवृत्त्यपेक्षासमुच्चयान्ववसर्गगर्हाशीस्सम्भावनभूषणसंवरणप्रश्नावमर्षेषु अपिः । पूजाभृशार्थानुमतिसमृद्धिदृढाख्याकृच्छ्रेषु सुः । प्राबल्यसम्भवलाभोर्द्ध्वकर्मप्रकाशास्वस्थमोक्षदृश्यसमृद्धात्ययान्यायप्राधान्यशक्त्यवरपरदिग्योगनिर्देशेषु उद् । पूजाभृशार्थानुमत्यतिक्रमणसमृद्धिभूताभावावज्ञानहीनार्थेषु अतिः । आभिमुख्यसन्निकृष्टवशीकरणोर्द्ध्वकर्मपूजाकुलसान्त्वव्याप्तीच्छादोषोल्बणरूपवचनलक्ष्यवीप्सानवप्रणयेषु अभिः । एते प्रादयः प्रत्यासन्नक्रियासम्बन्धिन उपसर्गसंज्ञका भवन्ति । धातोः प्रागेव तेषां प्रयोगः । अत एव प्रणयति परिणयतीत्यादौ 'अदुरुपसर्गान्तरे'ति णत्वम् । वृक्षं वृक्षमभि सेक इत्यत्र 'लक्षणवीप्से'ति द्वितीया । द्विवचनद्योत्यं यद्व्याप्यत्वं तद्विशिष्टवृक्षादीनां व्यापकत्वसम्बन्धेन सेचनेऽन्वयः, एतदेव च व्यापकत्वं अभिद्योतय-

गच्छति, आगच्छति परि; अति सिक्ता । धातोरिति प्राक् चेति च गतिसंज्ञां यावत् ॥ **ऊर्यादिच्विडाचश्च गतिः ॥ २ ॥** एते उपसर्गाश्च, धातोस्सम्बन्धिनो, गतयः स्युस्ते च प्राग्धातोः । ऊर्यादिः, ऊरीकृत्य, उररीकृत्य । अनुकरणम्, खाट्कृत्य । च्व्यन्तः, शुक्लीकृत्य ।

तीति धात्वर्थद्योतित्वाभावान्नोपसर्गसंज्ञा, अत एव सेक इत्यत्र न सकारस्य षत्वम् । सु सिक्तम्, अत्र सेकगतपूज्यत्वद्योतकः सुः, क्रियापूज्यत्वकृतः तत्तत्क्रियाकर्तुः पूज्यत्वमिति पूज्यार्थद्योतकत्वात् सोः अतेश्च नोपसर्गत्वम्, अत एव न षः । अध्यागच्छति पर्यागच्छति, अत्र अधिपरिद्योत्य उपरिभावः सर्वतोभावश्चान्यतः प्रकरणादेः प्रतीयत इति गतार्थता । अत्र प्राक्त्वनियमाभावः । यदर्थं क्रिया तस्मिन्निष्पन्ने क्रियाप्रवृत्तिरतिक्रमः, तद्द्योतिनोऽतेर्नोपसर्गसंज्ञा, यथाऽपि सिक्ता, अत्रापि न षत्वम्, समासाभावाच्च यबादेशाभावः । अनेनोपसर्गसंज्ञाविधानेन 'संज्ञा न संज्ञान्तरबाधिके'ति न्यायः सूच्यते, अन्यथोत्तरसूत्रेण क्रियमाणया गतिसंज्ञयोपसर्गसंज्ञाया बाधे निष्फलत्वादुपसर्गसंज्ञा निष्फला भवेत् ॥ ऊरी आदिर्येषान्ते, ऊर्यादयश्चानुकरणञ्च च्विश्च डाच्च ते, च, गतिः । च्विपदेन डाच्पदेन च तदन्तविधिः, यद्यपि 'संज्ञोत्तरपदाधिकारे प्रत्ययग्रहणे प्रत्ययमात्रस्यैव ग्रहणं न तदन्तस्य,' 'तदन्तं पदमि'ति ज्ञापकात्, तथापीह तदन्तग्रहणम्, केवलयोश्च्विडाचोर्गतिसंज्ञायाः प्रयोजनाऽभावात् । सोऽयमित्यभेदोपचारेण कुतश्चित्सादृश्याद्येनानुक्रियते तदनुकरणम् । चशब्देनोपसर्गाणां ग्रहणम् । ऊरीकृत्वेत्यूरीकृत्य । अनेन गतिसंज्ञायां 'गतिकन्यस्तत्पुरुष' इति समासः, 'अनञः क्त्वो यप्' एवमुररीकृत्य । खाडिति कृत्वा खाट्कृत्य गता विद्युत्, रूपं पूर्ववत् । अशुक्लं शुक्लं कृत्वेति शुक्लीकृत्य, 'कृभ्वस्तिभ्यामि'ति च्विः, च्व्यन्तत्वाद्गतिसंज्ञायां समासः प्राग्वत् । पटदिति कृत्वा पटपटाकृत्य,

डाजन्तः, पटपटाकृत्य । उपसर्गः, प्रकृत्य ॥ **कारिका स्थित्यादौ** ॥ ३ ॥ स्थित्यादावर्थे कारिका गतिः स्यात् । स्थितिर्मर्यादा वृत्तिर्वा, कारिकाकृत्य ॥ **भूषाऽऽदरक्षेपेऽलंसदसत्** ॥ ४ ॥ एष्वर्थेष्वेते यथासङ्ख्यं गतयः स्युः । अलङ्कृत्य, सत्कृत्य, असत्कृत्य । भूषादिष्विति किम् ? अलङ्कृत्वा, मा कारीत्यर्थः ॥ **अग्रहाऽनुपदेशेऽन्तरदः** ॥ ५ ॥ अनयोरर्थयोरेतौ यथासङ्ख्यं गती स्याताम् । अन्तर्हृत्य, अदःकृत्यैतत्कर्त्तेति ध्यायति ॥ **कणेमनस्तृप्तौ** ॥ ६ ॥ एतावव्ययौ तृप्तौ गम्यमानायां गती स्याताम् । कणेहृत्य, मनोहृत्य, पयः पिबति ।

'अव्यक्तादनुकरणादि'ति डाच् द्विश्च, 'डाच्यादावि'ति तलोपः, अवशिष्टं पूर्ववत् । ऊरी ऊररी अङ्गीकरणे विस्तारे च ॥ कारिका, स्थितिरादिर्यस्य तस्मिन् ॥ आदिशब्दाद् यत्नधात्वर्थनिर्देशौ गृह्येते, श्लोकवाची कारिकाशब्दोऽत्र न गृह्यते, धातुसम्बन्धसम्भवेऽपि प्रयोगादर्शनात् । करणं कारिका, तां कृत्वेति कारिकाकृत्य, स्थितिं यत्नं क्रियां वा कृत्वेत्यर्थः ॥ भूषा च आदरश्च क्षेपश्च तस्मिन्, अलञ्च सच्च असच्च ॥ अलङ्कृत्य विभूष्येत्यर्थः । क्षेपोऽनादरः ॥ न ग्रहः अग्रहः, न उपदेशः अनुपदेशः, अग्रहश्चानुपदेशश्च तस्मिन्, अन्तश्च अदश्च ॥ अग्रहोऽस्वीकारः, स्वयं परामर्शो विशेषाऽनाख्यानं वाऽनुपदेशः । अन्तःशब्दो मध्येऽधिकरणभूते वर्तते परिग्रहे च, तत्र परिग्रहे प्रतिषेधादितरत्र गतिसंज्ञा । अंतर्हृत्य मध्ये हिंसित्वा शत्रून् गत इत्यर्थः । अदःशब्दस्त्यदादावव्ययमिति केचित् ॥ कणेश्च मनश्च तृप्तौ ॥ तृप्तिरत्र श्रद्धाप्रतिघातः । कणेशब्दः सप्तमीप्रतिरूपको निपातोऽभिलाषाऽतिशये वर्तते । मनःशब्दोऽप्यत्रैव । कणेहृत्य, अत्यन्तमभिलष्य तन्निवृत्तिपर्यन्तं पिबतीत्यर्थः, तथा च श्रद्धाया अपगमात्तदुच्छेदो गम्यते, 'परावरे' इति क्त्वाप्रत्ययः, नतु 'प्राक्काले क्त्वा' पयःपानक्रियाया एव पूर्वकालिकत्वात् । एवञ्च पयःपानक्रियायाः श्रद्धा-

तृप्ताविति किम् ? तण्डुलावयवे कणे हत्वा ॥ **पुरोऽस्तमव्ययम्** ॥ ७ ॥ एतावव्ययौ गती स्याताम् । पुरस्कृत्य, अस्तङ्कृत्य । अव्ययमिति किम् ? पुरः कृत्वा, नगरीरित्यर्थः ॥ **गत्यर्थवदोऽच्छः** ॥८॥ अच्छेत्यव्ययं गत्यर्थानां वदश्च धातोः सम्बन्धि गतिः स्यात् । अच्छगत्य, अच्छोद्य ॥ **तिरोऽन्तर्द्धौ** ॥ ९ ॥ तिरोऽन्तर्द्धौ गतिः स्यात् । तिरोभूय ॥ **कृगो नवा** ॥ १० ॥ तिरोऽन्तर्द्धौ कृगः सम्बन्धि गतिर्वा स्यात् । तिरस्कृत्य, तिरःकृत्य, पक्षे तिरः कृत्वा ॥ **मध्येपदेनिवचनेमनस्युरस्यनत्याधाने** ॥ ११ ॥ अनत्याधानमनुपश्लेषोऽनाश्रयं वा, तद्वृत्तय एतेऽव्ययाः कृग्योगे गतयो वा स्युः । मध्येकृत्य, मध्येकृत्वा । पदेकृत्य, पदेकृत्वा । निवचनेकृत्य, निवचनेकृत्वा ।

तिशयहननप्रागभावसमानकालिकत्वे विवक्षित उक्तसूत्रेण क्त्वाप्रत्ययः ॥ **पुरश्च अस्तञ्च, अव्ययम्** ॥ पूर्वपर्यायः पुरशब्दः, अनुपलब्ध्यर्थोऽस्तं शब्दः । पुरस्कृत्येत्यत्र 'नमस्पुरस' इति रस्य सः । पुरः कृत्वा इत्यत्र शसन्तत्वात् सकारान्तत्वं विज्ञेयम् । पुरो नगरीः कृत्वेत्यर्थः । न चात्र गतिसंज्ञायामपि समासे सति विभक्तिनिवृत्तौ सकारान्तत्वाभावेन संज्ञिरूपस्य पुरसोऽसम्भवाद् गतिसंज्ञाया अपि निवृत्तेः समासादिकार्यस्यापि निवृत्तिर्भवतीति किमव्ययविशेषणेनेति वाच्यम् 'एकदेशविकृत०' न्यायेन स्यादिनिवृत्तावप्यनन्यत्वात्संज्ञाया अनिवृत्तेः ॥ **गतिरर्थो येषान्ते, गत्यर्थाश्च वच्च तस्य, अच्छः** ॥ अव्ययमित्यनुवर्तते । अच्छेत्यव्ययमभिशब्दार्थे दृढार्थे च । अच्छगत्य अच्छोद्य, अभिमुखं गत्वोक्त्वा चेत्यर्थः ॥ **तिरस् अव्ययम्, अन्तर्द्धानमन्तर्द्धिः तस्मिन्** ॥ तिरोभूय अदृश्यीभूयेत्यर्थः ॥ **कृगः षष्ठी, नवा** ॥ पूर्वसूत्रमनुवर्त्तते । प्राप्तविभाषेयम् । तिरस्कृत्य, 'तिरसो वे'ति रस्य सः ॥ **मध्येश्च पदेश्च निवचनेश्च मनसिश्च उरसिश्च, न अत्याधानं तस्मिन्** । पूर्वसूत्रमनुवर्तते । एतानि सप्तम्येकवचनान्त-

मनसिकृत्य, मनसिकृत्वा । उरसिकृत्य, उरसिकृत्वा ॥ **उपाजेऽन्वाजे** ॥ १२ ॥ एतावव्ययौ दुर्बलस्य भग्नस्य वा बलाधानार्थौ कृग्योगे गती वा स्याताम् । उपाजेकृत्य, उपाजेकृत्वा । अन्वाजेकृत्य, अन्वाजेकृत्वा ॥ **स्वाम्येऽधिः** ॥ १३ ॥ स्वाम्ये गम्येऽधीत्यव्ययं कृग्योगे गतिर्वा स्यात् । चैत्रं ग्रामेऽधिकृत्याधिकृत्वा वा गतः । स्वाम्य इति किम् ? ग्राममधिकृत्य, उद्दिश्येत्यर्थः ॥ **साक्षादादिश्च्व्यर्थे** ॥ १४ ॥ एते च्व्यर्थवृत्तयः कृग्योगे गतयो वा स्युः । साक्षात्कृत्य, साक्षात्कृत्वा । मिथ्याकृत्य, मिथ्याकृत्वा ॥ **नित्यं हस्तेपाणावुद्वाहे** ॥ १५ ॥ एतावव्ययावुद्वाहे गम्ये नित्यं कृग्योगे गती स्याताम् । हस्तेकृत्य,

---

प्रतिरूपकाणि अव्ययानि ॥ **उपाजेश्च अन्वाजेश्च** ॥ कृगो नवेत्यनुवर्तते । एवमग्रेऽपि ॥ **स्वामिनो** भावः कर्म वा स्वाम्यं तस्मिन्, अधिः ॥ उद्दिश्येत्यर्थ इति, अधेः सार्थकत्वे उपसर्गसंज्ञकत्वान्नित्यं प्राप्ते स्वाम्यर्थे पक्षे प्रतिषेधार्थं वचनम्, उद्दिश्येत्यर्थे तु नित्यं गतिसंज्ञा, ततश्च समासो यच्च । निरर्थकत्वे तु विधानार्थम् । अत्र पक्षे प्रत्युदाहरणमधिकृत्येत्येव ॥ **साक्षात्** आदिर्यस्य, च्वेरर्थस्तस्मिन् ॥ साक्षात्कृत्येति, असाक्षाद्भूतं साक्षात्क्रियते चेत्तदाऽयं प्रयोगः, असाक्षाद्भूतं यथा साक्षाद्भवति तथा कृत्वेत्यर्थः । यदा साक्षाद्भूतस्यैव किञ्चित्करोति, तदा तु साक्षात्कृत्वेत्येव भवति । च्विप्रत्ययान्तानान्तु 'ऊर्याद्यनुकरणच्विडाचश्चे'ति सूत्रेण नित्यमेव गतिसंज्ञा, तेन लवणीकृत्य–उष्णीकृत्येत्यादौ न मान्तत्वं भवति ॥ **नित्यम्, हस्तेश्च पाणौ च, सूत्रत्वाद्विभक्तिलोपः, उद्वाहे** ॥ नित्यग्रहणाद्वा निवृत्तिः । उद्वाहो दारकर्म, स्वीकारमात्रमित्यन्ये । काण्डं हस्तेकृत्वा गत इति, काण्डं शरमित्यर्थः, स्वीकृत्येत्यर्थः, स्वीकारमात्रमिति पक्षे त्वत्रापि भवत्येव गतिसंज्ञा, तन्मते प्रत्युदाहरणञ्च हस्ते कृत्वा कार्षापणं गतः,

पाणौकृत्य । उद्वाह इति किम् ? हस्तेकृत्वा काण्डङ्गतः ॥ **प्राध्वं बन्धे** ॥ १६ ॥ प्राध्वमित्यव्ययं बन्धार्थे कृग्योगे गतिः स्यात् । प्राध्वङ्कृत्य । बन्ध इति किम् ? प्राध्वङ्कृत्वा शकटङ्गतः ॥ **जीविकोपनिषदौपम्ये** ॥ १७ ॥ एतावौपम्ये गम्ये कृग्योगे गती स्याताम् । जीविकाकृत्य, उपनिषत्कृत्य ॥ **नाम नाम्नैकार्थ्ये समासो बहुलम्** ॥ १८ ॥ नाम नाम्ना सहैकार्थ्ये सामर्थ्यविशेषे सति समासो बहुलं स्यात् । लक्षणमिदमधिकारश्च, तेन बहुव्रीह्यादिसङ्कमाभावे यत्रैकार्थता तत्रानेनैव समासः । विस्पष्टपटुः, दारुणाध्यायकः, सार्वचर्म्मीणो रथः, कन्ये इव, श्रुतपूर्वः । नामेति किम् ? चरन्ति

नाऽलमिति बुद्ध्या परावृत्य गत इत्यर्थः ॥ प्राध्वं बन्धे ॥ प्राध्वमित्येतन्मकारान्तमव्ययमानुकूल्ये वर्त्तते, तच्चानुकूल्यं यदा बन्धहेतुकं भवति, तदा बन्ध इत्युच्यते, कार्ये कारणोपचारात्, कारणं बन्धः कार्यमानुकूल्यं, बन्ध एवानुकूल्ये वर्तते, अनेकार्थत्वाद्वा निपातानां मुख्य एवास्य बन्धोऽर्थः । प्राध्वङ्कृत्य बन्धनेनाऽऽनुकूल्यं कृत्वेत्यर्थः । प्रार्थनादिना त्वानुकूल्यकरणे प्राध्वं कृत्वा ॥ जीविका चोपनिषच्च, उपमानं उपमा, उपमैव औपम्यं तस्मिन् ॥ जीवयतीति जीविका जीवनोपायः, जीविकामिव कृत्वा जीविकाकृत्य ॥ नाम नाम्नैकोऽर्थो यस्यासावेकार्थः, एकार्थस्य भाव ऐकार्थ्यं तस्मिन्, समस्यते नामानि यत्रेति समासो, बहुलम् ॥ विभक्तिविरहितानां नाम्नां परस्परं सामर्थ्याऽसम्भवात् नाम नाम्ना समस्यत इत्यस्य विभक्त्यन्तं नाम विभक्त्यन्तेन नाम्ना समस्यते, न तु विभक्तिविरहितानां समास इति भावः, अत एव 'गतिकारकऽस्युक्तानां विभक्त्यन्तानामेव कृदन्तैर्विभक्त्युत्पत्तेः प्रागेव समास' इति न्यायेन कृदन्तस्योत्तरपदस्याविभक्त्यन्ततया समासनियमः कृतः । एकार्थ्ये सामर्थ्यविशेष इति, व्यपेक्षालक्षणमेकार्थीभावलक्षणञ्चेति द्विविधं हि

गावो धनमस्य । नाम्नेति किम् ? चैत्रः पचति ॥ सुज्वाऽर्थे

सामर्थ्यम्, तत्र स्वार्थे पर्यवसायिनां पदानामाकाङ्क्षादिवशाद् यः परस्परसम्बन्धः सा व्यपेक्षा, सैव राज्ञः पुरुष इत्यादौ वाक्ये । तत्र ह्यपेक्षायां सत्यां यो यः सन्निहितो योग्यश्च, तेन सम्बन्धोऽभ्युपेयते । एकार्थीभावस्तु राजपुरुष इत्यादिवृत्तावेव, स च प्रक्रियादशायां पृथगर्थत्वेन प्रथमगृहीतस्य विशिष्टैकार्थत्वरूपः । एकार्थीभावलक्षणसामर्थ्ये सति समासो भवति, व्यपेक्षाव्युदासाय सामर्थ्यविशेष इत्युक्तम् । क्वचिच्च पृथगर्थत्वेन पदानां सामर्थ्यमननुभूयाप्येकार्थीभावो भवति, यथोपकुम्भं कुम्भकार इत्यादि । अत्र च वाक्यान्तरेण केवलमर्थः प्रदर्श्यते कुम्भस्य समीपमुपकुम्भं करोतीति । विस्पष्टं पटुर्विस्पष्टपटुः, पट्वादयः शब्दाः पट्वादिगुणयोगान् मुख्यतया गुणिनि वर्तमाना अपि गौणतया पाट्वादावपीति विस्पष्टादयः पट्वादीनां प्रवृत्तिनिमित्तस्य पाटवादेर्विशेषणानि, न तु द्रव्यस्य, अतो विस्पष्टमिति नपुंसकत्वमत एव मुख्यं सामानाधिकरण्यं नास्तीति कर्मधारयतत्पुरुषाभावः, किन्तु गुणविशेषणस्य गुणवचनेन सहैतत्सूत्रेण समासः । दारुणमध्यायक इत्यादिषु क्रियाविशेषणस्य क्रियावता समासो दारुणं यथा भवति तथाऽध्यायक इत्यर्थः, क्रियाविशेषणत्वादारुणमिति नपुंसकत्वम् । सर्वचर्म्मीणो सार्वचर्मीणो वा रथः, 'सर्वचर्मण ईनेनञौ', अत्र तद्धितार्थे समासः । कन्ये इवेत्यादिरिवेन सहाऽलुप्समासः । श्रुतपूर्वः । बहुलमिति शिष्टप्रयोगानुसरणार्थम्, तेनाऽनुव्यचलत्, अनुप्रावर्षत्, भात्यर्क्षोऽत्रेति भात्यर्कं नभ इत्यादि भवन्ति । समासस्य फलमेकपद्यं नित्यसन्ध्यादिः । समासस्य च नामत्वेऽपि सङ्ख्यायास्त्यादिभिरेवोक्तत्वादनुव्यचलदित्यादौ न स्यादयः । पदत्वार्थमुत्पन्नस्य वा प्रथमैकवचनस्य त्याद्य-

सङ्ख्या सङ्ख्येये सङ्ख्यया बहुव्रीहिः ॥ १९ ॥ सुजर्थो वारो, वाऽर्थो विकल्पः संशयो वा, तद्वृत्तिसङ्ख्यावाचि नाम सङ्ख्येयार्थेन सङ्ख्यानाम्ना सहैकार्थ्ये समासो बहुव्रीहिश्च स्यात् ।

न्यार्थप्राधान्यान्नपुंसकत्वे लोपो भवति । समासः षोढा, बहुव्रीहिः, अव्ययीभावः, तत्पुरुषः, कर्म्मधारयः, द्विगुः, द्वन्द्वश्च । यद्वा समासो द्विधा, विशेषसंज्ञाविनिर्मुक्तस्तद्युतश्च, आद्य एतत्सूत्रविहितः, अपरश्चतुर्धा—बहुव्रीह्यव्ययीभावतत्पुरुषद्वन्द्वभेदात्, कर्मधारयद्विगू च तत्पुरुषभेदौ । वृत्तयश्च पञ्च, समासैकशेषकृत्तद्धितक्यनाद्यन्तधातुरूपाः । परार्थाभिधानं वृत्तिः, वृत्त्यर्थावबोधकं वाक्यं विग्रहः, स द्विधा लौकिकोऽलौकिकश्च, परिनिष्ठितत्वात् साधुर्लौकिकः, यथा राज्ञः पुरुष इत्यादि, प्रयोगाऽनर्होऽसाधुरलौकिकः, यथा राजन् अस् पुरुष स् इति । अविग्रहो नित्यसमासोऽस्वपदविग्रहो वा । प्रायेणाऽन्यपदार्थप्रधानो बहुव्रीहिः, पूर्वपदार्थप्रधानोऽव्ययीभावः, उत्तरपदार्थप्रधानस्तत्पुरुषः, उभयपदार्थप्रधानो द्वन्द्वः । अमेकपदत्वं द्वन्द्वबहुव्रीह्योरेव, क्वचिदेव तत्पुरुषस्य ॥ सुच्च वाश्च सुज्वौ, तयोरर्थस्तस्मिन्, सङ्ख्या सङ्ख्येये सङ्ख्यया बहूनर्थान् व्रीणातीति बहुव्रीहिः ॥ अत्र बहुव्रीहित्वं नञ्तत्पुरुषभिन्नत्वे सति उत्तरपदलाक्षणिकपदवत्त्वम्, चित्रगुरित्यत्र गोपदं गोस्वामिनि लाक्षणिकम्, चित्रपदञ्च चित्ररूपविशिष्टे गवि, चित्रपदार्थस्य गोपदार्थैकदेशे गवि—अभेदेनान्वयः, चित्राभिन्नगोस्वामीति वाक्यार्थबोधः । एवमन्यत्राप्यूह्यम् । स द्विविधः, समानाधिकरणपदघटितो व्यधिकरणपदघटितश्च, श्वेताम्बरादिः समानाधिकरणः, दण्डपाणिरित्यादिर्व्यधिकरणः । द्विरावृत्ता दश द्विदशाः, विंशतिरित्यर्थः, सुजर्थे बहुव्रीहिः, वृत्तौ तु सुजर्थान्तर्भावेणैव एकार्थीभावाश्रयणात् सुचोऽप्रयोगः । द्वित्वसङ्ख्याविशिष्टोत्पत्तिकाऽऽवृत्तिविषया दशेति बोधः । 'प्रमाणीसङ्ख्याद्वः' । द्वौ वा

द्विदशाः, द्वित्राः । सङ्ख्येति किम् ? गावो वा दश वा । सङ्ख्ययेति किम् ? दश वा गावो वा । सङ्ख्येय इति किम् ? द्विर्विंशतिर्गवाम् ॥

आसन्नाऽदूराधिकाऽध्यर्द्धार्द्धादिपूरणं द्वितीयाद्यन्यार्थे ॥ २० ॥ आसन्नादि अर्धपूर्वपदञ्च पूरणप्रत्ययान्तं नाम सङ्ख्यानाम्नैकार्थ्ये समासः स्यात्, द्वितीयाद्यन्तस्यान्यपदस्यार्थे सङ्ख्येये वाच्ये, स च बहुव्रीहिः । आसन्नदशाः, अदूरदशाः, अधिकदशाः, अध्यर्द्धविंशाः

त्रयो वा द्वित्राः, वाऽर्थेऽयं बहुव्रीहिः, वार्थश्च विकल्पः संशयो वा, निर्णये सति विकल्पः, अन्यथा संशयः । संदेहविषयद्वित्वत्रित्ववन्त इति बोधः, त्रित्वेनाऽपि सन्देहविषयत्वाद्बहुवचनम् । विकल्पार्थत्वे वृत्तौ कार्ये विकल्पो बोध्यः, न तु शब्दाद्बोधे, अतः शब्दान्नियमेन बहूनामुपस्थितेर्नित्यबहुवचनान्तता, अत्रापि डप्रत्ययः । द्विर्विंशतिर्गवामिति, अत्र सङ्ख्यार्थे विंशतिशब्दो न तु सङ्ख्येये, आदशतः सङ्ख्याः सङ्ख्येये वर्त्तन्ते न तु सङ्ख्यायाम्, विंशत्याद्याः सङ्ख्यास्तु सङ्ख्येयसङ्ख्ययोर्वर्तन्ते, यद्वा तु सङ्ख्येये विंशतिशब्दस्तदा भवत्येव समासः । सङ्ख्येये सङ्ख्ययेत्युक्ता 'आदशभ्यः सङ्ख्या सङ्ख्येये वर्त्तते न सङ्ख्याने' दशशब्दस्य प्रयोगावधिसङ्ख्या सङ्ख्येये वर्तते न सङ्ख्यान इत्यर्थको न्यायः सूच्यते । दशन्शब्दस्य प्रयोगोऽष्टादशसङ्ख्यावधि भवति । एतन्न्यायाभावे हीयं सङ्ख्यासङ्ख्येयवर्त्तिनी नेयमिति ज्ञानाऽसम्भवेन सङ्ख्यावृत्तिशब्दपरिहारेण सङ्ख्येयवृत्तिसङ्ख्यया सह समासः कथं विज्ञायेतेति ॥ अर्द्ध आदिर्यस्य, अर्द्धादिश्चासौ पूरणश्च, अधिकमर्द्धं यस्यासौ अध्यर्द्धः, आसन्नश्चादूरश्चाधिकश्चाध्यर्द्धश्चार्द्धादिपूरणश्च तत्, द्वितीयाऽऽदिर्यस्य तद्, द्वितीयादि च तदन्यच्च, द्वितीयाद्यन्यस्यार्थस्तस्मिन् ॥ सङ्ख्येये सङ्ख्यया बहुव्रीहिरित्यनुवर्त्तन्ते । आसन्ना दश दशत्वं येषां येभ्यो वा ते, येषां येभ्य इति द्वितीयान्तादन्यं पदं सङ्ख्येयरूपम् । 'आदशभ्य' इति

अर्द्धपञ्चमविंशाः ॥ अव्ययम् ॥ २१ ॥ अव्ययं नाम सङ्ख्यानामैकार्थ्ये समस्यते, द्वितीयाद्यन्यार्थे सङ्ख्येये वाच्ये, स च बहुव्रीहिः।

न्यायस्य प्रायिकत्वाद् दशन्शब्दः सङ्ख्यायां वर्तते, अत एव दशत्वमिति पर्यायः प्रदर्शितः, दशेत्यत्र बहुवचनन्तु सङ्ख्येयेन सहाऽभेदात्। सङ्ख्येयवाचिदशन्शब्देन विग्रहेऽनेन समासो न स्यात्, सङ्ख्यावाचिनेति वृत्त्यंशेन निषेधात्, नवैकादश वेति पर्यायप्रदर्शनाऽसम्भवाच्च। एवमग्रेऽपि। अधिका दश येभ्यो येषु वा, दशानामधिकत्वञ्चैकाद्यपेक्षम्, अवयवेन विग्रहः समासार्थः समुदायः। येभ्यो येषु वैकादशादिसमुदायेष्वेकाद्यपेक्षयाऽधिका दश विद्यन्ते, त एकादशादिसमुदाया अधिकदशा उच्यन्ते। अध्यर्द्धा विंशतिर्येषान्तेऽध्यर्धविंशाश्चित्रिंशदित्यर्थः। विंशतेस्तेर्डिति', 'परतः स्त्रीपुंवदि'ति तेर्लोपो ह्रस्वश्च। पञ्चानां पूरणा पञ्चमी, अर्द्धा पञ्चमी यासां ता अर्द्धपञ्चमा इत्यर्द्धशब्दपूर्वपदं पूरणप्रत्ययान्तं नाम, 'पूरणीभ्यस्तत्प्राधान्येऽबि'ति अप्प्रत्ययः। अर्द्धपञ्चमा विंशतयो येषान्तेऽर्द्धपञ्चमविंशाः, नवतिरित्यर्थः। पूर्ववत्। एकार्थञ्चानेकञ्चेत्यनेनैव बहुव्रीहौ सिद्धेऽप्यासन्नेत्यादिप्रतिपदोक्तबहुव्रीहिविधानं 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमि'ति न्यायं ज्ञापयति, तद्धि 'प्रमाणीसङ्ख्याडुः' इति डसमासान्तविधावेतद्बहुव्रीहिग्रहणार्थं तेनासन्ना दश येषान्त आसन्नदशा इत्यादावेव डः स्यात्, 'एकार्थञ्चानेकञ्चे' त्येतत्सूत्रनिष्पन्ने तु डो न स्यात्, यथा प्रिया दश येषान्ते प्रियदशान इत्यादि ॥ अव्ययम् ॥ सङ्ख्येये सङ्ख्यया द्वितीयाद्यन्यार्थे बहुव्रीहिरिति चानुवर्त्तन्ते। उप समीपे दश दशत्वं येषान्त उपदशाः, नवैकादश वेत्यर्थः। उपशब्दोऽत्र समीपे समीपिनि च वर्तते, आद्येऽव्ययीभावः द्वितीये तु बहुव्रीहिरिति विवेकः, अत्रोपशब्दः समीपवर्ति-

उपदशाः ॥ **एकार्थञ्चानेकञ्च** ॥ २२ ॥ एकमनेकञ्चैकार्थं समानाधिकरणमव्ययञ्च नाम्ना द्वितीयाद्यन्तान्यपदस्यार्थे समस्यते, स च

सङ्ख्यापरः । योगविभाग उत्तरत्राऽनुवृत्त्यर्थः ॥ **एकोऽर्थो** यस्य तदेकार्थं, च, न एकं अनेकम्, च ॥ द्वितीयाद्यन्यार्थे बहुव्रीहिरित्यनुवर्तते । एकः समानोऽर्थोऽधिकरणं यस्य तदेकार्थमव्ययं वा नाम्ना सह द्वितीयाद्यन्यपदस्यार्थे समस्यते । स च समासो बहुव्रीहिरित्यर्थः । ययोः पदयोर्भिन्नप्रवृत्तिनिमित्तकत्वे सत्येकार्थविशेष्यकप्रतीतिजनकत्वं तयोः पदयोः परस्परं सामानाधिकरण्यं भवति । उच्चैर्मुखमस्येत्युच्चैर्मुखः, कर्तुं कामोऽस्येति कर्तुकाम इत्यादौ व्यधिकरणत्वादव्ययस्य बहुव्रीहिर्न प्राप्नोतीति, चशब्देनाव्ययस्यानुकर्षः । द्वितीयेन चकारेण 'चकारो यस्मात्परस्तत्सजातीयमेव समुच्चिनोती'ति न्यायेनानेकसजातीयस्यैकस्य समुच्चयः । आरूढो वानरो यं स आरूढवानरो वृक्षः, कर्त्तरि क्तः । अत्र लौकिकविग्रहवाक्येन यत्कर्म्मकाऽऽरोहणकर्त्ता वानर इति बोधः, समासनश्च वानरकर्त्तृकाऽऽरोहणकर्म इति बोधः, लौकिके वाक्य आरूढस्य वानरस्य प्राधान्येऽपि वृत्तौ विशेष्यविशेषणभावव्यत्यासः, एवमेव शिष्टानां ततो बोधात् । ननु बहुव्रीहिसमासेनाऽन्यपदार्थस्याभिधान आरूढवानरो वृक्ष इत्याद्यनुप्रयोगाऽनुपपत्तिः, वृक्षादिर्ह्यन्यपदार्थः स चाऽऽरूढवानरपदार्थेनैव गतार्थः, अभिहिते शब्दप्रयोगाभावात्, यथा चार्थे द्वन्द्वविधानाद् द्वन्द्वे चशब्दस्य प्रयोगो न भवतीति चेन्न, वृत्तितः सामान्यस्याभिधानेऽपि विशेषानभिधानात्, यमिति सामान्येनान्यपदार्थ उक्तो न तु वृक्षमित्यादिविशेषरूपेण । ततश्च विशेषजिज्ञासायामवश्यं विशेषोऽनुप्रयोक्तव्यः, यथाऽऽरूढवानरः क इति जिज्ञासायां वृक्ष इति । सूक्ष्मा जटा येषान्ते सूक्ष्मजटाः, 'परतः स्त्री पुंवदि'ति ह्रस्वः, सुशोभनाः सूक्ष्मजटाः केशा यस्य स सुक्ष्मजटकेशः, अनेकमित्यस्योदाहरणमिदम् ।

बहुव्रीहिः । आरूढवानरो वृक्षः, सुसूक्ष्मजटकेशः, उच्चैर्मुखः ॥ **उष्ट्रमुखादयः** ॥ २३ ॥ एते बहुव्रीहिसमासा निपात्यन्ते । उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः, वृषस्कन्धः ॥ **सहस्तेन** ॥ २४ ॥ तेनेति तृतीयान्तेन सहोऽन्यपदार्थे समस्यते, स च बहुव्रीहिः । सपुत्र आगतः,

---

उच्चैर्मुखमस्येति, उच्चैः शब्दस्याधिकरणप्रधानत्वाद्वैयधिकरण्यम् । बहुव्रीहिर्द्विधा, **तद्गुणसंविज्ञानोऽतद्गुणसंविज्ञानश्च**, लम्बकर्णमानयेत्यादावाद्यः, चित्रगुमानयेत्यादावन्त्यः । विशेषणोपलक्षणाभ्यां तद्गुणातद्गुणत्वे बोध्ये यथा चित्रगुरिति, अन्यपदार्थस्य यदा कार्यान्वयित्वविवक्षायां गोस्वामित्वसद्भावस्तदा तद्गुणसंविज्ञानो बहुव्रीहिः, यदा तु तदानीं गोस्वामित्वाभावेऽपि चित्रगुशब्दप्रयोगस्तदाऽतद्गुणसंविज्ञानो बहुव्रीहिरित्यपि केचित् । बहुव्रीहिणा यं येन यस्म इत्यादिरूपेण कर्तृत्वकर्मत्वादीनामभिधानात्समासे न द्वितीयादिविभक्तयः किन्तु प्रथमैव । न च चित्रगोर्देवदत्तस्येत्यादि प्रयोगो न स्याद् बाह्यार्थापेक्षयैव तत्र षष्ठीविभक्तेर्भावात्, देवदत्तस्य गोभिः सह यो हि सम्बन्धः स एव समासेऽन्तर्भूतो न तु देवदत्तसम्बन्धिगृहादेः । द्वितीयाद्यन्यार्थ इत्यत्राऽर्थग्रहणाभावेऽपि शब्दे कार्यासम्भवादर्थे लब्धेऽपि यदर्थग्रहणं कृतं तदन्यपदार्थस्य या लिङ्गसङ्ख्याविभक्तयस्ता यथा स्युरित्येवमर्थम् ॥ **उष्ट्रमुख** आदिर्येषान्त उष्ट्रमुखादयः, उष्ट्रमुखमिव मुखमस्येति, अनेन सूत्रेण मुखशब्दस्य लोपः । एवं वृषस्कन्धः । उपमेयसरूपस्य चोपमानपदस्य यथासम्भवं लोपः ॥ **सहः प्रथमा**, तेन ॥ सहशब्दस्तुल्ययोगे विद्यमानतायाञ्च वर्तते । पुत्रेण सह सपुत्रः, 'सहार्थे' इति तृतीया, 'सहस्य सोऽन्यार्थे' इति वा सभावः, पक्षे सहपुत्र आगतः, पितेति शेषः । अत्र पितापुत्रयोरागमनक्रियया तुल्यया योगः सम्बन्धो विज्ञेयः । सह कर्मणा वर्तत इति सकर्मकः 'शेषाद्वा' इति कच्प्रत्ययः, विद्यमानताऽत्र सहार्थो न

सकर्मकः ॥ **दिशो रूढ्याऽन्तराले ॥ २५ ॥** रूढ्या दिग्वाचि नाम रूढ्यैव दिग्वाचिना सहान्तरालेऽन्यपदार्थे वाच्ये समासो बहुव्रीहिः स्यात् । दक्षिणपूर्वा दिक् । रूढ्येति किम् ? ऐन्द्र्याश्च कौबेर्याश्च दिशोर्यदन्तरालमिति ॥ **तत्राऽऽदायमिथस्तेन प्रहृत्येति सरूपेण युद्धेऽव्ययीभावः ॥ २६ ॥** तत्रेति सप्तम्यन्तं मिथ आदायेति क्रियाव्यतिहारे, तेनेति तृतीयातं, मिथः प्रहृत्येति क्रियाव्यतिहारे समानरूपेण नाम्ना युद्धविषयेऽन्यपदार्थे वाच्ये समासोऽव्ययीभावः स्यात् । केशाकेशि, दण्डादण्डि । तत्रेति तेनेति च किम् ? केशांश्च केशांश्च गृहीत्वा, मुखञ्च मुखञ्च प्रहृत्य कृतं युद्धम् । आदा-

---

तुल्ययोगः । प्रथमान्ताऽन्यपदार्थार्थं आरम्भः । सह पुत्रेण य आगतः स सपुत्र इति विग्रहात् । बहुलाधिकाराद् विद्यमानार्थे क्वचिन्न भवति, यथा सहैव दशभिः पुत्रैर्भारं वहति गर्दभी, पुत्राणां विद्यमानत्वेऽपीत्यर्थः ॥ दिशः षष्ठी, रूढ्या, अन्तराले ॥ अन्तरालभूतोऽन्यपदार्थोऽपि दिगेव प्रत्यासत्तेः, अत एवाऽस्य नित्यस्त्रीलिङ्गता । दक्षिणस्याश्च पूर्वस्याश्च दिशोर्यदन्तरालं सा दिग्दक्षिणपूर्वा, दिशि वर्तमाना नित्यस्त्रीलिङ्गा एवेति 'परतः स्त्री पुंवदि'त्यप्राप्ते 'सर्वादयोऽस्यादावि'ति पुंवद्भावः। इन्द्रो देवताऽस्या दिश इत्यैन्द्री, कुबेरो देवताऽस्या इति कौबेरी, एतौ शब्दौ यौगिकौ, अतो न समासः, किन्तु वाक्यमेव ॥ तत्र आदाय मिथस्तेन प्रहृत्येत्येतेषां विभक्तीनां सूत्रत्वाल्लोपः, समानं रूपं यस्य तेन, युद्धे, अनव्ययमव्ययं भवतीत्यव्ययीभावः ॥ अन्यार्थ इति सम्बध्यते । क्रियाव्यतिहारः परस्परग्रहणादिः । केशेषु केशेषु च मिथो गृहीत्वा कृतं युद्धमिति केशाकेशि । अत्र क्त्वाप्रत्ययः करणादिक्रियामादाय ग्रहणानन्तरं युद्धस्याचरणात् । ग्रहणकर्मत्वञ्च प्रत्यासत्त्या केशादिविशिष्टपुरुषयोरेव, परस्परग्रहणादिरूपः । क्रियाव्यतिहारः समुदायशक्यो युद्धादिरूप-

येति प्रहृत्येति च किम्? केशेषु च केशेषु च स्थित्वा, दण्डैश्च दण्डैश्चागत्य कृतं युद्धं गृहकोकिलाभ्याम् । सरूपेणेति किम्? हस्ते च पादे च गृहीत्वा कृतं युद्धम् । युद्ध इति किम्? हस्ते च हस्ते चादाय सख्यं कृतम् ॥ **नदीभिर्नाम्नि** ॥ २७ ॥ नाम नदीवाचिना संज्ञायामन्यपदार्थे समासोऽव्ययीभावश्च स्यात् । उन्मत्तगङ्गं देशः, तूष्णीगङ्गम् । नाम्नीति किम्? शीघ्रगङ्गो देशः ॥ **सङ्ख्या समाहारे** ॥ २८ ॥ सङ्ख्यावाचि नदीवाचिभिः सह समाहारे गम्ये समासोऽव्ययीभावः

क्रिया च । एवञ्च परस्परकेशाधिकरणकतद्वत्पुरुषकर्मैकग्रहणोत्तरकालिककृतिमत्पुरुषकर्तृका युद्धादिक्रियेति बोधः । दण्डैर्दण्डैश्च प्रहृत्य कृतं युद्धं दण्डादण्डि, बोधः पूर्ववत् । 'इज् युद्ध' इति इच्समासान्तः, 'इच्यस्वरे दीर्घ आचे'ति पूर्वपदस्य दीर्घ आकारः । अव्ययीभावत्वादव्ययत्वम् । युद्ध इति विषयनिर्देशाद्युद्धोपाधिकायामन्यस्यामपि क्रियायां भवति । तेन बहुबाहवी व्यासञ्जेतामित्यादि सिद्धिः, बाह्वोश्च बाह्वोश्च मिथो गृहीत्वा व्यासङ्गः कृत इति विग्रहः । पाणिनीये समासोऽयं बहुव्रीहिसंज्ञकः ॥ **नदीभिर्नाम्नि** ॥ अन्यपदार्थेऽव्ययीभाव इति पदद्वयमनुवर्त्तते । उन्मत्ता गङ्गा यत्र स उन्मत्तगङ्गं देशः, 'परतः स्त्री पुंवत्' 'द्वन्द्वैकत्वाव्ययीभावावि'ति लिङ्गानुशासनादव्ययीभावस्य नपुंसकत्वम्, ततश्च 'क्लीब' इति ह्रस्वः, ततः स्यादिविभक्तेः 'अमव्ययीभावस्यातोऽपञ्चम्या' इत्यम्भावः । तूष्णीं गङ्गा यत्र, पूर्ववत् । इमौ देशविशेषनामनी । नदीपर्यायाणान्तु न ग्रहणम्, नदीस्वरूपस्यैव ग्रहणादेकवचने हि 'स्वं रूपं शब्दस्याशब्दसंज्ञे'ति न्यायेन केवलस्य नदीशब्दस्यैव ग्रहणं स्यात्, तन्मा भूदित्यतो बहुवचनं नदीविशेषाणामपि ग्रहणाय । अत एवोत्तरसूत्रे नदीशब्देन नदीविशेषवाचिभिश्च सहाव्ययीभावः समासः सिद्धः ॥ सङ्ख्या, समाहरणं समाहारस्तस्मिन् समाहारे ॥ अव्ययीभावो नदीभिरित्य-

स्यात् । द्वियमुनम्, पञ्चनदम् । समाहारेति किम् ? एकनदी । द्विगुबाधनार्थं वचनम् ॥ **वंश्येन पूर्वार्थे** ॥ २९ ॥ विद्यया जन्मना वा एकसन्तानो वंशः, तत्र भवो वंश्यः, तद्वाचिना नाम्ना सङ्ख्यावाचिसमासोऽव्ययीभावः स्यात्, पूर्वपदस्यार्थे वाच्ये । एकमुनि व्याकरणस्य, सप्तकाशि राज्यस्य । पूर्वार्थ इति किम् ? द्विमुनिकं व्याकरणम् ॥ **पारेमध्येऽग्रेऽन्तः षष्ठ्या वा** ॥ ३० ॥ एतानि षष्ठ्यन्तेन पूर्वपदार्थे समासोऽव्ययीभावो वा स्युः । पारेगङ्गम्, मध्येगङ्गम्, अग्रे-

---

भिसम्बध्येते । समाहार इत्युक्तत्वादन्यार्थ इति निवृत्तम्, उभयपदप्रधानसमासोऽनेन विधीयते । द्विगोरपवादोऽयम् । द्वयोर्यमुनयोः समाहारो द्वियमुनम्, प्रक्रिया पूर्ववत् । पञ्चानां नदीनां समाहारः पञ्चनदम् । 'सङ्ख्याया नदीगोदावरीभ्यामि'त्यत्समासान्तः, 'अवर्णे वर्णस्ये' तीलोपः । एका चासौ नदी च 'सर्वादयोऽस्यादौ' पुंवद्भावः, एकनदी ॥ वंश्येन, पूर्वस्यार्थः पूर्वार्थस्तस्मिन् । अव्ययीभावः सङ्ख्येति वर्तते । एकसन्तान एकस्वभावः सन्तानप्रबन्धः । एको मुनिर्वंश्य इत्येकमुनि । वंश्योऽत्राऽऽद्यः कारणपुरुषो ग्राह्यः । व्याकरणस्येति, व्याकरणस्याऽऽद्यप्रणेता मुनिरेक इत्यर्थः । विद्यातद्वतामभेदविवक्षायामप्येकमुनिव्याकरणमित्यत्राऽप्यनेनैव समासः, तदा व्याकरणशब्दात्तु प्रथमा भवति । एको मुनिर्यस्येत्यन्यपदार्थस्य प्राधान्यं विवक्ष्यते तदैकमुनि व्याकरणमिति बहुव्रीहिरेव । प्रथमैकवचने भेदाभावेऽपि द्विवचनादौ भेदः स्पष्ट एव । सप्त काशयो वंश्या इति सप्तकाशि, जन्मनेत्यस्योदाहरणमिदम् । द्वौ मुनी वंश्यौ यस्य तत् 'शेषाद्वा' कच् ॥ पारेश्च मध्येश्च अग्रेश्च अन्तश्च, षष्ठ्या तृतीया, वा ॥ अव्ययीभावः पूर्वार्थ इत्यनुवर्तते, एवमग्रेऽपि । पारं गङ्गायाः पारेगङ्गम्, एवमग्रे पारमध्याग्रशब्दानामेतदन्तत्वमनेनैव निपात्यते ।

वणम्, अन्तर्गिरिम्। पक्षे गङ्गापारम्, गङ्गामध्यम्, वनाग्रम्, गिर्यन्तः॥

अग्रेवणम्, 'निष्प्रागेऽन्त' इति णत्वम्, वनस्याग्रम्। पक्षे 'षष्ठ्यत्नाच्छेष' इति समासः। पारे मध्ये इत्याद्येकारान्ततानिपातो यत्र सप्तम्यर्थो न सम्भवति तदर्थम्, सप्तम्यर्थसम्भवे तु बहुलवचनाद्लुप्यपि सिद्ध्यति। अत्र तु सप्तम्यर्थोऽभावः। नन्वत्र वावचनं किमर्थं 'नित्यं प्रतिनाऽल्पे' इत्युत्तरसूत्रेण नित्यग्रहणात्तत्पूर्वसूत्रेषु वैकल्पिकत्वस्य लाभात्पारं गङ्गाया इति समासविमुक्ते वाक्यस्य सम्भवात्, न च बहुलाधिकारादेव वाक्यमपि भविष्यतीति किं वाग्रहणेनेति वाच्यम्, तथा सत्यव्ययीभावेन मुक्ते गङ्गापारमिति षष्ठीसमासार्थं तदाऽऽवश्यकत्वात्। न चाव्ययीभावोऽपि बहुलाधिकाराद्विकल्पेन भवतीति पक्षे षष्ठीसमासः, तस्यापि बहुलाधिकारे पतितत्वाद् वाक्यमपि भविष्यतीति वाग्रहणं निरर्थकमेवेति चेदुच्यते, विकल्पस्याऽवचने पूर्वकायवदंशिसमासविमुक्ते, पक्षे यथा षष्ठीसमासो न भवति किन्तु वाक्यमेव, एवमत्रापि षष्ठीसमासो न स्यादिति वाग्रहणम्। ननु किं कारणमंशिसमासेन मुक्ते षष्ठीसमासो न भवतीति, उच्यते, 'समासतद्धितानां वृत्तिर्विकल्पेन, वृत्तिविषये च नित्यैवापवादप्रवृत्तिः,' इति न्यायात्। परार्थस्य स्वार्थातिरिक्तस्य वाक्येनाभिधाने प्राप्ते वृत्तिरारभ्यमाणा 'येन नाप्राप्त' इति न्यायाद्वाक्यस्य बाधिका प्राप्नोतीति विकल्पेन तस्यानुज्ञानेन न्यायेनोच्यते तथा वृत्तिपक्ष उत्सर्गापवादरूपयोर्वृत्योरसम्भव उत्सर्गस्य नित्यमेव बाधोऽनेन न्यायेनोच्यते। तथा चात्र वाग्रहणाभावेऽपवादोऽव्ययीभावो बहुलाधिकाराद्विधीयमानोऽपि विकल्पो वाक्यस्येवाऽभ्यनुज्ञानं करोतीत्युपसर्गस्य षष्ठीसमासस्य नित्यमेव बाधः स्याद्, अतो वाग्रहणं तेनोत्सर्गोऽपि पक्षेऽनुज्ञायत इति त्रैरूप्यं सिद्ध्यति। एवञ्चेदमेव वाग्रहणं ज्ञापयति 'यत्रोत्सर्गापवादौ बहुलाधिकारेण विक-

यावदियत्त्वे ॥ ३१ ॥ इयत्त्वेऽवधारणे गम्ये यावदिति नाम नाम्ना पूर्वपदार्थे वाच्ये समासोऽव्ययीभावः स्यात्। यावदमत्रं भोजय। इयत्त्व इति किम् ? यावद्दत्तं तावद्भुक्तम् ॥ **पर्यपाऽऽङ्-बहिरच् पञ्चम्या ॥३२॥** एतानि पञ्चम्यन्तेन पूर्वपदार्थे वाच्ये समासोऽव्ययीभावः। परित्रिगर्त्तम्, अपत्रिगर्त्तम्, आग्रामम्, बहिर्ग्रामम्, प्राग्रामम्। पञ्चम्येति किम् ? परिवृक्षं विद्युत् ॥ **लक्षणेनाभिप्रत्याभिमुख्ये**

ल्प्येते तत्रापवादे मुक्त उत्सर्गो न प्रवर्त्तत इति। तत्प्रवृत्त्यर्थं यदि कश्चनोपायः क्रियते तदा तु प्रवर्त्तत इति बोध्यम् ॥ यावत्, इयतो भाव इयत्त्वम्, तस्मिन् ॥ सङ्ख्यादिनेयत्तापरिच्छेदोऽवधारणम्। यावन्त्यमत्राणि यावदमत्रम्। यावन्त्यमत्राणीति निर्ज्ञातपरिमाणेनामत्रादिना तावन्त इत्यतिथिपरिमाणमिहावधार्यते। यावद्दत्तं तावद्भुक्तमिति कियदुक्तं नावधारयामीत्यर्थः। यावद्दत्तमित्यसमस्तमिदमत एव तावदित्युपादीयते, समासे हि गुणीभूतत्वात्, तावदित्यस्योपादानाभावः स्याद्यथा यावदमत्रमित्यत्र॥ परिश्च अपश्च आङ्च बहिश्च अश्च तत्, पञ्चम्या तृतीया ॥ परि त्रिगर्त्तेभ्य इति परित्रिगर्त्तम्, 'पर्यपाभ्यां वर्ज्ये' इति पञ्चमी, आग्रामम्, 'आङावधावि'ति पञ्चमी, ग्राममर्यादाका वृष्टिरित्यर्थः। ग्रामाद्बहिरिति बहिर्ग्रामम्, 'प्रभृत्यन्यार्थ' इति पञ्चमी, ग्रामावधिको बहिर्देशस्तत्स्थं वस्तु वेत्यर्थः। बहिश्शब्देन समभिव्याहृतपदार्थतावच्छेदकानधिकरणतत्सन्निहितदेशतत्स्थवस्तु च बहिष्टेनोच्यते। प्राग्रामम्, प्राचि देशे वसतीति प्राक्, 'दिक्शब्दादेशकालेष्वि'ति धाप्रत्ययः, 'अदूरे एन' इत्यनेनैनप्रत्ययो वा, तस्य 'लुबञ्चेरि'ति लुप्, अव्ययमिदम्, पर्यादिसाहचर्यादव्ययस्यैव ग्रहणात्, तद्योगे ग्रामशब्दात् 'प्रभृत्यन्यार्थ' इति पञ्चमी। परिवृक्षं विद्योतते विद्युदिति, 'भागिनि च' इति पञ्चमी॥ लक्षणेन, अभिश्च प्रतिश्च अभिप्रती, अभिमुखस्य भाव आभिमुख्यं-

॥ ३३ ॥ लक्षणं चिह्नम्, तद्वाचिनाऽऽभिमुख्यार्थाविभिप्रती पूर्वपदार्थेऽर्थे समासोऽव्ययीभावः स्यात् । अभ्यग्नि, प्रत्यग्नि शलभाः पतन्ति । लक्षणेनेति किम्? श्रुघ्नं प्रति गतः । पूर्वपदार्थ इत्येव? अभ्यङ्का गावः ॥ **दैर्घ्येऽनुः** ॥ ३४ ॥ दैर्घ्ये आयामविषये यल्लक्षणं तद्वाचिना पूर्वपदार्थेऽनुः समासोऽव्ययीभावः स्यात् । अनुगङ्गं वाराणसी । दैर्घ्य इति किम्? वृक्षमनु विद्युत् ॥ **समीपे** ॥ ३५ ॥ समीपार्थेऽनुः समीपि-

---

तस्मिन् ॥ ईदूदेद्विवचनमित्यसन्धिर्न सौत्रत्वाल्लाघवाच्च । अभि अग्निं अभ्यग्नि 'लक्षणवीप्स्ये'ति द्वितीया । एवं प्रत्यग्नि, 'भागिनि चे'ति द्वितीया । अग्निज्ञाप्यं शलभकर्तृकं पतनमिति बोधः, तथा बोधे चान्यभिमुखत्वं शलभपतनस्य लोकप्रसिद्ध्या मनसा गृह्यते, इत्यभिप्रतिशब्दौ ज्ञापकत्वसम्बन्धेनाऽऽभिमुख्यस्य द्योतकौ । प्रति गत इति, परावृत्यगमनं धात्वर्थः, तन्निरूपितकर्मत्वाच्छ्रुघ्नमिति द्वितीया, श्रुघ्नादन्यन्नगरान्तरं गन्तुकामो मध्य एव व्यामोहात्तमेव श्रुघ्नं प्रत्यागत इति नास्ति गमनं प्रति श्रुघ्नस्य लक्षणता, यदुद्दिश्य हि गमनं क्रियते, तल्लक्षणं भवति, अत्र तु व्यामोहादेवेत्थं गतः, गतक्रियापेक्षया च श्रुघ्नस्य कर्मत्वम् । अभिमुखोऽङ्को यासां ता अभ्यङ्काः, अङ्को ह्यत्र भवति गवां लक्षणं तथापि न पूर्वपदार्थोऽभिधेयः, किन्त्वन्यपदार्थ एव ॥ दीर्घस्य भावो दैर्घ्यं तस्मिन्ननुः ॥ लक्षणेनेत्यनुवर्तते । अनु गङ्गां दीर्घा अनुगङ्गम् । ननु लक्ष्यलक्षणयोर्द्वयोरप्यायामवत्त्वात्सन्देहः, किं गङ्गा लक्षणं वाराणसी वेति? उच्यते, अनेकदेशव्याप्यगङ्गाया आयामवत्त्वेनानेकजनापेक्षया प्रसिद्धत्वात्तस्या एव लक्षणत्वम् । वाराणसीशब्देन च तदायामो वाराणस्यायाम इति बोधः । वृक्षमन्विति 'भागिनि चे'ति द्वितीया । अत्र वृक्षो विद्योतनस्य लक्षणत्वेन विवक्ष्यते न त्वायामस्य ॥ समीपे ॥ अनुरित्यनुवर्तते । अनु वनस्यानुवनम्, वनस्य समीपं गता इत्यर्थः । 'विभक्तिसमीपे'

वाचिनाम्ना पूर्वपदार्थे समासोऽव्ययीभावः स्यात् । अनुवनमशनिर्गता ॥ **तिष्ठद्गु इत्यादयः ॥ ३६ ॥** एते समासा अव्ययीभावाः स्युः, यथायोगमन्यस्य पूर्वस्य वा पदस्यार्थे । तिष्ठद्गुकालः, अधोनाभं हृतः ॥ **नित्यं प्रतिनाऽल्पे ॥ ३७ ॥** अल्पार्थेन प्रतिना नाम नित्यं समासोऽव्ययीभावः स्यात् । शाकप्रति । अल्प इति किम् ? वृक्षं प्रति विद्युत् ॥ **सङ्ख्याक्षशलाकं परिणा द्यूतेऽन्यथावृत्तौ ॥ ३८ ॥** सङ्ख्यावाच्यक्षशलाके च द्यूतविषयायामन्यथावृत्तौ वर्त्तमानेन परिणा सह नित्यं समासोऽव्ययीभावः स्यात् । एकपरि, अक्षपरि, शलाकापरि, एकेनाक्षेण शलाकया वा न तथा वृत्तं यथा पूर्वं जय इत्यर्थः । सङ्ख्यादीति किम् ? पाशकेन न तथावृत्तम् । द्यूत इति किम् ?

त्यादिनैव समासे सिद्धे विकल्पार्थमिदम्, तेन वाक्यमपि भवति, पृथग्वचनं लक्षणेनेत्यस्य निवृत्त्यर्थम् ॥ तिष्ठद्गु इत्यादयः ॥ तिष्ठन्ति गावो यत्र काले गर्भाय दोहदाय वा, स तिष्ठद्गुकालः । अयमन्यपदार्थे काले । नाभेरधरधोनाभम्, निपातनादत् समासान्तः, पूर्वपदार्थप्रधानोऽयम् । इति शब्दः स्वरूपपरिग्रहार्थस्तेनैषां वृत्त्यन्तरं न भवति ॥ नित्यं प्रतिना, अल्पे ॥ पूर्वार्थ इत्यधिकारेऽप्यसम्भवादस्योत्तरपदार्थप्रधान एवायं समासः । शाकस्याल्पत्वं शाकप्रति । नित्यग्रहणं वाक्यनिवृत्त्यर्थम्, तेनान्यत्र समासो वाक्यञ्च भवति ॥ सङ्ख्या च अक्षश्च शलाका च तत्, परिणा, द्यूते, अन्यथा वर्त्तनमन्यथा वृत्तिस्तस्मिन् ॥ नित्यमित्यनुवर्त्तते यावत् तृतीयोक्ते वेति सूत्रम् । तत्राक्षादयस्तृतीयान्ताः परिणा समस्यन्ते, अक्षशलाकयोश्चैकवचनान्तयोरेवेष्यते, समासे द्वित्वाद्यनवगमात्, एकत्वस्यान्यनिरपेक्षत्वादन्तरङ्गत्वाच्चावगतिसम्भवात्, अन्यथा वृत्ताविति । पञ्चिका नाम द्यूतं पञ्चभिरक्षैः शलाकाभिर्वा भवति तत्र यदि सर्वे उत्तानाः पतन्ति, अवाञ्चो वा, तदा पातयिता जयति, अन्यथा तु

रथस्याक्षेण न तथावृत्तम् ॥ **विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिपश्चात्क्रमयौगपद्यसादृक्ष्यसम्पत्साकल्यान्तेऽव्ययम्** ॥ ३९ ॥ एष्वर्थेषु वर्त्तमानमव्ययं नाम्ना सह पूर्वपदार्थे वाच्ये नित्यं समासोऽव्ययीभावः स्यात्। विभक्तिर्विभक्त्यर्थः कारकम्, अधिस्त्रि। समीपम्, उपकुम्भम्। समृद्धिः, सुमद्रम्। विगता ऋद्धिर्व्यृद्धिः, दुर्यवनम्। अर्थाभावः, निर्मक्षिकम्। अत्ययोऽतीतत्वम्, अतिवर्षम्। असम्प्रतीति सम्प्रत्युप-

---

जीयते, तत्र पराजय एवायं समासः। एकेन दायेन न तथा वृत्तं यथा पूर्वं जय एकपरि। विपरीतवर्त्तने कर्तृत्वेनैकादेस्तृतीया। नित्यसमासोऽयमपि, अतोऽस्वपदविग्रहः परिपदस्याप्रयोगात् ॥ विभजनं विभक्तिः, सङ्गतर्द्धिः समृद्धिः, विगतर्द्धिर्व्यृद्धिः, अर्थस्याभावोऽर्थाभावः, अत्ययनमत्ययः, न सम्प्रत्यसम्प्रति, ततश्च सर्वेषां द्वन्द्वस्तस्मिन्नव्ययम्। नाम नाम्नैकार्थ्ये पूर्वार्थेऽव्ययीभावो नित्यमित्यनुवर्त्तन्ते। एवमग्रेऽपि। विभक्त्यादयश्च श्रुतत्वादव्ययस्यैव विशेषणानि। एष्वर्थेष्वव्ययं द्योतकतया वर्त्तते, तत्र विभक्त्यर्थः कारकशक्तिर्न तु विभक्तिपदार्थः, विभज्यतेऽनया नामार्थ इति व्युत्पत्तेः। तत्र विभक्त्यर्थे उदाहरणम्, स्त्रियामित्यधिस्त्रि, सप्तम्यर्थस्यैवात्र द्योतको वाचको वाऽधिः, स्त्री ङि अधि, इत्यलौकिकं विग्रहवाक्यम्, अत्राधिनोक्तावप्यधिकरणे वचनसामर्थ्यात्सप्तमी, एवञ्च येन विभक्त्यन्तेन समासस्तद्वटकविभक्त्यर्थवाचकादेव समासो विज्ञेयः। समीपे यथा कुम्भस्य समीपमुपकुम्भम्, अव्ययीभाव इति महासंज्ञाकरणादसत्त्वरूपाव्ययार्थप्राधान्य एवायं समासः, समीपवर्तिप्राधान्ये तु 'अव्ययमि'ति बहुव्रीहिर्यथा उपदशाः। ऋद्धेराधिक्यं समृद्धिस्तत्र यथा, मद्राणां समृद्धिः सुमद्रम्, विगता ऋद्धिर्व्यृद्धिः, ऋद्ध्यभावे

भोगाद्यभावः, अतिकम्बलम्। पश्चात्, अनुरथम्। क्रमः, अनुज्येष्ठम्। ख्यातिः, इतिभद्रबाहुः। युगपत्, सचक्रं धेहि। सदृक्, सव्रतम्। सम्पत्, सब्रह्म साधूनाम्। साकल्यम्, सतृणमभ्यवहरति। अन्तः, सपि-

---

यथा, यवनानां ऋद्ध्यभावो दुर्यवनम्। अर्थाभावो धर्म्मिणोऽसत्त्वं तत्र यथा, मक्षिकाणामभावो निर्मक्षिकम्, संसर्गाभावेऽयं समासः, न त्वन्योऽन्याभावे, अर्थग्रहणसामर्थ्येन लिङ्गसङ्ख्यान्वयिसमस्यमान-पदजन्यप्रतीतिविशेष्यविरोधिनोऽभावस्यैवाऽर्थाभावशब्देन ग्रहणात्, घटः पटो नेत्यादौ प्रतियोगितावच्छेदकविरोधित्वेन भेदस्य समस्यमा-नपदजन्यप्रतीतिविशेष्यविरोधित्वाभावान्नाव्ययीभावः। अत्ययोऽतीत-त्वम्, सत एवातिक्रान्तत्वं ध्वंस इत्यपि केचित्। तत्र यथा वर्षा-णामतीतत्वमतिवर्षम्। असम्प्रतीति वर्त्तमानकाल उपभोगादेः प्रति-षेधः, न तु वस्तुनः, कम्बलं सम्प्रति नोपभुज्यत इत्यतिकम्बलम्, कम्बलस्योपभोगं प्रति नायं काल इत्यर्थः। पश्चादर्थे यथा, रथस्य पश्चादनुरथम्। क्रमः आनुपूर्व्यम्, तत्र यथा ज्येष्ठस्यानतिक्रमेणानु-ज्येष्ठम्। ख्यातिः शब्दप्रथा, भद्रबाहुशब्दस्य प्रकाश इतिभद्रबाहुः, भद्रबाहुशब्दो लोके प्रकाशत इत्यर्थः। युगपदेककालार्थः, चक्रेण युगपत् सचक्रम्, युगपदर्थे सहेत्यव्ययम्, 'अकालेऽव्ययीभाव' इति सह-स्य सभावः। सदृगर्थे व्रतस्य सदृशं सव्रतम्, अत्र सादृश्यं गुण-भूतं ग्राह्यमुत्तरसूत्रे मुख्यसादृश्यस्य ग्रहणात्, सव्रतमित्यत्र सादृश्य-वतः प्राधान्यम्, अत एव सदृगित्युक्तम्। सम्पत् सिद्धिरात्मभाव-निष्पत्तिः, समृद्धिस्त्वन्यभावनिष्पत्तिरिति भेदः, तत्र यथा ब्रह्मणः सम्पत् सब्रह्म, साधूनां सम्पन्नं ब्रह्मेत्यर्थः। साकल्यमशेषता, तत्र यथा तृणमप्यपरित्यज्य सतृणं न किञ्चित्त्यजतीत्यर्थः। अन्तः समाप्तिः, तत्र यथा पिण्डैषणापर्यन्तं सपिण्डैषणम्, अत्र समाप्तिरसकलेऽप्य-

ण्डैषणमधीते ॥ **योग्यतावीप्सार्थानतिवृत्तिसादृश्ये** ॥४०॥ एष्वर्थेष्वव्ययं नाम्ना सह पूर्वपदार्थे समासोऽव्ययीभावः स्यात् । अनुरूपम्, प्रत्यर्थम्, यथाशक्ति, सशीलमनयोः ॥ **यथाऽथा** ॥४१॥ थाप्रत्ययवर्जं यथेत्यव्ययं नाम्ना सह पूर्वपदार्थे समासोऽव्ययीभावः स्यात् । यथारूपं चेष्टते, यथावृद्धमर्चय, यथासूत्रम् । अथेति किम्? यथा चैत्रस्तथा मैत्रः ॥ **गतिकन्यस्तत्पुरुषः** ॥ ४२ ॥ गतयः कुश्च नाम्ना सह नित्यं समासस्तत्पुरुषः स्यात्, अन्यो बहुव्रीह्यादि-

---

ध्ययने प्रतीयत इति साकल्ये नाऽन्तर्भावः ॥ योगस्य भावो योग्यता, व्याप्तुमिच्छा वीप्सा, अतिवर्त्तनमतिवृत्तिः, नातिवृत्तिरनतिवृत्तिः, अर्थस्यानतिवृत्तिरर्थानतिवृत्तिः, सदृशस्य भावः सादृश्यं ततः सर्वेषां द्वन्द्वस्तस्मिन् ॥ अव्ययमित्यनुवर्तते । योग्यतायां रूपस्य योग्यमनुरूपम्, रूपस्य योग्यां चेष्टां कुरुत इत्यर्थः । वीप्सायां यथाऽर्थमर्थं प्रति प्रत्यर्थम्, समासेन वीप्साया द्योतितत्वात्ततन्निमित्ता द्विरुक्तिर्न प्रवर्तते । वीप्सायां द्वितीयाया विधानाद्वाक्यमपि भवति, अर्थमर्थं प्रति । पदार्थाऽनतिक्रमोऽर्थाऽनतिवृत्तिस्तत्र यथा शक्तिमनतिक्रम्येति यथाशक्ति, शक्तेरनतिक्रमेणेत्यर्थः, नात्र विन्यासविशेषो विवक्षितः, इति क्रमाद्भेदः । सादृश्ये यथा, शीलस्य सादृश्यं सशीलं अत्र सादृश्यग्रहणं मुख्यसादृश्यपरिग्रहार्थम् ॥ यथा, न विद्यते था यस्य स अथा । अनुवृत्तिः पूर्ववत् । यथेत्यव्ययं द्विविधं, प्रत्ययरहितमव्युत्पन्नमव्ययमेकम्, अन्यच्च थाप्रत्ययान्तम्, व्युत्पन्नस्य यथेत्यव्ययस्यानेन सूत्रेणाव्ययीभावः, यथारूपं चेष्टते रूपानुरूपमित्यर्थः, यथावृद्धमर्चय ये ये वृद्धास्तानित्यर्थः, यथासूत्रं सूत्रानतिवृत्त्येत्यर्थः । यद्यप्येतद्योग्यता वीप्सेति सूत्रेण सिद्ध्यत्येव तथाप्यस्य सादृश्ये समासप्रतिषेधाय वचनम् ॥ गतयश्च कुश्च गतिकु, अन्यः, तत्पुरुषः ॥ नाम नाम्नैकार्थ्येऽव्ययमित्यनुवर्तते । 'सम्भवे व्यभिचारे च विशे-

लक्षणहीनः । ऊरीकृत्य, खाट्कृत्य, प्रकृत्य, कारिकाकृत्य, कुब्राह्मणः, कोष्णम् । अन्य इति किम् ? कुपुरुषकः ॥ **दुर्निन्दाकृच्छ्रे** ॥४३॥ दुरव्ययं निन्दाकृच्छ्रवृत्ति, नाम्ना सह नित्यं समासस्तत्पुरुषः स्यात् । दुष्पुरुषः, दुष्कृतम् । अन्य इति किम् ? दुष्पुरुषकः ॥ **सुः पूजायाम्** ॥ ४४ ॥ स्वित्यव्ययं पूजार्थं नाम्ना सह नित्यं समासस्तत्पुरुषः स्यात् । सुराजा । अन्य इति किम् ? सुमद्रम् ॥ **अतिरतिक्रमे च** ॥ ४५ ॥ अतिक्रमे पूजायां चार्थे अतीत्यव्ययं नाम्ना सह नित्यं समासस्तत्पुरुषः स्यात् । अतिस्तुत्य, अतिराजा ॥ **आङल्पे** ॥ ४६ ॥ आङित्यव्ययमल्पार्थं नाम्ना सह समासस्तत्पुरुषः स्यात् ।

षणमर्थवदि'ति न्यायेनाव्ययमिति कुशब्दस्य विशेषणम्, न तु गतिसंज्ञानां तेषामव्यभिचारात् । कु इत्यव्ययं पापाल्पयोर्वर्तते न तु पृथिवीवृत्तिकुशब्दस्तस्याऽनव्ययत्वात् । ऊरीकृत्य 'ऊर्याद्यनुकरणे'ति गतिसंज्ञा । कारिकाकृत्य 'कारिका स्थित्यादावि'ति गतिसंज्ञा । कुत्सितो ब्राह्मणः कुब्राह्मणः, नित्यसमासत्वादस्वपदविग्रहोऽल्पार्थः । ईषदुष्णं कोष्णम्, कवोष्णं कदुष्णं 'काकवौ वोष्णे' 'कोः कत्तत्पुरुषे' । कुत्सिताः पुरुषा यस्य स कुपुरुषकः, अत्र बहुव्रीहित्वात्कच् भवति ॥ दुर्, निन्दा च कृच्छ्रञ्च तस्मिन् । अन्यस्तत्पुरुष इत्यभिसम्बध्यते एवमग्रेऽपि । निन्दितः पुरुषो दुष्पुरुषः, कृच्छ्रेण कृतं दुष्कृतम् । निन्दिताः पुरुषा यत्र सो दुष्पुरुषकः, 'निर्दुर्बहिरि'ति षः ॥ सुः पूजायाम् ॥ शोभनो राजा सुराजा । मद्राणां समृद्धिः सुमद्रम् ॥ 'विभक्तिसमीपे'त्यव्ययीभावः ॥ अतिः, अतिक्रमे, च ॥ चशब्देन पूजायाः समुच्चयः । अतिक्रमेण स्तुत्वाऽतिस्तुत्य, पूजितो राजाऽतिराजा । बहुलाधिकारादतिक्रमे क्वचिन्न भवति, अतिश्रुत्वा ॥ आङ्, अल्पे ॥ ईषत्कडार

आकडारः ॥ **प्रात्यवपरिनिरादयो गतक्रान्तक्रुष्टग्लानक्रान्ताद्यर्थाः प्रथमाद्यैस्तैः** ॥ ४७ ॥ प्रादयो गताद्यर्थाः प्रथमान्तैः, अत्यादयः क्रान्ताद्यर्था द्वितीयान्तैः, अवादयः क्रुष्टाद्यर्थास्तृतीयान्तैः, पर्यादयो ग्लानाद्यर्थाश्चतुर्थ्यन्तैः, निरादयः क्रान्ताद्यर्थाः पञ्चम्यन्तैर्नित्यं समासस्तत्पुरुषः स्युः । प्राचार्यः, समर्थः । अतिखट्वः, उद्वेलः । अवकोकिलः । परिवीरुत्पर्यध्ययनः, उत्सङ्गामः, निष्कौशाम्बिः, अपशाखः । बाहुलकात्षष्ठ्याऽपि, अन्तर्गार्ग्यः । गताद्यर्था इति किम् ? वृक्षम्परि विद्युत् । अन्य इत्येव ? प्राचार्यको देशः । **अव्ययं प्रवृद्धादिभिः** ॥ ४८ ॥ अव्ययं प्रवृद्धादिभिस्सह नित्यं समासस्तत्पुरुषः स्यात् । पुनःप्रवृद्धम्, अन्तर्भूतः ॥ **ङस्युक्तं कृता** ॥ ४९ ॥ कृत्प्रत्ययविधायके सूत्रे ङस्यन्तनाम्नोक्तं कृदन्तेन नाम्ना नित्यं समा-

---

आकडारः, ईषत्कपिल इत्यर्थः ॥ **प्रश्च** अतिश्च अवश्च परिश्च निर् च त आदयो येषान्ते, गतश्च क्रान्तश्च क्रुष्टश्च ग्लानश्च, क्रान्तश्च त आदिरर्थो येषान्ते, प्रथमाऽऽदिर्यासां प्रथमादयस्तेऽन्ते येषां तैः ॥ यथाक्रममन्वयः । प्रगत आचार्यः प्राचार्यः । खट्वामतिक्रान्तोऽतिखट्वः । कोकिलयाऽवक्रुष्टोऽवकोकिलः । परिणद्धो वीरुद्भिः परिवीरुत्, परिग्लानोऽध्ययनाय पर्यध्ययनः । उद्युक्तः सङ्गामायोत्सङ्गामः । निष्क्रान्तः कौशाम्ब्या निष्कौशाम्बिः । अपगतः शाखाया अपशाखः कपिः । अन्तर्गतो गार्ग्यस्यान्तर्गार्ग्यः । बहुलाधिकारात् समस्यमानानां विभक्त्येन्तानाभुक्तार्थानाञ्चाऽनियमः । प्रगत आचार्यो यस्मात्स प्राचार्यको देशः, अस्य बहुव्रीहित्वादन्यत्वं नास्ति ॥ **अव्ययम्** प्रवृद्ध आदिर्येषान्तानि तैः ॥ पुनः प्रवृद्ध्यते स्म पुनःप्रवृद्धम् । अन्तरमध्ये भवति स्म अन्तर्भूतः । आदिशब्दः प्रकारे, तेन यस्याव्ययस्य समासो दृश्यते तस्यानेन समासः कार्यः ॥ **ङसिना** उक्तं ङस्युक्तम् कृता तृतीया ॥ कुम्भं करोतीति कुम्भकारः 'कर्मणोऽणि'ति सूत्रविहितपञ्चम्यन्तपद-

सस्तत्पुरुषः स्यात् । कुम्भकारः । ङस्युक्तमिति किम् ? अलङ्कृत्वा । कृतेति किम् ? धर्मो वो रक्षतु ॥ **तृतीयोक्तं वा** ॥ ५० ॥ "दंशेस्तृतीयये"त्यतो यत्तृतीयोक्तं नाम तत्कृदन्तेन वा समासस्तत्पुरुषः स्यात् । मूलकोपदंशम्, मूलकेनोपदंशं भुङ्क्ते ॥ **नञ्** ॥ ५१ ॥ नञ् नाम नाम्ना समासस्तत्पुरुषः स्यात् । अगौः, न सूर्य्यं पश्यन्ति,

---

ग्राह्यं तेनैव सूत्रेण विहिताणन्तेन नाम्नाऽनेन सूत्रेण समासः । इह 'गतिकारकङस्युक्तानां विभक्त्यन्तानामेव कृदन्तैर्विभक्त्युत्पत्तेः प्रागेव समास इष्यते, तेन कुम्भ अस् कार इत्यलौकिकं प्रक्रियावाक्यम् । तेन चर्मन् टा क्रीत अभ्र टा विलिप्त इत्यादावनेन समासे सत्यकारान्तत्वात् ङीः सिद्धः, चर्मक्रीती-अभ्रविलिप्तीति, यदि तु विभक्त्यन्तैः कृदन्तैः समासः स्यात्तदाऽन्तरङ्गत्वाद्विभक्तेः प्रागेव आपः प्राप्तावकारान्तत्वाभावात् ङीर्न स्यात् । अलङ्कृत्वेति 'निषेधेऽलङ्क्त्वोक्के'ति क्त्वाप्रत्ययः, नाऽत्र सूत्रेऽलङ्क्त्वोरिति पञ्चमी किंतु षष्ठी तस्मान्न समासः । धर्म्मो वो रक्षतु, अत्र 'पदाद्युगि'ति वसादेशः, पदादिति ङस्युक्तत्वेऽपि युष्मदः कृदन्तत्वाभावान्न समासः ॥ **तृतीययो** उक्तम् **वा** । कृतेत्यभिसम्बध्यते ॥ दंशेति, दंशेस्तृतीययेति सूत्रमारभ्य यत्तृतीययोक्तं नामेत्यर्थः । वाशब्दो नित्यसमासनिवृत्त्यर्थस्तेनोत्तरेषु वाक्यमपि भवति । यद्वा पृथक् सूत्रकरणादेव नित्यत्वनिवृत्तौ वाशब्दो नित्यसमासाधिकारनिवृत्यर्थः, मूलकेनोपदंशमित्यत्र 'दंशेस्तृतीययें'ति सूत्रेण तृतीयान्तेन मूलकेन नाम्ना योगे दंशनभोजनयोस्तुल्यकर्तृकत्वादुपपूर्वाद्दंशेर्णमि णमन्तेन सह तृतीयान्तनाम्नोऽनेन सूत्रेण वा समासः ॥ **नञ्** ॥ अत्र केवलं नेत्युच्यमाने समासस्य प्रतिषेधशङ्का स्यात्, तद्व्यावृत्त्यर्थं नञित्युक्तम्, न गौः अगौः, 'नञत्' नस्य अः, अगौः अत्र पर्युदासो नञर्थः, पर्युदासस्तु सदृशबोधकः, तेन गोसदृश इत्यर्थः । स च गवय एव, गोभिन्नत्वे सति

असूर्यम्पश्या राजदाराः ॥ **पूर्वापराधरोत्तरमभिन्नेनांशिना** ॥ ५२ ॥ पूर्वादयोऽशार्था अंशवद्वाचिना समासस्तत्पुरुषः स्यात्। नचेत्सोऽशी भिन्नः। पूर्वकायः, अपरकायः, उत्तरकायः, अधरकायः। अभिन्नेनेति किम्? पूर्वं छात्राणामामन्त्रयस्व। अंशिनेति किम्? पूर्वो

गोगतभूयोधर्मवत्त्वात्। यद्वाऽऽरोपितत्वं नञा द्योत्यते, एवञ्चायमगौरारोपितो गौरिति बोधेऽर्थाद्गोभिन्न इत्यर्थः पर्यवसति। गोभिन्नश्च गोसदृशपशुविशेष एव भवति, तत्रैवारोपितगोत्वसम्भवात्। प्रसज्यप्रतिषेधरूपो नञर्थोऽत्र न गृह्यते, तत्र नञ् पदान्तरेण सम्बध्यत इत्युत्तरपदं वाक्यवत्स्वार्थ एव वर्तते, तत्रासामर्थ्येऽपि यथाभिधानं बाहुलकात्समासः, यथा सूर्यमपि न पश्यन्तीत्यसूर्यम्पश्या राजदाराः। यो धर्मो यत्र पदार्थे आशङ्कितो व्यामोहादिभिः सो निवर्त्यमानः। स एवोत्तरपदप्रवृत्तिनिमित्तो यस्यार्थस्य स उत्तरपदार्थः। स चायं चतुर्द्धा तत्सदृशः, तद्विरुद्धः, तदन्यः, तदभाव इति। अब्राह्मणः, अशुक्ल इति तत्सदृशः क्षत्रियादिः पीतादिश्च प्रतीयते। अधर्मः, असित इति तद्विरोधि पाप्मा कृष्णश्च प्रतीयते। अनग्निः, अवायुरित्यादौ अग्निवायुभ्यामन्यः प्रतीयते। अवचनमवीक्षणमित्यादौ वचनवीक्षणाभावः प्रतीयते। तत्तच्छब्दशक्तिस्वाभाव्यात्॥ पूर्वश्च अपरश्च अधरश्च उत्तरश्च, न भिन्नोऽभिन्नस्तेन, अंशोऽस्यास्तीत्यंशी तेन। पूर्वः कायस्येति पूर्वकायः, पूर्वादिशब्दस्य दिशि दृष्टत्वेऽप्यत्रावयववाचित्वात्तद्योगे 'प्रभृत्यन्यार्थे'ति न पञ्चमी। पूर्वं छात्राणामिति बहुवचनाद्भेदः प्रतीयतेऽशी यत्रैकत्वसङ्ख्याविशिष्टस्तत्रैवाभेदप्रतीतिः। नात्र निर्द्धारणे षष्ठी किन्तु समुदायसमुदायिसम्बन्धे, बहुवचनन्तूद्भूतावयवभेदसमुदायविवक्षया, अत एव न समासः। पूर्वो नाभेः कायस्येति, नाभेर्यः पूर्वो भागः स कायस्यावयव इत्यर्थः, नाभेरिति पञ्चमी, नाभिः पूर्वभागस्यावधिर्न त्वेकदेशीति नाभ्या न

नाभेः कायस्य ॥ **सायाह्नादयः** ॥ ५३ ॥ एतेऽशितत्पुरुषाः साधवः स्युः । सायाह्नः, मध्यन्दिनम् ॥ **समेंऽशोऽर्द्ध नवा** ॥ ५४ ॥ समांशार्थमर्द्धमंशिनाऽभिन्नेन वा समासस्तत्पुरुषः स्यात् । अर्द्धपिप्पली, पिप्पल्यर्द्धम् । समेंश इति किम् ? ग्रामार्द्धः ॥ **जरत्यादिभिः** ॥ ५५ ॥ एभिरंशिभिरभिन्नैरर्द्धो वा समासस्तत्पुरुषः स्यात् । अर्द्धजरती, जरत्यर्द्धः । अर्द्धोक्तम्, उक्तार्द्धः ॥ **द्वित्रिचतुष्पूरणाग्रा-**

समासः, कायेन तु स्यादेव पूर्वकायो नाभेरिति, पूर्वशब्दस्य नित्यसापेक्षत्वात् प्रधानत्वाच्च । यद्यपि समुदाये प्रवृत्ताः शब्दा अवयवेष्वपि प्रवर्त्तन्त इति न्यायात् कायशब्दस्याप्यवयववाचित्वे पूर्वश्चासौ कायस्येति समानाधिकरणकर्मधारयसमासेनैव काय इत्यादिरूपसिद्धिर्भवति, एवं सायाह्नादिरूपसिद्धिश्च, तथापीह तत्पुरुषविधानम् । कायस्य पूर्वं कायपूर्वं, अह्नः सायमित्यादिषष्ठीसमासबाधनार्थं सूत्रमिदम् ॥ **सायाह्न** आदिर्येषान्ते ॥ अंशिनेत्यभिसम्बध्यते ॥ सायमह्नः सायाह्नः 'सर्वांशसङ्ख्यादि'त्यत्प्रत्ययः, अहन्स्थानेऽह्न च । सायंशब्दो यदा मान्तमव्ययं तदैतत्सूत्रनिर्देशादेव मलोपः । दिनस्य मध्यं मध्यन्दिनम्, 'लोकंपृणमध्यंदिनानभ्याशमित्यम्' ॥ *समे, अंशे, अर्द्ध, नवा* अभिन्नेनांशिनेत्यभिसम्बध्यते । अर्द्धं पिप्पल्या अर्द्धपिप्पली, 'गोश्वान्ते' इति न ह्रस्वोऽनंशिसमासेत्युक्तत्वात्, पक्षे षष्ठीतत्पुरुषः । अर्द्धं च सा पिप्पली चेति कर्मधारयेणैव सिद्धे, भेदविवक्षायां पक्षे षष्ठीसमासबाधनार्थमसमांशे चार्द्धश्चासौ ग्रामश्चेति कर्मधारयनिषेधार्थं वचनम् । अत्र समेंऽशे वर्त्तमानोऽर्धशब्दो नपुंसक एव, असमेंऽशे तु पुल्लिङ्गः ॥ **जरती** आदिर्येषान्तैः ॥ अभिन्नेनांशिनाऽर्द्धमित्यनुवर्त्तन्तो वचनविपरिणामेन जरत्यादिभिस्सहाऽभिन्नांशिशब्दयोरन्वयः । असमांशार्थ आरम्भः । अर्द्धो जरत्या अर्द्धजरती, पक्षे तत्पुरुषः ॥ द्विश्च त्रिश्च चत्वारश्च, द्वित्रिचत्वारश्च ते पूरणाश्च अग्रादिर्येषान्ते, ततो

दयः ॥ ५६ ॥ पूरणप्रत्ययान्ता द्वित्रिचत्वारोऽग्रादयश्चाभिन्नेनांशिना वा समासस्तत्पुरुषः स्यात् । द्वितीयभिक्षा, भिक्षाद्वितीयम् । तृतीयभिक्षा, भिक्षातृतीयम् । तुर्यभिक्षा, भिक्षातुर्यम् । अग्रहस्तः हस्ताग्रम् । तलपादः, पादतलम् ॥ **कालो द्विगौ च मेयैः** ॥ ५७ ॥ कालवाच्येकवचनान्तं द्विगौ च विषये मेयवाचिना समासस्तत्पुरुषः स्यात् । मासजातः । द्विगौ, एकमासजातः, द्व्यह्नसुप्तः । काल इति किम् ?

द्वन्द्वः ॥ अभिन्नेनांशिनेत्यनुवर्त्तते । द्वितीयं भिक्षाया द्वितीयभिक्षा, एवमग्रे । नित्याधिकाराभावादेव पक्षे वाक्यस्य सिद्धत्वाद्वाऽनुवृत्तिः पक्षे षष्ठीसमासार्थं तेन 'तृप्तार्थपूरणाव्यये'ति पूरणेन निषिद्धोऽपि षष्ठीसमासो भवति ॥ **कालः, द्विगौ, च, मेयैः** ॥ कालो मेयैरित्यभिनवार्थग्रहणादंशांशिभावनिवृत्तौ तत्सम्बद्धं वेति निवृत्तम् । मासो जातस्येति मासजातः, मासः कालः जातो मेयमित्यर्थो यस्य जनादूर्ध्वं मासो गतः स मासजात इति व्यवह्रियते, तत्र मासजात व्यवहारकालजन्मकालयोर्मध्यवर्त्तिमासो जननद्वारा जातमपि परिच्छिनत्ति, अतो जात इति मेयवाचकम् । एको मासो जातस्यैकमासजातः काल इति चैकवचनं द्विगोरन्यत्र बोध्यम्, द्विगौ तु नैकवचनान्तत्वनियमोऽत एव द्वे अहनि सुप्तस्येति द्व्यह्नसुप्तः । उत्तरपदेन मेयेन द्विगोः सिद्धये बहूनां तत्पुरुषस्तथा द्वे अहनीति पदद्वयं सुप्तस्येत्यनेन समस्यते, ततस्मिपदे समासे जाते सुप्त इत्युत्तरपदे परे 'सङ्ख्यासमाहारे' चेति द्विगुसंज्ञायां द्विगुविषये द्वेरुत्तरपदनिमित्ते द्विगौ भाविनि त्रयाणां तत्पुरुषः 'सर्व्वांशसङ्ख्याव्ययात्' अट्समासान्तोऽहादेशश्च जातादिशब्दस्य कालविशेषणत्वेऽप्ययं समासो जातादिप्रधानस्तेन समासे लिङ्गं सङ्ख्या च तदीयतदीयमेव भवति, न तु कालवाचिशब्दस्य । चकारो द्विगुरहितकालपरिग्रहार्थः । अयं समासः क्तान्तेनैव मेयेन सह प्रायो भवति । षष्ठीसमासापवादोऽयम् ॥

द्रोणो धान्यस्य ॥ **स्वयंसामी क्तेन** ॥ ५८ ॥ एते अव्यये क्तान्तेन सहैकार्थ्ये समासस्तत्पुरुषः स्याताम् । स्वयंधौतम्, सामिकृतम् । क्तेनेति किम् ? स्वयं कृत्वा ॥ **द्वितीया खट्वा क्षेपे** ॥ ५९ ॥ खट्वेति द्वितीयान्तं क्षेपे निन्दायां क्तान्तेन सहैकार्थ्ये समासस्तत्पुरुषः स्यात् । खट्वारूढो जाल्मः । क्षेप इति किम् ? खट्वामारूढः पिताऽध्यापयति ॥ **कालः** ॥ ६० ॥ कालवाचिद्वितीयान्तं क्तान्तेन समासस्तत्पुरुषः स्यात् । रात्र्यारूढाः, अहरतिसृताः ॥ **व्याप्तौ** ॥ ६१ ॥ गुणक्रियाद्रव्यैरत्यन्तसंयोगे या द्वितीया, तदन्तं कालवाचि व्यापकार्थेन समासस्तत्पुरुषः स्यात् । मुहूर्त्तसुखम्, क्षणपाठः, दिनगुडः । व्याप्ताविति किम् ? मासं पूरको याति ॥ **श्रितादिभिः** ॥ ६२ ॥

स्वयञ्च सामि च स्वयंसामी, क्तेन ॥ स्वयं धौतं स्वयंधौतम्, सामि कृतं सामिकृतम्, सामिशब्दोऽर्द्धपर्यायः । समासे सत्यैकपद्यादेकविभक्तिस्तद्धिताद्युत्पत्तिश्च भवति ॥ द्वितीया, खट्वा, क्षेपे ॥ क्तेनेत्यनुवर्त्तते ॥ द्वितीयाया नाम्नो विशेषणत्वेन तदन्तविधिः ॥ खट्वामारूढः खट्वारूढः, असमीक्ष्यकारीत्यर्थः, समुदायेनैव निन्दा गम्यत इति नित्यसमासोऽयम्, न हि वाक्येन निन्दा गम्यते ॥ **कालः** ॥ द्वितीया क्तेनेत्यनुवर्त्तते । रात्रिमारूढा रात्र्यारूढाः, एवमग्रे । अव्याप्त्यर्थं आरम्भः ॥ **व्याप्तौ** ॥ पृथग्योगात् क्तेनेति निवृत्तम् । द्वितीया काल इति पदद्वयं वर्तते । गुणक्रियाद्रव्यैरत्यन्तसंयोगो व्याप्तिः । मुहूर्त्तं सुखं मुहूर्त्तसुखं 'कालाध्वनोर्व्याप्तौ'ति द्वितीयाऽत्र गुणेनात्यन्तसंयोगः । क्षणं पाठः क्षणपाठोऽत्र क्रियया ऽत्यन्तसंयोगः । दिनं गुडः दिनगुडोऽत्र द्रव्येणात्यन्तसंयोगः । पूरयिष्यतीति पूरकः, णकच्प्रत्ययः 'तृन्नुदन्त' इति षष्ठीनिषेधान्नात्र व्याप्तौ द्वितीया ॥ **श्रितादिभिः** । द्वितीयेति सम्बध्यते । धर्मं श्रितो धर्मश्रितः, धर्म्मं प्राप्त इत्यर्थः । 'तयोरसदाधार' इति षष्ठीनिषेधः । यद्यपि धर्म्मःश्रितो-

द्वितीयान्तं श्रितादिभिः समासस्तत्पुरुषः स्यात्। धर्मश्रितः शिवगतः। **प्राप्ताऽऽपन्नौ तयाच्च** ॥ ६३ ॥ एतौ प्रथमान्तौ द्वितीयान्तेन समासस्तत्पुरुषः स्याताम्, तद्योगे चानयोरत् स्यात्। प्राप्तजीविका, आपन्नजीविका ॥ **ईषद्गुणवचनैः** ॥ ६४ ॥ ईषदन्ययं गुणवचनैः समासस्तत्पुरुषः स्यात्। ये गुणे वर्त्तित्वा, तद्योगाद्गुणिनि वर्त्तन्ते, ते गुणवचनाः। ईषत्पिङ्गलः, ईषद्रक्तः। गुणवचनैरिति किम्? ईषद्गार्ग्यः ॥ **तृतीया तत्कृतैः** ॥ ६५ ॥ तृतीयान्तं तदर्थकृतैर्गुणवचनैरेकार्थ्ये समासस्तत्पुरुषः स्यात्। शङ्कुलाखण्डः, मदपटुः। तत्कृतै-

---

ऽनेनेति बहुव्रीहिणैव धर्मश्रित इत्यादीनि सिद्ध्यन्ति, तथाऽपि समानार्थे केवलं विग्रहभेदाद् यत्र तत्पुरुषः प्राप्नोति बहुव्रीहिश्च तत्र तत्पुरुष एव भवतीति ज्ञापयति। तेन राज्ञः सखा राजसख इत्यादौ न बहुव्रीहिः। बहुवचनमाकृतिगणार्थम्। तेन तत्त्वबुभुत्सुः सुखेच्छुरित्यादि सिद्धम् ॥ **प्राप्तश्च, आपन्नश्च, तया तृतीया, अत्, च** ॥ तच्छब्देन द्वितीयायाः परामर्शः। प्राप्ता जीविकां प्राप्तजीविका। 'नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमि'ति न्यायात्प्राप्तेत्यावन्तेन समासः। रुयेकार्थोत्तरपदाभावात् 'परतः स्त्री'ति पुंवद्भावाऽप्राप्तेरनयोरद्विधानम्। प्राप्ताऽऽपन्नयोः प्रथमोक्तत्वात्पूर्वनिपातः। श्रितादित्वाच्चानयोः शब्दयोः पूर्वसूत्रेण समासे यद्वितीयान्तं नाम तस्यापि प्रथमोक्तत्वेन प्राग्निपातः, जीविकाप्राप्तो जीविकापन्न इत्यपि भवति ॥ ईषत्, गुणा उच्यन्ते यैस्तैः ॥ ईषदल्पं पिङ्गल ईषत्पिङ्गलः। अत्र पिङ्गलशब्दो पिङ्गलतालक्षणगुणे वर्त्तमानः सन् गुणिनि द्रव्यविशेषे वर्त्तते। ईषद्गार्ग्यः, गुणैः क्रियया वा हीनो गार्ग्य एवमुच्यते ॥ तृतीया, तेन तृतीयार्थेन कृतास्तैः ॥ गुणवचनैरिति सम्बध्यते। तृतीयाया नाम्नो विशेषणत्वेन तदन्तविधिः। तच्छब्देन तृतीयान्तपरामर्शिना तदर्थो लक्ष्यते, तदर्थकृतत्वञ्च गुणवचनञ्चार्थद्वारा विशेषणं

रिति किम् ? अक्ष्णा काणः । गुणवचनैरित्येव ? दध्ना पटुः, पाटवमित्यर्थः ॥ **चतस्रार्द्धम्** ॥ ६६ ॥ अर्द्धस्तृतीयान्तस्तत्कृतार्थेन चतसृशब्देन समासस्तत्पुरुषः स्यात् । अर्द्धचतस्रो मात्राः । चतस्रेति किम् ? अर्द्धेन चत्वारो द्रोणाः ॥ **ऊनार्थपूर्वाद्यैः** ॥ ६७ ॥ तृतीयान्तं ऊनार्थैः पूर्वाद्यैश्च समासस्तत्पुरुषः स्यात् । माषोनं माषविकलम् । मासपूर्वः, मासावरः ॥ **कारकं कृता** ॥ ६८ ॥ कारकवाचितृतीयान्तं कृदन्तेन समासस्तत्पुरुषः स्यात् । आत्मकृतम्, नखनिर्भिन्नः, काक-

---

तथा च तृतीयान्तार्थकृतो यो गुणस्तद्वचनैरिति फलितार्थः । शङ्कुलया कृतः खण्डः शङ्कुलाखण्डः । कृतार्थो वृत्तावन्तर्भूत इति कृतशब्दो न प्रयुज्यते । खण्डशब्दः क्रियारूपापन्ने गुणे वर्त्तित्वा पश्चान्मत्वर्थलक्षणया तद्वति द्रव्ये वर्त्तत इति गुणवचनः । शङ्कुलायाः खण्डेन सह सामर्थ्याभावात् कृतशब्दमन्तर्भाव्य समासः । अक्ष्णा काणः, काणत्वं नाक्षिकृतं किन्तु काण्डादिकृतम्, अक्ष्यादिना तु सम्बन्धमात्रं 'यद्धेदैस्तद्वदाख्ये'ति तृतीया । दध्ना पटुः, न ह्यत्र पटुशब्दः पूर्वं गुणमुक्त्वा साम्प्रतं द्रव्ये वर्तते, अतो न गुणवचनः । अत एव शुद्धगुणवाचिनापि न समासः, यथा घृतेन पाटवमित्यादि ॥ **चतस्रा** तृतीया, **अर्द्धम्** ॥ पूर्वसूत्रमनुवर्तते । अर्द्धेन कृताश्चतस्रोऽर्द्धचतस्रो मात्राः ॥ **ऊनोऽर्थो येषाम्, पूर्वं आद्यो येषाम्, ऊनार्थानि च पूर्वाद्यानि च तैः** ॥ तृतीयेत्यनुवर्तते । माषेन ऊनं माषोनम्, मासेन पूर्वो मासपूर्वः । पूर्वादिभावे मासादेर्हेतुत्वाद्धेतौ तृतीया ॥ **कारकं कृता** ॥ तृतीयेत्यनुवर्तते । कारकवाचिपदेनासामर्थ्यात् कर्तृकरणरूपं ग्राह्यम् । आत्मना कृतमात्मकृतम्, कर्त्तरि तृतीया कृदन्तेन । नखैर्निर्भिन्नो नखनिर्भिन्नः, 'कृत्सगतिकारकस्यापी'ति कृत् प्रत्ययः प्रकृत्यादेः समुदायस्य गतिकारकपूर्वस्य केवलस्यापि विशेषणं भवती-

पेया नदी, बाष्पच्छेद्यानि तृणानि। **कारकमिति किम्?** विद्ययोषितः॥ **न विंशत्यादिनैकोऽचान्तः॥ ६९॥** एकशब्दस्तृतीयान्तो न विंशत्यादिना समासस्तत्पुरुषः स्यात्, एकस्य चादन्तः। एकान्नविंशतिः, एकाद् न विंशतिः, एकान्नत्रिंशत्, एकाद् न त्रिंशत्॥ **चतुर्थी प्रकृत्या॥ ७०॥** प्रकृतिः परिणामिकारणम्। एतद्वाचिनैकार्थ्ये चतुर्थ्यन्तं विकारार्थं समासस्तत्पुरुषः स्यात्। यूपदारु। प्रकृत्येति किम्? रन्धनाय स्थाली॥ **हितादिभिः॥ ७१॥** चतुर्थ्यन्तं हितादिभिः समासस्तत्पुरुषः स्यात्। गोहितम्, गोसुखम्॥ **तदर्थार्थेन॥ ७२॥** चतुर्थ्यर्थो यस्य तेनार्थेन चतुर्थ्यन्तं समासस्तत्पुरुषः स्यात्। पित्रर्थं पयः, आतुरार्था यवागूः। तदर्थार्थेनेति

त्यर्थकेन परिभाषासूत्रेण गतिपूर्वेणाऽपि कृताऽनेन समासः। बहुलाधिकारात्स्तुतिनिन्दार्थतायां प्रायेण कृत्यैः समासः, यथा, काकैः पातुं शक्येति काकपेया, पूर्णतोयत्वात्तटस्थैः काकैरपि पातुं शक्येति स्तुतिः, अल्पपारभ्भत्वेन निन्दा वाऽत्र कर्तृतृतीयायाः कृत्येन समासः। बाष्पेण छेद्यानि बाष्पच्छेद्यानि, करणे तृतीया कृत्येन समस्यते। कोमलत्वेन दुर्बलत्वेन च स्तुतिनिन्दे। विद्ययोषित इति हेतौ तृतीया॥ न, विंशतिरादिर्यस्यासौ तेन, एकः, अचान्तः॥ एकेन न विंशतिरेकान्नविंशतिः, अनेनैव सूत्रेण निर्देशात् नञदिति न प्रवर्तते, एकशब्दस्य चाऽदन्तो भवति, 'धुटस्तृतीयः' पक्षे 'तृतीयस्य पञ्चमे' एकान्नविंशतिः॥ **चतुर्थी प्रकृत्या॥** यूपाय दारु यूपदारु, यूपो विकृतिः, दारु प्रकृतिः, चतुर्थी च तादर्थ्यं द्योतयति। रन्धनाय स्थाली, नाऽत्र प्रकृतिविकृतिभावः॥ **हितादिभिः॥** चतुर्थीत्यनुवर्तते। गोभ्यो हितं गोहितम्, 'हितसुखाभ्यामि'ति चतुर्थी। आकृतिगणोऽयम्, तेनाऽऽत्मनेपदं परस्मैपदमित्यादि सिद्धम्॥ **तदर्थार्थेन॥** तस्याश्चतुर्थ्या अर्थो यस्य सः, तदर्थश्चासावर्थश्च, तेन॥ चतुर्थीत्यनुवर्तते। पित्रे इदं

किम् ? पित्रेऽर्थः ॥ **पञ्चमी भयाद्यैः** ॥ ७३ ॥ पञ्चम्यन्तं भयाद्यैरैकार्थ्ये समासस्तत्पुरुषः स्यात् । वृकभयम्, वृकभीरुः ॥ **क्तेनासत्त्वे** ॥ ७४ ॥ असत्त्ववृत्तेर्या पञ्चमी तदन्तं क्तान्तेन समासस्तत्पुरुषः स्यात् । स्तोकान्मुक्तः, अल्पान्मुक्तः । असत्त्व इति किम् ? स्तोकाद्बद्धः ॥ **परःशतादिः** ॥७५॥ अयं पञ्चमीतत्पुरुषः साधुः स्यात् । परःशताः, परःसहस्राः ॥ **षष्ठ्ययत्नाच्छेषे** ॥ ७६ ॥ "शेषे" या षष्ठी तदन्तं नाम नाम्नैकार्थ्ये समासस्तत्पुरुषः स्यात् । न चेत्स शेषो "नाथ" इत्यादियत्नात् । राजपुरुषः । अयत्नादिति किम् ? सर्पिषो नाथितम् । शेष इति किम् ? गवां कृष्णा सम्पन्नक्षीरा ॥ **कृति** ॥ ७७ ॥ "कर्म्मणि कृतः" "कर्त्तरि" इति या कृन्निमित्ता षष्ठी, तदन्तं नाम नाम्ना समासस्तत्पुरुषः स्यात् । सर्पिर्ज्ञानम्, गणधरोक्तिः ॥ **याजकादिभिः** ॥ ७८ ॥ षष्ठ्यन्तं याजकाद्यैः समासस्तत्पुरुषः

पित्रर्थं, ङेरर्थो वाच्यवदिति वाच्यलिङ्गता, नित्यसमासश्चायं चतुर्थ्यैव तदर्थस्योक्तत्वादर्थशब्दाऽप्रयोगे वाक्यासम्भवात्, समासस्तु वचनाद्भवति । पित्रेऽर्थः, पित्रर्थं धनमित्यर्थः ॥ **पञ्चमी भयाद्यैः** ॥ वृकाद्भयं वृकभयम्, वृकाद्भीरुः ॥ **क्तेन, न सत्त्वमसत्त्वं तस्मिन्** ॥ पञ्चमीत्यनुवर्तते । स्तोकान् मुक्तः स्तोकान्मुक्तः । 'स्तोकाल्पकृच्छ्रे'ति पञ्चमी, 'असत्त्वे ङसेरि'त्यलुप् । स्तोकाद्बद्धः, द्रव्याद्बद्ध इत्यर्थः ॥ **परः शतादिः** ॥ शतात् परे परश्शताः, परशब्दस्य पूर्वनिपातः सकारागमश्च निपातनात् ॥ **षष्ठी, अयत्नात्, शेषे** ॥ राज्ञः पुरुषो राजपुरुषः । सर्पिषो नाथितं 'नाथ' इति षष्ठी । गवामिति, 'सप्तमी चाविभागे' इति षष्ठी, न तु शैषिकी ॥ **कृति** ॥ सर्पिषः ज्ञानं सर्पिर्ज्ञानम् । यत्नजाया अपि षष्ठ्याः समासो विहितः । गणधरस्योक्तिः, एवं सिद्धसेनकृतिः, धर्मानुस्मरणम्, तत्त्वानुचिन्तनम् ॥ **याजकादिभिः** ॥ षष्ठीति सम्बध्यते । ब्राह्मणानां याजकः ब्राह्मणयाजकः, गुरूणां पूजको गुरुपूजकः । 'कर्मजा तृचा चे'ति प्रतिषेधापवादो योगः,

स्यात् । ब्राह्मणयाजकः, गुरुपूजकः ॥ **पत्तिरथौ गणकेन** ॥७९॥ एतौ षष्ठ्यन्तौ गणकेन समासस्तत्पुरुषः स्याताम् । पत्तिगणकः, रथगणकः । पत्तिरथाविति किम् ? धनस्य गणकः ॥ **सर्वपश्चादादयः** ॥ ८० ॥ एते षष्ठीतत्पुरुषाः साधवः स्युः । सर्वपश्चात्, सर्वचिरम् ॥ **अकेन क्रीडाऽऽजीवे** ॥ ८१ ॥ षष्ठ्यन्तमकप्रत्ययान्तेन क्रीडाजीविकयोर्गम्ययोः समासस्तत्पुरुषः स्यात् । उद्दालकपुष्पभञ्जिका, नखलेखकः । क्रीडाजीव इति किम् ? पयसः पायकः ॥ **न कर्त्तरि**

तुल्यार्थैरिति या षष्ठी सा न शैषिकी, अतः समासाप्राप्तौ विध्यर्थश्च । तेन गुरुसदृशो गुरुसम इत्यादि सिद्धम् ॥ **पत्तिश्च रथश्च, गणकेन** ॥ षष्ठीति वर्त्तते । एवमग्रे । पत्तीनां गणकः पत्तिगणकः, 'कर्मजा तृचा चे'ति प्राप्ते वचनम् ॥ **सर्वपश्चात् आदिर्येषान्ते** ॥ सर्वेषां पश्चात्सर्वपश्चात् । यदा सम्बन्धे षष्ठी तदा 'तृप्तार्थपूरणे'ति निषेधे प्राप्ते वचनम्, यदा 'रिरिष्टादि'ति षष्ठी तदाऽप्राप्ते समासः । बहुवचनं शिष्टप्रयोगानुसरणार्थम् ॥ **अकेन, क्रीडा च आजीवश्च तस्मिन्** ॥ अकेनेति नाम्नेत्यस्य विशेषणत्वेन तदन्तविधिः । 'कर्म्मजा तृचा चे'त्यस्यापवादः । भनक्तीति भञ्जिका, उद्दालकपुष्पाणां भञ्जिकेति विग्रहे 'कृती'ति षष्ठीसमासः प्राप्तः ततः 'कर्मजा तृचा चे'ति निषेधः प्राप्तः, तदपवादेनाऽनेन समासः । क्रीडाविशेषस्य संज्ञेयम् । वाक्येन संज्ञाऽनवगमान्नित्यसमासः । यदा तूद्दालकपुष्पाणि भज्यन्ते यस्यां क्रीडायामिति विग्रहः क्रियते तदा निषेधाभावे 'कृती' त्यनेनैव सिद्धत्वादकिञ्चित्करमिदं सूत्रं स्यात् । यद्यपि क्रीडाया भङ्गे कर्तृत्वं न सम्भवति किन्तु क्रीडाकारिणामेव तथाप्यस्यां क्रीडायां भञ्जनक्रियाकरणादुपचारात्साऽपि कर्त्री भण्यते । नखानां लेखको नखलेखको नापित इत्यर्थः । नखलेखनादिरस्याऽऽजीवो गम्यते, तत्राऽपि नित्यसमास एव, वाक्यात्तदनवगमात् ॥ **न, कर्त्तरि** ॥ अकेनेति सम्बध्यते ।

॥ ८२ ॥ कर्त्तरि या षष्ठी तदन्तमकान्तेन समासो न स्यात् । तव शायिका । कर्त्तरीति किम् ? इक्षुभक्षिका ॥ **कर्मजा तृचा च** ॥ ८३ ॥ कर्मणि या षष्ठी तदन्तं कर्तृविहिताकान्तेन तृजन्तेन च न समासः स्यात् । भक्तस्य भोजकः, अपां स्रष्टा । कर्मजेति किम् ? गुणो गुणिविशेषकः, सम्बन्धेऽत्र षष्ठी । कर्त्तरीत्येव ? पयः पायिका ॥ **तृतीयायाम्** ॥ ८४ ॥ कर्त्तरि तृतीयायां सत्यां कर्म्मजा षष्ठी न समस्यते । आश्चर्यो गवां दोहोऽगोपालेन । तृतीयायामिति किम् ? शब्दानुशासनं गुरोः ॥ **तृप्तार्थपूरणाव्ययाऽतृशत्रानशां** ॥ ८५ ॥ तृप्तार्थैः पूरणप्रत्ययान्तैरव्ययैरतृशन्तैः शत्रन्तैरानशन्तैश्च षष्ठ्यन्तं न समस्यते । फलानां तृप्तः, तीर्थकृतां षोडश, राज्ञः साक्षात्,

---

शयितुं पर्यायः शायिका । 'पर्यायार्हे'ति णकप्रत्ययः, 'कर्त्तरी'ति षष्ठी । इक्षूणां भक्षिका कर्म्मणि षष्ठी, कृतीत्यनेन समासः ॥ **कर्म्मणि** जाता कर्मजा, तृचा तृतीया, च ॥ अकेन, न कर्त्तरीत्यनुवर्त्तते । कर्त्तरीति चाकस्य विशेषणम् । भक्तस्य भोजकः कर्मणि षष्ठी, अपां स्रष्टा कर्मणि षष्ठी तृज्विषय उदाहरणम् । गुणिविशेषको गुणिनः सम्बन्धि विशेषक इत्यर्थः, शेषषष्ठ्या समासः । पयसां पायिका पयः-पायिका, अत्र कृतीत्यनेन समासः ॥ **तृतीयायाम्** ॥ कर्त्तरि कर्मजा नेत्यनुवर्त्तन्ते । गवां दोह इत्यत्र 'द्विहेतोरस्त्र्यणकस्य वे'ति षष्ठी, गुरोरिति कर्तृषष्ठ्यन्तयोगः, न तु कर्तृतृतीयान्तस्य, अतः शब्दानु-शासनमित्यत्र कर्मजा षष्ठी समस्यते ॥ **तृप्तो** अर्थो येषान्ते, तृप्ता-र्थाश्च पूरणश्च अव्ययानि च अतृश्च शता च आनश्च तेन ॥ पूरण-शब्देनातृशादिना च तदन्तत्वं ग्राह्यम् । नेति वर्त्तते । तृप्त इति 'ज्ञाने-च्छे'ति कर्मणि क्तः । षोडशानां पूरणः षोडश । द्वेष्टीति द्विषन्, 'सुग्द्विषार्हैः' अतृश्प्रत्ययः, 'द्विषो वाऽतृश' इति वा षष्ठी । चैत्रस्य पचन् शतृप्रत्ययः, तद्योगे शेषे षष्ठी, 'तृन्नुदन्ने'ति षष्ठीनिषेधस्तु

रामस्य द्विषन्, चैत्रस्य पचन्, मैत्रस्य पचमानः ॥ **ज्ञानेच्छाऽर्चार्थाऽऽधारक्तेन** ॥ ८६ ॥ ज्ञानेच्छार्चार्थेभ्यो यो वर्त्तमाने क्तो यश्चार्थाच्चाधार इत्याधारे क्तस्तदन्तेन षष्ठ्यन्तं न समस्यते । राज्ञां ज्ञातः, राज्ञामिष्टः, राज्ञां पूजितः, इदमेषां यातम् ॥ **अस्वस्थगुणैः** ॥८७॥ ये गुणाः स्वात्मन्येव तिष्ठन्ति न द्रव्ये, ते स्वस्थास्तत्प्रतिषेधेनास्वस्थगुणवाचिभिः षष्ठ्यन्तं न समस्यते । पटस्य शुक्लः, गुडस्य मधुरः ।

'कर्म्मणि कृतः' 'कर्त्तरि चे'ति सूत्राभ्यां विधीयमानषष्ठ्या एव, 'अनन्तरस्यैव विधिर्निषेधो वे'ति न्यायात् । मैत्रस्य पचमान आनश्प्रत्ययः, शैषिकी षष्ठी ॥ ज्ञानश्च इच्छा च अर्चा च, ज्ञानेच्छार्चा अर्थो येषान्ते, ज्ञानेच्छार्चार्थाश्च आधारश्च, तेषां क्तस्तेन ॥ राज्ञां ज्ञातः, 'ज्ञानेच्छार्चार्थजीच्छील्यादिभ्यः क्त' इति वर्त्तमाने क्तप्रत्ययः, कर्त्तरि षष्ठी । एवमग्रे । इदमेषां यातमित्यादौ 'अद्यर्थाच्चाधार' इति क्तः । राजपूजित इत्यादौ तु बहुलाधिकारात्, भूतक्तान्तेन वा तृतीयासमासः । निषेधोऽयं कारकषष्ठीशेषषष्ठयोरुभयोरपि, केचित्तु कारकषष्ठ्या एवेति वदन्ति ॥ स्वस्मिन् तिष्ठन्तीति स्वस्थाः, न स्वस्था अस्वस्थाः, अस्वस्थाश्च ते गुणाश्च तैः ॥ नेति वर्तते । पटस्य शुक्लो, गुडस्य मधुरः, अत्रार्थात्प्रकरणाद्वाऽपेक्ष्यस्य वर्णादेर्निर्ज्ञाने य इमे शुक्लादयस्ते पटादेरिति सामर्थ्योपपत्तेः समासः प्राप्नोतीति प्रतिषिध्यते । तथा पटस्य शौक्ल्यं गुडस्य माधुर्यमित्यादिषु पूर्वोदाहरणेषु च शुक्लादेर्गुणस्य शुक्लः पट इत्यादौ द्रव्येऽपि वृत्तिदर्शनादस्वास्थ्यमस्त्येव, गुणशब्देन चेह लोकप्रसिद्धा रूपरसगन्धस्पर्शगुणा अभिप्रेताः, ततस्तद्विशेषैरेवायं प्रतिषेधस्तेन यत्नस्य गौरवं यत्नगौरवं प्रक्रियालाघवमित्यादिषु प्रतिषेधो न भवति । न च गुणस्य द्रव्याश्रितत्वस्वरूपत्वात् स्वात्मन्येवावस्थानं कथमिति वाच्यम्, अभिधाव्यापारापेक्षया स्वस्थताया उक्तत्वात्, शौक्ल्या-

अस्वस्थगुणैरिति किम्? घटवर्णः, चन्दनगन्धः ॥ **सप्तमी शौण्डाद्यैः** ॥ ८८ ॥ एभिः सहैकार्थे सप्तम्यन्तं समासस्तत्पुरुषः स्यात् । पानशौण्डः, अक्षधूर्त्तः ॥ **सिंहाद्यैः पूजायाम्** ॥ ८९ ॥ एभिः सप्तम्यन्तं समासस्तत्पुरुषः स्यात्, पूजायां गम्यमानायाम् । समरसिंहः, भूमिवासवः ॥ **काकाद्यैः क्षेपे** ॥ ९० ॥ एभिः सप्तम्यन्तं निन्दायां

दिशब्दैर्हि धर्ममात्रमेवाभिधीयते, एवञ्च गुणशब्देन केवलगुणवाची सन् गुणोपसर्जनद्रव्यवाची गुणिबोधकप्रकृतिकभावप्रत्ययान्तश्च गृह्यते, न तु जातिसङ्ख्याव्ययकृदन्ततद्धितान्तसमाससर्वनामसङ्ख्याशब्दाऽतिरिक्ताः । घटवर्णश्चन्दनगन्ध इति वर्णत्वादिना प्रतीयमाना वर्णादयो न कदापि गुणिसमानाधिकरणाः, किन्तु स्वस्था एवेति नात्र निषेधः ॥ सप्तमी, शौण्डाद्यानि तैः ॥ पाने शौण्डः पानशौण्डः, मद्यपे वर्त्तमानोऽपि शौण्डशब्दो गौणवृत्त्याऽत्र व्यसनिनि वर्त्तते । केचित्तु शौण्डः प्रवीण इत्याहुः । ननु कारकाणां क्रिययैवाऽन्वयात्पानेषु शौण्ड इत्यादौ क्रियाया अश्रवणात् सप्तम्यर्थः कान्वेतु? उच्यते, वृत्तौ प्रसक्तिरूपक्रियाया अन्तर्भावात्तद्द्वारा सामर्थ्यात् पानेषु प्रसक्तः शौण्डः पानशौण्ड इति समासात् । वृत्तौ प्रसक्तिक्रियाया अन्तर्भावादप्रयोगः । परे त्वधिकरणकारकस्य कर्तृकर्मद्वारा क्रियान्वयाच्छौण्डादिभिः सामर्थ्यं न तु प्रसक्त्यादिक्रियान्तर्भावेनेति वदन्ति । बहुवचनमाकृतिगणार्थम्, तेन शिरःशेखर आपातरमणीय इत्यादि सिद्धम्॥ सिंहाद्यैः, पूजायाम्॥ सप्तमीत्यनुवर्तते, एवमग्रेऽपि । समरे सङ्ग्रामे सिंह इव समरसिंहः । उपमयाऽत्र पूजाऽवगम्यते । समरे सिंह इव शूर इत्यादौ तु न समासः, यत्र साधारणधर्मवाचकशब्दस्याप्रयोगस्तत्रैव समासः, अत्र तु शूरशब्दस्य साधारणधर्मवाचकस्योपादानान्न समासः । बहुवचनमाकृतिगणार्थम् ॥ काकाद्यैः, क्षेपे ॥ तीर्थे काक इव तीर्थकाकः, उपमयाऽत्र क्षेपो गम्यते । यथा

गम्यमानायां समासस्तत्पुरुषः स्यात्। तीर्थकाकः, तीर्थश्वा। क्षेप इति किम्? तीर्थे काकोऽस्ति ॥ **पात्रेसमितेत्यादयः** ॥ ९१ ॥ एते सप्तमीतत्पुरुषाः क्षेपे निपात्यन्ते। पात्रेसमिताः, गेहेशूरः ॥ **क्तेन** ॥ ९२ ॥ सप्तम्यन्तं क्तान्तेन क्षेपे समासस्तत्पुरुषश्च स्यात्। भस्मनिहुतं, अवतप्तेनकुलस्थितम् ॥ **तत्राहोरात्रांशम्** ॥ ९३ ॥ तत्रेति सप्तम्यन्तं अहरवयवा रात्र्यवयवाश्च सप्तम्यन्ताः क्तान्तेन समासस्तत्पु-

---

काकादिस्तीर्थफलमजानन्नचिरस्थायी भवति, एवं यो देवदत्तादिः कार्याण्यारभ्य तेष्वनिर्वाहकः स तीर्थाधारेण काकादिनोपमीयमानः क्षिप्यत इत्यस्ति क्षेपस्य गम्यमानता। नित्यसमासोऽयम् ॥ पात्रे समित इत्यादिर्येषान्ते ॥ क्षेप इति सम्बध्यते। पात्र एव समिताः पात्रेसमिताः, य आवश्यककार्यार्थमपि बहिर्न निर्गच्छति, भोजन एव च संरभते स एवमुच्यते, अत्रावधारणेन निरुत्साहता, तया च क्षेपो गम्यते। भोजनसमय एव सङ्गता न तु कार्य इत्यपि निन्दा गम्यते। इतिशब्दः समासान्तर एषामघटकत्वबोधकस्तेन परमाः पात्रेसमिता इत्यादिषु समासो न भवति। निपातनात्सप्तम्या अलुप्। बहुवचनमाकृतिगणार्थम्। नित्यसमासोऽयम् ॥ क्तेन ॥ क्षेप इत्यभिसम्बध्यते। भस्मनि हुतमिव भस्मनिहुतम्, अवतप्ते नकुलस्थितमिवावतप्तेनकुलस्थितम्, क्तान्तेन गतिकारकपूर्वस्यापि ग्रहणम्, अत एव नकुलस्थितशब्देन सह समासोपपत्तिः। 'तत्पुरुषे कृती' त्यलुप् समासः। यथा तप्ते प्रदेशे नकुला न चिरमवतिष्ठन्त, एवं कार्याण्यारभ्य यश्चापलेन न चिरं तिष्ठति स एवमुच्यते, अव्यवस्थितत्वप्रतिपत्त्याऽत्र निन्दा। नित्यसमासोऽयम् ॥ तत्र अहश्च रात्रिश्च अहोरात्रम्, अहोरात्रस्यांशाः, तत्र च अहोरात्रांशाश्च तत्राहोरात्रांशम् ॥ क्तेनेति वर्तते। पृथग्योगात्क्षेप इति निवृत्तम्। सप्तमीसाधर्म्यात् त्रप्प्रत्ययोऽप्यत्र सप्तमीत्युच्यते, साधर्म्यञ्चाऽधिकरणार्थत्वेन, अथवाऽव्ययस्यापि नामत्वात्ततो ङिवि-

रुषः स्यात् । तत्रकृतम्, पूर्वाह्णकृतम्, पूर्वरात्रकृतम् । तत्राहोरात्रांशमिति किम् ? घटे कृतम् । अहोरात्रग्रहणं किम् ? शुक्लपक्षे कृतम् । अंशमिति किम् ? अह्नि भुक्तं, रात्रौ नृत्तम् ॥ **नाम्नि** ॥ ९४ ॥ सप्तम्यन्तं नाम्ना संज्ञाविषये समासस्तत्पुरुषश्च स्यात् । अरण्येतिलकाः, अरण्येमाषकाः ॥ **कृद्येनावश्यके** ॥ ९५ ॥ सप्तम्यन्तं नाम "य एच्चात" इति यान्तेनावश्यम्भावे गम्ये समासस्तत्पुरुषश्च स्यात् ।

भक्तौ 'अव्ययस्ये'ति लुप् । न चाभिहितत्वात् तत्रेति सप्तमी दुर्लभेति वाच्यम्, विभक्त्यन्तरेऽपि तत्र भवानित्यादौ तत्रशब्ददर्शनादधिकरणप्रतिपादनेऽपि सप्तम्या अपेक्षितत्वात् । सप्तम्यधिकाराऽबाधायामधिकरणशक्तिप्रधानादपि सप्तम्या युक्तत्वाच्च । तत्र कृतं तत्रकृतम् । पूर्वाह्णे प्रथमप्रहरे कृतम् पूर्वाह्णकृतम् । पूर्वं रात्रेः पूर्वरात्रं कृतं पूर्वरात्रकृतम् ॥ **नाम्नि** ॥ अरण्ये माषका अरण्येमाषकाः 'कोण्वादेरि'ति कः । 'अद्व्यञ्जनादि'त्यलुप् । संज्ञाविशेषोऽयम् , अत एव नित्य समासो वाक्यात् संज्ञानवगमात् ॥ कृतः यः कृत्यस्तेन, आवश्यके ॥ 'अर्थवद्ग्रहणे नानर्थकस्य ग्रहणमि'ति न्यायेन तव्यादिव्युदासात् फलितमाह—'य एच्चात' इत्यादि । मासे अवश्यं देयं मासदेयम् मासस्य पूरके त्रिंशत्तमे दिने देयमित्यर्थः । अत्र मासे गते देयमिति विवक्षायां 'यद्भावो भावलक्षणमि'ति सप्तमी । यदि मासाद्येकदेशे मासादिशब्दस्तदाऽऽधार एव सप्तमी अन्यथोपचारं विना समग्रेऽपि मासे देयमिति यदि विवक्ष्यते तदा 'कालाध्वनोर्व्याप्तावि'ति द्वितीया स्यात् । अयमपि नित्यसमासः । यतो न समासेऽवश्यंशब्दस्याप्रयोग इति । अत्र 'तत्पुरुषे कृती' त्यलुप्प्राप्तौ बाहुलकात् सप्तम्या लोपः । पाणिनीये तु लोपो नेष्यते । मासे स्तुत्य इत्यादौ न समासः 'निरनुबन्धग्रहणे न सानुबन्धकस्ये'ति न्यायेन क्यन्ध्यणोरग्रहणात् ।

मासदेयम् । कृदिति किम् ? मासे पित्र्यम् ॥ **विशेषणं विशेष्येणैकार्थं कर्म्मधारयश्च** ॥ ९६ ॥ भिन्नप्रवृत्तिनिमित्तयोः शब्दयोरेकस्मिन्नर्थे वृत्तिरैकार्थ्यं, तद्विशेषणवाचि विशेष्यवाचिनैकार्थ्ये समा-

---

पित्र्यमिति तद्धितयान्तः ॥ विशिष्यतेऽनेनेति विशेषणं व्यावर्त्तकमित्यर्थः । विशिष्यते तदिति विशेष्यम्, तेन, एकोऽर्थो यस्य तदेकार्थं कर्म्मधारयः, चकारेण तत्पुरुषस्य समुच्चयः । विशिष्यतेऽनेकप्रकारं वस्तु प्रकारान्तरेभ्यो व्यवच्छिद्यतेऽनेनेति विशेषणम्, व्यवच्छेद्यं विशेष्यम् । नीलञ्च तदुत्पलञ्च नीलोत्पलम्, अत्र वाक्ये चकारप्रयोगेण प्रवृत्तिनिमित्त उत्पलत्वनीलत्वयोर्नीलोत्पलयोर्वा साहित्यं भासते । नीलत्वोत्पलत्वसमूहवन्नीलमुत्पलमिति बोधः । नीलसमानाधिकरणं तदभिन्नमुत्पलमिति वा । विशेषणविशेष्ययोः सम्बन्धिशब्दत्वादेकतरोपादानेनैवान्यतरस्यापि लाभ उभयोर्ग्रहणं समस्यमानपदद्वयजन्यबोधप्रकारकयोर्विशेषणविशेष्यधर्मयोर्यत्र परस्परव्यभिचारस्तत्रैव समासो यथा स्यान्नान्यत्रेत्येतदर्थम् । तेन तक्षकः सर्प इत्यादेर्न समासः, उभयधर्मयोः परस्परव्यभिचाराभावात्, न हि तक्षकत्वं सर्पत्वं व्यभिचरति । न चाऽऽम्रवृक्षोऽस्तपर्वत इत्यादौ कथं समासः, न ह्यवृक्ष आम्रो भवतीति वाच्यम्, आम्रादीनां फलादौ तत्सहचरितमाधुर्यस्थैर्यादिगुणविशेषे च वृत्तेः, तत आम्रफलादिव्यवच्छेदकत्वेन वृक्षशब्दस्यापि विशेष्यत्वात्समासो भवत्येव । एवं तक्षकाहिः शेषाहिरित्यादयोऽपि भवन्ति, तक्षकशेषादिशब्दानामहिगुणादावपि वृत्तेरहिशब्दस्य गुणादिव्यावर्त्तकत्वात् । तक्षकः सर्प इत्यादौ तु तक्षकशब्देन तद्गुणविवक्षायामपि बाहुलकान्न भवति । अथवाऽऽम्राणां वृक्षोऽस्तस्य पर्वत इत्येवं षष्ठीसमासो विधेयः । न च विशेष्यविशेषणभावस्य कामचारत्व उत्पलस्यापि विशेषणत्वेन प्रथमोक्तं प्रागिति वचनादुत्पलनीलमित्यपि स्यादिति वाच्यम्,

सस्तत्पुरुषः कर्म्मधारश्च स्यात् । नीलोत्पलम्, खञ्जकुण्टः, कुण्टखञ्जः । एकार्थमिति किम् ? वृद्धस्योक्षा वृद्धोक्षा ॥ **पूर्वकालैकसर्वजरत्पुराणनवकेवलम्** ॥ ९७ ॥ पूर्वकालो यस्य तद्वाच्येकादीनि चैकार्थानि परेण नाम्ना समासस्तत्पुरुषः कर्मधारयश्च स्यात् । स्नातानुलिप्तः,

---

तथात्वेऽपि 'प्रधानानुयाय्यप्रधानमि'ति न्यायादप्रधानस्यैव प्रधानेन समासात्, द्रव्यस्यैव साक्षात्क्रिययाऽभिसम्बन्धेन द्रव्यशब्दानां प्राधान्यात् । उपलादिशब्दा जातिवाचका अप्युत्पत्तेः प्रभृत्याविनाशं द्रव्येण जातेरभिसम्बन्धाद्द्रव्यशब्दा उच्यन्ते, गुणक्रिययोस्तु द्रव्येण तथासम्बन्धाभावान्न तन्निमित्ताः शब्दा द्रव्यशब्दाः, अतो नीलोत्पलमित्यादेव भवति, न तूत्पलनीलमित्यादि । यत्र च गुणादिशब्दानामेव समासस्तत्रोभयोरपि पदयोरप्रधानत्वात्कामचारेण पूर्वापरनिपातः, यथा खञ्जश्चासौ कुण्टश्च खञ्जकुण्टः कुण्टखञ्जो वा । वृद्धस्योक्षा वृद्धोक्षेत्येकार्थप्रत्युदाहरणे भिन्नप्रवृत्तिनिमित्तयोः शब्दयोरेकस्मिन्नर्थे वृत्त्यभावेनैकार्थ्याभावान्न कर्म्मधारयः, किन्तु षष्ठी तत्पुरुषः । अत्र कर्म्मधारये हि समासान्तप्रत्ययः स्यात् । बहुलाधिकारात्कचिन्न समासः, यथा रामो जामदग्न्यः । कचिन्नित्यो यथा कृष्णसर्पो जातिविशेषवाचित्वात्, न हि वाक्येन जातिर्गम्यते । जातिशब्दानाञ्चावयवद्वारेण समुदायेऽपि वृत्तेस्सामानाधिकरण्यम्, भूयोऽवयवाभिधायिनश्च प्राधान्याद्विशेष्यत्वमितरस्य तु विशेषणत्वम् ॥ पूर्वः कालो यस्यार्थस्य पूर्वकालश्च एकश्च सर्वश्च जरच्च पुराणश्च नवश्च केवलश्च । एकार्थं कर्म्मधारयश्चानुवर्त्तते । अत्र पूर्वकालशब्दोऽर्थपरः, सम्बन्धिशब्दत्वात्परकालवाचकेन समस्यते, अन्ये षट् स्वरूपपरा न त्वर्थपराः । पूर्वं स्नातः पश्चादनुलिप्त इति स्नातानुलिप्तः । एका चासौ शाटी चैकशाटी एकशब्दः सङ्ख्याऽन्यासहायाद्वितीयेषु वर्तते, एकशाटीत्यत्र त्वसहाये । सर्वं च तदन्नं च सर्वान्न

एकशाटी, सर्वान्नम्, जरद्गवः, पुराणकविः, नवोक्तिः, केवलज्ञानम्। एकार्थमित्येव ? स्नात्वाऽनुलिप्तः ॥ **दिगधिकं संज्ञातद्धितोत्तरपदे ॥ ९८ ॥** दिग्वाच्यधिकं चैकार्थं नाम्ना समासस्तत्पुरुषः कर्मधारयश्च स्यात्, संज्ञायां तद्धिते च विषयभूते उत्तरपदे च परतः। दक्षिणकोशलाः, पूर्वेषुकामशमी, दाक्षिणशालः। अधिकषाष्टिकः, उत्तरगवधनः, अधिकगवप्रियः ॥ **सङ्ख्या समाहारे च द्विगु-**

न्नम्, सर्वशब्दो द्रव्यावयवप्रकारगुणानां कात्स्न्र्ये वर्तते, सर्व्वान्नमित्यत्र तु प्रकारस्य यावत्त्वे। जरंश्चासौ गौश्च जरद्गवः। पुराणश्चासौ कविश्च। नवा चासावुक्तिश्च नवोक्तिः। केवलञ्च तज्ज्ञानञ्च। स्नात्वानुलिप्त इति, स्नात्वेत्यसत्त्ववाचित्वान्नानुलिप्तपदेनैकार्थ्यम्, पूर्वेणैव सिद्धे पुनर्वचनं स्पर्द्धे परमिति पूर्वनिपातस्य विषयप्रदर्शनार्थम्। पूर्व्वापरकालवाचिनोरद्रव्यशब्दत्वादनियमे प्राप्ते पूर्वकालवाचिन एव पूर्वनिपातार्थञ्च ॥ दिक् च अधिकश्च, संज्ञा च तद्धितश्च उत्तरपदश्च तस्मिन्॥ अनुवृत्तिः पूर्ववत्, एवमग्रेऽपि। दक्षिणाश्च ते कोशलाश्च दक्षिणकोशलाः, अयोध्येत्यर्थः। पूर्वा चासाविषुकामशमी च पूर्वेषुकामशमी, इषुकामशमीति ग्रामसंज्ञा। संज्ञायां नित्यसमासः। पूर्वोत्तरविभागप्रदर्शनार्थन्तु विग्रहवाक्यम्। दक्षिणस्यां शालायां भवो दाक्षिणशालः, 'दिक्पूर्वादनात्र' णप्रत्ययः। अधिकया षष्ट्या क्रीतोऽधिकषाष्टिकः, 'मूल्यैः क्रीते' इकण्, अयमपि नित्यसमासः, न हि तद्धिते वाक्यमस्ति। उत्तरो गौर्धनमस्येत्युत्तरगवधनः, 'गोस्तत्पुरुषादि' त्यट्प्रत्ययः, उत्तरपदे च परत इत्यस्योदाहरणम्, अयमपि नित्यसमासः, त्रयाणामेकार्थीभाव एवोत्तरपदसम्भवात्, तत्र च द्वयोर्व्यपेक्षाभावात्। अधिका गौः प्रिया यस्याधिकगवप्रियः। विशेषणं विशेष्येणेत्येव सिद्धे नियमार्थं वचनम्। दिगधिकं संज्ञातद्धितोत्तरपद एव समस्यते, नान्यत्रेति ॥ संख्या समाहरणं समाहारः तस्मिन्, च, द्विगुः, च,

श्रानाम्न्ययम् ॥ ९९ ॥ सङ्ख्यावाचि परेण नाम्ना समासस्तत्पुरुषः कर्म्मधारयश्च स्यात्, संज्ञातद्धितयोर्विषये, उत्तरपदे च परे समाहारे चार्थे, अयमेव चासंज्ञायां द्विगुश्च । पञ्चाम्राः । सप्तर्षयः । द्वैमातुरः, अध्यर्द्धकंसः । पञ्चगवधनः, पञ्चनावप्रियः । पञ्चराजी । समाहारे चेति किम् ? अष्टौ प्रवचनमातरः । अनाम्नीति किम् ? पाञ्चर्षम् ॥ **निन्द्यं कुत्सनैरपापाद्यैः** ॥ १०० ॥ निन्द्यवाचि निन्दाहेतुभिः पापादिवर्जैः सह समासस्तत्पुरुषः कर्म्मधारयश्च स्यात् । वैयाकरणखसूची, मीमांसकदुर्दुरूढः । निन्द्यमिति किम् ? वैयाकरण-

---

न नाम अनाम तस्मिन्, अयम् ॥ संज्ञा तद्धित्तोरपद इत्यनुवर्त्तते । अनेकस्य कथञ्चिदेकत्वं समाहारः । पञ्च चैते आम्राश्च पञ्चाम्राः, सन्निवेशादिविशेषविशिष्टानां पञ्चानामाम्राणामियं संज्ञा । सप्त च त ऋषयश्च सप्तर्षयः । द्वयोर्मात्रोरपत्यं द्वैमातुरः 'सङ्ख्यासम्भद्रादि'ति तद्धितोऽण्प्रत्ययः । अध्यर्द्धेन कंसेन क्रीतोऽध्यर्द्धकंसः 'कंसार्द्धादि'तीकट्प्रत्ययः, क्रीतेऽर्थे 'अनाम्न्यद्विः' प्लुप् । उत्तरपदे, पञ्च गावो धनमस्य पञ्चगवधनः । पञ्चानां राज्ञां समाहारः, 'राजन्सखे' इत्यट्प्रत्ययः, 'अस्य ङ्यां' अष्टौ प्रवचनमातरः, नात्र समासः । पञ्च च त ऋषयश्च पञ्चर्षयः, पञ्चर्षीणामिदं पाञ्चर्षम्, 'तस्येदं' अण् । उत्तरसूत्रेषु द्विगुश्चेति नानुवर्त्ततेऽयंग्रहणात् ॥ **निन्द्यं** कुत्स्यते एभिरिति कुत्सनानि तैः, पाप आद्यो येषां न पापाद्यानि तैः ॥ व्याकरणं वेत्त्यधीते वा वैयाकरणः 'तद्वेत्त्यधीतेऽण्' वैयाकरणश्चासौ खसूची च । यः शब्दं पृष्टः सन् निष्प्रतिभत्वात् खं आकाशं सूचयति स एवमुच्यते । वैयाकरणखसूचिरिति पाणिनीयाः । मीमांसकश्चासौ दुर्दुरूढश्च नास्तिक इत्यर्थः । वैयाकरणश्चौरः, प्रत्यासत्तेर्निन्द्यशब्दप्रवृत्तिः निमित्तकुत्सायामयं समास इष्यते, न चात्र चौर्येण वैयाकरणत्वं कुत्स्यते, किन्तर्हि तदाश्रयो द्रव्यम्, वैयाकरणत्वं तदुपलक्षकमात्रम्, तेनात्र विशेषण-

श्चौरः । अपापाद्यैरिति किम् ? पापवैयाकरणः हतविधिः ॥ **उपमानं सामान्यैः** ॥ १०१ ॥ उपमानवाच्येकार्थमुपमानोपमेयसाधारणधर्म्मवाचिभिरेव समासस्तत्पुरुषः कर्म्मधारयश्च स्यात् । शङ्खीश्यामा, मृगचपाला । उपमानमिति किम् ? देवदत्ता श्यामा । सामान्यैरिति किम् ? अग्निर्माणवकः ॥ **उपमेयं व्याघ्राद्यैः साम्यानुक्तौ** ॥ १०२ ॥ उपमेयवाच्येकार्थमुपमानवाचिभिर्व्याघ्राद्यैः साधारणधर्मा-

---

समासो भवति, चौरवैयाकरणः विशेष्यस्य पूर्वनिपातार्थं सूत्रम् ॥ उपमीयतेऽनेनेत्युपमानम्, सामान्यैः । उपमानोपमेययोः साधारणो धर्मः सामान्यम् । शङ्खीव शङ्खी, शङ्खी चासौ श्यामा च शङ्खीश्यामा, शङ्खीव श्यामेत्यर्थः । अत्र श्यामाशब्दो विशिष्टायां शङ्ख्यां तदुपमितायां वा देवदत्तायां वर्त्तत इति विशेषवृत्तित्वात् कथं साधारण धर्म्मवाची, उच्यते सर्वशब्दः शब्दान्तरसम्बन्धे विशेषवाचित्वात् सामान्यवचनो न भवतीति सामान्यपदोपादानसामर्थ्याच्छब्दान्तराभिसम्बन्धरूपसमासात् पूर्वं यश्शब्दः सामान्यवचनः स गृह्यते शङ्खी श्यामा इत्यत्र हि वाक्ये श्यामत्वसामान्यमुपमानोपमेयगतमाश्रित्य श्यामशब्दः प्रवृत्त इति साम्प्रतिकाभावे भूतपूर्वगत्याश्रयणादिष्ट सिद्धिरिति । यत्र किञ्चित्समानं किञ्चिच्च विशेषस्तत्रोपमानोपमेये भवतः । पूर्वपदं तत्सदृशे लाक्षणिकम्, अत एव सामानाधिकरण्यान्मृगीव चपला मृगचपलेत्यादौ पूंवद्भावः, साहश्यञ्चोत्तरपदोपस्थितश्यामत्वचापलादिद्वारकमेव गृह्यते, श्रुतं विहायाऽश्रुतकल्पने गौरवाऽऽपत्तेः । विशेषणं विशेष्येणेत्येव समासे उपमानोपमेययोः साधारणधर्म्मप्रतीत्यन्यथानुपपत्त्यैव पूर्वनिपाते च सिद्धे उपमानं सामान्यैरेवेति नियमार्थं वचनम् । तेनाग्निर्माणवक इत्यादौ विशेषणसमासोऽपि न भवति ॥ उपमेयं, व्याघ्र आद्यो येषां तानि तैः, समस्य भावः साम्यं, न उक्तिः, अनुक्ति, साम्यस्यानुक्तिस्तस्याम् ॥ एकार्थमित्यनुवर्त्तते । व्याघ्र-

नुक्तौ समासस्तत्पुरुषः कर्म्मधारयश्च स्यात् । पुरुषव्याघ्रः, श्वसिंही । साम्यानुक्ताविति किम् ? पुरुषव्याघ्रः शूरः इति मा भूत् ॥ **पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीरम् ॥१०३॥** एतान्येकार्थानि नाम्ना परेण, समासस्तत्पुरुषः कर्म्मधारयश्च स्युः । पूर्व-

---

इव व्याघ्रः, पुरुषश्चासौ व्याघ्रश्च पुरुषव्याघ्रः, यदा व्याघ्रशब्दः 'शौर्यादेः पुरुषार्थ एव वर्त्तते तदैकार्थत्वे सति समासेन भाव्यम्, तत्र प्रकरणादिना यदा नियतसाधारणगुणज्ञानं तदा साधारणधर्मप्रयोगे सति समासः, यदा तु गुणान्तरव्यावृत्तये विशिष्टसाधारणगुणप्रतिपादकशब्दप्रयोगः क्रियते, पुरुषो व्याघ्र इव शूर तदा न समासः, साम्यानुक्तावित्युक्तत्वात्, उपमानभूतशूरव्याघ्राऽभिन्नः शूरः पुरुष उपमेय इति बोधः । न च साम्यानुक्ताविति शक्यमवक्तुम् । पुरुषो व्याघ्र इव शूर इत्यादौ शूरसापेक्षत्वेन व्याघ्रपदस्यासामर्थ्यादेव समासाभावादिति वाच्यम्, साम्यानुक्तावित्यनेनैव प्रतिषेधेन 'प्रधानस्य तु सापेक्षत्वेऽपि समासो भवती'ति ज्ञापनात् । यस्य क्रियया सह सामानाधिकरण्येन प्रयोगस्तत्प्रधानं यथा राजपुरुषोऽस्ति दर्शनीय इत्यादौ समासात्प्रागवस्थायां पुरुषशब्दस्य स्वविशेषणदर्शनीयशब्दसापेक्षत्वेऽपि राजशब्देन सह तत्पुरुषः, य एव हि पुरुषत्वस्याश्रयः, स एवास्तीति क्रियाया अपीति क्रियया सह सामानाधिकरण्यप्रयोगेण पुरुषशब्दस्य प्रधानत्वात् । शुनी चासौ सिंही च श्वसिंही, कर्मधारयानन्तरं पुंवद्भावः । उपमानं सामान्यैरेवेति पूर्वोक्तावधारणेन विशेषणसमासे प्रतिषिद्धे समासविधानार्थमिदं वचनम् ॥ पूर्वश्च अपरश्च प्रथमश्च चरमश्च जघन्यश्च समानश्च मध्यश्च मध्यमश्च वीरश्च ॥ अनुवृत्तिः, पूर्ववत् । पूर्वश्चासौ पुरुषश्च पूर्वपुरुषः । दिग्वाचकत्वेऽपि सूत्रोपादानसामर्थ्यात्समासः, न तु 'दिगधिकमि'त्यनेन निषेधः । 'विशेषणं विशेष्येणे' त्यादिनैव सिद्धे 'स्पर्द्धे परमि'ति

पुरुषः, अपरपुरुषः, प्रथमपुरुषः, चरमपुरुषः, जघन्यपुरुषः, समानपुरुषः, मध्यपुरुषः, मध्यमपुरुषः, वीरपुरुषः ॥ **श्रेण्यादि कृताद्यैश्च्व्यर्थे ॥ १०४ ॥** श्रेण्याद्येकार्थं कृताद्यैः सह च्व्यर्थे गम्ये समासस्तत्पुरुषः कर्म्मधारयश्च स्यात् । श्रेणिकृताः, ऊककृताः । च्व्यर्थ इति किम् ? श्रेणयः कृताः केचित् ॥ **क्तं नञादिभिन्नैः ॥१०५॥**

पूर्वनिपातस्य विषयप्रदर्शनार्थम्, अद्रव्यवाचिनोरनियमेन पूर्वापरभावप्रसक्तौ पूर्वनिपातनियमार्थं च वचनम् । नन्वेकश्चासौ वीरश्चेत्यत्र-'पूर्वकालैके'ति बाधित्वा परत्वादनेन समासे वीरैक इति स्यात्, कथमेकवीर इति चेत् मैवम्, बहुलाधिकारात् । बहुलाधिकारादेव च क्रियाशब्दैः पाचकादिभिरेषां न समासः ॥ श्रेण्यादि कृताद्यैः च्वेरर्थस्तस्मिन् । एकेन शिल्पेन पण्येन वा ये जीवन्ति तेषां समूहः श्रेणिः, अश्रेणयः श्रेणयः कृताः श्रेणिकृताः च्विप्रत्ययाभावे च्विप्रत्ययार्थे च गम्येऽनेन समासः । च्विप्रत्ययान्तस्य च 'गतिकन्यस्तत्पुरुष' इति सूत्रेण नित्यसमासः श्रेणिकृताः । यदा पृथक् संस्थितानां श्रेणीकरणं तदाऽयं समासो यथा स्यात्, यदा तु श्रेणीस्थानामेव दण्डनादिरूपकरणं तदा मा भूदित्येवमर्थं च्व्यर्थे इत्युक्तम् । अनूका ऊकाः कृता ऊककृता राशिस्थानीकृता इत्यर्थः । श्रेणिकृता इत्यादौ क्रियाकारकसम्बन्धमात्रम्, न विशेष्यविशेषणभावः । श्रेणयः कृताः, किञ्चिन्निगृहीता अनुगृहीता वेत्यर्थः ॥ क्तं नञ् आदिर्येषान्तानि, नञादिभिर्भिन्नानि तैः ॥ नञादीत्यत्रादिशब्दः प्रकारार्थः । विसमाप्तिवचनोऽत्र नञ्, विसमाप्तिश्चेषन्निष्पत्तिरीषदपरिसमाप्तिर्वा । एवंविधैर्नञादिप्रकारैरेव भिन्नैर्नामभिरित्यस्य नञ्प्रकारैरेवाधिकैरित्यर्थः, यथा कृतञ्च तद् अकृतञ्च कृताकृतम्, एकदेशकरणात्कृतमेकदेशान्तरस्याकरणात्तदेवाकृतमित्यर्थः । इटः क्तावयवत्वाद् विकारस्य त्वेकदेशविकृताऽनन्यत्वान्न भेदकत्वम्, यथा क्लिष्टाक्लिशितम्, अशिताऽनशि-

क्तान्तमेकार्थं नञ्प्रकारैरेव यानि भिन्नानि तैः सह समासस्तत्पुरुषः कर्म्मधारयश्च स्यात्। कृताकृतम्, पीतावपीतम्। क्तमिति किम्? कर्त्तव्यमकर्त्तव्यञ्च। नञादिभिन्नैरिति किम्? कृतं प्रकृतं, कृतञ्चाविहितञ्च ॥ **सेट् नाऽनिटा** ॥१०६॥ सेट् क्तान्तं नञादिभिन्नेनानिटा सह न समस्यते। क्लिशितमक्लिष्टम्, शितमशातम्। सेडिति किम्? कृताकृतम्। अनिटेति किम्? अशितानशितम् ॥ **सन्महत्परमोत्तमोत्कृष्ट पूजायाम्** ॥१०७॥ एतान्येकार्थानि पूजायां गम्यमानायां पूज्यवचनैः सह समासस्तत्पुरुषः कर्मधारयश्च स्यात्। सत्पुरुषः, महापुरुषः, परमपुरुषः, उत्तमपुरुषः, उत्कृष्टपुरुषः। पूजायामिति किम्? सन् घटः, अस्तीत्यर्थः ॥ **वृन्दारकनागकुञ्जरैः** ॥१०८॥ पूजायां गम्यायामेभिस्सह पूज्यवा-

---

तम्। आदिशब्देनेषदसमाप्तिद्योतका एवादयो गृह्यन्ते, तेन पीतावपीतमित्यादिसिद्धिः। नञादिभिरेव भिन्नैः, न तु प्रकृत्या प्रत्ययेनाऽर्थेन चेति विवक्षितत्वात्कृतञ्चाविहितञ्चेत्यादौ प्रकृतिभेदान्न समासः। पूर्वनिपातनियमार्थं वचनम्॥ सह इटा वर्तत इति सेट्, न, न विद्यत इट् यत्र तेन ॥ वचनविपरिणामेन पूर्वसूत्रमनुवर्तते। पूर्वसूत्रस्यापवादोऽयम् ॥ **संश्च** महांश्च परमश्च उत्तमश्च उत्कृष्टश्च, पूजायाम् ॥ संश्चासौ पुरुषश्च सत्पुरुषः, महांश्चासौ पुरुषश्च महापुरुषः, 'जातीयैकार्थेऽञ्वेरि'ति डान्तादेशः। महाजनो महोदधिरित्यादौ पूजाप्रतीत्यभावेऽपि बहुलाधिकारात्समासः। पूजायामेवेति नियमार्थं वचनं पूर्वनिपातव्यवस्थार्थञ्च। तेन गुणक्रियाशब्दैः सह समासे सदादीनां पूर्वनिपातव्यवस्था सिद्धा ॥ **वृन्दारकश्च** नागश्च कुञ्जरश्च तैः ॥ पूजायामित्यनुवर्तते। वृन्दारक इव वृन्दारकः, गौश्चासौ वृन्दारकश्च गोवृन्दारकः। वृन्दारकशब्दो देवजातिवाची, नागशब्दो गजसर्पवाची, कुञ्जरशब्दो गजवाची, इति न ते सदादि-

च्येकार्थं समासस्तत्पुरुषः कर्मधारयश्च स्यात्। गोवृन्दारकः, गोनागः, गोकुञ्जरः। पूजायामिति किम्? सुसीमो नागः॥ **कतरकतमौ जातिप्रश्ने** ॥ १०९ ॥ एतावेकार्थौ जातिप्रश्ने गम्ये जात्यर्थेन नाम्ना समासस्तत्पुरुषः कर्मधारयश्च स्यात्। कतरकठः, कतमगार्ग्यः। जातिप्रश्न इति किम्! कतरः शुक्लः, कतमो गन्ता॥ **किं क्षेपे** ॥ ११० ॥ निन्दायां गम्यमानायां किमित्येकार्थं कुत्स्यवाचिना समासस्तत्पुरुषः कर्मधारयश्च स्यात्। किंराजा, किंगौः। क्षेप इति किम्? को राजा तत्र?॥ **पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यायकधूर्त्तप्रशंसारूढैर्जातिः** ॥ १११ ॥ पोटादिभिः प्रशंसारूढैश्च सह जातिवाच्येकार्थं समासस्तत्पुरुषः कर्मधारयश्च स्यात्। इभ्यपोटा, नागयुवतिः, अग्निस्तोकम्,

---

वत् पूजावचनास्तथाऽप्युपमानात् पूजाऽवगम्यते। शोभना सीमा स्फटा यस्य सः सुसीमो नागः, अत्र नागशब्दो न पूजां गमयति, किन्तु जातिमात्रम्। व्याघ्रादेराकृतिगणत्वात् 'उपमेयं व्याघ्रादैरि'-त्येव सिद्धे पूजायामेवेति नियमार्थम्, साम्योक्तावपि विधानार्थञ्च वचनम्॥ **कतरश्च** कतमश्च, जातेः प्रश्नस्तस्मिन्॥ कतरश्चासौ कठश्च कतरकठः, 'गोत्रञ्च चरणैः सहे'ति कठो जातिवचनः। गुणक्रियाद्रव्यप्रश्ने न भवति, यथा कतरः शुक्लः, कतमो गन्ता, कतरः कुण्डली। जातिप्रश्न एवेति नियमार्थं वचनम्॥ **किं क्षेपे**॥ कुत्सितो राजा किंराजा, 'न किमः क्षेपे' इति समासान्ताट् निषेधः। कुत्सितो गौः किंगौः। स्वस्वकार्याऽकरणादत्र क्षेपो गम्यते। क्षेपे एवेति नियमार्थं वचनम्॥ **प्रशंसायां रूढः** प्रशंसारूढः, पोटा च युवतिश्च स्तोकश्च कतिपयश्च गृष्टिश्च धेनुश्च वशा च वेहच्च बष्कयणी च प्रवक्ता च श्रोत्रियश्च अध्यायकश्च धूर्त्तश्च प्रशंसारूढाश्च तैः, जातिः॥ *इभ्या च सा पोटा च, पुरुषवेषधारिणी स्त्री पोटा, गर्भ एव*

दधिकतिपयम्, गोगृष्टिः, गोधेनुः गोवशा, गोवेहत्, गोबष्कयणी, कठप्रवक्ता, कठश्रोत्रियः, कठाध्यायकः, मृगधूर्त्तः, गोमतल्लिका, गोप्रकाण्डम् ॥ **चतुष्पाद्गर्भिण्या** ॥ ११२ ॥ चत्वारः पादा यस्या

दास्यं प्राप्ता वा, उभयव्यञ्जना वा स्त्री, पुरुषस्वभावा इत्यर्थः । "पुंवत्कर्मधारय इति" पुंवद्भावः । नागी चासौ युवतिश्च, 'भाजगोणनागे'ति ङीप्रत्ययः, पूर्ववत्पुंवद्भावः । स्तोचनं स्तोकः, भावे घञ्, सोऽस्यास्तीति स्तोकम् । अत्र भिन्नलिङ्गयोरपि सामानाधिकरण्यम्, अग्निश्चासौ स्तोकश्च । गृष्टिः सकृत्प्रसूता, धेनुर्नवप्रसूता, वशा वन्ध्या, वेहत् गर्भघातिनी, बष्कयणी तरुणवत्सा । प्रवक्ता—उपाध्यायः, श्रोत्रियः छन्दोऽध्यायी, अध्यायकोऽध्येता । मृगधूर्त्तः शृगालः, शब्दप्रवृत्तिनिमित्तविशिष्टकुत्सायामत्र समासः, न तु शब्दप्रवृत्तिनिमित्तकुत्सायां तेन 'निन्द्यं कुत्सनैरि' त्यनेन मृगधूर्त्त इत्यादेर्न गतार्थता । मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ प्रशस्तवाचकान्यमी, तेन गौ रमणीयेत्यादौ न समासः, प्रशंसायां रूढस्यैव विवक्षणात् । मतल्लिकादयो नियतलिङ्गाः, न तु विशेष्यनिघ्नाः । शब्दाश्चतुर्विधाः, रूढयौगिकयोगरूढयौगिकरूढभेदात्, अवयवशक्तिनैरपेक्ष्येण समुदायशक्तिमत्पदत्वं रूढत्वम्, यथा गोमण्डपादिः । समुदायशक्तिनैरपेक्ष्येणावयवशक्तिमत्पदत्वं यौगिकत्वं यथा पाचकादिः । अवयवशक्तिसापेक्षसमुदायशक्तिमत्पदत्वं योगरूढत्वं यथा पङ्कजादिः । स्वतन्त्रोभयशक्तिमत्पदत्वं यौगिकरूढत्वं यथा उद्भिदादिः, अत्रोद्भेदनकर्ता तरुगुल्मादिर्योगविशेषश्च बोध्यत इति । एवञ्चात्र रूढिग्रहणाद् ये यौगिकाः प्रशस्तशोभनरमणीयादयः, ये च विशेषवचनाः शुचिमृद्वादयः, ये च गौण्या वृत्त्या प्रशंसां गमयन्ति सिंहो माणवक इत्यादयस्ते सर्व्वे व्युदस्यन्ते । विशेष्यस्य जातेः पूर्वनिपातार्थं वचनम् ॥ चत्वारः पादाः यस्याः सा चतुष्पाद्, गर्भिण्या ॥ जातिरित्यनुवर्त्तते । गौश्चासौ

जातेस्तद्वाच्येकार्थं गर्भिण्या समासस्तत्पुरुषः कर्म्मधारयश्च स्यात्। गोगर्भिणी, महिषगर्भिणी। जातिरित्येव ? कालाक्षी गर्भिणी ॥ **युवा खलतिपलितजरद्वलिनैः** ॥ ११३ ॥ युवन्नित्येकार्थमेभिः समासस्तत्पुरुषः कर्म्मधारयश्च स्यात्। युवखलतिः, युवपलितः, युवजरन्, युववलिनः ॥ **कृत्यतुल्याऽऽख्यमजात्या** ॥ ११४ ॥ कृत्यान्तं तुल्यपर्यायं चैकार्थ्यमजात्येन सह समासस्तत्पुरुषः कर्मधारयश्च स्यात्। भोज्योष्णम्, स्तुत्यपटुः। तुल्यसन्, सदृशमहान्।

गर्भिणी च गोगर्भिणी। महिषगर्भिणी, 'पुंवत्कर्मधारये' इति पुंवद्भावः। कालाक्षी गर्भिणी, संज्ञाशब्दोऽयं चतुष्पादमाह न तु जातिम्, जातेर्विशेष्यस्य पूर्वनिपातार्थं वचनम्॥ युवा प्रथमा, खलतिश्च पलितश्च जरच्च वलिनश्च तैः॥ युवा चासौ खलतिश्च युवखलतिः। युवा चासौ जरंश्च युवजरन्, अत्र जरत्युत्साहादियुवधर्म्मोपलम्भाद् यूनि बाऽऽलस्यादिजरद्धर्म्मोपलम्भात् तद्रूपारोपेण सामानाधिकरण्यं विज्ञेयम्। 'नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमि'ति न्यायेन युवतिश्चासौ खलतिश्च युवखलतिरित्याद्यपि विज्ञेयम्। युवशब्दस्य विशेष्यत्वात्परनिपाते प्राप्ते द्वयोर्वा गुणवचनत्वादनियमे पूर्वनिपातार्थं वचनम्। युवत्वस्य प्रसिद्ध्या यदा युवशब्देन पुरुषोऽभिधीयते तदा युवाविशेष्यः, युवत्वस्य चाऽप्रसिद्धत्वे युवशब्देन युवत्वविशिष्टपुरुषस्याभिधाने गुणवचनो युवन्शब्दः॥ तुल्यस्य आख्या तुल्याख्या, कृत्यश्च तुल्याख्या च, न जातिः अजातिस्तया॥ कृत्यस्य प्रत्ययवाचित्वेन तदन्तता। भोज्यश्च तदुष्णश्च भोज्योष्णम्। स्तुत्यश्चासौ पटुश्च स्तुत्यपटुः। तुल्यश्चासौ संश्च तुल्यसन्। सत्कृत्य परमपूज्य इत्यादौ षष्ठीसमासो विज्ञेयः, बाहुलकाद्वा 'सन्महदि'त्यस्यैवात्र प्रवृत्तिः। जात्या समासस्य, अजातेः पूर्वत्वस्य च प्रतिषे-

अजात्येति किम् ? भोज्य ओदनः ॥ **कुमारः श्रमणादिना** ॥ ११५ ॥ कुमारेत्येकार्थं श्रमणादिना समासस्तत्पुरुषः कर्मधारयश्च स्यात् । कुमारश्रमणा, कुमारप्रव्रजिता ॥ **मयूरव्यंसकेत्यादयः** ॥ ११६ ॥ एते तत्पुरुषसमासा निपात्यन्ते । मयूरव्यंसकः, कम्बोज-मुण्डः, एहीडं कर्म, अश्नीतपिबता क्रिया, कुरुकटो वक्ता, गतप्रत्या-

---

धार्थं वचनम् ॥ **कुमारः**, श्रमण आदिर्यस्य तेन ॥ कुमारी चासौ श्रमणा च कुमारश्रमणा । 'नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमि'ति न्यायेन श्रमणादौ ये स्त्रीलिङ्गास्तैस्सह स्त्रीलिङ्ग एव कुमारशब्दः समस्यते, अन्यैस्तूभयलिङ्गः समस्यते । अनेनैव न्यायेन स्त्रीलिङ्गेऽपि समासस्य सिद्धत्वात् श्रमणादौ स्त्रीलिङ्गानां पाठः, पुलिङ्गैः पूर्व-निपाते कामचार इति बोधनाय ॥ **मयूरव्यंसक** इति आदिर्येषान्ते । विगतौ अंसौ अस्य व्यंसः तत्तुल्यो व्यंसकः, व्यंसयति छलयतीति वा व्यंसकः, व्यंसकश्चासौ मयूरश्च मयूरव्यंसकः, विशेष्यस्यापि मयूर-स्य पूर्वनिपातः । मुण्डश्चासौ कम्बोजश्च, जातिशब्दस्य कम्बोजस्य पूर्वनिपातः । एहि ईड इति यस्मिन् कर्मणि तदेहीडम् । अश्नीत पिबतेत्येवं सन्ततं यत्राभिधीयते साऽश्नीतपिबता, क्रियारूपस्यान्य-पदार्थस्य प्राधान्यात्स्त्रीत्वादाप् । कुरु कटमिति कश्चिदाह स कुरु-कटो वक्ता । गतञ्च तत् प्रत्यागतञ्च गतप्रत्यागतम् । महान् क्रयः, अल्पः क्रयिका, क्रयावयवयोगात् क्रयः, क्रयिकावयवयोगात् क्रयिका, क्रयश्चासौ क्रयिका च क्रयक्रयिका । शाकप्रियः पार्थिवः शाकपार्थिवः । तृतीयो भागः त्रिभागः । सर्वेषां श्वेततरः सर्वश्वेतः । इत्येवमविहितलक्षणस्तत्पुरुषो मयूरव्यंसकादिषु द्रष्टव्यः, यच्चेह लक्ष-णेऽनुपपन्नं तत्सर्वं निपातनात् सिद्धम् । इति शब्दः स्वरूपावधार-णार्थः । तेन मयूरव्यंसकादीनां समासान्तरे प्रवेशः । बहुवचनमाकृति-

गतम्, क्रयक्रयिका, शाकपार्थिवः, त्रिभागः, सर्वश्वेतः ॥ **चार्थे द्वन्द्वः सहोक्तौ** ॥ ११७ ॥ नाम नाम्ना सहोक्तिविषये चार्थवृत्तिः समासो

गणार्थम् ॥ चस्य अर्थः चार्थस्तस्मिन्, द्वन्द्वः, सह वचनं सहोक्तिस्तस्याम् ॥ समुच्चयान्वाचयेतरेतरयोगसमाहारभेदाच्चत्वारः चार्थाः । यद्वर्तिपदैः प्रत्येकं पदार्थानां युगपदभिधानं सहोक्तिः । तत्रैकमर्थं प्रति द्वयादीनां क्रियाकारकद्रव्यगुणानां तुल्यबलानामविरोधिनामनियतक्रमयौगपद्यानामात्मरूपभेदेन चीयमानता समुच्चयः, यथा चैत्रः पचति पठति चेत्येकस्मिन्कारकेऽनेकक्रियाणाम्, चैत्रो मैत्रश्च पठतीत्यत्रानेककारकाणामेकस्यां क्रियायाम्, राज्ञो गौश्चाश्वश्चेत्यादावेकस्मिन्द्रव्येऽनेककारकाणाम्, राज्ञो ब्राह्मणस्य च गौरित्येकस्मिन् कारकेऽनेकद्रव्याणाम्, शुक्लश्चायं कृष्णश्चेत्येकस्मिन्धर्मिण्यनेकधर्माणाम्, आत्मरूपभेदेन चीयमानत्वात्समुच्चयः । गुणप्रधानभावमात्रविशिष्टः समुच्चय एवान्वाचयः, यथा भिक्षामट गाञ्चाऽऽनय । भिक्षामटनं प्रधानं गवानयनञ्चानुषङ्गिकम् । द्रव्याणामेव परस्परसव्यपेक्षाणामुद्भूतावयवभेदः समूह इतरेतरयोगः, यथा चैत्रश्च मैत्रश्च चैत्रमैत्रौ वा घटं कुर्वाते । अत्रावयवानामुद्भूतत्वात्तत्सङ्ख्यानिबन्धनं द्विवचनं बहुवचनञ्च भवति । स एव तिरोहितावयवभेदः संहतिप्रधानः समाहारः, यथा धवश्च खदिरश्च पलाशश्च धवखदिरपलाशं वा तिष्ठति । अत्र च समूहस्य प्राधान्यात्तस्यैकत्वादेकवचनमेव भवति । इहैकक्रियागुणनिवेशार्थमर्थौ बुद्ध्या निरूप्यमाणाः क्रियागुणद्वारेणेतरेतरस्यापेक्षया समुदायभावमापद्यमानाः साहभाव्येन वक्तुमभिप्रेता द्वन्द्वैकशेषलक्षणसमासपदवाच्या भवन्ति, समुदायश्चात्र नावयवव्यतिरिक्तः, अपि तु त एवावयवाः संहन्यन्ते यथा चात्रावयवभेदावभासानुविद्धा प्रतीतिर्नैयमिकी, अवयवावभासाच्च द्विवचनबहुवचने न विरुद्ध्येते, न हि यथा समासान्तरेष्वेक एवान्यावच्छिन्नो-

द्वन्द्वः स्यात् । प्लक्षन्यग्रोधौ, वाक्त्वचम् । नाम नाम्नेत्यनुवृत्तावपि

र्थः प्रधानं तथाऽत्र सर्व्वेषां पदार्थानां समकक्षत्वादवयवभेदानुगतैकप्रख्यावशाच्चोद्भूतावयवभेदः समुदायो वृत्तिपदवाच्यः, स चावयवाव्यतिरिक्त इत्यवयवशब्दैरेव व्यपदिश्यते धवखदिरपलाशा इति । यस्त्ववयवव्यतिरिक्तः शब्दान्तरेणोच्यते समुदायो वनं यूपमित्यादि, एकप्रख्याऽन्यथाऽनुपपत्तेश्चायं समुदायः परस्परापेक्षैः प्रत्येकमेव पदैरुच्यते, तत्रावधार्यमाणेन समुदायेन भेदरूपस्य तिरोधानात्, एकसमुदायाभिधायित्वेऽपि च द्वन्द्वस्य पट्वीमृद्व्याविति समानाधिकरणलक्षणः पुंवद्भावो न भवति, वाक्ये व्यभिचारासम्भवात् तद्वतस्य समानाधिकरणत्वस्याश्रयणात्। वृत्तौ त्वेकार्थीभावात्तदव्यभिचारः, पट्वी च मृद्वीचेति तु वाक्ये भेदप्रतीतिप्राधान्यम्, अत एव भेदाधिष्ठानेन समुच्चयेन योग इति समानाभिधेयत्वाभावः । समाहारेतरेतरयोर्भेदश्च यथा, सह विवक्षायामनेकानुस्यूतैकप्रख्यारूपायाश्चैतदवयवप्राधान्यं सङ्घप्राधान्यञ्च । तत्रावयवप्राधान्यमितरेतरयोगस्य विषयः, तथाहि-उद्भूतभेदसमूहाभिधायिनां द्वन्द्वपदानां प्रतिभागमसौ समूहः पर्यवस्यति, तत एकैकस्यापि स वाच्यः, प्रत्यवयवपरिसमाप्तो हि समुदाय एकावयवदृष्टावपि गृह्यते, एवमेकावयववाचकेनाऽप्यभिधीयते, यथा प्लक्षन्यग्रोधावित्यादौ प्लक्षोऽपि द्व्यर्थः, न्यग्रोधोऽपि द्व्यर्थः । यद्यपि प्लक्षन्यग्रोधशब्दयोः प्रत्येकं द्व्यर्थत्वात् प्लक्षश्च न्यग्रोधश्चेत्येकवचनान्तेन विग्रहवाक्यं न स्यात्, प्लक्षन्यग्रोधाविति समासाद्विवचनमपि न स्यात्, तथाप्युक्तविग्रहवाक्यं लौकिकं विज्ञेयम् । एवं नात्र चत्वारोऽर्थाः प्रतीयन्ते, किन्तु द्वावेव, याभ्यामेवात्रैकः शब्दो द्व्यर्थस्ताभ्यामपरोऽपि, न हि द्वाभ्यां लक्षाभ्यामविभक्तौ भ्रातरौ चतुर्लक्षौ भवतः । यथा च भूयोऽवयवदृष्टौ समुदायः स्फुटमवधार्यते तथा स्पष्टार्थाभिधायिनः समुदायादपि स्फुटा प्रतीतिः, तथा च प्रत्य-

'लघ्वक्षरादि'सूत्रे एकग्रहणाद्बहूनामपि । धवखदिरपलाशाः । चार्थ इति

वयवं समूहस्य प्रतिपत्तावपि न शब्दान्तरवैयर्थ्यम् । सङ्गप्राधान्ये तु समाहारः । ननु यद्वृत्तिपदैः प्रत्येकं पदार्थानां युगपदभिधानं सहोक्तिरिति न सङ्गच्छते, अभिधानक्रमाद्ध्यभिधेयक्रमोऽवश्यंभावीति कथं युगपदेकेन शब्देन परस्परारोपितस्वार्थं समुदायरूपमभिधीयते, मैवम्, प्लक्षन्यग्रोधौ, धवखदिरपलाशा इत्यत्र हि यदा न्यग्रोधार्थप्रतिपत्तिकाले प्लक्षार्थस्य नावगतिः, पलाशाद्यर्थप्रतिपत्तिकाले च धवाद्यर्थस्य नावगतिस्तदा न्यग्रोधपलाशशब्दयोरेकार्थत्वादेकवचनमेव स्यात्, न द्विवचनबहुवचने, अतो द्विवचनबहुवचनान्यथानुपपत्त्याऽत्रैकैकोऽपि शब्दोऽनेकार्थाभिधायीत्यनुमानाद्युगपद्वाचित्वं निश्चीयते । वृत्तिविषय एव च शब्दानामर्थान्तराभिधानं न तु सर्वत्र, शक्तिवैचित्र्यात्, तथा चेतरस्याप्रयोगेऽपरेण तन्नोच्यते । ननु चार्थे द्वन्द्व उच्यते, चश्चाव्ययं तेन समासस्याप्यव्ययसंज्ञा प्राप्नोति । न च यदि चादिगणपठितानामव्ययसंज्ञा क्रियते, समासस्त्वयं न तत्र पठ्यत इति वाच्यम्, चादीनामव्ययत्वस्यार्थकृतत्वात्, अलिङ्गासङ्ख्यात्वे हि चादीनामव्ययत्वं स्वभावसिद्धं पाठेनानूद्यते, न तु पाठ एव विधायकः, तथा च चशब्दसमानार्थत्वे द्वन्द्वस्याव्ययत्वं दुर्वारमेव । मा भूद्वाऽव्ययसंज्ञा पाठनिबन्धना, अलिङ्गसङ्ख्यात्वं त्वर्थाश्रयं केन निवार्येतेति चेदुच्यते, शब्दशक्तिभेदात् समुच्चयशब्दोऽयं यथा लिङ्गसङ्ख्यायुक्तं चार्थमाह, तथा द्वन्द्व इति समुच्चयोपाधिकार्थान्तराभिधायकोऽसौ पदान्तरोपादानादर्थनिष्ठास्तु द्योतकाश्चादय इति वाचकत्वद्योतकत्वकृत एवायं विशेषो व्यक्तिवचनाभ्यामयोगो योगश्च । वाक्ये चशब्देन द्योत्यस्यार्थस्य लिङ्गसङ्ख्ये न स्तः, समासस्य तु वाचकत्वात्तदर्थस्य लिङ्गसङ्ख्याभ्यां योग इति यावत् । तदेवं चतुर्विधेषु चार्थेषु समुच्चयान्वाचययोः सहोक्त्यभावात् समासो न भवति ।

किम् ? वीप्सा सहोक्तौ मा भूत्, ग्रामो ग्रामो रमणीयः । सहोक्ताविति किम् ? प्लक्षश्च न्यग्रोधश्च वीक्ष्यताम् ॥ **समानामर्थेनैकः शेषः ॥ ११८ ॥** अर्थेन समानां समानार्थानां सहोक्तौ गम्याया-

---

ननु समुच्चयान्वचययोः सामर्थ्याभावादेव समासो न भविष्यति, किं सहोक्तिग्रहणेन, परस्परानपेक्षानामनियतक्रमयौगपद्यानां क्रियाकारकादीनां हि समुच्चयो दृश्यते, यथा गामश्वमित्यत्र नयनक्रियायां गवादीनाम्, अन्वाचयेऽपि गौणस्य प्रधानं प्रत्यपेक्षा, न प्रधानस्य गौणं प्रतीति सामर्थ्याभाव इति चेन्न, क्रियाद्वारा समुच्चयान्वाचययोरपि सामर्थ्यसम्भवात्, कारकाणां हि क्रिययाऽन्वय इत्येककियान्वयित्वलक्षणं सामर्थ्यमस्त्येव । परस्परमपेक्षाया अभावेऽपि न सा सामर्थ्यविघातिनी, अतः सहोक्त्यभावादेवानयोः समासाभावो वाच्य इति । प्लक्षन्यग्रोधावितीतरेतरयोगस्योदाहरणम् । वाक् च त्वक्चेति समाहारस्योदाहरणम्, ' चवर्गदषह ' इत्यत्प्रत्ययः । ग्रामो ग्रामो रमणीयः, अत्र वीप्सायां सहोक्तिसद्भावेऽपि चार्थाभावात् द्वन्द्वाभावः । प्लक्षश्च न्यग्रोधश्च वीक्ष्यतामिति, अत्र चार्थः समुच्चयः, तत्त्वञ्चैकस्य क्रियान्वयोत्तरमपरस्य क्रियावाचकपदाऽऽवृत्त्यान्वयाद्भवतीत्येककियान्वयित्वरूपसहोक्त्यभावान्न द्वन्द्वः । अन्वाचये चैकस्याप्रधानत्वादेव न सहोक्तिः । द्वन्द्वत्वञ्च पदजन्यप्रतिपत्तिविषयभेदबोधकत्वे सति समानविभक्तिमत्पदप्रकृतिकत्वे सति प्राधान्येन सर्वपदार्थबोधकत्वम्, प्राधान्यञ्चात्र स्वघटकपदार्थांशे विशेषणतानापन्नत्वं तेन परस्परं विशेष्यत्वाभावेऽपि नासम्भवः, स च द्वन्द्वो द्विविधः, इतरेतरः समाहारश्चेति । अगृहीतविशेषद्वित्वादिसङ्ख्याविशिष्टनामार्थबोधकत्वमितरेतरत्वम् । नामार्थवृत्तिताद्दशसङ्ख्याबोधकत्वं समाहारत्वमित्यपि विज्ञेयम् ॥ समानाम्, अर्थेन, एकः,

मेकः शिष्यते, अर्थादन्ये निवर्त्तन्ते । वक्रश्च कुटिलश्च वक्रौ कुटिलौ वा । सितश्च शुक्लश्च श्वेतश्च सिताः शुक्लाः श्वेता वा । अर्थेन समानामिति किम् ? प्लक्षन्यग्रोधौ । सहोक्ताविति किम् ? वक्रश्च कुटिलश्च दृश्यः ॥ **स्यादावसङ्ख्येयः** ॥ ११९ ॥ सर्वस्मिन् स्यादौ विभक्तौ समानानां तुल्यरूपाणां सहोक्तावेकः शिष्यते, न तु सङ्ख्येयवाची । अक्षश्च

शेषः ॥ सहोक्तावित्यनुवर्तते । समानामित्यत्र निर्द्धारणे समुदायसमुदायिसम्बन्धे वा षष्ठी, न तु स्थाने षष्ठी । स्थानषष्ठीस्वीकारे ह्येकशेष आदेशरूपः स्यात्, तथा च सति बिसे बिसानीत्यादौ कृतसकारत्वात् 'नाम्यन्तस्थे'ति षत्वं स्यात् । वक्रश्च कुटिलश्चेति विग्रहे पदभेदेऽपि पदार्थस्य समानत्वाद् द्वन्द्वापवादोऽनेन सूत्रेणैकशेषः । असावेव शिष्यत इति विशेषानुक्तेरेकदा वक्रस्य शेषोऽन्यदा कुटिलस्य, यश्च शिष्यते स लुप्यमानार्थस्याप्यभिधायीति द्विवचनादयः । बहुवचनमतन्त्रं तेन द्वयोरप्येकः शिष्यते । प्लक्षन्यग्रोधावित्यत्र लोकदृष्ट्या समानार्थत्वं नास्ति, लौकिकसमानार्थतायाः एव विवक्षित्वादन्यथा द्वन्द्वघटकपदानामन्योऽन्यार्थसङ्क्रमात् प्लक्षन्यग्रोधावित्यत्राप्येकशेषस्यापत्तेः । ननु शब्दानां जात्यभिधायकत्वपक्षे बहूनां शब्दानां प्रयोगाप्राप्तौ नार्थ एकशेषेणेति चेन्न, प्रत्यर्थं शब्दनिवेशाद्द्रव्यं द्रव्यं प्रति शब्दप्रयोगात्, एकेन शब्देनानेकस्य द्रव्यस्याभिधानं नोपपद्यत इत्यनेकार्थप्रतिपादनायानेकशब्दानां प्रयोगस्य पदानां द्रव्यवाचकत्वपक्षे प्राप्त्यैकशेषारम्भ आवश्यकः । नन्वेकः शेष इत्यत्रैकग्रहणं किमर्थम्, शेष इत्येकवचनादेवैकशेषस्य सिद्धेरिति चेन्न, शेषस्य विधीयमानत्वेन प्राधान्यतया प्रधाने च सङ्ख्याया अविवक्षणाद् द्विबह्वोरपि शेषप्रसङ्गात्, अत एकग्रहणम् ॥ स्यादौ, न सङ्ख्येयोऽसङ्ख्येयः ॥ समानाम्, एकः, शेषः, सहोक्तौ, इत्यनुवर्त्तन्ते । सरूपार्थमिदं वचनम्, अन्यथाऽर्थसाम्यस्य स्यादावप्यभिद्यमानत्वात् पूर्वेणा-

शकटस्य, अक्षश्च देवनः, अक्षश्च बिभीतकः अक्षाः । स्यादाविति किम् ? माता च जननी, माता च धान्यस्य, मातृमातारौ । असङ्ख्येय इति किम् ? एकश्चैकश्च ॥ **त्यदादिः** ॥ १२० ॥ त्यदाद्यैरन्येन च सहोक्तौ त्यदादिरेवैकः शिष्यते । स च चैत्रश्च तौ, स च यश्च यौ,

---

पीष्टसिद्धिः स्यात् । शकटाक्षपर्यायः, एकोऽक्षशब्दः, देवनाऽऽक्षपर्यायोऽपरः, बिभीतकाक्षपर्यायश्चान्यः । ततोऽक्षश्च अक्षश्च अक्षश्चेति विवक्षायामनेन सूत्रेणैकशेषेऽक्षा इति रूपम् । जननीपर्याय एको मातृशब्दः, अन्यश्च धान्यमापकवचनः, ततश्च माता च माता चेति विग्रहे मातृमातारावित्येव रूपम्, भ्यामादौ विभक्तौ तुल्यरूपत्वाभावात्, जननीपर्यायस्य मातृशब्दस्य ह्यौणादिकतृप्रत्ययान्तस्यौविभक्तौ परे ' तृस्वसृनप्तृ ' इति नियमेनाऽऽर् भवति, अपरस्य तु मातृशब्दस्य तृजन्तस्याऽऽर् भवतीति । केचित्त्वौजसादौ विरूपत्वेऽपि भ्यामादौ तुल्यरूपत्वे तत्रैकशेषो भवति, तेन मातृभ्यां मातृभिरित्याद्यपि भवतीत्याहुः । एकश्च एकश्चेत्यादौ नैकशेषः सङ्ख्येयवाचित्वात् । अत्र द्वन्द्वोऽपि न भवति, अनभिधानात् । सङ्ख्येय इति कर्मणि प्रत्ययात् सङ्ख्यानवाचिनो भवत्येव यथा विंशतिश्च विंशतिश्च विंशती । द्वन्द्वापवादोऽयम् ॥ त्यद् आदिर्यस्य स त्यदादिः सहोक्तौ, एकः शेष इत्यनुवर्तन्ते । सहोक्तावित्यनुवर्तनादेव त्यदादिर्येन केनचित्सहोक्ताविति लभ्यते, द्वितीयाभावे सहोक्त्यसम्भवात्, स च द्वितीयस्त्यदादिरन्यश्च गृह्यते विशेषानुपादानादित्यत आह, त्यदाद्यैरन्येन चेति । स च चैत्रश्च तावित्यन्येन सहोक्तावुदाहरणम्, स च यश्च यावित्यदादिना सहोक्तावुदाहरणम् । अत्र त्यदादिपाठे यत्परं तदेव शिष्यते । स्पर्द्धे परमि'ति परिभाषासूत्रात्, बहुलाधिकारात्कचित्पूर्वमपि शिष्यते । लिङ्गमपि स्त्रीनपुंसकानां मध्ये परमेव भवति यथा सा च चैत्रश्च, तौ । स च

अहं च स च त्वं च वयम् ॥ **भ्रातृपुत्राः स्वसृदुहितृभिः** ॥ १२१ ॥ स्वस्रर्थेन सहोक्तौ भ्रात्रर्थो, दुहित्रर्थेन च पुत्रार्थ एकः शिष्यते । भ्राता च स्वसा च भ्रातरौ, पुत्रश्च दुहिता च पुत्रौ ॥ **पिता मात्रा वा** ॥ १२२ ॥ मातृशब्देन सहोक्तौ पितृशब्द एको वा शिष्यते । पिता च माता च पितरौ, मातापितरौ ॥ **श्वशुरः श्वश्रूभ्यां वा** ॥ १२३ ॥ श्वश्रूशब्देन सहोक्तौ श्वशुर एको वा शिष्यते । श्वशुरौ, श्वश्रूश्वशुरौ ॥ **वृद्धो यूना तन्मात्रभेदे** ॥१२४॥

देवदत्तश्च तौ, अत्र स्त्रीपुंसलिङ्गयोः परं पुल्लिङ्गमेव भवति । सा च कुण्डे च तानि, अत्र परं नपुंसकमेव भवति । तच्च चैत्रश्च ते, अत्रापि नपुंसकमेव भवति ॥ भ्रातरश्च पुत्राश्च, स्वसारश्च दुहितारश्च तैः ॥ सहोक्ताविति अनुवर्त्तते, एवमग्रेऽपि । बहुवचनं पर्यायार्थम्, तेन भ्रातृपुत्रवाचिसर्वे शब्दा ग्राह्याः, एवं स्वस्रादावपि । यथासङ्ख्यायस्य प्रवृत्तिः । अत्र भ्रातृस्वसृशब्दयोः सरूपत्वाभावात् 'पुरुषः स्त्रिये' त्यस्य न प्रवृत्तिः ॥ स्त्रीपुंनपुंसकानां सहवचने स्यात्परमिति पुल्लिङ्गमेव भवति ॥ पिता मात्रा, वा ॥ पितृशब्दसाहचर्यान्मातृशब्दो जननीवचन एव ग्राह्यः । पक्षे मातापितरौ, 'लघ्वक्षरासखी'ति मातुरर्च्यत्वात्प्राक्प्रयोगः, पितुर्दशगुणं माता गौरवेणातिरिच्यते, इत्युक्तेः । 'आ द्वन्द्व' इति मातु ऋत आकारादेशः ॥ श्वशुरः, श्वश्रूश्च श्वश्रूश्च श्वश्रूौ ताभ्यां वा । श्वश्रूभ्यामिति द्विवचनं जातौ धवयोगे च वर्त्तमानयोः श्वश्रूोः परिग्रहार्थम् । श्वशुरश्च श्वश्रूश्च श्वशुरौ, पक्षे श्वश्रूश्वशुरौ । अभ्यर्हितत्वाच्छ्वश्रूशब्दस्य पूर्वनिपातः । ननु पितृशब्देन मातापित्रोः, श्वशुरशब्देन श्वश्रूश्वशुरयोर्लक्षणया बोधसम्भवात् सूत्रद्वयमिदं व्यर्थम्, न च द्वन्द्वनिवृत्त्यर्थं तदिति वाच्यम्, इह द्वन्द्वस्यापि पक्ष इष्टत्वादिति चेन्मैवम्, पितृश्वशुरशब्दयोरिव मातृश्वश्रूशब्दयोः केवलयोरुक्तविषये प्रयोगं वारयितुं सूत्रद्वयारम्भात् ॥ वृद्धः यूना तृतीया,

यूना सहोक्तौ वृद्धवाच्येकः शिष्यते तन्मात्रभेदे, न चेत् प्रकृतिभेदोऽर्थभेदो वाऽन्यः स्यात् । गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ । वृद्ध इति किम् ? गर्गगार्ग्यायणौ । यूनेति किम् ? गार्ग्यगर्गौ । तन्मात्रभेद इति किम् ? गार्ग्यवात्स्यायनौ ॥ **स्त्री पुंवच्च** ॥ १२५ ॥ वृद्धस्त्रीवाची यूना सहोक्तौ एकः शिष्यते, पुलिङ्गश्चायम्, तन्मात्रभेदे । गार्गी च गार्ग्यायणश्च गार्ग्यौ, गार्गी च गार्ग्यायणौ च गर्गान् ॥ **पुरुषः स्त्रिया** ॥ १२६ ॥ पुरुषशब्दः प्राणिनि पुंसि रूढः स्त्रीवाचिना सहोक्तौ पुरुषः एकः शिष्यते, स्त्रीपुरुषमात्रभेदश्चेत् । ब्राह्मणश्च ब्राह्मणी च ब्राह्मणौ । पुरुष इति किम् ? तीरं नदनदीपतेः । तन्मात्र-

---

तावेव तन्मात्रम्, तच्चासौ भेदश्च तस्मिन् ॥ व्यवहितमपत्यं पौत्रप्रभृति शास्त्रे वृद्ध उच्यते । युवन्शब्दो जीवद्वंश्यादिरुच्यते । गर्गस्यापत्यं वृद्धं गार्ग्यः गर्गस्यापत्यं युवा गार्ग्यायणः । गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ । अत्र वृद्धयुवप्रत्ययकृत एव भेदो वर्तते, तथा तन्मात्रकृतार्थभेद एव वर्तते, नान्यः कश्चन प्रकृतिभेदोऽर्थभेदो वा । गर्गश्च गार्ग्यायणश्च गर्गगार्ग्यायणौ, अत्र वृद्धप्रत्ययान्तस्याभावान्नैकशेषः । गार्ग्यवात्स्यायनावित्यत्र तु प्रकृत्यंशे वैरूप्यमस्ति, अतो नैकशेषः ॥ **स्त्री पुंवत् च** ॥ पूर्वसूत्रमनुवर्तते । स्त्रीति प्रथमान्तत्वात् प्रथमान्तेन वृद्धशब्देन सम्बध्यते । पुलिङ्गश्चायमिति, स्त्र्यर्थः पुमर्थो भवतीत्यर्थः । गार्ग्याविति गार्गीशब्दस्य वृद्धस्त्रीवाचिन एकशेषे सति पुंवत्त्वे च रूपम् । गार्गी च गार्ग्यायणौ च गर्गाः, अत्र पुंवद्भावात्ङीनिवृत्तौ वृद्धप्रत्ययस्य यञो बहुवचने लुप्, तथा च गार्ग्यः, गार्ग्यौ, गर्गाः, गार्ग्यं, गार्ग्यौ, गर्गानित्येवं रूपाणि बोध्यानि ॥ **पुरुषः स्त्रिया** ॥ तन्मात्रभेद इत्यनुवर्तते, एवमग्रेऽपि । ब्राह्मणश्च ब्राह्मणी च ब्राह्मणावित्यादौ जातिसामान्यविवक्षायामविवक्षितविशेषत्वात् 'सामानामर्थेने'त्येकशेषसिद्ध्यति । भेदविवक्षायान्तु द्वन्द्वः प्राप्नोतीति वचनम् । नदश्च नदी

भेदे इत्येव ? स्त्रीपुंसौ ॥ **ग्राम्याऽशिशुद्विशफसङ्घे स्त्री प्रायः** ॥१२७॥ ग्राम्या अशिशवो ये द्विशफा द्विखुरा अर्थात् पशवस्तेषां संङ्घे स्त्रीपुरुषसहोक्तौ प्रायः स्त्रीवाच्येकः शिष्यते, स्त्रीपुरुषमात्रभेदश्चेत् । गावश्च स्त्रियः, गावश्च नरा, इमा गावः । ग्राम्येति किम् ? रुरवश्चेमे रुरवश्चेमा इमे रुरवः । अशिश्विति किम् ? बर्कर्यश्च बर्कराश्च बर्कराः । द्विशफ इति किम् ? गर्दभाश्च गर्दभ्यश्च गर्दभाः । सङ्घ इति किम् ? गौश्चायं गौश्चेयं इमौ गावौ । प्राय इति किम् ? उष्ट्राश्च उष्ट्र्यश्च उष्ट्राः ॥ **क्लीबमन्येनैकश्च वा** ॥ १२८ ॥ क्लीबं नपुंसकमन्येनाक्लीबेन सहोक्तावेकः शिष्यते, क्लीवाक्लीबमात्रभेदे, तच्च शिष्यमाणं एकमेकार्थं वा स्यात् । शुक्लश्च शुक्लश्च शुक्लं, शुक्ले वा । शुक्लश्च शुक्लश्च

च नदनद्यौ अत्र, नदशब्दस्य क्रियासहोक्तावपि पुल्लिङ्गत्वेऽपि च न पुरुषवाची शब्द इति नैकशेषः, तयोः पतिस्तस्य नदनदीपतेः । पुमाँश्च स्त्री च स्त्रीपुंसौ । अत्र शब्दभेदान्न तन्मात्रभेदः ॥ ग्रामे भवा ग्राम्याः, न शिशवोऽशिशवः, द्वौ शफौ खुरौ येषान्ते द्विशफाः, ग्राम्याश्च तेऽशिशवश्च, ग्राम्याशिशवश्च ते द्विशफाश्च, ग्राम्याशिशुद्विशफानां सङ्घः, तस्मिन् ॥ इमा गाव इति स्त्रीवाचिन एकशेषप्रदर्शकमुदाहरणम् । इमे रुरवः, अत्र 'पुरुषः स्त्रिये'ति पुरुषवाचिन एकशेष आरण्यकत्वात् । बर्कर इति, बर्करशब्दस्य प्रकरणादिना शिशुपरत्व इदं प्रत्युदाहरणम् ; अन्यथा 'बर्करस्तरुणः पशुरि'ति कोशात् प्रत्युदाहरणं न सङ्गच्छेत, अथवा पाणिनीयेऽतरुणेष्वित्युक्तेस्तद्रीत्या प्रत्युदाहरणमिदम्, अत्र मते तु वत्साश्चेमा वत्साश्चेमे वत्सा इम इति प्रत्युदाहरणं बोध्यम् । इमौ गावौ, अत्र द्वयोरपि सङ्घो भवति, तथापि द्वितीयेन विना सहोक्तेरभावात् सहोक्तिग्रहणादेव द्वयोः सङ्घे सिद्धे सङ्घग्रहणं बहूनां समुदायविषयम् ॥ **क्लीबम्, अन्येन, एकम्, च वा** ॥ एकशेषेणैकप्रयोगस्य सिद्धत्वात्, विधी-

शुक्लाश्च शुक्लं, शुक्लानि वा । अन्येनेति किम् ? शुक्लश्च शुक्लश्च, शुक्ले । तन्मात्रभेद इत्येव हिमहिमान्यौ ॥ **पुष्यार्थाद्वे पुनर्वसुः** ॥ १२९ ॥ पुष्पार्थान्नक्षत्रवृत्तेः परो नक्षत्रवृत्तिः पुनर्वसुः सहोक्तौ द्व्यर्थः सन् एकार्थः स्यात् । उदितौ पुष्यपुनर्वसू, उदितौ तिष्यपुनर्वसू । पुष्यार्थादिति किम् ? आर्द्रापुनर्वसवः । पुनर्वसुरिति किम् ? पुष्यमघाः । भ इति किम् ? तिष्यपुनर्वसवो बालाः ॥ **विरोधिनामद्रव्याणां नवा द्वन्द्वः स्वैः** ॥ १३० ॥ द्रव्यं गुणाद्याश्रयः, विरोधिवाचिना-

---

यमानमत्रैकत्वमर्थद्वारकमेवेत्युक्तमेकार्थमिति । शुक्लं शुक्ले वेति क्लीबस्यैकशेष एकार्थत्वे च शुक्लमिति, एकशेष एकार्थत्वाभावे च शुक्ल इति । शुक्लश्च शुक्लश्च शुक्ले इत्यत्र 'स्याद्वावसङ्ख्येय' इत्येकशेषः । हिमश्च हिमानी च हिमहिमान्यौ, महद्धिमं हिमानीत्युच्यते, अतः क्लीबाक्लीबकृत एव विशेषोऽत्र न, किन्त्वर्थकृतविशेषोऽप्यस्तीति नैकशेषः ॥ **पुष्योऽर्थो** यस्य तस्मात्, भे, पुनर्वसुः ॥ एकशेषो निवृत्तः पृथक् सूत्रकरणात् । एकं सहोक्तावित्यनुवर्त्तते । भ इत्यस्याऽऽवृत्त्या पुष्यार्थपुनर्वसुशब्दयोर्विशेषणीयः । अर्थग्रहणं पर्यायार्थम् । पुनर्वसुशब्दो नक्षत्रवाचित्वे द्विवचनान्तः, ताराद्वयवाचित्वात् । पुष्यश्च पुनर्वसू चेति विग्रहे 'चार्थे द्वन्द्वः' तत्र पुरुषनक्षत्रवाचिनः पुष्यशब्दात्परस्य नक्षत्रवाचिनः पुनर्वसुशब्दस्य ताराद्वयबोधकत्वेऽप्येकवद्भावस्यानेन सूत्रेण कृते समासानन्तरमुचितप्राप्तं द्विवचनम् । आर्द्रा च पुनर्वसू चाऽऽर्द्रापुनर्वसवः । पुष्यश्च मघाश्च, पुष्यमघाः, मघाशब्दस्य बहुत्ववर्त्तित्वात् तिष्ये जातः तिष्यः, पुनर्वस्वोर्जातौ पुनर्वसू 'भर्तृसन्ध्यादेरि'त्यण्', बहुलानुराधे 'ति तस्य लोपः, ततस्तिष्यश्च पुनर्वसू च तिष्यपुनर्वसवो बालाः । अत्रेतरेतरयोगरूपा सहोक्तिर्ग्राह्या, न तु समाहारलक्षणा, समाहार एकत्वानेकत्वयोर्विशेषाभावात्, तेन तिष्यपुनर्वसू इति समाहारे रूपम् ॥ विरोधो विद्यते

मतदाश्रयवृत्तीनां द्वन्द्वो वैकार्थः स्यात्, स्वैः सजातीयैरेवाऽऽरब्धश्चेत्। सुखदुःखम्, सुखदुःखे। लाभालाभम्, लाभालाभौ। विरोधिनामिति किम्? कामक्रोधौ। अद्रव्याणामिति किम्? शीतोष्णे जले स्वैरिति किम्? बुद्धिसुखदुःखानि ॥ **अश्ववडवपूर्वापराधरोत्तराः** ॥ १३१ ॥ एते त्रयोऽपि द्वन्द्वा एकार्था वा स्वैश्चेत्। अश्ववडवं अश्ववडवौ। पूर्वापरं पूर्वापरे। अधरोत्तरं अधरोत्तरे ॥

येषां तानि विरोधीनि तेषाम्, न विद्यते द्रव्यं प्रतिपाद्यतया येषां तान्यद्रव्याणि तेषाम्, नवा द्वन्द्वः स्वैः ॥ एकमित्यनुवर्त्तते। 'वस्तूपलक्षणं यत्र सर्वनामप्रयुज्यते। द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन विवक्षितः'। इति लक्षणलक्षितं द्रव्यमत्र न ग्राह्यम्, अन्यथा सुखदुःखादीनामपि द्रव्यत्वं स्यात्, किन्तु गुणादीनामाश्रयोऽत्र द्रव्यमित्याशयेनाह द्रव्यमिति। सुखञ्च दुःखञ्च सुखदुःखे। विरोधः सहानवस्थानम्। अनयोः सहानवस्थानाद्विरोधः, एवमग्रेऽपि। कामक्रोधौ, अनयोः सहावस्थानमस्तीति नैकवद्भावः। शीतोष्णे जले द्रव्यवाचिनाविमौ शब्दौ। बुद्धिश्च सुखञ्च दुःखञ्च बुद्धिसुखदुःखानि। अत्र सुखदुःखे विरोधिनी, बुद्धिस्त्वविरोधिनी, असमानजातीयमविरोध्यवयमत्रप्रविष्टमिति सजातीयैरेव नारब्धमतो नैकवद्भावः। समाहारे चार्थे एकत्वस्येतरेतरयोगे चानेकत्वस्य सिद्धत्वाद्विकल्पे सिद्धे सर्वमिदं विकल्पानुक्रमणं नियमार्थम्, विरोधिनामेव, अद्रव्याणामेव, स्वैरेवेति। तथा च प्रत्युदाहरण इतरेतरयोग एव भवति ॥ **अश्ववडवश्च, पूर्वापरश्च अधरोत्तरश्च** ॥ एकं नवा द्वन्द्वः स्वैरित्यनुवर्तन्ते, एवमग्रेऽपि। अश्वश्च वडवा च अश्ववडवम्। अश्ववडवेति निर्देशादेवेतरेतरयोगे ह्रस्वत्वं निपात्यते। 'पशुव्यञ्जनानामि'त्येव सिद्धेऽश्ववडवग्रहणं तत्पर्यायनिवृत्त्यर्थम्। पूर्ववदत्रापि विकल्पे सिद्धे पूर्वापरादिग्रहणं पदान्तरनिवृत्त्यर्थम्, तेन पूर्वपश्चिमौ दक्षिणापरावित्यादौ विकल्पो न भवति ॥

पशुव्यञ्जनानाम् ॥ १३२ ॥ पशूनां व्यञ्जनानाञ्च स्वैर्द्वन्द्व एकार्थो वा स्यात् । गोमहिषौ । दधिघृतम्, दधिघृते ॥ **तरुतृणधान्यमृगपक्षिणां बहुत्वे ॥ १३३ ॥** एतद्वाचिनां बह्वर्थानां प्रत्येकं स्वैर्द्वन्द्व एकार्थो वा स्यात् । प्लक्षन्यग्रोधम्, प्लक्षन्यग्रोधाः । कुशकाशम्, कुशकाशाः । तिलमाषम्, तिलमाषाः ऋश्यैणम्, ऋश्यैणाः । हंसचक्रवाकम्, हंसचक्रवाकाः ॥ **सेनाङ्गक्षुद्रजन्तूनाम् ॥ १३४ ॥** सेनाङ्गाना क्षुद्रजन्तूनाञ्च बह्वर्थानां स्वैर्द्वन्द्व एकार्थो

पशवश्च व्यञ्जनानि च तेषाम् ॥ अवयवावयविसम्बन्धे षष्ठी, तेन पश्ववयवो व्यञ्जनावयवश्च द्वन्द्व इत्यर्थः, पशवो ग्राम्या गवादयो ग्राह्याः, न त्वारण्याः कुरङ्गादयः, उत्तरत्र मृगग्रहणात् । गौश्च महिषश्च गोमहिषम् । व्यञ्जनं येनान्नं रुचिमापद्यते तदधिघृतशाकसूपादि । दधि च घृतञ्च दधिघृतम्, अत्रापि स्वत्वं पशुत्वेन व्यञ्जनत्वेन च ॥ तरवश्च तृणानि च धान्यञ्च मृगाश्च पक्षिणश्च तेषां बहुत्वे ॥ प्लक्षाश्च न्यग्रोधाश्च प्लक्षन्यग्रोधम्, तरुशब्देन तद्विशेषाणामेव ग्रहणम्, न तु सामान्यस्य । वृक्षश्च वृक्षश्चेति समासे 'स्यादावसञ्ज्ञेय' इति प्रवृत्तेः, वृक्षश्च तरुश्चेति द्वन्द्वे 'समानार्थेने'ति प्रवृत्तेः । एवं तृणादयोऽपि विशेषा एव ग्राह्याः । कुशाश्च काशाश्च कुशकाशम् ॥ सेनाया अङ्गानि सेनाङ्गानि, क्षुद्राश्च ते जन्तवश्च, सेनाङ्गानि च क्षुद्रजन्तवश्च तेषाम् ॥ बहुत्व इति वर्तते, पृथग्योगान्नवेति निवृत्तम् । अश्वाश्च रथाश्च अश्वरथम् । क्षुद्रजन्तवोऽल्पकायाः प्राणिन आनकुलमिह स्मर्यन्ते । यूकाश्च लिक्षाश्च यूकालिक्षम् ॥ फलस्य जातौ । बहुत्व इति वर्तते । बदराणि चाऽऽमलकानि च बदरामलकम्, बदरामलकशब्दौ फलवाचिनौ, फलविहितप्रत्ययस्य लोपात् । एतानि बदरामलकानीति,

नित्यं स्यात् । अश्वरथम्, यूकालिक्षम् ॥ **फलस्य जातौ** ॥१३५॥ फलवाचिनां बह्वर्थानां जातौ स्वैर्द्वन्द्व एकार्थो नित्यं स्यात् । बदरामलकम् । जाताविति किम् ? एतानि बदरामलकानि सन्ति ॥ **अप्राणिपश्वादेः** ॥ १३६ ॥ प्राणिभ्यः पश्वादिसूत्रोक्तेभ्यश्च येऽन्यद्रव्यवाचिनस्तेषां जात्यर्थानां स्वैर्द्वन्द्व एकार्थः स्यात् । आराशस्त्रि । जाताविति किम् ? सह्यविन्ध्यौ । प्राण्यादिवर्जनं किम् ? ब्राह्मणक्षत्रियविट्शूद्राः, ब्राह्मणक्षत्रियविट्शूद्रम् । गोमहिषौ गोमहिषम् । प्लक्षन्यग्रोधौ, प्लक्षन्यग्रोधम् । अश्वरथौ, अश्वरथम् । बदरामलके, बदरामलकम् ॥ **प्राणितूर्याङ्गाणाम्** ॥ १३७ ॥ प्राणितूर्ययोरङ्गार्थानां स्वैर्द्वन्द्व एकार्थः स्यात् । कर्णनासिकम्, मार्दङ्गिकपाणविकम् । स्वैरित्येव ?

व्यक्तिपरत्वेऽत्र प्रयोगः ॥ **प्राणा विद्यन्ते येषां ते प्राणिनः**, पशुरादिर्येषां पश्वादयः, प्राणिनश्च पश्वादयश्च, न प्राणिपश्वादिस्तस्य ॥ जाताविति वर्तते । बहुत्व इति निवृत्तम्, अनेनैव सूत्रेण बदरामलकमित्यादिरूपसिद्धौ फलस्य जाताविति पृथक् सूत्रणात् । अत्र नञः पर्युदासवाचित्वेन 'पर्युदासः सदृग्ग्राही प्रसज्यस्तु निषेधकृत्' इत्यभियुक्तोक्त्या प्राणिभिन्नप्राणिसदृशस्यैव ग्रहणाद्द्रव्यस्य लाभस्तत्र जातेर्विशेषणत्वम् । तथा च प्राणिभ्यः पश्वादिसूत्रोक्तेभ्यश्चान्ये ये द्रव्यभूताः पदार्थास्तेषां जातौ वर्त्तमानानां शब्दानामिति भावः । एकवद्भावात्ङीबत्वम्, ह्रस्वत्वञ्च । सह्यविन्ध्याविति, सह्यश्च विन्ध्यश्च पर्वतविशेषवाचिनौ, नैतौ जातिवाचिनौ । ब्राह्मणक्षत्रियविट्शुद्रा इति, अत्र प्राणिवर्जनाद् ब्राह्मणादीनाञ्च प्राणित्वादयं नित्यो विधिर्न भवति। इतरेतरद्वन्द्वः । ब्राह्मणक्षत्रियविट्शुद्रम्, समाहारद्वन्द्वः । गोमहिषम् 'पशुव्यञ्जनानाम्' ॥ **प्राणी च तूर्यञ्च प्राणितूर्ययोरङ्गानि** तेषां । प्राण्यङ्गानां प्राण्यङ्गैः सह, तूर्याङ्गाणां तूर्याङ्गैः सह यो द्वन्द्वः स एकवद्भवति । कर्णौ च नासिका च कर्णनासिकमिति प्राण्यङ्गस्य । मृदङ्गवादनं-

पाणिगृध्रौ ॥ **चरणस्य स्थेणोऽद्यतन्यामनुवादे** ॥ १३८ ॥
चरणाः कठादयस्तद्वाचिनामद्यतन्यां यौ स्थेणौ तयोः कर्तृत्वेन सम्बधिनां स्वैर्द्वन्द्वोऽनुवादविषये एकार्थः स्यात् । प्रत्यष्ठात्कठकालापम्, उदगात्कठकौथुमम् । अनुवाद इति किम् ? उदगुः कठकालापाः ।

शिल्पमस्येत्यर्थे 'शिल्पमि'तीकणि मार्दङ्गिकः, एवं पाणविकः, मार्दङ्गिकश्च पाणविकश्च मार्दङ्गिकपाणविकमिति तूर्याङ्गस्य शङ्खशाङ्खिकादिसमुदायस्तूर्यम् । अङ्गान्यवयवाः । प्राण्यङ्गानां तूर्याङ्गेषु शङ्खपटहादीनाञ्चाऽप्राणिजातित्वात्पूर्वेणैव सिद्धे व्यक्तिविवक्षायां विधानार्थं जातिविवक्षायां प्राण्यङ्गाऽप्राण्यङ्गादिसम्भेद एकत्वनिराकरणार्थञ्च वचनम् । एतज्ज्ञापनार्थमेव च बहुवचनम् ॥ **चरणस्य** स्था च इणू च तस्य, **अद्यतन्याम्**, **अनुवादे** ॥ शाखाऽध्ययननिमित्तकव्यपदेशभाजो द्विजन्मानश्चरणाः कठादयः । प्रमाणान्तरप्रतिपन्नार्थस्य शब्देन सङ्कीर्तनमनुवादः । प्रकृते चोदयप्रतिष्ठयोरनुवादः, यज्ञकर्मणि शंसितानुशंसनमित्येके, अनुकरणमित्यपरे । कठेन प्रोक्तं विदन्त्यधीयते वा कठाः, 'तेन प्रोक्ते' 'तद्वेत्त्यधीते' इत्यण्, 'कठादिभ्यः' इति तस्य लुप् । कालाप इत्यत्र तु 'कलापी कुथुमी 'तीनो लुपि वृद्धौ कालापः । कठश्च कालापश्च 'कठकालापम् । एवमुदगात् कठकौथुमम् । यदा कठेषु कालापेषूदितेषु प्रतिष्ठितेषु वाऽऽवाभ्यां तत्र गन्तव्यमिति संवादं कृत्वा, तं च सङ्केतं विस्मृत्य कश्चिदास्ते, तं प्रतीदं वाक्यमुच्यते । उदगुः कठकालापा इत्यप्रसिद्धज्ञापने । कर्तृत्वेन सम्बन्धिनामिति, गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः' इति न्यायान्मुख्यवृत्त्या कर्त्ता लभ्यते । स्थेणोर्मुख्यकर्त्तुश्चरणस्येतीष्टम्, तथा न कृत्वा यत्सामान्येनोक्तं तदेतन्न्यायाभिसन्ध्यैव, अन्यथा मुख्यत्वस्य लाभो न स्यात् । एवञ्च यदि मुख्यत्वभाजा कर्त्रा सह सम्बन्धः स्यात्तदैव समाहारः, यदा भावे प्रयोगः स्यात्तदा समाहारो न भवति, यथा

अप्रसिद्धं कथयन्ति ॥ **अक्लीबेऽध्वर्युक्रतोः** ॥ १३९ ॥ अध्वर्युः यजुर्वेदः, तद्विहितक्रतुवाचिनां स्वैर्द्वन्द्व एकार्थः स्यात्, न चेदेते क्लीववृत्तयः । अर्काश्वमेधम् । अक्लीब इति किम् ? गवामयनादित्यानामयने । अध्वर्य्विति किम् ? इषुवज्रौ । क्रतोरिति किम् ? दर्शपौर्णमासौ ॥ **निकटपाठस्य** ॥ १४० ॥ निकटः पाठो येषामध्येतॄणां तेषां स्वैर्द्वन्द्व एकार्थः स्यात् । पदकक्रमकम् ॥ **नित्यवैरस्य** ॥ १४१ ॥ नित्यं जातिनिबद्धं वैरं येषां तेषां स्वैर्द्वन्द्व एकार्थः स्यात्। अहिनकुलम् । नित्यवैरस्येति किम् ? देवासुराः, देवासुरम् ॥ **नदीदेशपुरां विलिङ्गानाम्** ॥ १४२ ॥ एषां विविधलिङ्गानां स्वैर्द्वन्द्व

प्रत्यष्ठायि कठकालापाभ्याम्, अत्र चरणस्य कर्तृत्वेन सम्बन्धे सत्यपि स कर्ता न मुख्यः किन्तु गौणः, भावस्यैव प्राधान्यात् ॥ **न क्लीबस्तस्मिन्**, अध्वर्योः क्रतुस्तस्य ॥ **अर्कश्च अश्वमेधश्च अर्काश्वमेधम्** । गवामयनञ्चाऽऽदित्यानामयनञ्च गवामयनादित्यानामयने । **इषुश्च वज्रश्चेषुवज्रौ**, सामवेदे विहितौ क्रतू । **दर्शश्च पौर्णमासश्च दर्शपौर्णमासौ** । अमावास्यायां यो यज्ञः क्रियते स दर्शः, पूर्णमास्यां यश्च यज्ञः क्रियते स पौर्णमासः । इमौ न क्रतू, ससोमके यागे क्रतुशब्दस्य रूढत्वात् ॥ **निकटपाठस्य** ॥ पदान्यधीते पदकः, एवं क्रमकः । पदान्यधीत्य क्रमोऽध्येतव्य इति स्पष्टो निकटपाठः । **पदकश्च क्रमकश्च पदकक्रमकम्** । **नित्यमनिमित्तम्**, जातिनिबद्धं वैरं यस्य तस्य । अहिनकुलमेतयोर्नित्यविरोधः । **देवाश्चाऽसुराश्च देवासुरम्**, नैतेषां निर्निमित्तं वैरं किन्तु राज्यापहारादिकृतम् । पशुविकल्पः पक्षिविकल्पश्चानेन परत्वाद्बाध्यते । महाजोरभ्रमित्यादौ पशुद्वन्द्वविकल्पस्य सावकाशत्वात्, मार्जारमूषकं ब्राह्मणश्रमणमित्यादावस्य सावकाशत्वात्, अश्वमहिषं काकोलूकमित्यादौ तूभयप्राप्तौ परत्वादयमेव भवति ॥ **नदी च देशश्च पूश्च तासाम्**,

एकार्थः स्यात् । गङ्गाशोणम्, कुरुकुरुक्षेत्रम्, मथुरापाटलिपुत्रम् । विलिङ्गानामिति किम् ? गङ्गायमुने ॥ **पात्र्यशूद्रस्य** ॥ १४३ ॥ पात्रार्हशूद्रवाचिनां स्वैर्द्वन्द्व एकार्थः स्यात् । तक्षायस्कारम् । पात्र्येति किम् ? जनङ्गमबुक्कसाः ॥ **गवाश्वादिः** ॥ १४४ ॥ अयं द्वन्द्व एकार्थः स्यात् । गवाश्वम्, गवाविकम् ॥ **न दधिपयआदिः** ॥ १४५ ॥ दधिपय आद्यो द्वन्द्व एकार्थो न स्यात् । दधिपयसी,

---

विविधं लिङ्गं यस्यां तासाम् ॥ गङ्गा च शोणश्च गङ्गाशोणं शोणो ह्रदः । कुरवश्च कुरुक्षेत्रञ्च कुरुकुरुक्षेत्रम् ॥ मथुरा च पाटलिपुत्रश्च मथुरापाटलिपुत्रम् । पुरां देशत्वात्तद्ग्रहणेनैव सिद्धे पूर्ग्रहणं ग्रामनिषेधार्थम्, अतोऽत्रैकवद्भावः । उपभोगस्थानत्वं हि देशस्य लक्षणम्, तच्च पुर्यप्यस्ति । देशग्रहणेन च जनपदानां ग्रहणं पृथग्रदीपूर्ग्रहणात्तेन पर्वतानां न, यथा कैलासश्च गन्धमादनश्च कैलासगन्धमादने ॥ **पात्रमर्हति** पात्र्यः पात्र्यश्चासौ शूद्रश्च तस्य ॥ यैर्भुक्ते पात्रं संस्कारेण शुद्ध्यति ते पात्रार्हाः । पात्र्यशूद्रा द्विप्रकारा आर्य्यावर्त्तान्तर्गताः, तद्बाह्याश्च । आर्यावर्त्तजानामार्यावर्त्तजैः, तद्बाह्यानां तद्बाह्यैः । आर्यावर्त्तश्च प्रागादर्शात् प्रत्यक्कालकवनाद् दक्षिणेन हिमवन्तमुत्तरेण पारियात्रम् । तक्षा च अयस्कारश्च तक्षायस्कारम् । इदमुदाहरणमार्यावर्त्तपात्र्यशूद्राणाम्, तद्बाह्यानाञ्च किञ्चिन्धगन्धिकं ज्ञेयम् । जनङ्गमाश्च बुक्कसाश्च, जनङ्गमाश्चण्डालाः, बुक्कसास्तु म्लेच्छा इति । न ह्येतेभ्यः त्रैवर्णिकाः स्वं पात्रं प्रयच्छन्ति, तैर्भुक्ते पात्रस्य संस्कारेण शुद्धेः । अत्र शूद्रशब्दः त्रैवर्णिकेतरपरः, न तु शूद्रत्वजातिपरो जानङ्गमिकादावभावात्, प्रत्युदाहरणासङ्गतेः ॥ **गवाश्वादिः** ॥ गौश्च अश्वश्च गवाश्वम् । 'पशुव्यञ्जनानामिति विकल्पे प्राप्ते नित्यार्थः पाठः, 'स्वरे वाऽनक्षे' इत्यवादेशः । गौश्च अविका च गवाविकम् । अविरेव अविका-अजेत्यर्थः ॥ **न दधिपय आदिः** ॥ दधि च पयश्च

सर्पिर्मधुनी ॥ **सङ्ख्याने** ॥ १४६ ॥ वर्त्तिपदार्थानां गणने गम्ये द्वन्द्व एकार्थो न स्यात् । दश गोमहिषाः, बहवः पाणिपादाः ॥ **वान्तिके** ॥ १४७ ॥ वर्त्तिपदार्थानां सङ्ख्यानस्य समीपे गम्ये द्वन्द्व एकार्थो वा स्यात् । उपदशं गोमहिषम्, उपदशा गोमहिषाः ॥ **प्रथमोक्तं प्राक्** ॥ १४८ ॥ अत्र समासप्रकरणे प्रथमान्तेन यन्निर्दिष्टं

दधिपयसी, 'पशुव्यञ्जनानामि'ति विकल्पे प्राप्ते प्रतिषेधोऽयम् । सर्पिश्च मधु च सर्पिर्मधुनी ॥ सङ्ख्यायते येन तत्सङ्ख्यानं तस्मिन्, सङ्ख्याने ॥ इयत्तापरिच्छेदः सङ्ख्यानम् । वर्त्तिपदार्थानामिति, समासघटकपूर्वोत्तरपदार्थानामित्यर्थः । गावश्च महिषाश्च गोमहिषाः । पाणयश्च पादाश्च पाणिपादाः, 'प्राणितूर्याङ्गाणामित्यस्यापवादः । 'बहुगणं भेदे' इति बहुशब्दो भेदवृत्ती स्यात्, न तु वैपुल्ये सङ्घे वा, भेदः पृथग्भूपता, यथा बहवः पुरुषाः, वैपुल्ये च न स्याद् यथा बहुधान्यमित्यादि ॥ **वा अन्तिके** । उपगता दश येषां यस्य वा उपदशम्, नव एकादश वा गोमहिषसमूह इत्यर्थः । द्वन्द्वार्थस्यैकत्वात्तदनुप्रयोगस्यापि बहुव्रीहेरेकवचनान्तत्वम् । दशानां समीपमुपदशमित्यव्ययीभावस्यानुप्रयोगे तूपदशं गोमहिषायेति भवति । समाहारद्वन्द्वे समानलिङ्गवचनत्वादव्ययीभावस्यैवानुप्रयोग उपदशं गोमहिषमिति, इतरेतरयोगे तु बहुव्रीहेरेवानुप्रयोगः, बहुव्रीहेः समीपिप्रधानत्वात्, समानलिङ्गवचनत्वाच्च यथोपदशा गोमहिषा इति । अव्ययीभावे च समीपसमीपिनोरभेदविवक्षया सामानाधिकरण्यं विज्ञेयम् ॥ प्रथमया उक्तं प्रथमोक्तं प्राक् ॥ 'प्रत्ययग्रहणे तदन्तग्रहणमि'ति न्यायः प्रवर्तते । आसन्नदशाः 'आसन्नाहूरे'ति बहुव्रीहिः, अस्मिन् सूत्र आसन्नादूराधिकाध्यर्द्धार्द्धादिपूरणमिति प्रथमान्तं पदं तेन निर्दिष्टमत्रासन्नपदं तत्पूर्वं निपततीत्यर्थः । सप्तगङ्गं 'सङ्ख्या समाहार' इत्यव्ययीभावः, प्रथमान्तं पदं सङ्ख्येति तन्निर्दिष्टं 'सप्ते'ति पदं तस्य

तत्प्राक् स्यात् । आसन्नदशाः, सप्तगङ्गम् ॥ **राजदन्तादिषु** ॥ १४९ ॥ एतेषु समासेष्वप्राप्तप्राप्तिपातं प्राक् स्यात् । राजदन्तः, लिप्तवासितम् ॥ **विशेषणसर्व्वादिसङ्ख्यं बहुव्रीहौ** ॥१५०॥ विशेषणं सर्वादि सङ्ख्यावाचि च बहुव्रीहौ प्राक् स्यात् चित्रगुः, सर्वशुक्लः, द्विकृष्णः ॥ **क्ताः** ॥ १५१ ॥ क्तान्तं सर्वं बहुव्रीहौ प्राक् स्यात् । कृतकटः ॥ **जातिकालसुखादेर्नवा** ॥ १५२ ॥ जातेः कालात् सुखादिभ्यश्च बहुव्रीहौ क्तान्तं वा प्राक् स्यात् । शाङ्गरजग्धी, जग्धशाङ्गरा मासजाता जातमासा । सुखजाता, जातसुखा । दुःखहीना,

---

प्राक्प्रयोगः । वाक्यवत् समासेति पदयोः पूर्वोत्तरभावस्यानियमः स्यादिति वचनम् ॥ **राजदन्तादिषु** ॥ प्रागिति वर्तते । दन्तानां राजा राजदन्तः । 'षष्ठ्यत्नाच्छेषं' इति समासः । अत्र प्रथमोक्तत्वेन दन्तशब्दस्य पूर्वनिपाते प्राप्तेऽनेन सूत्रेण राजशब्दस्य पूर्वनिपातः । पूर्वं वासितं पश्चाल्लिप्तमित्यत्र 'पूर्वकाले'ति समासे प्रथमोक्तत्वेन वासितशब्दस्य पूर्वनिपाते प्राप्ते लिप्तस्य पूर्वनिपातः ॥ **विशेषणञ्च** सर्व्वादिश्च सङ्ख्या च तत्, बहुव्रीहौ । चित्रगुरिति गावश्चित्रा यस्यासाविति विग्रहे गोः प्रथमोक्तत्वेन पूर्वनिपाते प्राप्तेऽनेन सूत्रेण विशेषणस्य चित्रपदस्य प्राक्प्रयोगः । सर्वं शुक्लमस्य, अत्र शुक्लशब्देन सर्वार्थस्य विशेष्यमाणत्वाद्विशेषणत्वाभावेऽपि सर्वादित्वात्सर्वशब्दस्य पूर्वनिपातः । द्वौ कृष्णौ गुणौ यस्य द्विकृष्णः, वृषभः, अत्र द्व्यर्थस्य विशेष्यत्वेन विवक्षितत्वादनेन पूर्वनिपातः । यद्यपि सर्वादित्वेनैव द्विशब्दस्य पूर्वनिपातत्वं सिद्ध्यति तथापि त्रिशुक्लश्चतुर्ह्रस्व इत्यादि सिद्ध्यै सङ्ख्याग्रहणं कृतम् ॥ **क्ताः** ॥ बहुव्रीहौ प्रागिति वर्तते । कृतः कटो येनेति कृतकटः, बहुवचनं व्याप्त्यर्थम् । तेन कृतप्रिय इत्यत्र परेणापि स्पर्द्धे क्तान्तस्यैव पूर्वनिपातः ॥ **जातिश्च कालश्च सुखादिश्च** तस्मात्, नवा ॥ प्राग् बहुव्रीहौ, क्ता इत्यनुवर्त्तन्ते । एवमग्रे-

हीनदुःखा ॥ **आहिताग्न्यादिषु** ॥ १५३ ॥ एषु बहुव्रीहिषु क्तान्तं वा प्राक् स्यात् । आहिताग्निः, अग्न्याहितः । जातदन्तः, दन्तजातः ॥ **प्रहरणात्** ॥ १५४ ॥ प्रहरणार्थात् क्तान्तं बहुव्रीहौ वा प्राक् स्यात् । उद्यतासिः, अस्युद्यतः ॥ **न सप्तमीन्द्वादिभ्यश्च** ॥ १५५ ॥ इन्द्वादेः प्रहरणार्थाच्च प्राक् सप्तम्यन्तं बहुव्रीहौ न स्यात् । इन्दुमौलिः, पद्मनाभः, असिपाणिः ॥ **गड्वादिभ्यः** ॥ १५६ ॥ गड्वादिभ्यो बहुव्रीहौ सप्तम्यन्तं प्राक् वा स्यात् । कण्ठेगडुः, गडुकण्ठः । मध्येगुरुः, गुरुमध्यः ॥ **प्रियः** ॥ १५७ ॥ अयं बहुव्रीहौ प्राक् वा स्यात् । प्रियगुडः, गुडप्रियः ॥ **कडाराः कर्मधारये** ॥१५८॥

ऽपि । शाङ्गरं जग्धमनया शाङ्गरजग्धी, 'अनाच्छादनादि'ति ङीः, जग्धशाङ्गरा, क्तान्तस्य जग्धस्य वा पूर्वनिपातः । मासो जातोऽस्या मासजाता, जातमासा वा गौः । एवमग्रेऽपि ॥ **आहिताग्निः** आदिर्येषान्तेषु । आहितोऽग्निर्येन, एवमग्रे । बहुवचनमाकृतिगणार्थम् ॥ **प्रहरणात्** ॥ उद्यतोऽसिरनेन, उद्यतासिः ॥ अस्यादीनां जातिशब्दत्वेन 'जातिकाले'त्यनेन पूर्वनिपातसिद्धावपि व्यक्तिविवक्षायां तत्सिद्ध्यर्थमिदम् ॥ **न सप्तमी, इन्दुरादिर्येषान्तेभ्यः** ॥ नन्वुपादानादनुवृत्तमपि नवेति न सम्बध्यते । इन्दुर्मौलौ यस्य स इन्दुमौलिः, अत्र मौलिशब्दस्य 'विशेषणसर्वादी'ति पूर्वप्रयोगप्राप्तेऽनेन निषेधः । पद्मं नाभौ यस्य, असिः पाणौ यस्य ॥ **गड्वादिभ्यः** ॥ सप्तमीत्यनुवर्तते । कण्ठे गडुरस्येत्येवं सर्वत्र विग्रहः ॥ **प्रियः** ॥ प्रियो गुडो यस्य ॥ **कडाराः कर्मधारये** ॥ कडारा इति बहुवचननिर्देशात्कडारादयो ग्राह्याः । कडारश्चासौ जैमिनिश्च । कडारः पिङ्गलः, जैमिनिःऋषिः, काणश्चासौ द्रोणश्च स काण ऋषिः । कडारादीनां गुणवचनत्वाद्द्रव्यशब्दान्नित्यं पूर्वनिपाते प्राप्ते, पक्षे परनिपातार्थं वचनम् । यदा तु द्वावपि गुणशब्दौ तदा पर्यायेण ॥ **धर्म्मार्थादिषु** द्वन्द्वे ॥ धर्मश्च

एते कर्म्मधारये प्राग्वा स्युः । कडारजैमिनिः, जैमिनिकडारः । काणद्रोणः, द्रोणकाणः ॥ **धर्मार्थादिषु द्वन्द्वे ॥ १५० ॥** एषु द्वन्द्वेष्वप्राप्तप्राक्तुं वा प्राक् स्यात् । धर्म्मार्थौ, अर्थधर्म्मौ । शब्दार्थौ, अर्थशब्दौ ॥ **लघ्वक्षराऽसखीदुत्स्वराद्यदल्पस्वरार्च्यमेकम् ॥ १६० ॥** लघ्वक्षरं सखिवर्जेदुदन्तं स्वराद्यकारान्तमल्पस्वरं पूज्यवाचि चैकं द्वन्द्वे प्राक् स्यात् । करशीर्षम्, अग्नीषोमौ, वायुतोयम् । असखीति किम् ? सुतसखायौ । अस्त्रशस्त्रम्, प्लक्षन्यग्रोधौ, श्रद्धामेधे । लघ्वादिति किम् ? कुक्कुटमयूरौ, मयूरकुक्कुटौ । एकमिति किम् ?

अर्थश्च धर्मार्थौ, शब्दश्च अर्थश्च शब्दार्थौ अत्र स्वराद्यदन्तत्वादर्थशब्दस्य पूर्वनिपातः प्राप्तः, धर्मशब्दस्य शब्दशब्दस्य च पूर्वनिपातोऽप्राप्तः, इति तस्य वा पूर्वनिपातः ॥ लघूनि अक्षराणि यत्र तत्, स्वरादि च तद् अच्च स्वराद्यत्, अल्पे स्वरा यत्र, लघ्वक्षरञ्च असखीदुच्च स्वराद्यच्च अल्पस्वरञ्च अर्च्यञ्च, एकम् ॥ पृथग्योगाद्वेति निवृत्तम् । द्वन्द्व इत्यनुवर्तते । करश्च शीर्षञ्च करशीर्षम्, 'प्राणितूर्ये'त्येकवद्भावः, अनेन लघ्वक्षरत्वाच्छरशब्दस्य पूर्वनिपातः । अग्निश्च सोमश्च, 'ईः षोमवरुणेऽग्नेरि'ति दीर्घत्वं षत्वञ्च, अनेनाग्निशब्दस्य पूर्वनिपातः । वायुश्च तोयश्च वायुतोयम्, उकारान्तस्य पूर्वनिपातः । स्तुतश्च सखा च । अस्त्रञ्च शस्त्रञ्च अस्त्रशस्त्रम्, अस्त्रशब्देन सामान्यधनुरुच्यते, शस्त्रशब्देन च सामान्यमायुधम्, अतः 'समानामर्थेने'ति नैकशेषः, अप्राणिजातित्वादेकवद्भावः, स्वराद्यदन्तत्वादस्त्रशब्दस्य प्राक्प्रयोगः । प्लक्षन्यग्रोधौ, अल्पस्वरत्वात्प्लक्षशब्दस्य प्राक्प्रयोगः । श्रद्धा च मेधा च श्रद्धामेधे, अर्थग्राहिणी श्रद्धा, शब्दग्राहिणी मेधा, इष्टसिद्धेः श्रद्धामूलत्वाच्छ्रद्धाया अर्च्यत्वेन पूर्वनिपातः । युगपदनेकस्य पूर्वनिपाते प्राप्त एकस्यैव यथाप्राप्तं पूर्वनिपातः, शेषाणान्तु

शङ्खदुन्दुभिवीणाः । द्वन्द्व इत्येव ? विस्पष्टपटुः ॥ **मासवर्णभ्रात्राऽनुपूर्वम् ॥ १६१ ॥** एतद्वाचि द्वन्द्वेऽनुपूर्वं प्राक् स्यात् फाल्गुनचैत्रौ, ब्राह्मणक्षत्रियौ, ब्राह्मणक्षत्रियवैश्याः, बलदेववासुदेवौ ॥ **भर्तुतुल्यस्वरम् ॥ १६२ ॥** नक्षत्रर्तुवाचि तुल्यस्वरं द्वन्द्वेऽनुपूर्वं प्राक् स्यात् । अश्विनीभरणीकृत्तिकाः, हेमन्तशिशिरवसन्ताः, तुल्यस्वरमिति किम् ? आर्द्रामृगशिरसी, ग्रीष्मवसन्तौ ॥ **सङ्ख्या समासे ॥१६३॥** समासमात्रे सङ्ख्यावाच्यनुपूर्वं प्राक् स्यात् । द्वित्राः, द्विशती, एकादश ॥

इत्याचार्यश्रीहेमचन्द्रविरचितायां सिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ तृतीयस्याध्यायस्य समासविषयः प्रथमः पादः समाप्तः ॥ ३ १ ॥

कामचार इति प्रदर्शनार्थमेकग्रहणम्, तेन शङ्खदुन्दुभि वीणाः, वीणादुन्दुभिशङ्खाः, शङ्खवीणादुन्दुभयः । विस्पष्टं पटुर्विस्पष्टपटुर्नात्र पटुशब्दस्य पूर्वनिपातो द्वन्द्वाभावात् ॥ मासश्च वर्णश्च भ्राता च मासवर्णभ्रातृ, पूर्वस्यानतिक्रमेणानुपूर्वी ॥ अनुग्रहणादेकमिति निवृत्तम् । द्वन्द्व इत्यभिसम्बध्यते । फाल्गुनश्च चैत्रश्च फाल्गुनचैत्रौ । ब्राह्मणश्च क्षत्रियश्च वैश्यश्च । बलदेवश्च वासुदेवश्च ॥ भश्च ऋतुश्च भर्तु, तुल्याः स्वरा यत्र तत् तुल्यस्वरम् ॥ द्वन्द्वे अनुपूर्वमित्यनुवर्तते । अश्विनी च भरणी च कृत्तिका च, अत्र नक्षत्रवाचिनः तुल्यस्वराः सन्ति । नक्षत्राणामृतूनाञ्चाऽऽनुपूर्व्यं लोकप्रसिद्ध्यैव ग्राह्यम् ॥ सङ्ख्या, समासे ॥ आनुपूर्वमित्यनुवर्तते । सर्वा सङ्ख्या प्रथमोक्त्यनियम आनुपूर्व्याः सङ्ख्यायाः पूर्वनिपातार्थं वचनम् । समास इति सामान्यतयोक्तेः सर्वत्र समासेऽयं भवति । बहुव्रीहौ द्वौ वा त्रयो वा द्वित्राः । द्विगौ, द्वे शते समाहृते इति द्विशती । द्वन्द्वे, एकश्च दश चैकादश । य एवाल्पः स एव पूर्वः ॥

इति द्वितीयाध्यायस्य प्रथमपादे समासप्रकरणात्मकः अवचूरिपरिष्कारः समाप्तः ॥

॥ अथ तृतीयाध्याये द्वितीयः पादः ॥

परस्परान्योऽन्येतरेतरस्यां स्यादेर्वाऽपुंसि ॥ १ ॥

एषामपुंवृत्तीनां स्यादेरम्वा स्यात्। इमे सख्यौ कुले वा परस्परां परस्परं, अन्योऽन्यामन्योऽन्यं, इतरेतरामितरेतरं भोजयतः। आभिः सखीभिः कुलैर्वा परस्परां परस्परेण, अन्योऽन्यामन्योऽन्येन, इतरेतरामितरेतरेण भोज्यते। अपुंसीति किम्? इमे नराः परस्परं भोजयन्ति ॥

परस्परश्चान्योऽन्यश्चेतरेतरश्चेति समाहारात्षष्ठी, अन्योन्येतरेतरशब्दयोः द्वन्द्वं विधाय वा परस्परशब्देन द्वन्द्वस्तेनान्योऽन्यशब्दस्य स्वराद्यदन्तत्वादल्पस्वरत्वाच्च परस्परशब्दात्पूर्वं प्रयोग इत्याशङ्का न सम्भवति; आम्, सिरादिर्यस्य तस्य, वा, न पुमान् तस्मिन्। परस्परादयस्त्रयोऽपि स्वभावत एकत्ववचनाः पुंस्त्ववृत्तयः क्रियाव्यतिहारविषयाः। परस्याः परस्याः विनिमयः परस्परः, अस्मादेव निर्देशात्परान्येतरशब्दानां सर्वनाम्नां द्विर्वचनादि निपात्यते। इमे सख्याविति, परस्परो भुङ्क्ते, भुञ्जानं तं सख्यौ कुले वा प्रयुञ्जाते, गतिबोधेति सूत्रेणाणिकर्तुः परस्परस्य कर्मत्वं अनेन आम्, पक्षे परस्परमेवमग्रेऽपि। यदा करणे सहार्थे वा तृतीया तदा भोज्यते इति रूपं भवति तद्दर्शयत्याभिः सखीभिरिति। अत्र करणे सहार्थे वा यदा तृतीया तदैको णिग्, यथा भुङ्क्ते जनस्तं भुञ्जानं सख्यः प्रयुञ्जते इति णिग्, केन सह केन कृत्वा वेति शङ्कायां परस्परेण। यदा तु कर्तरि तृतीया तदा णिग् द्वयं यथा भुङ्क्ते जनस्तं भुञ्जानं परस्परः प्रयुङ्क्ते इत्येको णिग्, तं परस्परं भोजयन्तं सख्यः प्रयुञ्जते इति द्वितीयो णिग्, ततः कर्तरि तृतीया, अधिकं बृहद्वृत्तौ। यत्र तु

अमव्ययीभावस्यातोऽपञ्चम्याः ॥ २ ॥ अदन्तस्याव्ययीभावस्य स्यादेरम् स्यात्, न तु पञ्चम्याः। उपकुम्भमस्ति, उपकुम्भं देहि। अव्ययीभावस्येति किम्? प्रियोपकुम्भोऽयम्। अत इति किम्? अधिस्त्रि। अपञ्चम्या इति किम्? उपकुम्भात् ॥ **वा तृतीयायाः ॥ ३ ॥** अदन्तस्याव्ययीभावस्य तृतीयाया अम्वा स्यात्। किं न उपकुम्भम्, किं न उपकुम्भेन। अव्ययीभावस्येति किम्? प्रियोप-

---

पुलिङ्गस्तत्राम् नेत्याह—इमे नरा इति ॥ **अम्, अव्ययीभावस्य,** अतः षष्ठी, न पञ्चमी तस्याः। स्यादेरिति वर्तते। अत इति सम्बन्धे षष्ठी, अव्ययीभावस्य विशेषणात्तदन्तविधिः। कुम्भस्य समीपमुपकुम्भम्, विभक्तिसमीपेति सूत्रेणाव्ययीभावः। अनेन सूत्रेण प्रथमैकवचनस्य सेरमादेशः। उपकुम्भं देहीत्यत्र तु चतुर्थ्या अमादेशः। प्रियमुपकुम्भं यस्यासौ प्रियोपकुम्भः, अत्र सिविभक्तेरव्ययीभावसमासानन्तरभावित्वेन नाव्ययीभावसमाससम्बन्धित्वमिति नाम्। अधिस्त्रि, स्त्रियमधि, स्त्रीषु अधीति वाऽधिस्त्रि, इकारान्ताव्ययीभावोऽयम्। ननूपकुम्भ सि इत्यत्र सेर्मविधानेनैवोपकुम्भमित्यादिरूपसिद्धौ किमर्थमम्विधानमिति चेदुच्यते, हे उपकुम्भ इत्यादिसम्बोधने अदेतः स्यमोरिति अमो लोपार्थम्, उपजरसमिति जरसादेशार्थञ्चाम्विधानम्। नन्वत इति व्यर्थम्, अकारान्तादन्यत्रानतो लुबिति सेर्लोपेन यत्राकारान्तत्वं तत्रैवाम्प्राप्तेः, उच्यते, अत्राद्रहणाभावेऽनतो लुबित्यत्रानत इति पदं पर्युदासबोधकं न भवेत्, ततश्चातः स्वरस्य वर्जनमित्यन्यस्मादपि स्वरान्ताल्लुप् स्यात्, ततो यत्र व्यञ्जनान्तत्वं स्यात्तत्राप्यमव्ययीभावस्यातोऽपञ्चम्या इति कृते अमादेशः स्यादित्यद्रहणम्॥ **वा, तृतीयायाः अमव्ययीभावस्यात** इति सूत्रखण्डस्सम्बध्यते। किं नः उपकुम्भम्, अस्माकं कुम्भसमीपेन देशेन किं प्रयोजनं? न किमपीत्यर्थः। प्रयोगसाधनं

कुम्भेन ॥ **सप्तम्या वा** ॥ ४ ॥ अदन्तस्याव्ययीभावस्य सप्तम्या अम्वा स्यात् । उपकुम्भम्, उपकुम्भे निधेहि । अव्ययीभावस्येत्येव ? प्रियोपकुम्भे ॥ **ऋद्धनदीवंश्यस्य** ॥ ५ ॥ एतदन्तस्याव्ययीभावस्यादन्तस्य सप्तम्या अम् नित्यं स्यात् । सुमगधम्, उन्मत्तगङ्गम्, एकविंशतिभारद्वाजं वसति ॥ **अनतो लुप्** ॥ ६ ॥ अदन्तवर्जस्याव्ययीभावस्य स्यादेर्लुप् स्यात् । उपवधु, उपकर्तृ । अनत इति किम् ? उपकुम्भात् । अव्ययीभावस्येत्येव ? प्रियोपवधुः ॥ **अव्ययस्य** ॥ ७ ॥ अव्ययस्य स्यादेर्लुप् स्यात् । स्वः, प्रातः । अव्ययस्येति किम् ? अत्युच्चैसः ॥ **ऐकार्थ्ये** ॥ ८ ॥ ऐकार्थ्यमैकपद्यं

स्पष्टम् । प्रियोपकुम्भेनेति बहुव्रीहिः ॥ सप्तम्याः, वा । पूर्ववदनुवर्तनम्, अन्यत्स्पष्टम् ॥ ऋद्धश्च नदी च वंश्यश्च तस्य । अमव्ययीभावस्यातः सप्तम्या इति च वर्तते । अदन्ताव्ययीभावस्य विशेषणं ऋद्धनदीवंश्यस्येति । मगधानां समृद्धिः सुमगधं तस्मिन्निति ऋद्धस्योदाहरणम् । उन्मत्ता गङ्गा यस्मिन्देशे तस्मिन्नुन्मत्तगङ्गम्, क्लीबे इति ह्रस्वः, परतः स्त्रीपुंवदिति उन्मत्ताशब्दस्य ह्रस्वः, नदीभिर्नाम्नीत्यव्ययीभावः, इति नद्यन्तस्योदाहरणम् । एकविंशतिः भारद्वाजा वंश्या इति तस्मिन्, अत्र वंश्येन पूर्वार्थे इत्यव्ययीभावः । भारद्वाजो गोत्रविशेषस्तस्मिन्नुत्पन्ना एकविंशतिर्ये पुरुषास्तेषां मध्ये वसतीत्यर्थः । नित्यार्थं वचनम् ॥ न अत् अनत्तस्य, लुप् । अव्ययीभावस्य स्यादेरिति वर्तते । वध्वाः समीपमुपवधु, क्लीबे इति ह्रस्वः । स्पष्टमन्यत् ॥ अव्ययस्य । स्यादेर्लुबिति वर्तते । उच्चैरतिक्रान्ता ये ते इति प्रत्युदाहरणे अत्युच्चैस् शब्दाद्विहितस्य जसो न लुप्, अव्ययसम्बन्धिन एव स्यादेर्लुब्विधानेनात्र जसोऽव्ययपरत्वेऽपि नाव्ययाद्विहितत्वं किन्तु नाम्न एवेति न लुप् । अत एव लुब्विधानादव्ययेभ्यः स्यादयोऽनुमीयन्ते ॥ एकोऽर्थो यस्यासावेकार्थ-

तन्निमित्तस्य स्यादेर्लुप् स्यात्। चित्रगुः, पुत्रीयति, ओपगवः। अत एव लुब्विधानाद् " नाम नाम्ने "त्युक्तावपि स्याद्यन्तानां समासः स्यात्। ऐकार्थ्य इति किम्? चित्रा गावो यस्येत्यादिवाक्ये मा भूत्॥

न नाम्येकस्वरात् खित्युत्तरपदेऽमः॥९॥ समासारम्भकमन्त्यं

स्तस्य भाव ऐकार्थ्यं ऐकपद्यं तस्मिन्। यत्र परित्यक्तस्वार्थानि उपसर्जनीभूतस्वार्थानि वा, पदान्यर्थान्तरसङ्क्रमाद्व्यर्थानि भवन्ति तदैकार्थ्यं तच्चैकपद्यमेवार्थान्तराभिधायित्वात्, घटपटादिवत्पदान्तरमेव, न हि समस्तपदस्य योऽर्थः सः समासघटकपूर्वपदेन वोत्तरपदेन वाऽभिधीयते, प्रक्रियार्थन्तु पृथक् पदानि दर्श्यन्ते, अत एव तदर्थस्य निवृत्तत्वाद्विभक्तेरपि स्वयमेव निवृत्तेः लुप्शास्त्रमनुवादकमभिधीयते। चित्राः गावो यस्य सः चित्रगुः, अत्रैकपद्यनिमित्तभूतयोश्चित्रपदगोपदोत्तरविभक्त्योरनेन लुप्, ततश्च चित्रगुशब्दात्पुनः सिविभक्तौ गोश्चान्ते इति ह्रस्वे, परतः स्त्रीति पुंवद्भावे चित्रगुरिति रूपम्। ऐकपद्योत्तरकालविहितस्य स्यादेस्तु नानेन लुप्, ऐकार्थ्य इति निमित्तसप्तमीविज्ञानात्। आत्मनः पुत्रमिच्छतीति पुत्रीयति, अत्र पुत्रशब्दः क्रियाविशेषणं समासमध्यगतस्यामोऽनेन लुप्। उपगोरपत्यमौपगवः, गोश्चान्ते ह्रस्वः, ङसोऽपत्येऽण्, वृद्धिर्यस्येत्यादिवृद्धिः, अस्वयम्भुवोऽवित्यव्। ननु नाम नाम्नैकार्थ्यं इति नाम्नां समासविधानात् विभक्तिरहितस्यैव च नामत्वात् समासे घटकतया विभक्तेरभावादैकार्थ्यं इति सूत्रं निरर्थकम्, पुत्रीयति औपगव इत्यादिसिद्धये च प्रत्यये इत्येव कार्यमित्याशङ्कायामाह—अत एवेत्यादि। तथा च स्याद्यन्तं नाम स्याद्यन्तेन नाम्ना समस्यते इत्यर्थः। न, एकः स्वरो यस्य तत्, नामि च तदेकस्वरञ्च तस्मात्, ख् इत् अनुबन्धो यस्य तस्मिन्, उत्तरञ्च तत्पदञ्च तस्मिन्, अमः षष्ठी। नाम्येकस्वरादिति पूर्वपदस्य विशेषणम्, तल्लाभश्चोत्तरपदे इत्युक्तेः समास-

पदमुत्तरपदं तस्मिन् खित्प्रत्ययान्ते उत्तरपदे परे, नाम्यन्तादेकस्वरात्पूर्वपदात्परस्यामो लुब् न स्यात् । स्त्रियंमन्य नावंमन्यः । नामीति किम् ? क्ष्मंमन्यः । एकस्वरादिति किम् ? वधुंमन्यः । खितीति किम् ? स्त्रीमानी ॥ **असत्त्वे ङसेः** ॥ १० ॥ असत्त्वे विहितस्य ङसेरुत्तरपदे परे लुब् न स्यात् । स्तोकान्मुक्तः । असत्त्व इति किम् ? स्तोकभयम् । उत्तरपद इत्येव ? निःस्तोकः ॥ **ब्राह्मणाच्छंसी** ॥ ११ ॥ अत्र समासे ङसेर्लुबभावो निपात्यते । ब्राह्मणाच्छंसिनौ । निपातनादृत्विग्विशेषादन्यत्र लुबेव । ब्राह्मणशंसिनी स्त्री ॥ **ओजोऽङ्गःसहो-**

घटकमन्त्यं पदमुत्तरपदं तथाविधमादिपदं पूर्वपदम् । खितीति पदं खकारानुबन्धप्रत्ययबोधकं तदाद्युत्तरपदस्याप्रसिद्धेः सप्तम्या आदिरिति परिभाषामुपेक्ष्योक्तं खित्प्रत्ययान्ते उत्तरपदे इति । स्त्रियमात्मानं मन्यते स्त्रियंमन्यः, मन्यात् 'कर्तुः खशि' ति खश्प्रत्ययः, 'खित्यनव्ययें'ति मोन्तः । क्ष्मंमन्य इत्यत्र क्ष्मेति पूर्वपदो न नाम्यन्तः । वधुंमन्य इत्यत्र तु नाम्यन्तपूर्वपदो नैकस्वरः । स्त्रीमानीत्यत्र तु न खश् किन्तु मन्याण्णिनिति णिन् । ऐकार्थ्य इति विहितस्य लुपोऽपवादः; न तु नपुंसकलक्षणस्य लोपस्य, उत्तरपदग्रहणात् ॥ **न सत्त्वमसत्त्वं तस्मिन्, ङसेः षष्ठी** । उत्तरपदे न लुबिति वर्तते । स्तोकात् मुक्तः, क्तेनासत्त्वे इति समासः, स्तोकाल्पेति पञ्चमी, अनेन सूत्रेणासत्त्वेऽद्रव्ये विहितस्य पञ्चम्या न लुप् । निष्क्रान्तः स्तोकादिति निःस्तोकः, अत्र स्तोकशब्दः पूर्वपदः, 'प्रात्यवपरी'ति समासः ॥ **ब्राह्मणात्, शंसी** । ब्राह्मणाद्ग्रन्थादादाय शंसेते इति ब्राह्मणाच्छंसिनौ, व्रताभीक्ष्ण्ये इति णिन् । रूढिवशात् ऋत्विग्विशेष उच्यते, अन्यत्र तु लुप्, निपातनस्येष्टविषयत्वात्, **ओजाश्चाङ्गाश्च सहाश्चाम्भाश्च तमाश्च तपाश्च तेभ्यः, टः** षष्ठी । अनुवृत्तिः पूर्ववदेवमग्रेऽपि । ओजसा क्रियते स्मेत्योजसाकृतम्, क्तयोरसदाधार इति निषेधात् कर्तरि षष्ठी

ऽम्भस्तमस्तपसष्टः ॥ १२ ॥ एभ्यः परस्य टावचनस्योत्तरपदे परे लुब् न स्यात्। ओजसाकृतम्, अङ्गसाकृतम्, सहसाकृतम्, अम्भसाकृतम्, तमसाकृतम्, तपसाकृतम्। ट इति किम्, ओजोभावः ॥ **पुम्जनुषोऽनुजान्धे ॥ १३ ॥** पुञ्जनुभ्यां परस्य टो यथासङ्ख्यमनुजेऽन्धे चोत्तरपदे लुब् न स्यात्। पुंसानुजः, जनुषान्धः। ट इत्येव ! पुमनुजा ॥ **आत्मनः पूरणे ॥ १४ ॥** अस्मात्परस्य टः पूरणप्रत्ययान्ते उत्तरपदे लुब् न स्यात्। आत्मनाद्वितीयः, आत्मनाषष्ठः ॥ **मनसश्चाऽऽज्ञायिनि ॥ १५ ॥** मनस आत्मनश्च परस्य ट आज्ञायिन्युत्तरपदे लुब् न स्यात्। मनसाऽऽज्ञायी, आत्मनाऽऽज्ञायी ॥ **नाम्नि ॥ १६ ॥** मनसः परस्य टः संज्ञाविषये उत्तरपदे परे लुब् न स्यात्। मनसादेवी। नाम्नीति किम् ? मनोदत्ता कन्या ॥ **पराऽऽत्मभ्यां ङेः ॥ १७ ॥** आभ्यां परस्य ङेवचनस्योत्तरपदे नाम्नि लुब् न स्यात्। परस्मैपदम्, आत्मनेपदम्। नाम्नीत्येव ?

न भवति, तृतीया कर्तरि करणे वा, 'कारकं कृते'ति समासः। अनेन तृतीयाया लुब्न। एवमग्रे। ओजसो भावः ओजोभावः ॥ **पुमांश्च जनुश्च तस्मात्**, अनुजश्चान्धश्च तस्मिन्। ट इत्यधिकं वर्तते। पुंसा अनुजः पुंसानुजः, जनुषा जन्मनाऽन्धो, जनुषान्धः, कारकं कृतेति समासः। पुमांसमनुजाता पुमनुजा, "श्रितादिभिरि"ति समासः, अनो जनेर्डः इति प्रत्ययः। **आत्मनः पञ्चमी, पूरणे**। अनुवृत्तिः पूर्ववत्। एवमग्रेऽपि। आत्मनाद्वितीयः ऊनार्थपूर्वाद्यैरिति समासः, अनेन तृतीयायाः न लुप्। यद्वैरिति तृतीया। **मनसः, च, आज्ञातुं शीलमस्य तस्मिन्**। आत्मन इत्यधिकं वर्तते। मनसाऽऽज्ञातुं शीलमस्येति मनसाज्ञायी। **नाम्नि**। मनसः इत्यधिकमनुवर्तनीयम्। मनसादेवी सरस्वतीत्यर्थः। मनसा दत्ता मनो दत्ता कन्या। **परश्चात्मा च ताभ्यां, ङेः**। ट इति विहाय पूर्वं सर्वं

परहितम् ॥ **अद्व्यञ्जनात्सप्तम्या बहुलम्** ॥ १८ ॥ अदन्ता-द्व्यञ्जनाच्च परस्याः सप्तम्या बहुलं नाम्नि लुप् न स्यात् । अरण्ये-तिलकाः युधिष्ठिरः । अद्व्यञ्जनादिति किम् ? भूमिपाशः । नाम्नीत्येव ? तीर्थकाकः ॥ **प्राक्कारस्य व्यञ्जने** ॥ १९ ॥ राजलभ्यो रक्षा-निर्वेशः कारः । प्राचां देशे यः कारस्तस्य संज्ञायां गम्यमानायाम-द्व्यञ्जनात्परस्याः सप्तम्या व्यञ्जनादावुत्तरपदे लुप् न स्यात् । मुकुटे-कार्षापणः, समिधिमाषकः । प्रागिति किम् ? यूथपशुः, उदीचामयं न प्राचां । कार इति किम् ? अभ्यर्हितपशुः । व्यञ्जन इति किम् ?

नाम्नीति चानुवर्तते । परस्मै हितं परहितम् ॥ अच्च व्यञ्जनञ्च तस्मात्, सप्तम्याः, बहुलम् । लुब्न नाम्नीति वर्तते । अरण्ये-तिलका इति अदन्तात्परस्याः सप्तम्याः उदाहरणम्, नाम्नीति समासः । युधिष्ठिर इति व्यञ्जनान्तात्परस्याः, गवियुधेः स्थिरस्येति षत्वम् । भूमौ पाश इव भूमिपाशः, न चात्र संज्ञाशब्दत्वाभावा-देवालुब्न भवतीति वाच्यम्, संज्ञा हि क्वचित्साध्यमाना, क्वचिच्चा-साध्यमाना भवति, ततश्चात्र साध्यमाना संज्ञा अस्तीति प्रत्युदाहृतम् । तीर्थे काक इव तीर्थकाकः, काकाद्यैरिति समासः । प्राचां कारस्तस्य, व्यञ्जने । नाम्नि, अद्व्यञ्जनात् सप्तम्याः उत्तरपदे लुब्न इति वर्तन्ते, एवमग्रे । मुकुटे मुकुटे कार्षापणो देय इति मुकुटे कार्षापणः, पूर्वदेशप्रसिद्धः मुद्राविशेषस्तस्मिन्देशे यो मुकुटं बध्नाति सः कार्षा-पणं गृह्णाति । समिध इन्धनभारकं यस्तस्मिन्देशे आनयति, स हिरण्यादिमाषकं गृह्णातीति समिधिमाषको देयः समिधिमाषकः, नाम्नीति समासः, यदि पूर्वदेशप्रसिद्धं भवति । यूथे यूथे देयः पशुः यूथपशुः, उदीचां देशे कारोऽयं न तु प्राचाम् । अभ्यर्हिते अभ्यर्हिते देयः पशुः अभ्यर्हितपशुः, प्राचां देशे कारादन्यस्य नामैतत् । अवि-कटे अविकटे उरणो दातव्यः अविकटोरणः, अविकटः अवीनां

अविकटोरणः ॥ **तत्पुरुषे कृति ॥ २० ॥** अद्व्यञ्जनात्परस्याः सप्तम्याः कृदन्ते उत्तरपदे तत्पुरुषे लुब् न स्यात् । स्तम्बेरमः, भस्मनिहुतम् । तत्पुरुष इति किम् ? धन्वकारकः । अद्व्यञ्जनादित्येव ? कुरुचरः ॥ **मध्यान्तादुरौ ॥ २१ ॥** आभ्यां परस्याः सप्तम्या गुरावुत्तरपदे लुब् न स्यात् । मध्येगुरुः, अन्तेगुरुः ॥ **अमूर्द्धमस्तकात्स्वाङ्गादकामे ॥ २२ ॥** मूर्द्धमस्तकवर्जात्स्वाङ्गवाचिनोऽद्व्यञ्जनात्परस्याः सप्तम्याः कामवर्जे उत्तरपदे लुब् न स्यात् । कण्ठेकालः । अमूर्द्धमस्तकादिति किम् ? मूर्द्धशिखः मस्तकशिखः । अकाम इति किम् ? मुखकामः ॥ **बन्धे घञि नवा ॥ २३ ॥** बन्धे

सङ्घातः ' अवेः सङ्घातविस्तारे कटपटमि 'ति कटप्रत्ययः । उरणो मेषः । पूर्वेणैव सिद्धे नियमार्थोऽयं योगः, नियमश्चात्र त्रिविधः, प्राचामेव, कारस्यैव नाम्नि, व्यञ्जनादावेवेति । **तत्पुरुषे, कृति ।** **नाम्नीति** निवृत्तम् । कृतीत्यनुवर्तमानस्योत्तरपदस्य विशेषणात्तदन्तविधिः । स्तम्बे रमत इति स्तम्बेरमः । ' शोकापनुदे 'ति कप्रत्ययः, ङस्युक्तं कृतेति समासः, अनेन लुब्न । बहुलाधिकारात् क्वचिल्लुप् । भस्मनि हुतमिव भस्मनिहुतम्, क्तेनेति समासः । उदाहरणद्वयमिदमदन्ताद्व्यञ्जनान्ताच्च परस्याः सप्तम्या अलुपि । धन्वनि मरुदेशे कारका यस्य सः धन्वकारकः । नायं तत्पुरुषसमासः ॥ **मध्यश्चान्तश्च मध्यान्तं तस्मात्, गुरौ ।** स्पष्टम् ॥ **मूर्द्धा च मस्तकश्च, न मूर्द्धमस्तकं तस्मात्, स्वञ्च तदङ्गञ्च** तस्मात्, न कामस्तस्मिन् । कण्ठे कालोऽस्य कण्ठेकालः । **बन्धे, घञि, नवा ।** हस्ते बन्धो यस्यासौ हस्तेबन्धः हस्तबन्धः इति वा समासः । बन्धनं बन्धः, ' भावाकर्त्रोर्घञ् ,' स्वाङ्गादस्वाङ्गाच्चायं विकल्पः । अत एवोदाहरणद्वयम्, हस्ते बध्नातीति हस्तबन्धः, अत्र बन्धशब्दोऽचूप्रत्ययान्तः । न चात्र तत्पुरुषे कृतीति लुबभाव-

बन्धे घञन्ते उत्तरपदे अद्व्यञ्जनात् परस्याः सप्तम्या लुप् वा न स्यात् । हस्तेबन्धः, हस्तबन्धः । चक्रेबन्धः, चक्रबन्धः । घञीति किम् ? अजन्ते हस्तबन्धः ॥ **कालात्तनतरतमकाले** ॥ २४ ॥ अद्व्यञ्जनान्तात्कालवाचिनः परस्याः सप्तम्यास्तनादिप्रत्ययेषु काले चोत्तरपदे वा लुप् न स्यात् । पूर्वाह्णेतनः, पूर्वाह्णेतनः । पूर्वाह्णेतरः, पूर्वाह्णेतरे । पूर्वाह्णेतमः, पूर्वाह्णेतमे । पूर्वाह्णेकाले, पूर्वाह्णकाले । कालादिति किम् ? शुक्लतरे, शुक्लतमे । अद्व्यञ्जनादित्येव ? रात्रितरायाम् ॥ **शयवासिवासेष्वकालात्** ॥ २५ ॥ अकालवाचिनोऽद्व्यञ्जनात्परस्याः सप्तम्या एषूत्तर-

---

शङ्क्यः, तत्र बहुलाधिकारेण प्रकृते लुबभावाप्रवृत्तेः । न चैवमप्यमूर्धमस्तकादित्यनेनालुप्स्यादिति वाच्यम्, तत्पुरुषे कृतीति यत्र न प्राप्नोति तत्रैवामूर्द्धमस्तकादित्यस्य प्रवृत्तेः ॥ **कालात्, तनश्च तरश्च तमश्च, कालश्च तस्मिन्** । प्रथमकालपदेन कालवाचिनां नाम्नां ग्रहणम्, अपरकालशब्देन च तनतरादिशब्दसाहचर्यात्स्वरूपस्य ग्रहणम् । अत्रोत्तरपदस्याधिकारात् " संज्ञोत्तरपदाधिकारे प्रत्ययग्रहणे प्रत्ययमात्रस्य ग्रहणं न तदन्तस्येति " न्यायेन तनतरतमप्रत्ययानां स्वरूपस्यैव ग्रहणम् । यद्यपि तरतीति तरः, ताम्यतीति तम इत्यचि व्युत्पन्नावपि तरतमौ नामनी, तथापि ' प्रत्ययाप्रत्ययोः प्रत्ययस्यैव ग्रहणमि 'ति न्यायेन प्रत्ययरूपावेव ग्राह्यौ । पूर्वमह्नः पूर्वाह्णः 'सर्वाशसङ्ख्याव्ययादि 'त्यट् समासान्तः, अहन्स्थाने अह्न च, ' अनोऽह्नस्ये 'ति णत्वम्, पूर्वाह्णे जातो भवो वा पूर्वाह्णेतनः, पूर्वाह्णपराह्णात्तनडिति तनट् प्रत्ययः, अनेनालुप् । द्वयोर्मध्ये प्रकृष्टे पूर्वाह्णे इति पूर्वाह्णेतराम् ' द्वयोर्विभज्ये तरम् ' ' किं त्याद्योऽव्ययादि' त्यन्तस्याम् । बहूनां मध्ये प्रकृष्टे पूर्वाह्णे पूर्वाह्णेतमाम् । पूर्वाह्णे च तस्मिन्काले च पूर्वाह्णेकाले । **शयश्च वासी च वासश्च तेषु, न कालस्तस्मात्** । बिले शेते इति बिलेशयः सर्पादिकः, आधारादित्यप्रत्ययः । वने वसतीति वनेवासी,

पदेषु लुब् वा न स्यात्। बिलेशयः, बिलशयः। वनेवासी, वनवासी। ग्रामेवासः, ग्रामवासः। अकालादिति किम्? पूर्वाह्णशयः॥ **वर्ष-क्षरवराप्सरःशरोरस्मनसो जे** ॥ २६ ॥ एभ्यः परस्याः सप्तम्या जे उत्तरपदे लुब् वा न स्यात्। वर्षेजः, वर्षजः। क्षरेजः, क्षरजः। वरेजः, वरजः। अप्सुजम्, अब्जम्। सरसिजम्, सरोजम्। शरेजम्, शरजम्। उरसिजः, उरोजः। मनसिजः, मनोजः॥ **द्युप्रावृड्वर्षाशरत्कालात्** ॥ २७ ॥ एभ्यः परस्याः सप्तम्या जे उत्तरपदे लुब् न स्यात्। दिविजः, प्रावृषिजः, वर्षासुजः, शरदिजः, कालेजः॥ **अपो ययोनिमतिचरे** ॥ २८ ॥ अपः परस्याः सप्तम्या ये प्रत्यये योन्यादौ च उत्तरपदे लुब् न स्यात्। अप्सव्यः, अप्सुयोनिः, अप्सुमतिः, अप्सुचरः॥ **नेन्सिद्धस्थे** ॥ २९ ॥ इन्प्रत्ययान्ते सिद्ध-

---

'अजातेः शीले' इति णिन्। ग्रामे वसनं ग्रामेवासः, भावाकर्त्रोर्घञ्। पूर्वाह्णे शेते इति पूर्वाह्णशयः, अत्र कालवाचिपूर्वपदत्वान्नालुप्॥ **वर्षश्च क्षरश्च वरश्च अप् च सरश्च शरश्च** उरश्च मनश्च तस्मात्, जे॥ वर्षे जातः वर्षेजः, 'सप्तम्या' इति डप्रत्ययः, स्पष्टमन्यत्॥ **द्यौश्च प्रावृट् च वर्षा च शरच्च कालश्च** तस्मात्। जे इति वर्तते, योगविभागान्नवेति निवृत्तम्। दिवि जातो दिविज इत्यादि॥ **अपः पञ्चमी, यश्च योनिश्च मतिश्च चरश्च** तस्मिन्। अप्सु भवः अप्सव्यः, दिगादित्वाद्यः, अस्वयम्भुवोऽव्, अप्सु योनिरस्य अप्सुयोनिः, इत्यादि॥ **न, इन् च सिद्धश्च स्थश्च** तस्मिन्। इनिति पदेन इन्प्रत्ययान्तग्रहणम्। यद्यप्युत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तविधिर्नास्ति तथाप्यत्र सामर्थ्यात्तदन्तविधिः, सप्तम्यन्तादिन्प्रत्ययासम्भवात्। अनुवर्तमाननञ्शब्दः सूत्रस्थनञ्ना मिलितः विभक्तिलुपो विधानमेव गमयति, 'द्वौ नञौ प्रकृतमर्थं गमयत' इति न्यायात्, अत एव भवत्येवेत्यर्थ इत्युक्तम्। इदमेव नञ्ग्रहणमसुं न्यायं सूच-

स्थयोश्चोत्तरपदयोर्न लुब् न स्यात्, भवत्येवेत्यर्थः । स्थण्डिलवर्ती, साङ्काश्यसिद्धः, समस्थः ॥ **षष्ठ्याः क्षेपे** ॥ ३० ॥ उत्तरपदे परे क्षेपे गम्ये षष्ठ्या लुब् न स्यात्। चौरस्य कुलम् ॥ **पुत्रे वा** ॥ ३१ ॥ पुत्रे उत्तरपदे क्षेपे षष्ठ्या लुब् वा न स्यात्। दास्याः पुत्रः, दासी-पुत्रः ॥ **पश्यद्वाग्दिशो हरयुक्तिदण्डे** ॥ ३२ ॥ एभ्यः परस्याः षष्ठ्या यथासङ्ख्यं हरादावुत्तरपदे लुब् न स्यात्। पश्यतोहरः, वाचो-युक्तिः, दिशोदण्डः ॥ **अदसोऽकञायनणोः** ॥ ३३ ॥ अदसः

यति, 'नाम्येकस्वरादि'त्यतो विभक्तिलुब्निषेधार्थे नञि अनुवर्त-मानेऽपि विभक्तिलुब्विध्यर्थं नेन्सिद्धस्थ इत्यत्र पुनः नञ्ग्रहणात्। द्वितीयेन नञा यदि पूर्वनञ्सम्बन्धिनिषेध एवार्थः नमो नम इत्यादाविव दृढीक्रियमाणः स्यात्तदा विभक्तिलुब्निषेधार्थे नञि अनुवर्तमाने सति तल्लुब्विध्यर्थी सूत्रकृत्कथं पुनर्द्वितीयनञं गृह्णी-यात्, यत्तु गृहीतस्तदेतन्न्यायाद्वितीयनञा विध्यर्थभवनं सम्भाव्यैव। स्थण्डिले वर्तत इति स्थण्डिलवर्ती, 'व्रताभीक्ष्ण्ये' इति णिन् ॥ षष्ठ्याः, क्षेपे। अत्र पूर्वपदात् क्षेपे गम्यमाने लुब्निषेध इष्यते, यथा चौरस्य कुलम्, उत्तरपदात् क्षेपे गम्यमाने तु लुबेव, यथा भूपस्य जाल्मः भूपजाल्मः, एतत्तु व्याख्यानतो विशेषप्रतिपत्तिरिति न्यायाद्बाध्यम् ॥ पुत्रे, वा। पूर्वसूत्रमनुवर्तते। पूर्वेण नित्यं निषेधे प्राप्ते विकल्पः ॥ पश्यच्च वाक् च दिक् च तस्मात्, हरश्च युक्तिश्च दण्डश्च तस्मिन्। पश्यतो हरतीति पश्यतोहरः, 'षष्ठी चानादरे' इति षष्ठी, पश्यन्तमनादृत्य हरतीत्यर्थः। अदसः पञ्चमी, अकञ् च, आ-यनण् च तयोः। अत्र अकञ्विषये उत्तरपदे इत्युक्तम्, न तु अकञ् प्रत्ययान्ते उत्तरपदे इत्युच्यते, उत्तरपदाधिकारे प्रत्ययस्यैव ग्रहणात्। 'नेन्सिद्ध-स्थे' इति सूत्रे इन्निवात्रासम्भवाभावात्, किन्त्वत्र विषय-व्याख्याने षष्ठ्यन्तपूर्वपदस्य पुत्रशब्दे उत्तरपदे अकञ्प्रत्ययः सम्भव-

परस्याः षष्ठ्या अकञ्विषये उत्तरपदे आयनणि च परे लुब् न स्यात्। आमुष्यपुत्रिका, आमुष्यायणः ॥ **देवानांप्रियः** ॥ ३४ ॥ अत्र षष्ठ्या लुब् न स्यात्। देवानांप्रियः ॥ **शेफपुच्छलाङ्गूलेषु नाम्नि शुनः** ॥ ३५ ॥ शुनः परस्याः षष्ठ्याः शेफादावुत्तरपदे संज्ञायां लुब् न स्यात्। शुनःशेफः, शुनःपुच्छः, शुनोलाङ्गूलकः ॥ **वाचस्पतिवास्तोष्पतिदिवस्पतिदिवोदासम्** ॥ ३६ ॥ एते समासाः षष्ठ्यलुपि निपात्यन्ते नाम्नि। वाचस्पतिः, वास्तोष्पतिः, दिवस्पतिः, दिवोदासः ॥ **ऋतां विद्यायोनिसम्बन्धे** ॥ ३७ ॥ ऋदन्तानां विद्यया

त्येव। अमुष्य पुत्रस्य भवा आमुष्यपुत्रिका, 'चौरादेरि'त्यकञ्, आदिवृद्धिः। अमुष्यापत्यमामुष्यायणः, नडादिभ्य इत्यायनण् ॥ **देवानांप्रियः**। अखण्डस्थापना, देवानांप्रियः ऋजुः मूर्खो वा ॥ **शेफश्च पुच्छश्च लाङ्गूलश्च** तेषु, नाम्नि, शुनः पञ्चमी। शुनः शेफमिव शेफमस्येति शुनःशेफः। गौर्लिङ्गं चिह्नशेफसोरित्यमरे सकारान्तः शेफश्शब्दः, इह तु शीङो निपातनादौणादिके फप्रत्ययेऽकारान्तोऽप्यस्ति शेफशब्दस्तस्यात्र ग्रहणम्। त्रयोऽप्यमी ऋषिविशेषाणां संज्ञाः ॥ **वाचस्पतिश्च वास्तोष्पतिश्च दिवस्पतिश्च दिवोदासश्च** ॥ नाम्नीति वर्तते। वाचः पतिः वाचस्पतिः, षष्ठ्याः अलुप्, निपातनात् सत्वं। वास्तोः पतिः वास्तोष्पतिः, निपातनात्षत्वम्। दिवः पतिः दिवस्पतिः, दिवः दासः दिवोदासः ॥ **ऋताम्, विद्या च योनिश्च ताभ्यां** सम्बन्धस्तस्मिन्। विद्यासम्बन्धस्य योनिसम्बन्धस्य च वाचिनः ऋदन्तात्षष्ठ्याः विद्यायोनिसम्बन्धे एव वर्तमाने उत्तरपदे लुब्न स्यादित्यर्थः। विद्यासम्बन्धयोनिसम्बन्धवाचकयोरन्यतरस्य यत्र पूर्वपदत्वमुत्तरपदत्वञ्च तत्रैवास्य प्रवृत्तिरिति भावः। होतुः पुत्रः होतुःपुत्रः। भर्तृगृहमित्यत्र तु नायकवाचको भर्तृशब्दः। ऋतामिति बहुवचनं विद्यासम्बन्धनिमित्तात् विद्यासम्बन्धनिमित्ते, योनिसम्ब-

योन्या वा कृते सम्बन्धे हेतौ सति प्रवृत्तानां षष्ठ्यास्तत्रैव हेतौ सति प्रवृत्ते उत्तरपदे लुब् न स्यात्। होतुःपुत्रः, पितुःपुत्रः, पितुरन्तेवासी। ऋतामिति किम्? आचार्यपुत्रः। विद्यायोनिसम्बन्ध इति किम्? भर्तृगृहम् ॥ **स्वसृपत्योर्वा** ॥ ३८ ॥ विद्यायोनिसम्बन्धनिमित्तानामृदन्तानां षष्ठ्याः स्वसृपत्योरुत्तरपदयोर्योनिसम्बन्धनिमित्तयोर्लुब् वा न स्यात्। होतुःस्वसा, होतृस्वसा। स्वसुःपतिः, स्वसृपतिः। विद्यायोनिसम्बन्ध इत्येव? भर्तृस्वसा, होतृपतिः ॥ **आ द्वन्द्वे** ॥ ३९ ॥ विद्यायोनिसम्बन्धनिमित्तानामृदन्तानां यो द्वन्द्वस्तस्मिन्सत्युत्तरपदे पूर्वपदस्य आः स्यात्। होतापोतारौ, मातापितरौ। ऋतामित्येव? गुरुशिष्यौ। विद्यायोनिसम्बन्ध इत्येव? कर्तृकारयितारौ ॥ **पुत्रे** ॥ ४० ॥ पुत्रे उत्तरपदे विद्यायोनिसम्बन्धानामृदन्तानां द्वन्द्वे आः स्यात्। मातापुत्रौ, होतापुत्रौ ॥ **वेदसहश्रुतावायुदेवता-**

न्धनिमित्तात् योनिसम्बन्धनिमित्ते इति यथासङ्ख्यप्रतिपत्तेर्व्युदासार्थम्, यथासङ्ख्यविवक्षायां हि होतुःपुत्रः पितुरन्तेवासीति न भवेत्। ऋद्भ्य इति पञ्चमीनिर्देशे प्राप्ते षष्ठीनिर्देश उत्तरार्थः ॥ स्वसा च पतिश्च तयोः, वा। पूर्वसूत्रमत्रानुवर्तनीयम्। होतुः स्वसा। भर्तृस्वसा इत्यत्र तु पूर्वपदं न विद्यायोनिसम्बन्धे, होतृपतिरित्यत्र च पतिशब्दस्य स्वामिवाचित्वान्न योनिसम्बन्धः। पूर्वेण नित्यं प्राप्ते विकल्पोऽयम्। आः, द्वन्द्वे। अनुवृत्तिः पूर्ववत्। होता च पोता च होतापोतारौ, अनेन पूर्वपदस्य आकारोऽन्तादेशः, अत्र विद्यासम्बन्धः। माता च पिता च मातापितरौ, अत्र योनिसम्बन्धः। कर्ता च कारयिता च कर्तृकारयितारौ, अत्र न विद्यासम्बन्धो नवा योनिसम्बन्धः। पुत्रे, पूर्ववदनुवृत्तिरा द्वन्द्वे इति च। माता च पुत्रश्च मातापुत्रौ, योनिकृतस्सम्बन्धः, होता च पुत्रश्च होतापुत्रौ, अत्र सम्बन्धः विद्याकृतः ॥ वेदे सहश्रुताः, न

नाम् ॥ ४१ ॥ एषां द्वन्द्वे पूर्वपदस्योत्तरपदे आः स्यात् । इन्द्रा-सोमौ । वेदेति किम् ? ब्रह्मप्रजापती । सहेति किम् ? विष्णुशक्रौ । श्रुतेति किम् ? चन्द्रसूर्यौ । वायुवर्जनं किम् ? वाय्वग्नी । देवता-नामिति किम् ? यूपचषालौ ॥ **ईः षोमवरुणेऽग्नेः** ॥ ४२ ॥ वेदसहश्रुतावायुदेवतानां द्वन्द्वे षोमे वरुणे चोत्तरपदेऽग्नेरीः स्यात् । षोमेति निर्देशाद् ईयोगे षत्वञ्च । अग्नीषोमौ, अग्नीवरुणौ । देवता-द्वन्द्व इत्येव ? अग्निसोमौ वटू ॥ **इर्वृद्धिमत्यविष्णौ** ॥ ४३ ॥ विष्णुवर्जे वृद्धिमत्युत्तरपदे देवताद्वन्द्वे अग्नेरिः स्यात् । आग्निवारुणी-

---

वायवः अवायवः, अवायवश्च ताः देवताश्च, वेदसहश्रुताश्च ताः अवायुदेवताश्च तासाम् । आ द्वन्द्वे इति वर्तते । वेदे सहश्रुतानां वायुवर्जितदेवतानां द्वन्द्वे पूर्वपदस्योत्तरपदे परे आः स्यादित्यर्थः । इन्द्रश्च सोमश्चेन्द्रासोमौ, अनेन पूर्वपदस्य आः । ब्रह्मा च प्रजा पतिश्च ब्रह्मप्रजापती वेदे न सहश्रुताविमौ । विष्णुश्च शक्रश्च विष्णु-शक्रौ, वेदे पृथगनयोः श्रुतत्वेऽपि सहश्रुतत्वं नास्ति । चन्द्रश्च सूर्यश्च चन्द्रसूर्यौ, एतौ हि वेदे शब्दान्तरेण विद्येते, चन्द्रसूर्येत्यादिशब्दैस्तु न श्रुतौ । यूपश्च चषालश्च यूपचषालौ, वेदे सहनिर्दिष्टत्वेऽपि न देवता-वाचिनावेतौ ॥ ईः, षोमश्च वरुणश्च तस्मिन्, अग्नेः षष्ठी । पूर्व-सूत्रं द्वन्द्वे इति च वर्तते । षोमेति निर्देशादीकारसन्नियोगे षत्वञ्च निपात्यते । अग्निश्च सोमश्च अग्नीषोमौ, अनेन ईः षत्वञ्च । अग्निश्च सोमश्च अग्निसोमौ, नेमौ देवतावाचिनौ, किन्तु माणवकौ ॥ इः, वृद्धिर्विद्यते यस्यासौ तस्मिन्, न विष्णुरविष्णुस्तस्मिन् । अग्नेरिति वर्तते । अग्निश्च वरुणश्च अग्नीवरुणौ, पूर्वसूत्रेण ईः, अग्नीवरुणौ देवतेऽस्याः असौ अग्निवारुणी, देवतार्थेऽण् प्रत्ययः । '*देवतानामात्वादावि*'*त्युभयपदवृद्धिः*, अनेन चालौकिके वाक्ये ईकारमाकारञ्च बाधित्वा इकाराऽन्तादेशः, बहिरङ्गापि लुप् अन्तरङ्गा-

मनड्वाहीमालभेत । वृद्धिमतीति किम् ? अग्नीवरुणौ । अविष्णाविति किम् ? आग्नावैष्णवं चरुं निर्वपेत् ॥ **दिवो द्यावा** ॥ ४४ ॥ देवताद्वन्द्वे दिव उत्तरपदे द्यावेति स्यात् । द्यावाभूमी ॥ **दिवस्दिवः पृथिव्यां वा** ॥ ४५ ॥ देवताद्वन्द्वे दिवः पृथिव्यामुत्तरपदे एतौ वा स्याताम् । दिवस्पृथिव्यौ, दिवःपृथिव्यौ, द्यावापृथिव्यौ ॥ **उषासोषसः** ॥ ४६ ॥ देवताद्वन्द्वे उषसः उत्तरपदे उषासा स्यात् । उषासासूर्यम् ॥ **मातरपितरं वा** ॥ ४७ ॥ मातृपित्रोः पूर्वोत्तरपदयोर्द्वन्द्वे ऋतोऽरो वा निपात्यते । मातरपितरयोः, मातापित्रोः ॥ **वर्चस्कादिष्ववस्करादयः** ॥ ४८ ॥ एष्वर्थेष्वेते कृतशषसाद्युत्तरपदाः साधवः स्युः । अवस्करोऽन्नमलम्, अवकरोऽन्यः । अपस्करो रथाङ्गम्, अपकरोऽन्यः ॥ **परतः स्त्री पुंवत्स्त्र्येकार्थेऽनूङ्**

नपि विधीन् बाधत इति न्यायात्, तेनान्तरङ्गत्वात्पूर्वमीकारादऽऽकारयोर्न सम्भवः, अग्नीवरुणावित्यत्रोत्तरपदं न वृद्धिमत् । अग्निश्च विष्णुश्च अग्नाविष्णू, वेदसहश्रुतेति पूर्वपदस्याकारोऽन्तादेशः, अग्नाविष्णू देवताऽस्येत्याग्नावैष्णवं 'देवतार्थेऽण्', उभयपदवृद्धिः ॥ दिवः, द्यावा । द्यौश्च भूमिश्च द्यावाभूमी, इतोऽक्त्यर्थादिति ङीः । दिवस् च दिवश्च, पृथिव्यां, वा । दिव इत्यनुवर्तते । द्यौश्च पृथिवी च दिवस्पृथिव्यौ, दिवःपृथिव्यौ, । द्यावादेशे च द्यावापृथिव्यौ । दिवसिति निर्देशात्सकारस्य न रुत्वम् ॥ उषासा प्रथमा, उषसः षष्ठी । उषश्च सूर्यश्च उषासासूर्यम् । उषःशब्दः प्रभातवाचको नपुंसकः, सन्ध्यावाचकस्तु स्त्रीक्लीबः ॥ मातरश्च पितरश्च मातरपितरम्, वा । माता च पिता च मातरपितरौ तयोः मातरपितरयोः, पक्षे आ द्वन्द्व इति पूर्वस्य आः । वर्चस्क आदिर्येषान्तेषु, अवस्कर आदिर्येषान्ते । अवकीर्यत इत्यवस्करः, अन्यार्थे अवकरः ॥ परस्मात्परतः, स्त्री

॥ ४९ ॥ परतो विशेष्यवशात्स्त्रीलिङ्गः स्त्रीवृत्तावेकार्थे उत्तरपदे पुंवत्स्यात्, न तूङन्तः । दर्शनीयभार्यः । परत इति किम् ? द्रोणीभार्यः । स्त्रीति किम् ? खलपुदृष्टिः । स्त्र्येकार्थ इति किम् ? गृहिणीनेत्रः, कल्याणीमाता । अनूङिति किम् ? करभोरूभार्यः ॥ **क्यङ्मानिपित्तद्धिते** ॥ ५० ॥ क्यङि मानिनि चोत्तरपदे पित्तद्धिते च परतः स्त्रीलिङ्गोऽनूङ् पुंवत्स्यात् । इयेतायते, दर्शनीयमानी अयमस्याः,

---

पुमानिव पुंवत्, स्त्री च तदेकार्थश्च तस्मिन्, यद्वा स्त्रियामेकार्थं तस्मिन्, एकार्थं नाम समानविभक्तिकं समानाधिकरणमित्यर्थः, न ऊङनूङ् । विशेष्यवशात् यश्शब्दः स्त्रीलिङ्गः सः स्त्रियां वर्तमाने समानाधिकरणे उत्तरपदे परे पुंवद्भवति, न चेत्पूर्वपदः ऊङन्तः । दर्शनीया भार्या यस्य सः, अत्र दर्शनीयशब्दो भार्याशब्दवशात् स्त्रीलिङ्गे वर्तते, भार्याशब्दस्य तु गोश्चान्ते ह्रस्व इति ह्रस्वः । द्रोणी भार्या यस्य स इति द्रोणीभार्यः, अत्र द्रोणीशब्दो न विशेष्यवशात्स्त्रीलिङ्गः, किन्तु स्वत एव । खलं पुनाति यत्कुलं तत्खलपु, खलपु दृष्टिरस्यासौ खलपुदृष्टिः, नात्र खलपुशब्दः स्त्रियां वर्तते । गृहिणी नेत्रं यस्य सः गृहिणीनेत्रः, अत्र समानाधिकरणत्वेऽपि न स्त्रीलिङ्गोत्तरपदं वर्तते । एवं कल्याण्याः माता कल्याणीमाता, अत्र स्त्रीलिङ्गोत्तरपदत्वेऽपि न सामानाधिकरण्यम् । करभवत् ऊरू जङ्घे यस्याः सा करभोरूः, उपमानसहितेत्यूङ् प्रत्ययः, करभोरू भार्या यस्य सः करभोरूभार्यः । अत्र पूर्वपदमूङन्तमेव ॥ प् इदनुबन्धो यस्य स पित्, पित्चासौ तद्धितश्च पित्तद्धितः, क्यङ् च मानी च पित्तद्धितश्च तस्मिन् । परतः स्त्री पुंवदनूङिति वर्तते । इयेनीवाचरति इयेतायते, क्यङ् प्रत्यये रूपमिदम् । क्यङि परे च इयेनीशब्दस्य पुंवद्भावे ङीनिवृत्तौ निमित्ताभावे नैमित्तिकस्याप्यभाव इति न्यायेन ङीनिमित्तेन जातस्य तकारस्थानिकनकारस्य निवृत्तौ दीर्घश्चियङीति दीर्घे इयेतायते । स्त्रियं दर्शनीयां

अजथ्यं यूथम् ॥ **जातिश्च णितद्धितयस्वरे** ॥ ५१ ॥ अन्या परतः स्त्री जातिश्च णौ प्रत्यये यादौ स्वरादौ च तद्धिते विषयभूते पुंवत्स्याद्, अनूङ्। पटयति, एत्यः, भावत्कम्। जातिः—दारद्यः, गार्गः।

मन्यते चैत्रः इति दर्शनीयमानी, अत्र मानिनि उत्तरपदे पूर्वपदस्य पुंवद्भावः, अत्रासमानाधिकरणत्वात्पूर्वसूत्रेण न पुंवद्भावः। अजायै हितमजथ्यं 'अव्यजात्थ्यप्', अत्र स्वाङ्गात् ङीर्जातिश्चेति निषेधेऽपि पित्करणात्पुंवद्भावः ॥ **जातिः, च, यश्च स्वरश्च यस्वरम्**, तद्धितश्च तद्यस्वरश्च, णिश्च तद्धितयस्वरश्च तस्मिन्। अनुवृत्तिः पूर्ववत्। पट्टीमाचष्टे, णिञ्बहुलम्, अनेन णौ पुंवद्भावः 'नामिनोऽकलिहलेरि'ति वृद्धौ, 'ञ्यन्त्यस्वरादेरिति' तल्लोपे तिव्, शव्, गुणः, पटयति। एत्यां साधुः एत्यः, 'तत्र साधौ' यः, अनेन पुंवद्भावः, निमित्तापाये नकारस्यापि निवृत्तिः। भवत्या इदं भावत्कं, अनेन पुंवद्भावे सति, 'भवतोरिकणीयसा'वितीकण् प्रत्ययः, 'ऋवर्णोवर्णदोसी'-तीकणः इकारलोपः, इत्येवमन्यायाः पुंवद्भावः। दरदोऽपत्यं स्त्री दारद्यः, 'पुरुमगधे'त्यण्, द्रेरञणोऽप्राच्यभर्गादेरित्यण्लोपः, ततः दरदि साधुः दारद्यः, 'तत्र साधौ यः', इति यविषये पुंवद्भावे सति अणोऽवस्थानं, अवस्थाने च वृद्धिः, अवर्णेवर्णस्येत्यणूलोपः। गार्ग्यायण्याः कुत्सितमपत्यम्, अत्र प्रथमं पुंवद्भावे ङायन्ङीनिवृत्तौ सत्यां गार्ग्येत्यवस्थायां 'वृद्धस्त्रियाः क्षेपे णेकणौणा वि' इति णः, ततः 'तद्धितयस्वर' इति यलोपः, गार्गः। अत्र गार्ग्यायणीशब्दः "गोत्रञ्च चरणैः सहे"ति जातिकार्यभाक्। हस्तिनीमिच्छति हस्तिनीयति, 'अमव्ययात्क्यन्' अयं न तद्धितयः, किन्तु नामधातुसम्बन्धियः, अतो न पुंवत्। हस्तिन्यः जसि रूपम्, नात्र तद्धितस्वरः, पुंवद्भावश्च ण्यादिप्रत्ययानयनपूर्वकाले एव कर्तव्यः, ततो ण्यादिप्रत्ययाः भवन्ति, अत एव णितद्धितयस्वरे इति विषयसप्तमी, अन्यथा परसप्तमी-

तद्धितेति किम् ? हस्तिनीयति हस्तिन्यः ॥ **एयेऽग्नायी** ॥ ५२ ॥ एयप्रत्ययेऽग्नाय्येव परतः स्त्री पुंवत्स्यात्, आग्नेयः । पूर्वेण सिद्धे नियमार्थमिदम्, श्यैनेयः ॥ **नाप्प्रियाऽऽदौ** ॥ ५३ ॥ अप्-प्रत्ययान्ते स्त्र्येकार्थे उत्तरपदे प्रियादौ च परतः स्त्री पुंवन्न स्यात् । कल्याणीपञ्चमा रात्रयः, कल्याणीप्रियः । अप्प्रियादाविति किम् ? कल्याणपञ्चमीकः पक्षः ॥ **तद्धिताऽककोपान्त्यपूरण्याख्याः**

समाश्रयणे पटुत्वाः भावः इत्यत्र पटीशब्दस्य लघ्वादित्वाभावेन 'य्वृवर्णाल्लघ्वादेरि' त्यण् न स्यात्, ततश्च पाटवमिति न सिद्ध्येत् ॥ **एये, अग्नायी** । अनुवृत्तिः पूर्ववत् । अग्नाय्याः अपत्यमाग्नेयः, पुंवद्भावे कृते, 'कल्पाग्नेरेयणि' त्येयण्प्रत्ययः । पूर्वेण सिद्धे नियमार्थमिदम्, तेन श्यैनेयः इत्यत्र एयण्प्रत्ययविषये श्येनी-शब्दस्य न पुंवद्भावः । अत्र 'द्विस्वरादनद्यादेरि' त्येयण्प्रत्ययः ॥ **न, प्रियः आदिर्येषान्ते, अप् च प्रियादिश्च तस्मिन्** । स्त्री पुंवत्स्येकार्थे इति वर्तते । कल्याणी पञ्चमी आसां ताः, अत्र पञ्चमीति पूरण्यपूप्रत्ययान्ते परतः कल्याणीशब्दस्य पुंवद्भावनिषेधः । 'पूरणीभ्य-स्तत्प्राधान्येऽबि'त्यप्, अवर्णेति ईलोपः, आदित्याप्, ततो जसि रूपं कल्याणीपञ्चमाः । कल्याणी प्रिया यस्य, अत्रापि प्रियादौ परतः पुंवद्भावः, प्रियाशब्दस्य च गोश्चान्ते ह्रस्वः । कल्याणी पञ्चमी यस्य पक्षस्येति विग्रहे 'क्रन्नित्यदितः कच्' परतः स्त्री पुंवत्, अत्र पुल्लिङ्गस्य पक्षस्य प्राधान्यात् पूरणीभ्य इति अप्समासान्तप्रत्ययो न भवति ॥ **तद्धितश्चाकश्च तयोः कः, तद्धिताककः उपान्त्यो यासाम्**, तद्धिताककोपान्त्याश्च पूरणी चाख्या च ते । स्त्री पुंवन्नेति वर्तन्ते । मद्रिका भार्या यस्य सः, अत्र मद्रिकाशब्दस्य तद्धितप्रत्ययान्तत्वेन परतः स्त्री पुंवदिति प्राप्तस्य पुंवद्भावस्यानेन निषेधः । कारिका भार्या यस्य कारिकाभार्यः, अत्र अकप्रत्ययान्तत्वेन पुंवद्भावनिषेधः ।

॥ ५४ ॥ तद्धितस्याकप्रत्ययस्य च क उपान्त्यो यासां ताः पूरणप्रत्ययान्ताः संज्ञाश्च परतः स्त्री पुंवन्न स्युः । सद्रिकाभार्यः कारिकाभार्यः, पञ्चमीभार्यः । दत्ताभार्यः । तद्धिताकेति किम् ? पाकभार्यः ॥ **तद्धितः स्वरवृद्धिहेतुररक्तविकारे** ॥ ५५ ॥ रक्तविकाराभ्यामन्यार्थः स्वरवृद्धिहेतुर्यस्तद्धितस्तदन्तः परतः स्त्री पुंवन्न स्यात् । माथुरीभार्यः । स्वरेति किम् ? वैयाकरणभार्यः । वृद्धिहेतुरिति किम् ? अर्द्धप्रस्थभार्यः । अरक्तविकार इति किम् ? काषायबृहतिकः, लौहेषः ॥ **स्वाङ्गाद् ङीर्जातिश्चामानिनि** ॥ ५६ ॥ स्वाङ्गाद्यो ङीस्तदन्तो

पञ्चमीभार्यः, पूरणप्रत्ययान्तत्वेन पञ्चम्याः पुंवद्भावनिषेधः । दत्ताभार्यः, दत्तेति कस्याश्चित्संज्ञाऽतः पुंवद्भावनिषेधः । पाका भार्या यस्येति पाकभार्यः, अत्र तु पाकेति न तद्धिताकप्रत्ययः, किन्त्वौणादिकः पाकशब्दः वयोविशेषे उणादिषु निपातितः, अतो न पुंवद्भावप्रतिषेधः ॥ तद्धितः, स्वरस्य वृद्धिस्तस्य हेतुः, रक्तश्च विकारश्च, न रक्तविकारस्तस्मिन् । माथुरीभार्यः, अत्र माथुरीशब्दो मथुरायां भवेत्यर्थेऽणन्तः आदिवृद्धिहेतुः, अतोऽनेन पुंवद्भावनिषेधः । वैयाकरणी भार्या यस्य, अत्र अधीत्यर्थेऽण्, वकारयकारयोर्मध्ये ऐकारागमः, अत्राण् न स्वरवृद्धिहेतुः । अर्धं प्रस्थस्यार्धप्रस्थः, अर्धप्रस्थे भवा, अर्धप्रस्था, ' अर्धात्परिमाणस्ये 'त्यनेनोत्तरपदस्य वृद्धिविधावकारवर्जनादाद्यस्य च वा वृद्धिविधानान्नात्र वृद्धिः, अत एव वृद्धिहेतुतद्धितो नास्तीति अर्धप्रस्था भार्या यस्येत्यत्र पुंवद्भावः । कषायेन रक्ता काषायी, सा बृहतिकाऽस्येति काषायबृहतिकः, अत्र रक्तार्थस्तद्धितः । लोहस्य विकारो लौही, सा ईषाऽस्य लौहेषः, अत्र विकारार्थे तद्धितः ॥ स्वश्च तदङ्गश्च तस्मात्, ङीः जातिः, च, न मानी तस्मिन् । दीर्घाः केशाः यस्याः सा, ' असहनङि 'ति ङीः, दीर्घकेशी भार्या यस्य, अत्र दीर्घकेशीति स्वाङ्गाद्विहितङ्यन्तः ।

जातिवाची च परतः स्त्री पुंवन्न स्यात्, न तु मानिनि । दीर्घकेशीभार्यः, कठीभार्यः, शूद्राभार्यः । स्वाङ्गादिति किम् ? पटुभार्यः । अमानिनीति किम् ? दीर्घकेशमानिनी ॥ **पुंवत्कर्म्मधारये** ॥ ५७ ॥ परतः स्त्री अनूङ् कर्म्मधारये सति स्त्र्येकार्थे उत्तरपदे परे पुंवत्स्यात् । कल्याणप्रिया, मद्रकभार्या, माथुरवृन्दारिका, चन्द्रमुखवृन्दारिका । अनूङित्येव ? ब्रह्मबन्धूवृन्दारिका ॥ **रिति** ॥ ५८ ॥ परतः स्त्री अनूङ् रिति प्रत्यये पुंवत्स्यात् । पटुजातीया, कठदेशीया ॥ **त्वतले गुणः** ॥५९॥ परतः स्त्र्यनूङ् गुणवचनस्त्वतयोः प्रत्ययोः पुंवत्स्यात् । पटुत्वम्,

---

कठेन प्रोक्तं वेत्तीति कठी, जातेरयान्तादिति ङीः, कठी भार्या यस्य, अत्र कठीति जातिवाची । शूद्रा भार्या यस्येत्यत्रापि शूद्राशब्दो जातिवचनः । पटुर्भार्या यस्येत्यत्र न स्वाङ्गङ्यन्तस्तस्मात् पुंवद्भावः ॥ **पुंवत्, कर्मधारये** । परतः स्त्री पुंवत्स्त्र्येकार्थेऽनूङिति वर्तते । कल्याणी चासौ प्रिया च, अनेन पुंवद्भावः । नाप्प्रियादावित्यस्यापवादोऽयम् । मद्रिका चासौ भार्या च, अत्र तद्धिताककोपान्त्येति निषेधे प्राप्तेऽनेन पुंवत् । माथुरी चासौ वृन्दारिका चेत्यत्र तद्धितः स्वरवृद्धीति निषेधे प्राप्तेऽनेन पुंवद्भावः । चन्द्रमुखी चासौ वृन्दारिका चेत्यत्र स्वाङ्गाद् ङीर्जातिश्चेति निषेधे प्राप्ते पुंवद्भावः ॥ **र् इदनुबन्धो यस्य तस्मिन्** । पटुर्प्रकारोऽस्याः, 'प्रकारे जातीयरि'ति जातीयर्प्रत्ययः, अनेन पुंवत् । ईषदपरिसमाप्ता कठी कठदेशीया 'अतमबादेरि'ति देशीयर्प्रत्ययोऽनेन पुंवत्, अप्राप्तप्रापणार्थोऽयमारम्भः ॥ **त्वश्च तश्च तस्मिन्, गुणः** । पटोर्भावः पटुत्वं पटुता । गुणवचनत्वात्पुंवद्भावः, गुण इति गुणद्वारेण गुणिनि वर्तमानो गुणवचनो गृह्यते, गुणमात्रवृत्तेरस्त्रीलिङ्गत्वात्पुंवद्भावाप्राप्तेः । कठीत्वमित्यस्य तु न गुणवचनत्वं जातिवाचित्वात् । यद्यप्यत्र गुण इति असत्यपि स्वाङ्गात् ङीरिति पुंवद्भावप्रतिषेधस्सिद्धस्तथापि सर्वापवादत्वमस्य दर्शयितुं गुण इति

पटुता । गुण इति किम् ? कठीत्वम् ? ॥ **च्वौ क्वचित्** ॥ ६० ॥ परतः स्त्र्यनूङ् च्वौ क्वचित्पुंवत्स्यात् । महद्भूता कन्या । क्वचिदिति किम् ? गोमतीभूता ॥ **सर्वादयोऽस्यादौ** ॥ ६१ ॥ सर्वादिः परतः स्त्री पुंवत्स्यात्, न तु स्यादौ । सर्वस्त्रियः, भवत्पुत्रः । अस्यादाविति किम् ? सर्वस्यै ॥ **मृगक्षीरादिषु वा** ॥ ६२ ॥ एषु समासेषु परतः स्त्री उत्तरपदे पुंवद्वा स्यात् । मृगक्षीरम्, मृगीक्षीरम् । काकशावः, काकीशावः ॥ **ऋदुदित्तरतमरूपकल्पब्रुवचेलट्गोत्रमतहते वा ह्रस्वश्च** ॥ ६३ ॥ ऋदुदित्परतः स्त्री तरादिषु प्रत्ययेषु, ब्रुवादौ च स्त्र्येकार्थे उत्तरपदे ह्रस्वान्तः पुंवच्च वा स्यात् । पचन्नितरा, पचत्तरा, पचन्तीतरा । श्रेयसितरा, श्रेयस्तरा, श्रेयसीतरा । पचन्नितमा, पचत्तमा, पचन्तीतमा । श्रेयसितमा, श्रेयस्तमा, श्रेयसीतमा । पचन्तिरूपा, पचद्रूपा, पचन्तीरूपा । विदुषिरूपा, विद्वद्रूपा, विदुषीरूपा । पचन्तिकल्पा, पचत्कल्पा, पचन्तीकल्पा । विदुषीकल्पा, विद्वत्कल्पा,

---

पदमथवा कर्त्रीत्वमित्यादिक्रियाशब्दादौ पुंवद्भावनिषेधाय गुणग्रहणस्यावश्यकत्वं बोध्यम् ॥ **च्वौ, क्वचित्** । अमहती महतीभूता महद्भूता, च्वीविषयत्वात्पुंवद्भावः ॥ **सर्व आदिर्येषान्ते, न स्यादिरस्यादिस्तस्मिन्** । सर्वासां स्त्रियः सर्वस्त्रियः । भवत्याः पुत्रः भवत्पुत्रः । व्याप्त्यर्थम्, तेन भूतपूर्वसर्वादेरपि भवति, यथा दक्षिणोत्तरपूर्वाणाम्, अत्र द्वन्द्वे सति न सर्वादिरिति सर्वादित्वं नास्ति ॥ **मृगक्षीरः आदिर्येषान्तेषु, वा** । मृग्याः क्षीरं मृगक्षीरम्, मृगीक्षीरं वा । काक्याः शावः काकशावः, काकीशावो वा । **ऋच्च उच्च, तावितौ यस्य, तरश्च तमश्च रूपश्च कल्पश्च ब्रुवश्च चेलट् च गोत्रश्च मतश्च हतश्च तस्मिन्, वा, ह्रस्वः, च** । चशब्देन पुंवदित्यस्य ग्रहणम् । परतः स्त्री स्त्र्येकार्थे इति च वर्तन्ते, एवमग्रे । द्वयोर्मध्ये

विदुषीकल्पा । श्रेयसिकल्पा, श्रेयस्कल्पा, श्रेयसीकल्पा । पचन्तिब्रुवा, पचद्ब्रुवा, पचन्तीब्रुवा । श्रेयसिब्रुवा, श्रेयोब्रुवा, श्रेयसीब्रुवा । पचन्तिचेली, पचच्चेली, पचन्तीचेली । श्रेयसिचेली, श्रेयश्चेली, श्रेयसीचेली । पचन्तिगोत्रा, पचद्गोत्रा, पचन्तीगोत्रा । श्रेयसिगोत्रा, श्रेयोगोत्रा, श्रेयसीगोत्रा । पचन्तिमता, पचन्मता पचन्तीमता । श्रेयसिमता, श्रेयोमता, श्रेयसीमता । पचन्तिहता, पचद्धता, पचन्तीहता । श्रेयसिहता, श्रेयोहता, श्रेयसीहता ॥ **ङ्यः** ॥ ६४ ॥ ङ्यन्तायाः परतः स्त्रियास्तरादिषु प्रत्ययेषु ब्रुवादिषु चोत्तरपदेषु एकार्थे ह्रस्वः स्यात् । गौरितरा, गौरितमा, नर्त्तकिरूपा, कुमारिकल्पा, ब्राह्मणिब्रुवा, गार्गिचेली, ब्राह्मणिगोत्रा, गार्गिमता, गौरिहता ॥ **भोगवद्गौरिमतोर्नाम्नि** ॥ ६५ ॥ अनयोर्ङ्यन्तयोः संज्ञायां तरादिषु प्रत्ययेषु ब्रुवादौ चोत्तरपदे एकार्थे ह्रस्वः स्यात् । भोगवतितरा, गौरिमतितमा, भोगवतिरूपा, गौरिमतिकल्पा, भोगवतिब्रुवा, गौरिमतिचेली, भोगवतिगोत्रा, गौरिमतिमता, भोगवतिहता । नाम्नीति किम् ? भोगवतितरा

प्रकृष्टा पचन्ती पचत्तरा, अत्र पुंवद्भावः, पक्षे वा ह्रस्वः । पचन्तीशब्दस्तु ऋदित्प्रत्ययान्तः, श्रेयसीतरा इत्यत्र तूदित्प्रत्ययान्तः । पचन्तीरूपा, अत्र प्रशस्ते रूपप्प्रत्ययः, पचन्तीकल्पेत्यत्र तु कल्पप् प्रत्ययः । पचन्ती चासौ ब्रुवा च, पचन्ती चासौ चेली च, एवमग्रेऽपि । चेलडिति टित् वचनं ङ्यर्थम् । ब्रुवादयः कुत्सनवचनास्तेन निन्द्यं कुत्सनैरिति समासः ॥ **ङ्यः**. षष्ठी । द्वयोर्मध्ये प्रकृष्टा गौरी गौरितरा । 'नवैकस्वराणामि'त्युत्तरत्र वचनादनेकस्वरस्यैवायं विधिः । नर्तकिरूपा इत्यादौ कोपान्त्यत्वात्पुंवद्भावप्रतिषेधादयं विधिः । दर्शनीयतरा, विद्वद्वृन्दारिकेत्यादौ पुंभावः सावकाशः, गौरितरेत्यादौ तूभयप्राप्तौ "स्पर्द्धे पर" इति न्यायेन परत्वादयमेव विधिः ॥ **भोगवांश्च** गौरिमांश्च तयोर्नाम्नि । स्पष्टम् ॥ नवा, एकः स्वरो

भोगवत्तरा, भोगवतीतरा ।: **नवैकस्वराणाम् ॥६६॥** एकस्वरस्य ङ्यन्तस्य तरादौ प्रत्यये ब्रुवादौ चोत्तरपदे स्त्येकार्थे वा ह्रस्वः स्यात् । स्त्रितरा स्त्रीतरा । ज्ञितरा, ज्ञीतरा । ज्ञितमा, ज्ञीतमा । ज्ञिब्रुवा, ज्ञीब्रुवा । एकस्वराणामिति किम् ? कुटीतरा ॥ **ऊङः ॥ ६७ ॥** ऊङन्तस्य तरादौ चोत्तरपदे स्त्येकार्थे वा ह्रस्वः स्यात् । ब्रह्मबन्धुतरा, ब्रह्मबन्धूतरा । कद्रुब्रुवा, कद्रूब्रुवा ॥ **महतः करघासविशिष्टे डाः ॥ ६८ ॥** करादावुत्तरपदे महतो डा वा स्यात् । महाकरः, महत्करः । महाघासः, महद्घासः । महाविशिष्टः, महद्विशिष्टः ॥ **स्त्रियाम् ॥ ६९ ॥** स्त्रीवृत्तेर्महतः करादावुत्तरपदे नित्यं डाः स्यात् । महाकरः महाघासः, महाविशिष्टः ॥ **जातीयै-**

येषान्ते, तेषाम् । बहुवचनात्परतः स्त्रीति निवृत्तम्, स्त्येकार्थे इत्यनुवर्तते । स्त्रितरा, एकस्वरत्वादनेन वा ह्रस्वोऽन्तादेशः तरादौ परतः । ज्ञीतरेत्यादौ ह्रस्वविकल्पपक्षे पुंवन्न भवति, धवयोगे ङ्यां पश्चात्संज्ञाविवक्षायां तद्धिताककेति निषेधात् ॥ **ऊङः षष्ठी** । **ब्रह्मा बन्धुरस्याः**, उतोऽप्राणिन इत्यूङ्प्रत्ययः, द्वयोर्मध्ये प्रकृष्टा ब्रह्मबन्धू ब्रह्मबन्धूतरा । कद्रूब्रुवेत्यत्र 'बाह्वन्तकद्रुकमण्डलोरि'त्यूङ् ॥ **महतः, करश्च घासश्च विशिष्टश्च तस्मिन्**, डाः । महतां करः महाकरः, करादौ परे महतो डान्तादेशः । वैयधिकरण्ये विभाषेयम्, सामानाधिकरण्ये तु जातीयैकार्थेऽच्वेरित्युत्तरसूत्रेण नित्य एव विधिः । डकारोऽन्त्यस्वरादिलोपार्थः ॥ **स्त्रियाम्, पूर्वसूत्रमनुवर्तते** । महत्याः करः महाकरः, यद्यपि "नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमि"ति न्यायेन पूर्वसूत्रेणैव डान्तादेशस्सिद्धस्तथापि नित्यार्थोऽयमारम्भः ॥ **जातीयश्चैकार्थश्च तस्मिन्**, न च्विरच्विस्तस्य । महतः डा इति वर्तते । महान्प्रकारोऽस्य महाजातीयः, प्रकारे जातीयर्प्रत्ययः,

कार्थेऽच्चेः ॥ ७० ॥ महतोऽच्यन्तस्य जातीयरि एकार्थे चोत्तरपदे डाः स्यात्। महाजातीयः, महावीरः। जातीयैकार्थ इति किम्? महत्तरः। अच्चेरिति किम्? महद्भूता कन्या ॥ **न पुंवन्निषेधे** ॥ ७१ ॥ महतः पुंवन्निषेधविषये उत्तरपदे डा न स्यात्। महतीप्रियः ॥ **इच्यस्वरे दीर्घ आच्च** ॥ ७२ ॥ इजन्तेऽस्वरादावुत्तरपदे पूर्वपदस्य दीर्घत्वमाच्च स्यात्। मुष्टीमुष्टि, मुष्टा-

---

अनेन महच्छब्दस्य जातीये प्रत्यये परे डान्तादेशः। महांश्चासौ वीरश्च महावीरः, अत्रैकार्थ्ये उत्तरपदे महतो डान्तादेशः। नन्वेकार्थे इति किमर्थम्, जातीये चेति कृतेऽपि चकारेणोत्तरपदाकर्षणात्तेन च समासस्याक्षेपात् "लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमि"ति न्यायेन प्रतिपदोक्तस्यैव समासस्य ग्रहणाल्लाक्षणिके षष्ठी तत्पुरुषे महत्याः पुत्रः महतीपुत्र इत्यादौ न डा भविष्यतीति चेत्, मैवम्, षष्ठीतत्पुरुषवन्महाभागोऽस्येत्यादौ बहुव्रीहावपि न स्यादतस्तद्ग्रहणम्। अत्र पाणिनीये महच्छब्देन महच्छब्दान्तस्यापि ग्रहणं कृतं तेन महाबाहुवदतिमहाबाहुरिति प्रयोगो भवतीति बोध्यम्। अमहती महतीसम्पन्ना महद्भूता, अत्र च्व्यन्तत्वान्न डाः ॥ न, पुंवदित्यस्य निषेधः पुंवन्निषेधस्तस्मिन्। महतः डाः इति वर्तते। महती प्रियाऽस्येति महतीप्रियः। अत्र नाप्रियादाविति पुंवन्निषेधविषयस्य प्रियेत्युत्तरपदस्य सद्भावान्न महतो डान्तादेशः ॥ इचि, न विद्यते स्वरो यत्र तस्मिन्, दीर्घः, आत्, च। मुष्टिभिश्च मुष्टिभिश्च प्रहृत्य कृतं युद्धमित्यत्र तत्रादायेति समासः, इज्युद्धे इतीच्प्रत्ययः, अनेन दीर्घे मुष्टीमुष्टि, आत्वे च मुष्टामुष्टि। अस्य समासस्याव्ययीभावत्वाद्विभक्तेरनतो लुबिति लुप्। असिभिरसिभिः प्रहृत्य कृतं युद्धमस्यसि, अत्रोत्तरपदस्य स्वरादित्वान्न दीर्घत्वम्, दीर्घसाहचर्यादात्वमपि न भवति ॥ हविषि, अष्टनः कपाले।

मुष्टि । अस्वर इति किम् ? अस्यसि ॥ **हविष्यष्टनः कपाले** ॥ ७३ ॥ हविष्यर्थे कपाले उत्तरपदेऽष्टनो दीर्घः स्यात् । अष्टाकपालं हविः । हविषीति किम् ? अष्टकपालम् । कपाल इति किम् ? अष्टपात्रं हविः ॥ **गवि युक्ते** ॥ ७४ ॥ युक्तेऽर्थे गव्युत्तरपदेऽष्टनो दीर्घः स्यात् । अष्टागवं शकटम् । युक्त इति किम् ? अष्टगुश्चैत्रः ॥ **नाम्नि** ॥ ७५ ॥ अष्टन उत्तरपदे संज्ञायां दीर्घः स्यात् । अष्टापदः कैलासः । नाम्नीति किम् ? अष्टदंष्ट्रः ॥ **कोटरमिश्रकसिध्रकपुरगसारिकस्य वणे** ॥ ७६ ॥ एषां कृतणत्वे वने उत्तरपदे

दीर्घ इति वर्तते । अष्टसु कपालेषु संस्कृतमष्टाकपालं हविः, संस्कृतं भक्ष्येऽणित्यण्प्रत्ययः, द्विगोरनपत्ये, अण्लोपः, अनेनाष्टन्शब्दस्य दीर्घोऽन्तादेशः । न चाष्टन्शब्दस्यान्त्यभूतो नकारो लुप्तः, नवा स्थानिवत्त्वं परविधौ दीर्घे नलोपस्यासत्त्वात्कथमत्र दीर्घोऽन्तादेश इति वाच्यम्, दीर्घस्य स्वरधर्मत्वादकारस्योपान्त्यस्यापि स्वरापेक्षयाऽन्त्यत्वाद्दीर्घे बाधकाभावात् । अष्टानां कपालानां समाहारोऽष्टकपालम्, अत्र हविरर्थो नास्ति । अष्टसु पात्रेषु संस्कृतं हविरष्टपात्रम्, अत्र हविषि वर्तमानत्वेऽपि कपालोत्तरपदत्वं नास्ति ॥ गवि, युक्ते । अष्टनः दीर्घ इति पदद्वयमनुवर्तते । अष्टौ गावो युक्ता अस्मिन् शकटे इत्यष्टागवमिति त्रिपदे बहुव्रीहौ कृते उत्तरपदे परे द्वयोर्द्विगुः । गोस्तत्पुरुषादित्यट् समासान्तः । अनेन चाष्टशब्दस्य दीर्घोऽन्तादेशः, गोश्चान्ते ह्रस्वः, अस्वयम्भुवोऽव् । अत्र दीर्घे कृते युक्तार्थस्य बोधाद्युक्तशब्दनिवृत्तिः, ' उक्तार्थानामप्रयोग ' इति न्यायात् । अष्टौ गावो यस्य सः अष्टगुः, गोश्चान्ते ह्रस्वः, अत्र युक्तार्थो नास्ति ॥ नाम्नि । अष्टौ पदान्यत्राष्टापदः कैलासशैलस्य संज्ञा, अत एवानेन दीर्घः । अष्टौ दंष्ट्राः यस्यासावष्टदंष्ट्रः ॥ कोटरश्च मिश्रकश्च सिध्रकश्च पुरगश्च सारिकश्च तस्य, वणे । दीर्घो नाम्नीति वर्तते, एवमग्रेऽपि ।

संज्ञायां दीर्घः स्यात्। कोटरावणम् मिश्रकावणम्, सिध्रकावणम्, पुरगावणम्, सारिकावणम्॥ **अञ्जनादीनां गिरौ** ॥ ७७ ॥ एषां गिरावुत्तरपदे नाम्नि दीर्घः स्यात्। अञ्जनागिरिः, कुक्कुटागिरिः॥ **अनजिरादिबहुस्वरशरादीनां मतौ** ॥ ७८ ॥ अजिरादिवर्जबहुस्वराणां शरादीनां च मतौ प्रत्यये नाम्नि दीर्घः स्यात्। उदुम्बरावती, शरावती, वंशावती। अनजिरादीति किम्? अजिरवती, हिरण्यवती॥ **ऋषौ विश्वस्य मित्रे** ॥ ७९ ॥ ऋषावर्थे मित्रे उत्तरपदे विश्वस्य नाम्नि दीर्घः स्यात्। विश्वामित्रः॥ **नरे** ॥ ८० ॥ नरे उत्तरपदे नाम्नि विश्वस्य दीर्घः स्यात्। विश्वानरः कश्चित्॥ **वसुराटोः** ॥ ८१ ॥ अनयोरुत्तरपदयोर्विश्वस्य

कोटराणां वनम्, समासे दीर्घे च कृते नामत्वाद्वनशब्दस्य 'पूर्वपदस्थादि'त्येव णत्वे सिद्धेऽत्र सूत्रे कृतणत्वस्य वनशब्दस्य निर्देशो नियमार्थः। कृतदीर्घेभ्यः कोटरादिभ्य एव परस्य णत्वमिति, तेन कुबेरवनमित्यादौ संज्ञायामपि णत्वं न भवति, कृतदीर्घेभ्यः कोटरादिभ्यो वनस्यैव णत्वं नान्येषामिति विपरीतनियमस्तु न सम्भवति, वनादन्यस्मिन्नुत्तरपदे कोटरादीनां दीर्घासम्भवात्॥ **अञ्जनादीनाम् गिरौ**। अञ्जनानां गिरिरञ्जनागिरिः, बहुवचनमाकृतिगणार्थम्॥ अजिर आदिर्येषाम्, नाजिरादयः, बहवः स्वरा येषान्ते, अनजिरादयश्च बहुस्वराश्च शरादयश्च तेषाम्, मतौ। उदुम्बराः सन्त्यस्यामित्युदुम्बरावती, नद्यां मतुः, नाम्नीति यस्य वः, बहुस्वरत्वादनेन दीर्घः, एवमग्रेऽपि। बहुवचनमाकृतिगणार्थम्, अजिरादिराकृतिगणः॥ **ऋषौ, विश्वस्य, मित्रे**। विश्वस्य मित्रः विश्वामित्रो नामर्षिः॥ **नरे**। विश्वस्येति वर्तते। विश्वे नरा अस्य, विश्वानरो नाम कश्चित्॥ **वसुश्च राट् च तयोः**। विश्वस्येति वर्तते, पृथग्योगान्नाम्नीति निवृत्तम्। विश्वं वसु अस्य विश्वावसुः, विश्वस्मिन्राजते क्विप्, यजसृजेति षत्वम्,

दीर्घः स्यात् । विश्वावसुः, विश्वाराट् ॥ **वलच्यपित्रादेः** ॥ ८२ ॥ वलच्प्रत्यये पित्रादिवर्जानां दीर्घः स्यात् । आसुतीवलः । अपित्रादेरिति किम् ? पितृवलः मातृवलः ॥ **चितेः कचि** ॥ ८३ ॥ चितेः कचि दीर्घः स्यात् । एकचितीकः ॥ **स्वामिचिह्नस्याऽविष्टाष्टपञ्चभिन्नछिन्नच्छिद्रस्रुवस्वस्तिकस्य कर्णे** ॥ ८४ ॥ स्वामी चिह्नयते येन तद्वाचिनो विष्टादिवर्जस्य कर्णे उत्तरपदे दीर्घः स्यात् । दात्राकर्णः पशुः । स्वामिचिह्नस्येति किम् ? लम्बकर्णः । विष्टादिवर्जनं किम् ? विष्टकर्णः, अष्टकर्णः ॥ **गतिकारकस्य नहिवृतिवृषिव्यधिरुचिसहितनौ कौ** ॥ ८५ ॥ गतिकारकयोर्नह्यादौ किब-

---

षस्य डः, राडिति विकृतनिर्देशात् यदा राडिति रूपं भवति तदैव दीर्घस्तेन विश्वराजावित्यादौ न दीर्घः ॥ वलचि, न पित्रादिस्तस्य । आसुतिः सुरा अस्यास्तीति आसुतीवलः, कृष्यादिभ्यो वलच्, अनेन दीर्घः । वलजित्यत्र चकारः प्रत्ययत्वप्रकाशनाय, तेन कायबलमित्यादौ बलशब्दे परे न दीर्घः ॥ चितेः, कचि । एका चितिरस्मिन्नित्येकचितीकः, शेषाद्वेति कच्, अनेन कचि दीर्घः ॥ स्वामिनः चिह्नं तस्य, विष्टादीनां द्वन्द्वस्ततो नञ्समासस्तस्य, कर्णे । पाणिनीये तु मणिशब्दोऽपि वर्जितः । दात्रं चिह्नं कर्णे यस्य, दात्रमिव वा कर्णौ यस्य दात्राकर्णः । स्वरूपेण यथा कर्णस्य ग्रहणं तथा न स्वामिचिह्नस्य, किन्तु तद्वाचिनामेवान्यथा विष्टादीनां प्रतिषेधो व्यर्थः स्यात् । लम्बौ कर्णौ यस्य सः लम्बकर्णः । यत्पशूनां स्वामिविशेषसम्बन्धज्ञापनार्थं दात्राकारादिचिह्नं क्रियते, तदेव स्वामिचिह्नमत्र ग्राह्यम्, लम्बकर्णता च न स्वामिचिह्नम् ॥ गतिश्च कारकश्च तस्य, नह्यादीनां द्वन्द्वस्तस्मिन्, कौ । उपनह्यत्युपनह्यते वा उपानत्, क्विप्, तल्लोपः, नहाहोर्धतावितिहस्य धः, विरामे वा, अनेन दीर्घः । निवर्तत इति नीवृत्, प्रवर्षतीति प्रावृट्, श्वानं विध्यतीति श्वावित्, नितरां

न्ते उत्तरपदे दीर्घः स्यात्। उपानत्, नीवृत्, प्रावृट्, श्वावित्, नीरुक्, ऋतीषट्, जलासट्, परीतत्॥ **घञ्युपसर्गस्य बहुलम्॥ ८६॥** घञन्ते उत्तरपदे उपसर्गस्य बहुलं दीर्घः स्यात्। नीक्लेदः, नीवारः। बाहुलकात्कचिद्वा, प्रतीवेशः, प्रतिवेशः। क्वचिन्न, विषादः, निषादः॥ **नामिनः काशे॥ ८७॥** नाम्यन्तस्योपसर्गस्याजन्ते काशे उत्तरपदे दीर्घः स्यात्। नीकाशः, वीकाशः। नामिन इति किम्? प्रकाशः॥ **दस्ति॥ ८८॥** दो यस्तादिरादेशस्तस्मिन् परे नाम्यन्तस्योपसर्गस्य दीर्घः स्यात्। नीत्तम्, वीत्तम्। द इति

रोचते नीरुक्। ऋतिं पीडां सहते ऋतीषट्, जलं सहते जलासट्। परितनोतीति परीतत्। श्वाविदृतीषज्जलासडिति कारकस्योदाहरणानि, इतरे गतेः। ऋतीषडित्यत्र भीरुष्ठानादित्वात् षत्वम्। इह क्विब्ग्रहणादन्यत्र धातुग्रहणे तदादिविधिर्लभ्यते, तेनायस्कृतमयस्कार इत्यादौ सकारस्सिद्धो भवति, अन्यथा हि अयस्कृदित्यत्रैव सकारः स्यात्॥ **घञि, उपसर्गस्य, बहुलम्।** घञ्मात्रस्योत्तरपदत्वासम्भवादाह, घञन्त इति। यद्यप्युत्तरपदाधिकारे प्रत्ययग्रहणे प्रत्ययमात्रस्यैव ग्रहणं तथापि घञः उपसर्गपरत्वासम्भवेन घञन्तस्यैव ग्रहणम्। नितरां क्लिद्यतेऽनेनेति नीक्लेदः, 'व्यञ्जनाद् घञ्'। नितरां व्रियते इति नीवारः॥ **नामिनः षष्ठी, काशे।** घञन्ते विकल्पितत्वादजन्ते एवायं काशशब्द इत्याह—अजन्ते। निकाशते विकाशते इति नीकाशो वीकाशः॥ **दः षष्ठी, ति सप्तमी।** उपसर्गस्य नामिन इति पदद्वयमनुवर्तते। निदीयते स्म, विदीयते स्मेति नीत्तं वीत्तम्। दासंज्ञानां चतुर्णामन्यतमात् क्ते कृते ददित्यस्यापवादः स्वरादुपसर्गादिति दा इत्यस्य त्त् इत्यादेशः, दागस्तु निदातुमारब्धम्, आरम्भे क्तः, 'निविस्वन्वनादि'ति त्त्। वितीर्णम्, अत्रादेशरूपो न तकारादिः। सुदत्तमित्यत्र दाधातोर्दत् आदेशेऽपि न तादिरादेशः॥

किम् ? वितीर्णम् । तीति किम् ? सुदत्तम् ॥ **अपील्वादेर्वहे** ॥८९॥ पील्वादिवर्जस्य नाम्यन्तस्य वहे उत्तरपदे दीर्घः स्यात् । ऋषीवहम्, मुनीवहम् । अपील्वादेरिति किम् ? पीलुवहम्, दारुवहम् ॥ **शुनः** ॥ ९० ॥ अस्योत्तरपदे दीर्घः स्यात् । श्वादन्तः, श्वावराहम् । **एकादशषोडशषोडन् षोढा षड्ढा** ॥ ९१ ॥ एकादयो दशादिषु कृतदीर्घत्वादयो निपात्यन्ते । एकादश, षोडश, षट्दन्ता अस्य षोडन्, षोढा, षड्ढा ॥ **द्वित्र्यष्टानां द्वात्रयोऽष्टाः प्राक्शतादनशीतिबहुव्रीहौ** ॥ ९२ ॥ एषां यथासङ्ख्यमेते प्राक्शतात्स-

---

न पील्वादिस्तस्य, वहे । नामिन इति वर्तते । अत्र वहशब्दोऽजन्तो हान्तश्च गृह्यते, वहतीति वहं, अजित्यच्प्रत्ययः, ऋषीणां वहं ऋषीवहम्, एवं मुनीवहमित्यादावजन्तो वहशब्दः, हान्ते तु वहशब्दे ऋषीवहः मुनीवहः इति लिङ्गविशेषाद्विशेषो वाच्यः ॥ शुनः । शुनो दन्तः श्वादन्तः । श्वा च वराहश्च श्ववराहम् ॥ एकश्च दश चैकादश, अत्रैकस्य दशशब्दे उत्तरपदे दीर्घः । षडुत्तरा दश षोडश, अत्र षषोऽन्तस्य उत्वम्, उत्तरपददकारस्य डकारः । षड् दन्ताऽस्य षोडन्, अत्र दन्तशब्दस्य दत्रादेशे कृते दस्य डत्वम्, षषोऽन्तस्य उत्वम्, षड्भिः प्रकारैः षोढा षड्ढा, अत्र धाप्रत्यये षषोऽन्तस्य वोत्वम्, धकारस्य तु नित्यं ढत्वम् ॥ द्विश्च त्रिश्चाष्टा च तेषाम्, द्वाश्च त्रयश्चाष्टा च, प्राक्, शतात्, अशीतिश्च बहुव्रीहिश्च, ततो नञ्समासस्तस्मिन् । द्वाभ्यामधिका दश, द्वौ च दश च वा दादश, अनेन द्विशब्दस्य द्वाऽऽदेशः, एवं त्रयोविंशतिरित्यत्र त्रिशब्दस्य त्रयसादेशः, अष्टात्रिंशदित्यत्राष्टन्शब्दस्याष्टाऽऽदेशः, अत्र सर्वत्रोत्तरपदं सङ्ख्यायां वर्तते, प्राक्शतादित्युक्तेः, अनशीतीतिपर्युदासेनाशीतेः सङ्ख्यायाः प्रतिषेधाया । द्विशतं त्रिशतमित्यादौ तु शतशब्द एव वर्तते । अष्टसहस्रमित्यत्र तु सहस्रशब्दः शतो-

ङ्ख्यायामुत्तरपदे स्युः, न त्वशीतौ बहुव्रीहिविषये च। द्वादश, त्रयोविंशतिः, अष्टात्रिंशत्। प्राक्शतादिति किम्? द्विशतम्, त्रिशतम्, अष्टसहस्रम्। अनशीतिबहुव्रीहाविति किम्? द्व्यशीतिः, द्वित्राः॥ **चत्वारिंशदादौ वा॥ ९३॥** द्वित्र्यष्टानां प्राक्शताच्चत्वारिंशदादावुत्तरपदे यथासङ्ख्यं द्वात्रयोऽष्टा वा स्युः, अनशीतिबहुव्रीहौ। द्वाचत्वारिंशत्, द्विचत्वारिंशत्। त्रयश्चत्वारिंशत्, त्रिचत्वारिंशत्। अष्टाचत्वारिंशत् अष्टचत्वारिंशत्॥ **हृदयस्य हृत् लासलेखाऽण्ये ॥९४॥** अस्य लासलेखयोरुत्तरपदयोरणि ये च प्रत्यये हृत् स्यात्। हृल्लासः, हृल्लेखः, हार्दम्, हृद्यः॥ **पदः पादस्याऽऽज्याऽऽतिगोपहते ॥ ९५ ॥** पादस्याज्यादावुत्तरपदे पदः स्यात्। पदाजिः, पदा-

---

त्तरसङ्ख्यावाची। द्व्यशीतिरित्यत्राशीतिशब्द एवास्ति। द्वौ वा त्रयो वा द्वित्रा इति बहुव्रीहिः॥ **चत्वारिंशदादौ, वा।** पूर्वसूत्रं वर्तते। द्वाभ्यामधिका चत्वारिंशदिति द्विचत्वारिंशद्वाचत्वारिंशद्वा, एवमग्रेऽपि॥ **हृदयस्य, हृत्, लासश्च लेखश्च अण् च यश्च तस्मिन्।** हृदयस्य लासो हृल्लासः, हृदयं लिखतीति हृल्लेखः, हृदयस्येदं हार्दम्, हृदयस्य प्रियः हृद्यः। लेखशब्दस्याण्साहचर्यादणन्तत्वेनाण्ग्रहणेनैव सिद्धे पृथग् लेखग्रहणमुत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तग्रहणं न भवतीति न्यायं ज्ञापयति। हृदयशब्दसमानार्थेन हृच्छब्देनैव हृल्लासादीनां सिद्धौ हृदादेशविधानं लासादिषु परेषु हृदयशब्दप्रयोगनिवृत्त्यर्थम्॥ **पदः, पादस्य, आजिश्चाऽऽतिश्च गश्चोपहतश्च तस्मिन्।** पादाभ्यामजति अतति चेत्यौणादिके इणि पदाजिः पदातिः। आजिरिति निर्देशात् 'अद्यञ्क्यवलच्यजेर्वी' इत्यनेन वी न भवति। पादाभ्यां गच्छतीति पदगः 'नाम्नो गम' इत्यादिना डः। पादाभ्यामुपहतः पदोपहतः, पादशब्दसमानार्थः पदशब्दोऽप्यस्ति, तेन सिद्धावप्याज्यादिषूत्तरपदेषु पादशब्दप्रयोगनिवृत्त्यर्थं वचनम्। अत्र पादशब्दः प्राण्यङ्गवाचको न

तिः, पदगः, पदोपहतः ॥ **हिमहतिकाषिषे पद् ॥ ९६ ॥** हिमादावुत्तरपदे ये च प्रत्यये पादस्य पत्स्यात् । पद्धिमम्, पद्धतिः, पत्काषी, पद्याः शर्कराः ॥ **ऋचः शसि ॥ ९७ ॥** ऋचां पादस्य शादौ शस्प्रत्यये पत्स्यात् । पच्छो गायत्रीं शंसति । ऋच इति किम् ? पादशः श्लोकं वक्ति । द्विःशपाठात् स्यादिशसि न स्यात्, ऋचः पादान् पश्य ॥ **शब्दनिष्कघोषमिश्रे वा ॥ ९८ ॥** शब्दादावुत्तरपदे पादस्य पद् वा स्यात् । पच्छब्दः, पादशब्दः । पन्निष्कः, पादनिष्कः । पद्घोषः, पादघोषः । पन्मिश्रः पादमिश्रः ॥ **नस् नासिकायाः तःक्षुद्रे ॥ ९९ ॥** नासिकायास्तस्प्रत्यये क्षुद्रे

तु परिमाणवचनः, गत्यादौ प्राण्यङ्गस्यैव करणत्वात् ॥ **हिमश्च हतिश्च काषिश्च यश्च तस्मिन् पद्** । पादस्येति वर्तते । पादयोः हिमं पद्धिमम्, पादाभ्यां हृतिः पद्धतिः, पादौ कषतीत्येवंशीलः पत्काषी, पादौ विध्यन्तीति पद्याः शर्कराः ॥ **ऋचः षष्ठी, शकारादिः शस् शंस् तस्मिन्** । पादस्य पदिति पदद्वयमनुवर्तते । पादं पादं गायत्र्याः शंसतीति, पच्छो गायत्रीं शंसति । नन्विह पादं गायत्र्याश्शंसतीति गायत्र्याः पादशब्देन सम्बन्धात् षष्ठ्याः इव गायत्रीं पच्छः शंसतीत्यत्रापि षष्ठी स्यात्, कथं गायत्रीमिति द्वितीयेति चेन्न, शंसनक्रियापेक्षया कर्मत्वात् । श्लोकस्य पादं पादं वक्तीति पादशः श्लोकं वक्ति, अत्र ऋचः सम्बन्धिपादशब्दाभावान्न पदादेशः । शकारद्वयपाठात् शस्यादिविभक्तिसम्बन्धिशसि परे न पदादेशः, यथा ऋचः पादान् पश्य ॥ **शब्दादीनां द्वन्द्वस्तस्मिन्, वा** । पादस्य पदित्यनुवर्तते । पादस्य शब्दः पच्छब्दः पादशब्दो वा । एवमग्रेऽपि ॥ **नस्, नासिकायाः, तः, क्षुद्रे** । नासिकायां नासिकाया वा नस्तः 'अहीयरुहोऽपादाने' इति वा तसुः प्रत्ययः, एवं नासिकायां

चोत्तरपदे नस् स्यात् । नस्तः, नःक्षुद्रः ॥ **ये ऽवर्णे** ॥ १०० ॥ नासिकाया ये प्रत्यये वर्णादन्यत्रार्थे नस्स्यात् । नस्यम् । य इति किम् ? नासिक्यं पुरम् । अवर्ण इति किम् ? नासिक्यो वर्णः ॥ **शिरसः शीर्षन्** ॥ १०१ ॥ शिरसो ये प्रत्यये शीर्षन् स्यात् । शीर्षण्यः स्वरः, शीर्षण्यं तैलम् । य इत्येव ? शिरस्तः, शिरस्यति ॥ **केशे वा** ॥१०२॥ शिरसः केशविषये ये प्रत्यये शीर्षन् वा स्यात् । शीर्षण्याः, शिरस्याः केशाः ॥ **शीर्षः स्वरे तद्धिते** ॥ १०३ ॥ शिरसः स्वरादौ तद्धिते शीर्षः स्यात् । हास्तिशीर्षिः, शीर्षिकः ॥ **उदकस्योदः पेषंधिवासवाहने** ॥ १०४ ॥ उदकस्य पेषमादावुत्तरपदे उदः स्यात् । उदपेषं पिनष्टि, उदधिर्घटः, उदवासः, उद-

---

नासिकाया वा क्षुद्रः नःक्षुद्रः ॥ **ये, न वर्णोऽवर्णस्तस्मिन्** । नासिकाया नसिति वर्तते । नासिक्यै हितं नस्यम्, 'प्राण्यङ्गरथे' ति यः प्रत्ययः । नासिक्यं पुरम्, चातुरर्थिको ञ्यः, सूत्रे तु निरनुबन्धस्य यस्य ग्रहणात्सानुबन्धस्याऽस्य न ग्रहणम् । नासिकायां भवो नासिक्यो वर्णः, 'दिगादिदेहांशाद्यः' इति यप्रत्ययः ॥ **शिरसः, शीर्षन्** । ये इति वर्तते । शिरसि भवः शीर्षण्यः स्वरः, शिरसे हितं शीर्षण्यं तैलम् । शिरः इच्छति शिरस्यति, क्यन् प्रत्ययः, सोऽत्र न गृह्यते सानुबन्धत्वात् ॥ **केशे, वा** । शिरसि भवाः शीर्षण्याः शिरस्याः वा, केशविषयत्वाद्वा शीर्षन् ॥ **शीर्षः, स्वरे, तद्धिते** । हस्तिशिर इव शिरो यस्यासौ हस्तिशिराः, उष्ट्रमुखादय इति समासः, हस्तिशिरसोऽपत्यं हास्तिशीर्षिः । 'बाह्वादिभ्यो गोत्रे' इति इञ्प्रत्ययः, अनेन शीर्ष आदेशः । शिरसा तरतीति शीर्षिकः, इकप्रत्ययः, अनेन शीर्ष आदेशः ॥ **उदकस्य, उदः, पेषमादीनां द्वन्द्वस्तस्मिन्** । उदकेन पिनष्टि–उदपेषं पिनष्टि, 'स्वस्नेहनार्थादि'ति णम् । उदकं धीयतेऽस्मिन्नित्युदधिः, 'व्याप्यादाधारे' इक्प्रत्ययः ।

वाहनः ॥ **वैकव्यञ्जने पूर्ये** ॥ १०५ ॥ उदकस्यासंयुक्तव्यञ्जनादौ पूर्यमाणार्थे उत्तरपदे उदो वा स्यात् । उदकुम्भः, उदककुम्भः । व्यञ्जन इति किम् ? उदकामत्रम् । एकेति किम् ? उदकस्थालम् । पूर्य इति किम् ? उदकदेशः ॥ **मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहे वा** ॥ १०६ ॥ एषूत्तरपदेषु उदकस्योदो वा स्यात् । उदमन्थः, उदकमन्थः । उदौदनः, उदकौदनः । उदसक्तुः, उदकसक्तुः । उदबिन्दुः, उदकबिन्दुः । उदवज्रः, उदकवज्रः । उदभारः, उदकभारः । उदहारः, उदकहारः । उदवीवधः; उदकवीवधः । उदगाहः, उदकगाहः ॥ **नाम्न्युत्तरपदस्य च** ॥ १०७ ॥ उदकस्य पूर्वपदस्योत्तरपदस्य च संज्ञायामुदः स्यात् । उदमेघः, उदवाहः, उदपानम्, उदधिः, लवणोदः, कालोदः ॥ **ते लुग्वा** ॥ १०८ ॥

उदकस्य वासः, एवमग्रेऽपि । अनामार्थं वचनम् । नाम्नि त्वग्रे वक्ष्यते ॥ **वा, एकश्च तद्व्यञ्जनश्च तस्मिन्, पूर्ये** । उदकस्योद इति वर्तते । उदकेन पूर्णः कुम्भः । उदकामत्रम्, उदकस्यामत्रम्, अत्र व्यञ्जनपरत्वं नास्ति । उदकेनोपलक्षितो देशः उदकदेशः, अत्र देशो न पूर्यते उदकेन ॥ मन्थादीनां द्वन्द्वस्तस्मिन् वा । अनुवृत्तिः पूर्ववत् । उदकेन मथ्यते उदमन्थः, कर्मणि घञि कारकं कृतेति समासः, द्रवद्रव्यसंस्कृताः सक्थवः मन्थः, उदकेन मन्थ इति विग्रहे तु तृतीयासमासः । उदकेनोपसिक्तः ओदनः, अत्र मयूरव्यंसकत्वात्समासः, उपसिक्तक्रियायाश्च वृत्तावन्तर्भावादुदकौदनयोस्सामर्थ्यम् । वीवधशब्दोऽव्युत्पन्नः, पथि पर्याहारे च वर्तते ॥ **नाम्नि, उत्तरश्च तत् पदश्च तस्य, च** । अनुवृत्तिः पूर्ववत्, उत्तरपदाधिकारात्पूर्वपदस्यैव स्यादत उत्तरपदस्येत्युक्तम्, चकाराभावे च पूर्वपदस्य न स्यात् । उदमेघो नाम यस्यौदमेघी पुत्रः । उदवाहो नाम यस्यौदवाही पुत्रः । लवणोद इत्यादि तूत्तरपदस्योदकस्योदाहरणम् ॥ ते,

संज्ञाविषये पूर्वोत्तरपदे लुग्वा स्यात् । देवदत्तः, देवः, दत्तः ॥ **ह्रयन्तरनवर्णोपसर्गादप ईप् ॥ १०९ ॥** ह्रयन्तभ्यामवर्णान्तवर्जोपसर्गेभ्यश्च परस्याप उत्तरपदस्य ईप् स्यात् । द्वीपम्, अन्तरीपम्, नीपम्, समीपम् । उपसर्गादिति किम् ? स्वापः । अनवर्णेति किम् ? प्रापम्, परापम् ॥ **अनोर्देशे उप् ॥ ११० ॥** अनोः परस्यापो देशेऽर्थे उप्स्यात् । अनूपो देशः । देश इति किम् ? अन्वीपं वनम् ॥ **खित्यनव्ययारुषो मोऽन्तो ह्रस्वश्च ॥ १११ ॥** स्वरान्तस्यानव्ययस्यारुषश्च खित्प्रत्ययान्ते उत्तरपदे मोऽन्तो यथासम्भवं ह्रस्वादेशश्च स्यात् । ज्ञंमन्यः, कालिंमन्या, अरुन्तुदः । खितीति किम् ?

लुग्, वा । स्पष्टम् ॥ **न वर्ण अनवर्णः**, अनवर्णश्चासावुपसर्गश्च तस्मात्, द्व्यश्चान्तश्चानवर्णोपसर्गश्च तस्मादपः ईप्, द्विर्गता आपो यस्मिन्निति द्वीपम् । अन्तर्गताः निर्गताः सङ्गता वाऽऽपोऽस्मिन्निति विग्रहः । शोभना आपः स्वापः, अत्र सुशब्दः पूजायां न तूपसर्गः, ऋक्पूःपथ्यपोऽदिति सर्वत्रात्प्रत्ययः, प्रत्युदाहरणे तु नात्समासान्तः । प्रापमित्यादौ त्ववर्णान्तोपसर्ग एव ॥ **अनोः, देशे, उप्** । अनुगता आपोऽस्मिन्नित्यनूपो देशः । वने तु न उपादेशः किन्तु पूर्वसूत्रेण आपः ईप् अत्समासान्तः ॥ **ख् इदनुबन्धो यस्य तस्मिन्, नाव्ययमनव्ययम्, न रुषरुष्, अनव्ययश्चारुष् च तस्य, मः** अन्तः, ह्रस्वः, च । अरुर्मर्दनादनव्ययानां स्वरान्तत्वं लभ्यते, अतः स्वरान्तस्येत्युक्तम् । ज्ञमात्मानं कालीमात्मानं वा मन्यत इति ज्ञंमन्यः कालिंमन्या, कर्तुः खशिति खश्, अनेन पूर्वपदस्य मोऽन्तः । कालीशब्दस्य तु ह्रस्वादेशोऽपि । अरुः तुदतीत्यरुन्तुदः मर्मवेधकः ' बहुविघ्तरुरि 'ति खश्, अनेन मोऽन्तः, संयोगस्यादाविति सलोपः । ज्ञमानीत्यत्र तु ' मन्याण्णिन् ' णिन् प्रत्ययः, खित्प्रत्ययान्तोत्तरपदाभावान्न मोऽन्तः । दोषाऽऽत्मानं मन्यते दोषामन्यम् । दोषाशब्दो

ज्ञमानी । अनव्ययस्येति किम् ? दोषामन्यमहः ॥ **सत्यागदास्तोः कारे** ॥ ११२ ॥ एभ्यः कारे उत्तरपदे मोऽन्त स्यात् । सत्यङ्कारः, अगदङ्कारः, अस्तुङ्कारः ॥ **लोकम्पृणमध्यन्दिनानभ्याशमित्यम्** ॥ ११३ ॥ एते कृतपूर्वपदमोऽन्ता निपात्यन्ते । लोकम्पृणः, मध्यन्दिनम्, अनभ्याशमित्यः ॥ **भ्राष्ट्राग्नेरिन्धे** ॥ ११४ ॥ आभ्यामिन्धे उत्तरपदे मोऽन्तः स्यात् । भ्राष्ट्रमिन्धः, अग्निमिन्धः ॥ **अगिलाद्विलगिलगिलयोः** ॥ ११५ ॥ गिलान्तवर्जात्पूर्वपदात्परे गिले गिलगिले चोत्तरपदे मोऽन्तः स्यात् । तिमि-

---

रात्रिवाचकोऽव्ययः । अव्ययप्रतिषेधादव्ययाच्च परतः खितोऽम्भवेन खिदन्तस्य ग्रहणम्, अरुश्शब्दोपादानव्ययस्य व्यञ्जनान्तस्य मोऽन्तो न भवति ॥ **सत्यश्चागदश्चास्तुश्च तस्मात्, कारे** । मोऽन्त इति वर्तते । सत्यङ्करोति सत्यस्य कार इति वा, एवमग्रेऽपि, अस्त्विति निपातः क्रियाप्रतिरूपकोऽभ्युगमे वर्तते न तुवन्तः, नाम नाम्नेति समासाप्राप्तेः ॥ **लोकम्पृणश्च मध्यन्दिनश्चानभ्याशमित्यश्च** । लोकं पृणति लोकस्य वा पृणः लोकम्पृणः । आद्ये 'मूलविभुजादयः' इति कः, षष्ठीसमासे तु 'नाम्युपान्त्ये'ति कः । मध्यं दिनस्य, मध्यञ्च तद्दिनञ्चेति वा मध्यन्दिनम्, अश्नोतेर्घञि अभ्याश इति रूपम्, अनभ्याशं दूरं इत्यं गन्तव्यमस्येति अनभ्याशमित्यः दूरतः परिहर्तव्येत्यर्थः ॥ **भ्राष्ट्राग्निश्च तस्मात्, इन्धे**, मोऽन्त इति वर्तते, एवमग्रेऽपि भ्राष्ट्रस्येन्धः, भ्राष्ट्रमिन्धः । एवमग्निमिन्धः । **न गिलोऽगिलस्तस्मात्, गिलश्च गिलगिलश्च तयोः** । तिमिं गिलतीति तिमिंगिलः । गिलं गिलतीति गिलगिलः, तिमीनां गिलगिलः । गिलगिलेति निर्देशादेव गिलेति पूर्वपदाद्गिले उत्तरपदे मोऽन्तो न भवतीत्यगिलादिति प्रतिषेधे व्यर्थेऽपि तदन्तस्यैव प्रतिषेधार्थं तद्ग्रहणम्, अत एव गिलान्तवर्जादित्युक्तम् । स्वरान्तस्य

ङ्गिलः, तिमिङ्गिलगिलः । अगिलादिति किम् ? तिमिङ्गिलगिलः ॥ **भद्रोष्णात्करणे** ॥ ११६ ॥ आभ्यां परः करणे उत्तरपदे मोऽन्तः स्यात् । भद्रङ्करणम्, उष्णङ्करणम् ॥ **नवाऽखित्कृदन्ते रात्रे** ॥ ११७ ॥ खिद्वर्जे कृदन्ते उत्तरपदे परे रात्रेर्मोऽन्तो वा स्यात् । रात्रिञ्चरः, रात्रिचरः । खिद्वर्जनमिति किम् ? रात्रिमन्यमहः । कृदन्त इति किम् ? रात्रिसुखम् । अन्तग्रहणं किम् ? रात्रयिता ॥ **धेनोर्भव्यायाम्** ॥ ११८ ॥ धेनोर्भव्यायामुत्तरपदे मोऽन्तो वा स्यात् । धेनुम्भव्या, धेनुभव्या ॥ **अषष्ठीतृतीयादन्याद्योऽर्थे** ॥ ११९ ॥ अषष्ठ्यन्तादतृतीयान्ताच्चान्यादर्थे उत्तरपदे द् अन्तो वा स्यात् । अन्यदर्थः, अन्यार्थः । षष्ठ्यादिवर्जनं किम् ? अन्यस्यान्येन वाऽर्थोऽन्यार्थः ॥ **आशीराशाऽऽस्थिताऽऽस्थोत्सुकोतिरागे** ॥१२०॥

गिलशब्दस्य पर्युदासात्स्वरान्तस्यैव मोऽन्तविधिर्न तु धूर्गिल इत्यादिव्यञ्जनान्तपूर्वपदस्य ॥ **भद्रश्चोष्णश्च तस्मात्, करणे** । भद्रस्योष्णस्य करणम्, कृतीति समासः ॥ **नवा, न खिदखित्, अखिच्चासौ कृच्च** । सोऽन्ते यस्य तस्मिन्, रात्रेः । रात्रौ चरति रात्रिञ्चरः, चरेष्टः, अनेन वा मोऽन्तः । रात्रिमात्मानं मन्यते रात्रिमन्यः, पूर्ववत् । रात्रेः सुखम्, अत्र सुखशब्दोऽव्युत्पन्नो न कृदन्त इति मोऽन्तो न भवति । रात्रिरिवाचरति, क्विप्, लुक्, तृच् च रात्रयिता, अत्र कृत्परत्वेऽपि न मोऽन्तः, इदमेवान्तग्रहणमिहोत्तरपदाधिकारे प्रत्ययग्रहणे प्रत्ययस्यैव ग्रहणं न तदन्तस्येति न्यायस्य ज्ञापकम् । **धेनोः भव्यायाम्** । धेनुश्चासौ भव्या च धेनुम्भव्या । धेनोर्विशेषणत्वेन विवक्षितत्वात् पूर्वनिपातः । विशेष्यत्वेऽपि धेनोर्भव्यायामिति भव्याशब्दस्य निमित्तत्वेनोपादानाद्धेनोः पूर्वनिपातः ॥ **षष्ठी च तृतीया च, न षष्ठीतृतीयं तस्मात्, अन्यात्, दः अर्थे** । अन्यश्चासावर्थश्च, अन्योऽर्थोऽस्येति वाऽन्यदर्थः ॥ **आशीरादीनां द्वन्द्वस्तस्मिन्** ।

एषूत्तरपदेष्वषष्ठीतृतीयादन्याद्योऽन्तः स्यात् । अन्यदाशीः, अन्यदाशा, अन्यदास्थितः, अन्यदास्था, अन्यदुत्सुकः, अन्यदूतिः, अन्यद्रागः । अषष्ठीतृतीयादित्येव ! अन्यस्य अन्येन वा आशीः अन्याशीः ॥ **ईयकारके** ॥ १२१ ॥ अन्याद् ईये प्रत्यये कारके चोत्तरपदे दोऽन्तः स्यात् । अन्यदीयः, अन्यत्कारकः ॥ **सर्वादिविश्वद्वेवाद् डद्रिः कयश्चौ** ॥ १२२ ॥ सर्वादेर्विश्वगदेवाभ्याञ्च परतः किबन्तेऽञ्चावुत्तरपदे डद्रिरन्तः स्यात् । सर्वद्रीचः, द्वयद्रयङ्, कद्रयङ्, विश्वद्रयङ्, देवद्रयङ् । कीति किम् ? विश्वगञ्चनम् ॥ **सहसमः सध्रिसमि** ॥ १२३ ॥ अनयोः स्थाने किबन्तेऽञ्चावुत्तरपदे यथासङ्ख्यं सध्रिसमी स्याताम् । सध्रयङ्, सम्यङ्, कयञ्चावित्येव ! सहाञ्च-

---

अन्यदाशीरित्यादयः कर्मधारयाः, सर्वत्र च दोऽन्तः ॥ ईयश्च कारकश्च तस्मिन् । पृथग्योगादषष्ठीतृतीयादिति निवृत्तम् । अन्याद्ः इति वर्तते । अन्यस्यायमन्यदीयः, गहादित्वादीयप्रत्ययः, अन्यस्यान्येन वा कारक इति याजकादिभिरिति कारकं कृता इति च समासः ॥ सर्व आदिर्यस्य, सर्वादिश्च विश्वक् च देवश्च तस्मात्, डद्रिः, किबन्तोऽञ्चिस्तस्मिन् । सर्वमञ्चतीति सर्वद्रयङ्, तस्य द्वितीयाबहुवचने सर्वद्रीचः, क्विप्, लुक्, अञ्चोऽनर्चायां नलोपः अनेन डद्रि आदेशः, अच प्राग्दीर्घश्च सर्वद्रीचः । द्वावञ्चति, क्विप्, अनेन डद्रिः, डित्यन्त्यस्वरादेः, अञ्चोऽनर्चायाम्, अच इति नोऽन्तः, द्वयद्रयङ् । किमञ्चतीति कद्रयङ् । विश्वगञ्चतीति विश्वद्रयङ् । देवानञ्चतीति देवद्रयङ् । विश्वगञ्चनम्, अत्राञ्चतिर्न किबन्तः, धातुग्रहणे तदादेस्समुदायस्य ग्रहणं प्राप्नोतीति कीत्युक्तम् ॥ सहश्च समश्च तस्य सध्रिश्च समिश्च सूत्रत्वाल्लोपः । कयञ्चाविति वर्तते, यथासङ्ख्यपरिभाषा च । सह अञ्चतीति सध्रयङ्, अनेन सध्र्यादेशः, सम्यगञ्चतीति सम्यङ्, समः सम्यादेशः । स्पष्टम् ॥

नम् ॥ **तिरसस्तिर्यति** ॥ १२४ ॥ अकारादौ किबन्तेऽञ्चावुत्तरपदे तिरसस्तिरिः स्यात् । तिर्यङ् । अतीति किम् ? तिरश्चः ॥ **नञ् अत्** ॥ १२५ ॥ उत्तरपदे परे नञ् अः स्यात् । अचौरः पन्थाः । उत्तरपद इत्येव ? न भुङ्क्ते ॥ **त्यादौ क्षेपे** ॥ १२६ ॥ त्यादन्ते पदे परे निन्दायां गम्यमानायां नञ् अः स्यात् । अपचसि त्वं जाल्म ! । क्षेप इति किम् ? न पचति चैत्रः ॥ **नगोऽप्राणिनि वा** ॥१२७॥ अप्राणिन्यर्थे नगो वा निपात्यते । नगः, अगो गिरिः । अप्राणिनीति किम् ? अगोऽयं शीतेन ॥ **नखादयः** ॥ १२८ ॥ एते अकृताकाराद्यादेशा निपात्यन्ते । नखः, नासत्यः ॥ **अन्स्वरे** ॥ १२९ ॥

तिरसः, तिरि, अति । अनुवृत्तिः पूर्ववत् । तिरोऽञ्चतीति तिर्यङ्, अत्र अञ्च प्राग्दीर्घश्चेति चादेशो न भवत्यतः अकारादेरञ्चतेः सद्भावात् तिरसस्तिर्यादेशः, तिरश्चः इत्यत्र तु शसि चादेशेऽकारादेरञ्चतेरभावेन न तिर्यादेशः ॥ **नञ्, अत्** । न विद्यते चौरो यत्र स अचौरः पन्थाः । अनेन नञोऽकारादेशः । न भुङ्क्ते, अत्र समासाभावान्न पूर्वोत्तरपदत्वं कस्यापीति नाकारादेशः ॥ **त्यादौ क्षेपे** । ति आदिर्यस्य तस्मिन् क्षेपे । पूर्वसूत्रं वर्तते । न पचस्यपचसि त्वं जाल्म, कुत्सितं पचसीत्यर्थः । तिबन्तेन समासाभावादप्राप्ते, अमानोनाः प्रतिषेधवचनाः इत्यकारेण प्रतिषेधार्थीयेनैवापचसीत्यादिसिद्धौ क्षेपे नञः श्रवणनिवारणार्थञ्च वचनम् ॥ **नगः, न प्राणी तस्मिन् वा** । न गच्छतीति नगः, 'नाम्नो गमः खङ्गावि 'ति डप्रत्ययः, अन्त्यस्वरादिलोपः । नञत् प्राप्तो निषिध्यते, पक्षेऽगः । प्राणिवाचित्वे तु पूर्वसूत्रेण नित्यमः । पूर्वेण नित्यमादेशे प्राप्ते विकल्पार्थमिदम् ॥ **नखादयः** । न खमस्येति नखः, उष्ट्रमुखादित्वात्समासः । न सत्योऽसत्यः न असत्यः नासत्यः । **अन्, स्वरे** । नञः इति वर्तते । न विद्यतेऽन्तोऽस्येत्यनन्तः, अनेनान्, अनिति स्वरूप-

स्वरादावुत्तरपदे नञोऽन् स्यात् । अनन्तो जिनः ॥ **कोः कत्तत्पुरुषे ॥ १३० ॥** स्वरादावुत्तरपदे कोस्तत्पुरुषे कत्स्यात् । कदश्वः । तत्पुरुष इति किम् ? कूष्ट्रो देशः । स्वर इत्येव ? कुब्राह्मणः ॥ **रथवदे ॥ १३१ ॥** रथे वदे चोत्तरपदे कोः कत्स्यात् । कद्रथः, कद्वदः ॥ **तृणे जातौ ॥ १३२ ॥** जातावर्थे तृणे उत्तरपदे कोः कत्स्यात् । कत्तृणा रोहिषाख्या तृणजातिः ॥ **कत्रि ॥ १३३ ॥** कोः किमो वा त्रावुत्तरपदे कत्स्यात् । कत्रयः ॥ **काऽक्षपथोः ॥ १३४ ॥** अन-

---

निर्देशान्नलोपो द्वित्वञ्च न भवति । स्वर इत्युत्तरपदस्य विशेषणात्तदादिविधिः । **कोः, कत्, तत्पुरुषे** । स्वरे इति वर्तते । कुत्सितोऽश्वः कदश्वः, गतिकन्यस्तत्पुरुष इति प्रतिपदोक्तस्तत्पुरुषोऽत्र ग्राह्यः । तेन कुं पृथिवीमतीतः कतीतः, अत्र कोः कन्न भवति, श्रितादिभिरिति समासस्य प्रतिपदोक्तत्वाभावात्, द्वितीयान्तं श्रितादिभिस्समस्यते इति तदर्थत्वेन तत्र द्वितीयान्तमित्यस्य सामान्यवचनत्वात् । कुत्सिता उष्ट्राः यस्मिन्देशे कूष्टः, अत्र न तत्पुरुषः । कुत्सितो ब्राह्मणः कुब्राह्मणः, अत्र नोत्तरपदं स्वरादि ॥ **रथश्च वदश्च तस्मिन्** । कोः कदिति सम्बध्यते । कुत्सितो रथः कद्रथः ॥ **तृणे, जातौ** । अनुवृत्तिः पूर्ववत् । कुत्सितं तृणमस्याः कत्तृणा, अत्र कत्तृणशब्दो जातिवाची, अवयवार्थस्तु वृत्तावसन्नेव दर्श्यते ॥ **कत्, त्रि** । त्रावित्येव सिद्धे कत्रीति करणं किमोऽपि परिग्रहार्थम् । कुत्सिताः के वा त्रयः कत्रयः ॥ **का, अक्षश्च पन्था च तयोः** । कोरिति सम्बध्यते । अक्षशब्दस्याकारान्तस्य कृतसमासान्तस्य चाविशेषेण ग्रहणम् । कुत्सितोऽक्षः काक्षः कुत्सितमक्षि अक्षं वाऽस्य काक्षः, 'सक्थ्यक्ष्णः स्वाङ्गे' इत्यक्षिशब्दस्य टप्रत्ययः । कुत्सितः पन्थाः कापथम्, ऋक्पूरित्यत्प्रत्ययः, नोऽपदस्य तद्धिते इत्यन्त्यस्वरादेर्लुक, पथः सङ्ख्येति नंपु-

योरुत्तरपदयोः कोः का स्यात्। काऽक्षः, कापथम्॥ **पुरुषे वा** ॥ १३५ ॥ पुरुषे उत्तरपदे कोः का वा स्यात्। कापुरुषः, कुपुरुषः॥ **अल्पे** ॥ १३६ ॥ ईषदर्थस्य कोरुत्तरपदे का स्यात्। कामधुरम्, काऽच्छम्॥ **काकवौ वोष्णे** ॥ १३७ ॥ उष्णे उत्तरपदे कोः काकवौ वा स्याताम्। कोष्णम्, कवोष्णम्, पक्षे यथाप्राप्तमिति। तत्पुरुषे, कदुष्णम्, बहुव्रीहौ, कूष्णो देशः॥ **कृत्येऽवश्यमो लुक्** ॥ १३८ ॥ कृत्यान्ते उत्तरपदेऽवश्यमो लुक् स्यात्। अवश्यकार्यम्। कृत्य इति किम्? अवश्यं लावकः॥ **समः ततहिते वा** ॥१३९॥ तते हिते चोत्तरपदे समो लुग्वा स्यात्। सततम्, सन्ततम्। सहितम्, संहितम्॥ **तुमश्च मनःकामे** ॥ १४० ॥ तुम्समोर्मनसि कामे चोत्तरपदे लुक् स्यात्। भोक्तुमनाः, गन्तुकामः, समनाः, सकामः॥

सकत्वम्, बहुव्रीहौ त्वाश्रयलिङ्गता॥ **पुरुषे, वा**। **कोः का इत्यनुवर्तते**। कुत्सितः पुरुषः कापुरुषः कुपुरुषः, अनीषदर्थे विकल्पोऽयम्, ईषदर्थे तु परत्वादुत्तरेण नित्यमेव॥ **अल्पे**, अनुवृत्तिः पूर्ववत्। ईषन्मधुरं कामधुरम्, ईषदच्छं काच्छम्। स्वरादावपि परत्वादीषदर्थे कादेश एव भवति॥ **का च कवश्च, वा, उष्णे**। ईषत्कुत्सितं वा उष्णं कवोष्णं कोष्णम्, पक्षे कदादेशः, कदुष्णम्। बहुव्रीहौ तु न कदादेशस्तत्पुरुषे इत्युक्तेः, तेन कूष्णो देशः॥ **कृत्ये, अवश्यमः, लुक्**। अवश्यङ्कार्यमवश्यकार्यम्, अनेनान्त्यस्य मकारस्य लुक्, कार्यमिति कृत्यप्रत्ययान्तोत्तरपदपरत्वात्, अव्ययं प्रवृद्धादिभिरिति, मयूरव्यंसकादिना वा समासः। अवश्यंलावकः, लावक इति कृत्यप्रत्ययान्तो न॥ **समः, ततश्च हितश्च तस्मिन्, वा**। लुगिति वर्तते। सन्तन्यते स्मेति सततं सन्ततं वा। सन्धीयते स्मेति सहितं संहितं वा, 'धाग' इति हिरादेशः। **तुमः, च मनश्च, कामश्च तस्मिन्**। लुगिति वर्तते। भोक्तुं मनोऽस्यास्तीति भोक्तुमनाः, गन्तुं

मांसस्यानड्घञि पचि नवा ॥ १४१ ॥ अनड्घञन्ते पचावुत्तरपदे मांसस्य लुग्वा स्यात् । मांस्पचनम्, मांसपचनम् । मांस्पाकः, मांसपाकः ॥ **दिक्शब्दात्तीरस्य तारः** ॥ १४२ ॥ अस्मात्परस्य तीरस्योत्तरपदस्य तारो वा स्यात् । दक्षिणतारम्, दक्षिणतीरम् ॥ **सहस्य सोऽन्यार्थे** ॥ १४३ ॥ उत्तरपदे परे बहुव्रीहौ सहस्य सो वा स्यात् । सपुत्रः, सहपुत्रः । अन्यार्थ इति किम्? सहजः ॥ **नाम्नि** ॥ १४४ ॥ उत्तरपदे परे बहुव्रीहौ सहस्य सः संज्ञायां स्यात् । साश्वत्थं वनम् । अन्यार्थ इत्येव? सहदेवः कुरुः ॥ **अदृश्याधिके** ॥ १४५ ॥ अदृश्यं परोक्षम्, अधिकमधिरूढं तदर्थयोरुत्तरपदयोर्बहुव्रीहौ सहस्य सः स्यात् । साग्निः कपोतः, सद्रोणा खारी ॥ **अकालेऽव्ययीभावे** ॥ १४६ ॥ अकालवाचिन्युत्तरपदे सहस्याव्ययीभावे सः स्यात् । सब्रह्म साधूनाम् । अकाल इति किम्? सहपूर्वाह्णं शेते । अव्ययीभाव इति किम्? सहयुध्वा ॥ **ग्रन्थाऽन्ते**

कामोऽस्यास्तीति गन्तुकामः । सम्यग् मनोऽस्येति समनाः, सहशब्देनापि सिद्धौ समः श्रुतिनिवृत्त्यर्थं वचनम् । **मांसस्य, अनट् च घञ् च तस्मिन्, पचि, नवा** । मांसस्य पचनं मांस्पचनं मांसपचनम्, एवमग्रे । **दिशि दृष्टः शब्दः दिक्शब्दस्तस्मात्, तीरस्य तारः** । दक्षिणस्यास्तीरं दक्षिणतीरम् ॥ **सहस्य, सः, अन्यस्यार्थस्तस्मिन्** । सह पुत्रेणागतः सपुत्रः, सहपुत्रो वा ॥ **नाम्नि** । पृथग्योगाद्वेति निवृत्तम् । सहाश्वत्थेन वर्तते साश्वत्थम् । सह दीव्यतीति सहदेवः, नात्र बहुवीहिः ॥ **अदृश्यश्चाधिकश्च तस्मिन्** । अग्निना सह वर्तते साग्निः, अत्राग्निरदृश्यः । सह द्रोणेन वर्तते सद्रोणा खारी, द्रोणेनाधिका खारीत्यर्थः ॥ **अकाले, अव्ययीभावे** । ब्रह्मणः सम्पत् सब्रह्म, सम्पत्तावव्ययीभावः । कालवाचिन्युत्तरपदे तु सहपूर्वाह्णं शेते, साकल्येऽव्ययीभावः । सह योधितवानिति सहयुध्वा,

॥ १४७ ॥ एतद्वाच्युत्तरपदे सहस्याव्ययीभावे सः स्यात् । सकलं ज्योतिषमधीते ॥ **नाऽऽशिष्यगोवत्सहले** ॥ १४८ ॥ गवादिवर्जे उत्तरपदे आशिषि गम्यायां सहस्य सो न स्यात् । स्वस्ति गुरवे सहशिष्याय । आशिषीति किम् ? सपुत्रः । गवादिवर्जनं किम् ? स्वस्ति तुभ्यं सगवे, सहगवे, सवत्साय, सहवत्साय, सहलाय, सहहलाय ॥ **समानस्य धर्माऽऽदिषु** ॥ १४९ ॥ धर्मादावुत्तरपदे समानस्य सः स्यात् । सधर्मा, सनामा ॥ **सब्रह्मचारी** ॥ १५० ॥ अयं निपात्यते ॥ **दृक्दृशदृक्षे** ॥ १५१ ॥ एषूत्तरपदेषु समानस्य सः स्यात् । सदृक्, सदृशः, सदृक्षः ॥ **अन्यत्यदादेराः** ॥ १५२ ॥ अन्यस्य त्यदादेश्च दृगादावुत्तरपदे आः स्यात् । अन्यादृक्, अन्यादृशः, अन्यादृक्षः । त्यादृक्, त्यादृशः, त्यादृक्षः । अस्मादृक्, अस्मादृशः, अस्मादृक्षः ॥ **इदमेकम् ईत्की** ॥ १५३ ॥ दृगादावुत्तरपदे

सहराजभ्यां कृग्युधेरिति कनिप् । ग्रन्थस्यान्तस्तस्मिन् । कलामन्तं कृत्वा सकलं ज्योतिषमधीते, अत्र कलाशब्दः कालविशेषवचनोऽपि तत्सहचारिषु ग्रन्थेषु वर्तत, इति ग्रन्थान्तवाचित्वमुत्तरपदस्य, अन्त इत्यव्ययीभावः ॥ न, आशिषि, गोश्च वत्सश्च हलश्च, ततो नञ् समासस्तस्मिन् । स्वस्ति गुरवे सहशिष्यायात्र सहस्य न स आदेशः । सपुत्रः, अत्राशिषो न गम्यता । सगवे सहगवे इत्यादौ सहस्य सोऽन्यार्थे इति वा सादेशः ॥ समानस्य, धर्मादिषु । समानो धर्मोऽस्येति सधर्मा, 'द्विपदाद्धर्मादन्' । सत्रानं नामास्य सनाम ॥ सब्रह्मचारी । समानो ब्रह्मचारी, समाने ब्रह्मणि आगमे गुरुकुले च व्रतं चरतीति सब्रह्मचारी, निपातनादेव व्रतशब्दस्यापि लोपः ॥ दृक् च दृशश्च दृक्षश्च तस्मिन् । समान इव दृश्यते सदृक् सदृशः सदृक्षः । दृशदृक्षसाहचर्यात् टक्सक्प्रत्ययसहचरितकिबन्तस्यैव दृशो ग्रहणम् ॥ अन्यश्च त्यदादिश्च तस्य, आः । अन्य इव दृश्यते अन्यादृगन्या-

इदम्किमो यथासङ्ख्यमीत्कीरूपौ स्याताम् । ईदृक्, ईदृशः, ईदृक्षः । कीदृक्, कीदृशः, कीदृक्षः ॥ **अनञः क्त्वो यप् ॥ १५४ ॥** नञोऽन्यस्मादव्ययात्पूर्वपदात्परं यदुत्तरपदं तदवयवस्य क्त्वो यप् स्यात् । प्रकृत्य । अनञ इति किम् ? अकृत्वा, परमकृत्वा । उत्तरपदस्येत्येव ? अलङ्कृत्वा ॥ **पृषोदरादयः ॥१५५॥** एते साधवः स्युः । पृषोदरः, बलाहकः ॥ **वाऽवाप्योस्तनिक्रीधाग्नहोर्वपी ॥ १५६ ॥** अवस्योपसर्गस्य तनिक्रियोरपेश्च धाग्रहोर्यथासङ्ख्यं व–पी वा स्याताम् । वतंसः, अवतंसः । वक्रयः, अवक्रयः । पिहितम्, अपिहितम् । पिनद्धम्, अपिनद्धम् ॥

इति कलिकालसर्वज्ञाचार्यश्रीहेमचन्द्रविरचितायां श्रीसिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनलघुवृत्तौ तृतीयस्याध्यायस्य द्वितीयः पादः समाप्तः ॥

दृशोऽन्यादृक्षः । एवमग्रे ॥ **इदश्च किश्च, ईच कीच** । अयमिव दृश्यते, ईदृगीदृशः ईदृक्षः । क इव दृश्यते कीदृक्कीदृशः कीदृक्षः । **न नञ्, अनञ् तस्मात् क्त्वः, यप्** । प्रकर्षेण कृत्वा प्रकृत्य । न कृत्वाऽकृत्वा, नञ् समासः । परमञ्च तत्कृत्वा च परमकृत्वा, अत्राव्ययपूर्वपदत्वं नास्ति । अनञः इति नञ्सदृशमव्ययं गृह्यते इति नञोऽनव्ययाच्च क्त्वो यबन भवति । अलङ्कृत्वेत्यत्र तु न समासः, अत एव पूर्वोत्तरपदत्वाभावान्न यबादेशः ॥ **पृषोदरादयः** । पृषोदर इत्येवम्प्रकाराश्शब्दाः विहितलोपागमवर्णविकाराः यथायथं शिष्टपुरुषैः प्रयुज्यमानाः साधवो भवन्ति, पृषदुदरमुदरे वास्येति पृषोदरः अत्र तकारलोपो निपात्यते । वारिणो वाहकः बलाहकः, अत्र पूर्वपदस्य बः, उत्तरपदादेश्च ल आदेशः बलाहकः ॥ **वा, अवश्चापिश्च तयोः, तनिश्च क्रीश्च, धाक् च नहच, तनिक्रीच धागनह् च तयोः, वश्च पिश्च वपी** । वतंसः, अवतंसः, वक्रयः अवक्रयः, एषु अवस्य विकल्पेन वाऽऽदेशः । पिहितादौ तु अपेः प्यादेशः ॥

इति तृतीयाध्याये द्वितीयपादस्यावचूरिपरिष्कारः समाप्तः ॥

